

# शास्त्रसंदेशमाला

## आचारशास्त्रनिकरः




११

# શાસ્ત્રસંદેશમાલા - ૧૧

આચારશાસ્ત્રનિકરઃ

ભાગ-૧૧


॥ સંકલન ॥

પ.પૂ.આચાર્ય ભ.શ્રીમદ્

વિજય રામચન્દ્રસૂરીશ્વરજીના સામ્રાજ્યવર્તી

પૂ.પંન્યાસશ્રી બોધિરત્નવિજયજી મ.સા.ના

શિષ્યરત્ન

*પૂ.મુ.શ્રી વિનયરક્ષિતવિજયજી મ.સા.*



*॥ પ્રકાશક ॥*

શાસ્ત્રસંદેશમાલા

૩, મણિભદ્ર એપાર્ટમેન્ટ, સુભાષચોક,

આરાધના ભવન માર્ગ - ગોપીપુરા, સુરત-૧

◉ શાસ્ત્રસંદેશમાલા - ૧૧
◉ આચારશાસ્ત્રનિકર:
◉ પ્રથમ આવૃત્તિ
◉ આસો પૂનમ વિ.સ.૨૦૬૧
◉ કિંમત રૂ.૪૫/- (પડતર કિંમત)

**॥ પ્રમાર્જના - શુદ્ધિ ॥**

**પૂ.મુ.શ્રી હિતરક્ષિતવિજયજી મ.સા.**

**પૂ.મુ.શ્રી શ્રુતતિલકવિજયજી મ.સા.**

**પૂ.સા.શ્રી ભદ્રજ્ઞાશ્રીજી મ.**

**પંડિતવર્ય શ્રી રતીભાઇ ચીમનલાલ દોશી**

◉ **ટાઇપ સેટીંગ:** પાયલ પ્રિન્ટર્સ - રાધનપુર
શ્રીજી ગ્રાફીક્સ, પાલડી, અમદાવાદ.

◉ **મુદ્રક :** શિવકૃપા ઓફસેટ પ્રીન્ટર્સ, દૂધેશ્વર, અમદાવાદ-૪

---

**વિશેષ નોંધ : શાસ્ત્રસંદેશમાલાના ૧ થી ૨૦ ભાગનું સંપૂર્ણ પ્રકાશન જ્ઞાનદ્રવ્યમાંથી કરવામાં આવેલ છે. તેની નોંધ લેવા વિનંતી.**

**આભાર...!**

**અનુમોદનીય...!**

**અનુકરણીય...!**

શાસ્ત્રસંદેશમાલાના
અગિયારમા ભાગના પ્રકાશનનો સંપૂર્ણ લાભ

# શ્રી સહસ્ત્રફણા ચિંતામણી પાર્શ્વનાથની પેઢી

આશિષ સોસાયટી, રાજમહેલ રોડ,
પાટણ

**તરફથી શ્રી સંઘના જ્ઞાનદ્રવ્યની નિધિમાંથી લેવામાં આવેલ છે. તેની અમો હાર્દિક અનુમોદના કરીએ છીએ...! શ્રી સંઘ તથા ટ્રસ્ટીગણના અમો આભારી છીએ ..!**

**- શાસ્ત્રસંદેશમાલા**

**શાસ્ત્રસંદેશમાલાનાં ૧ થી ૨૦ ભાગમાં લેવાયેલ ૪૦૦ થી વધારે ગ્રંથોના મૂળ પુસ્તકો-પ્રતો મેળવવા માટે અમોએ નીચે લખેલ સંસ્થાઓ હસ્તકના જ્ઞાનભંડારનો વિશેષ ઉપયોગ કરેલ છે. આ સંસ્થાઓ અને તેના ટ્રસ્ટીઓ તથા કાર્યકરોના અમો આભારી છીએ.**

૧. શ્રી વિજયગચ્છ જૈન ઉપાશ્રય - રાધનપુર
૨. શ્રી નગીનભાઈ જૈન પૌષધશાળા - પાટણ
૩. વિજય રામચન્દ્રસૂરીશ્વરજી આરાધના ભવન - સુરત
૪. શ્રી જૈનાનન્દ પુસ્તકાલય - સુરત
૫. શ્રી મોહનલાલજી જૈન ઉપાશ્રય - સુરત
૬. શ્રી દાનસૂરિ જ્ઞાનમંદિર - અમદાવાદ
૭. જૈન આરાધના ભવન ટ્રસ્ટ - અમદાવાદ
૮. શ્રી કૈલાસસાગરસૂરિ જ્ઞાનમંદિર - કોબા
૯. શ્રી નેમિનંદન શતાબ્દિ ટ્રસ્ટ - અમદાવાદ

- શાસ્ત્રસંદેશમાલા

# શરણ કોનું ? ધર્મનું જ ... !

પરમ ઉપકારી એવા ધર્મશાસ્ત્રકારોએ, ધર્મની ઉપાદેયતાને જણાવવાને માટે અને ભવ્ય જીવોને ધર્મ પ્રતિ આકર્ષવાને માટે, ધર્મનો મહિમા પણ ખૂબ ખૂબ ગાયો છે. ધર્મમાં જે તાકાત છે, તે તાકાત બીજા કોઈમાં પણ નથી, એનું જગતના જીવોને ધર્મશાસ્ત્રકાર મહાપુરૂષોએ ભાન કરાવ્યું છે. જે આત્મા ધર્મના શરણને ગ્રહણ કરે છે, તે આત્માએ કલ્યાણને વિષે નિશ્ચિન્ત થઈ જવા જેવું છે, એમ ધર્મશાસ્ત્રકાર મહાપુરૂષો ફરમાવે છે. આત્મા ધર્મનું શરણ પામ્યો એટલે સમજી લો કે-એ કલ્યાણના આગારમાં પેઠો. જેમ જેમ આત્મા ધર્મને સમર્પિત થતો જાય છે, તેમ તેમ આત્મા દુઃખથી મૂકાતો જાય છે અને સુખને પામતો જાય છે. જ્ઞાનિઓ ફરમાવે છે કે-જ્યાં ધર્મ નહિ, ત્યાં સુખ નહિ; અને, જ્યાં ધર્મ, ત્યાં દુઃખનું નામનિશાન નહિ. પૂર્વના અધર્મના યોગે દુઃખના સંયોગો આવે એ બને, તે છતાં પણ ધર્મના શરણને પામેલો આત્મા એ સંયોગોથી મુંઝાય નહિ : ઉલટું, દુઃખના સંયોગોને પણ ધર્મના શરણને પામેલો આત્મા, સુખના કારણ રૂપ બનાવી દે ! માટે, જગતમાં જો કોઈ શરણ લેવા લાયક વસ્તુ હોય, તો તે એક ધર્મ જ છે : પણ બીજી કોઈપણ વસ્તુ શરણ લેવા લાયક નથી.

**-પૂ.આ.દેવ.શ્રીમદ્ વિજય રામચન્દ્રસૂરીશ્વરજી મહારાજા**

# પ્રકાશકીય ........ !

પૂર્વના પૂર્વાચાર્ય - પુણ્યાત્માઓએ પદ્યમાં પ્રરૂપેલા ૪૦૦ થી વધારે પ્રકરણોના ૭૦,૦૦૦ હજાર શ્લોક પ્રમાણ સાહિત્ય આજે એક નવા સ્વરૂપે આવી રહ્યું છે.

ઉપલબ્ધ ગ્રંથોનું ઉપકારક-ઉપયોગી બનનાર આ એક-અપૂર્વ-અનોખું-અનેરું-અદ્ભૂત પ્રકાશનમાં અમો નિમિત્ત બનેલ છીએ તેનો અમોને હર્ષ છે.

છેલ્લા ત્રણ વર્ષથી પૂ.પંન્યાસશ્રી બોધિરત્નવિજયજી મ.સા.ના શિષ્ય રત્ન પૂ.પંન્યાસશ્રી તપોરત્નવિજયજી મ.સા.ના સંપૂર્ણ માર્ગદર્શન મુજબ પૂ.મુ.શ્રી વિનયંરક્ષિતવિજયજી મ.સાહેબે આ સંકલના તૈયાર કરી આપેલ છે.

શાસ્ત્રસંદેશમાલા દ્વારા પ્રકાશિત થયેલ આ ૨૦ પુસ્તકોમાં પૂ.આ.શ્રી હરિભદ્રસૂરીશ્વરજી મ.સા. તથા પૂ.ઉપા.શ્રી યશોવિજયજી મ.સા. દ્વારા રચાયેલ પદ્ય સાહિત્યના સાત પુસ્તકો છે બાકીના તેર પુસ્તકોમાં અલગ-અલગ કર્તાઓની કૃત્તિઓનો વિષયવાર સમાવેશ કરવામાં આવેલ છે.

શાસ્ત્રસંદેશમાલાના આ પ્રકાશનમાં શુદ્ધિનો વિશેષ ખ્યાલ રાખવામાં આવેલ છે. દરેક પુસ્તકમાં આગળ જણાવેલ પૂજ્યશ્રીઓએ તે પુસ્તકનું પ્રમાર્જન કરી આપેલ છે. તેમાં પૂ.પં.શ્રી બોધિરત્નવિજયજી મ.સા.ના શિષ્યરત્ન પૂ.મુ.શ્રી હિતરક્ષિતવિજયજી મ.સા., પૂ.આ.શ્રી યોગતિલકસૂરીશ્વરજી

મ.સા.ના શિષ્યરત્ન પૂ.મુ.શ્રી શ્રુતતિલકવિજયજી મ.સા. (સંસ્કૃત ગ્રન્થો) તથા પૂ.સા.શ્રી દક્ષાશ્રીજી મ.ના. શિષ્યા પૂ.સા.શ્રી ભદ્રજ્ઞાશ્રીજી મ. આદિએ વિશેષ કાળજી રાખી શુદ્ધિ કરી આપેલ છે.

જૈન પંડિતોમાં જેમનું આગવું સ્થાન-નામ છે એવા પંડિતવર્યશ્રી રતીભાઇ ચીમનલાલ દોશીએ શાસ્ત્રસંદેશમાલાના આ ૨૦ ભાગનું સમગ્ર મેટર ચેક કરી આપેલ છે. દરરોજ પાંચ-છ કલાક અધ્યયનનું કાર્ય ચાલુ રાખી, અથાગ મહેનત કરી સમયનો જે ભોગ તેઓશ્રીએ આપેલ છે તે પ્રશંસનીય છે.

શ્રી સુરત તપગચ્છ રત્નત્રયી આરાધક સંઘે તથા બીજા અલગ અલગ સંઘોએ પોતાના જ્ઞાનદ્રવ્યની નિધિમાંથી ઉદારતાપૂર્વક લાભ લઇ આ કાર્યને વેગવંતુ બનાવેલ છે તે માટે અમો તેઓશ્રીના આભારી છીએ.

ટાઇપ સેટીંગ માટે પાયલ પ્રિન્ટર્સ - રાધનપુરના માલિક શ્રી ઇકબાલભાઇ તથા શ્રીજી ગ્રાફીક્સ - અમદાવાદના શ્રી નિકુંજભાઇ પટેલે ઘણી જ ધીરજ અને ખંતથી શ્રી રીઝવાન શેખના સહકારથી આ કાર્યને પૂર્ણતાએ પહોંચાડ્યું છે.

પ્રીન્ટીંગ, ટાઇટલ પ્રીન્ટીંગ તથા બાઇન્ડીંગનું કામ શિવકૃપા ઓફસેટ પ્રીન્ટર્સ-અમદાવાદના ભાવિનભાઇએ વિશેષ કાળજીપૂર્વક કરી આપેલ છે.

- શાસ્ત્રસંદેશમાલા

# ॥ अनुक्रमणिका ॥


| | | | |
|---|---|---|---|
| १. | यात्रास्तवः | ३२ | १-३ |
| २. | धर्मसंग्रहः | १५९ | ४-१७ |
| ३. | पूजाविधिः | १९ | १७-१९ |
| ४. | उपदेशसारः | ५९ | १९-२५ |
| ५. | आचारोपदेशः | २६६ | २५-४८ |
| ६. | उपदेशकल्पवल्लिः | ४३६ | ४८-८४ |
| ७. | उपदेशसप्ततिः | १०८ | ८५-९४ |
| ८. | धर्मरत्नकरण्डकः | ३७६ | ९४-१२६ |
| ९. | यतिदिनकृत्यम् | ४२१ | १२६-१६१ |
| १०. | श्रावकधर्मकृत्यम् | २४५ | १६२-१८२ |
| ११. | त्रिषष्ठीयदेशनासंग्रहः | १७९६ | १८३-३३६ |
| १२. | परिशिष्ठ-१ | | १-८ |


संपूर्ण श्लोक संख्या - ३९१७

संपूर्ण पृष्ठ संख्या - ८ + ३३६ + ८

पू.आ. श्रीजिनेश्वरसूरिविरचितः

# ॥ यात्रास्तवः ॥

तीर्थयात्राप्रचलितसंघपादाब्जरेणुभिः ।
स्पृष्टैरपि पराप्येत, न स्पर्शो भवरक्षसा ॥ १ ॥

तीर्थेशवन्दनैः पापतसप्रशमचन्दनैः ।
प्राप्यते परमानन्दो, महानन्दोऽमरालयः ॥ २ ॥

शत्रुञ्जये नाभिसूनोरुज्जयन्ते च नेमिनः ।
ते धन्या ये प्रकुर्वन्ति, वन्दनार्थं मनोरथान् ॥ ३ ॥

कदा शत्रुञ्जये शैले, वन्दिष्ये प्रथमं जिनम् ।
येन दृष्टेन नश्यन्ति, पाप्मानः पूर्वजन्मनाम् ॥ ४ ॥

यथा सेफालिकापुष्पमालिका त्रुट्यति क्षणात् ।
चन्द्रोदये तथा यत्र, दृष्टे कर्म्मपरम्परा ॥ ५ ॥

तं नाभेर्नन्दनं देवं, मारुदेवं गुणास्पदम् ।
भरतेश्वरचक्रीशश्रीभद्बाहुबलिप्रभो ! (भुम्) ॥ ६ ॥

तथाऽष्टानवतिक्ष्मेशां (शान्), ब्राह्म्या ब्राह्म्या महाविदम् ।
सुन्दर्याः शीलसुन्दर्या, वप्रं वप्रं महाश्रियाम् ॥ ७ ॥

पञ्चचापशतीमानविग्रहं क्षिप्तविग्रहम् ।
प्राज्यं राज्यं परित्यज्य, कृतचारित्रसङ्ग्रहम् ॥ ८ ॥

शाक्रराङ्कं परिभ्राजं, स्वर्णश्रीपर्णरोचिषम् ।
आर्यानार्येषु देशेषु, सहस्रं शरदां क्षितौ ॥ ९ ॥

मौनेन विहृतं वर्षानाश्वासं कृतपारणम् ।
श्रेयांसस्य गृहे स्वादुरसैः पुण्ड्रद्रवैर्नवैः ॥ १० ॥

न्यग्रोधस्य तले क्लृप्ताष्टमं योगीन्द्रसत्तमम् ।
घातिकर्म्मक्षयाज्जातकेवलं निर्मलं स्तुवे ॥ ११ ॥

सिद्धमष्टापदे शैले, शैलेशीमाप्य योगिनाम् ।
सहस्रैर्दशभिः शक्रचक्रवर्तिस्तुतं श्रये ॥ १२ ॥

सम्मेते तीर्थकोटीरे, सुनाशीरेण संस्तुतान् ।
विंशतिं तीर्थपान् सिद्धान्, कदा वन्दे प्रमोदतः ? ॥ १३ ॥

वन्दे श्रीधातकीखण्डे, धातकीखण्डमण्डिते ।
पुष्करार्द्धे परार्द्धे च, जम्बूद्वीपे महर्द्धिके ॥ १४ ॥

भरतैरावतक्षेत्रपञ्चके श्रीप्रपञ्चके ।
सप्तत्यग्रं गुणैरग्र्यं, शतं तीर्थकृतां कदा ? ॥ १५ ॥

जम्बूद्वीपे महाद्वीपे, प्रदीपे तामसक्षितौ ।
पूर्वेषु श्रीविदेहेषु, गेहेषु प्राज्यसम्पदाम् ॥ १६ ॥

श्रीमत्यां पुष्कलावत्यां, विजये विजयोत्तभे ।
वर्त्तमानं चिदम्लानं, सीमन्धरजिनेश्वरम् ॥ १७ ॥

प्राकारत्रयमध्यस्थं, मध्यस्थं सर्वजन्तुषु ।
रत्नसिंहासनारूढं, वीज्यमानं च चामरैः ॥ १८ ॥

चतुःषष्ट्या सुराधीशैर्विष्णुना युगबाहुना ।
पूज्यमानं पञ्चचापशतीमानवपुर्लतम् ॥ १९ ॥

तथाऽपरविदेहेषु, तीर्थेन्द्रं श्रीयुगन्धरम् ।
श्रीमहाबाहुकृष्णेन, सेवितं वरपर्षदा ॥ २० ॥

ललाटपट्टमास्फाल्य, पृथ्वीपीठे मुहुर्मुहुः ।
स्तुत्वाऽऽनन्देन वन्दित्वा, कदा विज्ञपयाम्यहम् ॥ २१ ॥

नाथ ! भीतो भवाम्भोधेर्बोधिलाभं प्रयच्छ मे ।
देहि दीक्षां महाशिक्षां, स्पर्शं मे कुरु मस्तके ॥ २२ ॥

स्वहस्तेन प्रशस्तेन, सर्वलक्षणराजिना ।
त्वां प्राप्य निर्वृतो भूत्वा, त्वदाज्ञां पालयाम्यहम् ॥ २३ ॥

कुर्वे मुक्तावलीं रत्नावलीं श्रीकनकावलीम् ।
सिंहनिःक्रीडिताभिख्यं, तपो लघु तथा महत् ॥ २४ ॥

सुदुष्करं गुणरत्नसंवत्सरमहातपः ।
आचाम्लवर्द्धमानं च तपः षष्ठाष्टमादिकम् ॥ २५ ॥

सेवेऽहं स्थावरं कल्पं, जिनकल्पं सुदुर्वहम् ।
अनल्पं प्रतिमाकल्पं, यथालन्दं सुदुःसहम् ॥ २६ ॥

कदा प्राप्य यथाख्यातं, चारित्रं मित्रमुत्तमम् ।
उत्पाद्य केवलज्ञानं, प्रबोध्य त्रिजगज्जनम् ॥ २७ ॥

अष्टभिः समयैः कृत्वा, समुद्घातं महागुणम् ।
प्राप्नोमि श्रीमहानन्दं, महानन्दं सुनिश्चलम् ? ॥ २८ ॥

न जरा जन्म नो यत्र, न मृत्युर्न च बन्धनम् ।
न देहो नैव च स्नेहो, नास्ति कर्म्मलवोऽपि च ॥ २९ ॥

केवलं केवलं यत्र, यत्र दर्शनमक्षयम् ।
अक्षयं च सुखं यत्र, वीर्यसम्यक्त्वमक्षयम् ॥ ३० ॥

यथा तत्रैव तिष्ठामि, तीर्त्वा भवमहोदधिम् ।
प्रसद्य कुरु मे नाथ !, दृक्प्रसादं तथा शुभम् ॥ ३१ ॥

इत्थं सूरिजिनेश्वरेण विनुताः सर्वे सुपर्वेश्वरस्तुत्या
नित्यसुखाः सुखानि सुदृशा ध्वस्तापदां सम्पदाम् ।
मह्यं रातु शिवास्पदं गतमदं प्रीणन्तु सङ्घं जिनास्
सर्वजगत्त्रयी रचयतात् कल्याणिकाद्युत्सवान् ॥ ३२ ॥

पू.उपाध्यायश्रीमानविजयगणिविरचितः

# ।। धर्मसंग्रहः ।।

प्रणम्य प्रणताशेषसुरासुरनरेश्वरम् ।
तत्त्वज्ञं तत्त्वदेष्टारं महावीरं जिनोत्तमम् ॥ १ ॥

श्रुताब्धेः सम्प्रदायाच्च, ज्ञात्वा स्वानुभवादपि ।
सिद्धान्तसारं ग्रथ्नामि धर्मसङ्ग्रहमुत्तमम् ॥ २ ॥

वचनादविरुद्धाद्यदनुष्ठानं यथोदितम् ।
मैत्र्यादिभावसम्मिश्रं, तद्धर्म इति कीर्त्यते ॥ ३ ॥

स द्विधा स्यादनुष्ठातृगृहिव्रतिविभागतः ।
सामान्यतो विशेषाच्च, गृहिधर्मोऽप्ययं द्विधा ॥ ४ ॥

तत्र सामान्यतो गृहिधर्मो न्यायार्जितं धनम् ।
वैवाह्यमन्यगोत्रीयैः, कुलशीलसमैः समम् ॥ ५ ॥

शिष्टाचारप्रशंसारिषड्वर्गत्यजनं तथा ।
इन्द्रियाणां जय उपप्लुतस्थानविवर्ज्जनम् ॥ ६ ॥

सुप्रातिवेश्मिके स्थानेऽनतिप्रकटगुप्तके ।
अनेकनिर्गमद्वारं गृहस्य विनिवेशनम् ॥ ७ ॥

पापभीरूकता ख्यातदेशाचारप्रपालनम् ।
सर्वेष्वनपवादित्वं नृपादिषु विशेषतः ॥ ८ ॥

आयोचितव्ययो वेषो, विभवाद्यनुसारतः ।
मातापित्रर्चनं सङ्गः सदाचारैः कृतज्ञता ॥ ९ ॥

अजीर्णे भोजनं काले भुक्तिः सात्म्यादलोल्यतः ।
वृत्तस्थज्ञानवृद्धार्हा गर्हितेष्वप्रवर्त्तनम् ॥ १० ॥

भर्त्तव्यभरणं दीर्घदृष्टिर्धर्मश्रुतिर्दया ।
अष्टबुद्धिगुणैर्योगः पक्षपातो गुणेषु च ॥ ११ ॥

सदाऽनभिनिवेशश्च, विशेषज्ञानमन्वहम् ।
यथार्हमतिथौ साधौ दीने च प्रतिपन्नता ॥ १२ ॥

अन्योऽन्यानुपघातेन त्रिवर्गस्यापि साधनम् ।
अदेशाकालाचरणं बलाबलविचारणम् ॥ १३ ॥

यथार्हलोकयात्रा च परोपकृतिपाटवम् ।
ह्रीः सौम्यता चेति जिनैः प्रज्ञप्तो हितकारिभिः ॥ १४ ॥

एतद्युतं सुगार्हस्थ्यं, यः करोति नरः सुधीः ।
लोकद्वयेऽप्यसौ भूरि, सुखमाप्नोत्यनिन्दितम् ॥ १५ ॥

तस्मिन् प्रायः प्ररोहन्ति, धर्मबीजानि गेहिनि ।
विधिनोप्तानि बीजानि विशुद्धायां यथा भुवि ॥ १६ ॥

स आदिधार्मिकश्चित्रस्तत्तत्तन्त्रानुसारतः ।
इह तु स्वागमापेक्षं, लक्षणं परिगृह्यते ॥ १७ ॥

स धर्मदेशनायोग्यो मध्यस्थत्वाज्जिनैर्मतः ।
योगदृष्ट्युदयात्सार्थं, यद्गुणस्थानमादिमम् ॥ १८ ॥

सा च संवेगकृत्कार्या, शुश्रूषोर्मुनिना परा ।
बालादिभावं संज्ञाय, यथाबोधं महात्मना ॥ १९ ॥

संविग्नस्तच्छ्रुतेरेवं, ज्ञाततत्त्वो नरोऽनघः ।
दृढं स्वशक्त्या जातेच्छः, संग्रेहऽस्य प्रवर्त्तते ॥ २० ॥

न्याय्यश्च सति सम्यक्त्वेऽणुव्रतप्रमुखग्रहः ।
जिनोक्ततत्त्वेषु रुचिः, शुद्धा सम्यक्त्वमुच्यते ॥ २१ ॥

निसर्गाद्वाऽधिगमतो, जायते तच्च पञ्चधा ।
मिथ्यात्वपरिहाण्यैव, पञ्चलक्षणलक्षितम् ॥ २२ ॥

योगवन्दननिमित्तदिगाकारविशुद्धयः ।
योग्योपचर्येति विधिरणुव्रतमुखग्रहे ॥ २३ ॥

स्थूलहिंसादिविरतिं, व्रतभङ्गेन केनचित् ।
अणुव्रतानि पञ्चाहुरहिंसादीनि शम्भवः ॥ २४ ॥

निरागोद्वीन्द्रियादीनां, संकल्पाच्चानपेक्षया ।
हिंसाया विरतिर्या सा, स्यादणुव्रतमादिमम् ॥ २५ ॥

द्वितीयं कन्यागोभूम्यलीकानि न्यासनिह्नवः ।
कूटसाक्ष्यं चेति पञ्चासत्येभ्यो विरतिर्मतम् ॥ २६ ॥

परस्वग्रहणाच्चौर्यव्यपदेशनिबन्धनात् ।
या निवृत्तिस्तृतीयं तत्प्रोचे सार्वैरणुव्रतम् ॥ २७ ॥

स्वकीयदारसन्तोषो, वर्ज्जनं वाऽन्ययोषिताम् ।
श्रमणोपासकानां तच्चतुर्थाणुव्रतं मतम् ॥ २८ ॥

परिग्रहस्य कृत्स्नस्यामितस्य परिवर्जनात् ।
इच्छापरिमाणकृतिं, जगदुः पञ्चमं व्रतम् ॥ २९ ॥

ऊर्ध्वाधस्तिर्यगाशासु, नियमो गमनस्य यः ।
आद्यं गुणव्रतं प्राहुस्तद्दिग्विरमणाभिधम् ॥ ३० ॥

भोगोपभोगयोः सङ्ख्याविधानं यत्स्वशक्तितः ।
भोगोपभोगमानाख्यं, तद्द्वितीयं गुणव्रतम् ॥ ३१ ॥

चतुर्विकृतयो निन्द्या उदुम्बरकपञ्चकम् ।
हिमं विषं च करका मृज्जाती रात्रिभोजनम् ॥ ३२ ॥

बहुबीजाऽज्ञातफले सन्धानानन्तकायिके ।
वृन्ताकं चलितरसं, तुच्छं पुष्पफलादि च ॥ ३३ ॥

आमगोरससंपृक्तद्विदलं चेति वर्ज्जयेत् ।
द्वाविंशतिमभक्ष्याणि, जैनधर्माधिवासितः ॥ ३४ ॥

शरीराद्यर्थविकलो, यो दण्डः क्रियते जनैः ।
सोऽनर्थदण्डस्तत्त्यागस्तार्त्तीयीकं गुणव्रतम् ॥ ३५ ॥

सोऽपध्यानं पापकर्मोपदेशो हिंसकार्पणम् ।
प्रमादाचरणं चेति, प्रोक्तोऽर्हद्भिश्चतुर्विधः ॥ ३६ ॥

सावद्यकर्ममुक्तस्य, दुर्ध्यानरहितस्य च ।
समभावो मुहूर्तं तद्व्रतं सामायिकाह्वयम् ॥ ३७ ॥

संक्षेपणं गृहीतस्य, परिमाणस्य दिग्व्रते ।
यत्स्वल्पकालं तद् ज्ञेयं, व्रतं देशावकाशिकम् ॥ ३८ ॥

आहार-तनुसत्कारा-ऽब्रह्म-सावद्यकर्मणाम् ।
त्यागः पर्वचतुष्टय्यां, तद्विदुः पौषधव्रतम् ॥ ३९ ॥

आहारवस्त्रपात्रादेः, प्रदानमतिथेर्मुदा ।
उदीरितं तदतिथिसंविभागव्रतं जिनैः ॥ ४० ॥

एषां निरतिचाराणां, पालनं शुद्धभावतः ।
पञ्च पञ्चातिचाराश्च, सम्यक्त्वे च प्रतिव्रते ॥ ४१ ॥

पञ्चातिचाराः सम्यक्त्वे, हेयाः शङ्कन-काङ्क्षणे ।
विचिकित्सा कुदृष्टीनां, प्रशंसा तैश्च संस्तवः ॥ ४२ ॥

वधो बन्धश्छविच्छेदोऽतिभारारोपणं कुधः ।
भक्तपानव्यवच्छेदोऽतिचाराः प्रथमव्रते ॥ ४३ ॥

सहसाभ्याख्यानं मिथ्योपदेशो गुह्यभाषणम् ।
कूटलेखश्च विश्वस्तमन्त्रभेदश्च सुनृते ॥ ४४ ॥

स्तेनाहृतग्रह-स्तेनप्रयोगौ मानविप्लवः ।
द्विड्राज्यगतिरस्तेये, प्रतिरूपेण च क्रिया ॥ ४५ ॥

परविवाहकरणं, गमोऽनात्तेत्वरात्तयोः ।
अनङ्गक्रीडनं तीव्ररागश्च ब्रह्मणि स्मृताः ॥ ४६ ॥

धनधान्यं क्षेत्रवास्तु, रूप्यस्वर्णं च पञ्चमे ।
गोमनुष्यादि कुप्यं चेत्येषां सङ्ख्याव्यतिक्रमाः ॥ ४७ ॥

बन्धनात् योजनात् दानात्, गर्भतो भावतस्तथा ।
कृतेच्छपरिमाणस्य, न्याय्याः पञ्चापि न ह्यमी ॥ ४८ ॥

मानस्य निश्चितस्योर्ध्वाधस्तिर्यक्षु व्यतिक्रमाः ।
क्षेत्रवृद्धिः स्मृतिभ्रंशः, स्मृता आद्यगुणव्रते ॥ ४९ ॥

सचित्तस्तत्प्रतिबद्धः, संमिश्रोऽभिषवस्तथा ।
दुष्पक्वाहार इत्येते, द्वैतीयीके गुणव्रते ॥ ५० ॥

अमी भोजनमाश्रित्य त्यक्तव्याः कर्मतः पुनः ।
खरकर्मत्रिघ्नपञ्चकर्मादानानि तन्मलाः ॥ ५१ ॥

वृत्तयोऽङ्गार-विपिना-ऽनो-भाटी-स्फोटकर्मभिः ।
वणिज्याका दन्त-लाक्षा-रस-केश-विषाश्रिताः ॥ ५२ ॥

यन्त्रपीडनकं निर्लाञ्छनं दानं दवस्य च ।
सरःशोषोऽसतीपोषश्चेति पञ्चदश त्यजेत् ॥ ५३ ॥

प्रोक्तास्तृतीये कन्दर्पः कौत्कुच्यं भोगभूरिता ।
संयुक्ताधिकरणत्वं, मौखर्यं च गुणव्रते ॥ ५४ ॥

योगदुष्प्रणिधानानि, स्मृतेरनवता(धा)रणम् ।
अनादरश्चेति जिनैः, प्रोक्ताः सामायिकव्रते ॥ ५५ ॥

प्रेषणाऽऽनयने शब्द-रूपयोरनुपातने ।
पुद्गलप्रेरणं चेति, मता देशावकाशिके ॥ ५६ ॥

संस्तारादानहानान्यप्रत्युपेक्ष्याप्रमृज्य च ।
अनादरोऽस्मृतिश्चेत्यतिचाराः पौषधव्रते ॥ ५७ ॥

सचिते स्थापनं तेन, स्थगनं मत्सरस्तथा ।
काललङ्घ्योऽन्यापदेश, इति पञ्चान्तिमे व्रते ॥ ५८ ॥

एतैर्विना व्रताचारो, गृहिधर्मो विशेषतः ।
सप्तक्षेत्र्यां तथा वित्तवापो दीनानुकम्पनम् ॥ ५९ ॥

नमस्कारेणावबोधः स्वद्रव्याद्युपयोजनम् ।
सामायिकादिकरणं विधिना चैत्यपूजनम् ॥ ६० ॥

सम्यग् स्नात्वोचिते काले संस्नाप्य च जिनान् क्रमात् ।
पुष्पाहारस्तुतिभिश्च पूजयेदिति तद्विधिः ॥ ६१ ॥

आशातनापरीहारं स्वशक्त्योचितचिन्तनम् ।
प्रत्याख्यानक्रियाऽभ्यर्णे गुरोर्विनयपूर्वकम् ॥ ६२ ॥

धर्मोपदेशश्रवणमशनादिनिमन्त्रणम् ।
गत्वा यथोचिते स्थाने धर्म्यमर्थार्जनं तथा ॥ ६३ ॥

मध्याह्नेऽर्चा च सत्पात्रदानपूर्वं तु भोजनम् ।
संवरणकृतिस्तद्विज्ञैः, सार्द्धं शास्त्रार्थचिन्तनम् ॥ ६४ ॥

सायं पुनर्जिनाभ्यर्चा प्रतिक्रमणकारिता ।
गुरोर्विश्रामणा चैव, स्वाध्यायकरणं तथा ॥ ६५ ॥

गत्वा गृहेऽथ कालेऽर्हद्गुरुस्मृतिपुरस्सरम् ।
अल्पनिद्रोपासनं च, प्रायेणाब्रह्मवर्ज्जनम् ॥ ६६ ॥

निद्राक्षयेऽङ्गनाऽङ्गानामशौचादेर्विचिन्तनम् ।
इत्याहोरात्रिकी चर्या, श्रावकाणामुदीरिता ॥ ६७ ॥

एवं पर्वसु सर्वेषु चतुर्मास्यां च हायने ।
जन्मन्यपि यथाशक्ति स्वस्वर्सत्कर्मणां कृतिः ॥ ६८ ॥

विधिना दर्शनाद्यानां प्रतिमानां प्रपालनम् ।
यासु स्थितो गृहस्थोऽपि विशुद्ध्यति विशेषतः ॥ ६९ ॥

प्ररूपितो जिनैरेवं गृहिधर्मो विशेषतः ।
सतामनुष्ठेयतया चारित्रगिरिपद्यिका ॥ ७० ॥

एनं धर्मं च निखिलं पालयन् भावशुद्धितः ।
योग्यः स्याद्यतिधर्मस्य मोचनात्पापकर्मणः ॥ ७१ ॥

आर्यदेशसमुत्पन्नः १, शुद्धजातिकुलान्वितः २ ।
क्षीणप्रायाशुभकर्मा ३ तत एव विशुद्धधीः ४ ॥ ७२ ॥

दुर्लभं मानुषं जन्म, निमित्तं मरणस्य च ।
सम्पदश्चपला दुःखहेतवो विषयास्तथा ॥ ७३ ॥

संयोगे विप्रयोगश्च, मरणं च प्रतिक्षणम् ।
दारुणश्च विपाकोऽस्य, सर्वचेष्टानिवर्त्तनात् ॥ ७४ ॥

इति विज्ञातसंसारनैर्गुण्यः स्वत एव हि ५ ।
तद्विरक्तस्तत एव ६, तथा मन्दकषायभाक् ७ ॥ ७५ ॥

अल्पहास्यादिविकृतिः ८ कृतज्ञो ९ विनयान्वितः १० ।
सम्मतश्च नृपादीनामद्रोही ११-१२ सुन्दराङ्गभृत् १३ ॥ ७६ ॥

श्राद्धः १४ स्थिरश्च १५ समुपसंपन्नश्चेति १६ सद्गुणः ।
भवेद्योग्यः प्रव्रज्याया, भव्यसत्त्वोऽत्र शासने ॥ ७७ ॥

यतिरेवंविधो भव्यो, गुरोर्योग्यस्य सन्निधौ ।
विधिप्रव्रजितः शुद्धव्यवहाराज्जिनैर्मतः ॥ ७८ ॥

योग्यो गुरुस्तु पूर्वोक्तगुणैः सङ्गत एव हि ।
विधिप्रपन्नप्रव्रज्य १ आसेवितगुरुक्रमः २ ॥ ७९ ॥

अखण्डितव्रतो नित्यं ३, विधिना पठितागमः ४ ।
तत एवातिविमलबोधयोगाच्च तत्त्ववित् ५ ॥ ८० ॥

उपशान्तश्च ६ वात्सल्ययुक्तः प्रवचनेऽखिले ७ ।
सर्वसत्त्वहितान्वेषी ८, आदेय ९ श्चानुवर्त्तकः १० ॥ ८१ ॥

गम्भीर ११ श्चाविषादी चोपसर्गादिपराभवे १२ ।
तथोपशमलब्ध्यादियुक्तः १३ सूत्रार्थभाषकः १४ ॥ ८२ ॥

स्वगुर्वनुज्ञातगुरुपद १५ श्चेति जिनैर्मतः ।
पादार्द्धगुणहीनौ च, यौग्यौ तौ मध्यमावरौ ॥ ८३ ॥

गुर्वनुज्ञोपधायोगो वृत्त्युपायसमर्थनम् ।
ग्लानौषधादिदृष्टान्तात्, त्यागो गुरुनिवेदनम् ॥ ८४ ॥

प्रश्नः साधुक्रियाख्यानं परीक्षा कण्ठतोऽर्पणम् ।
सामायिकादिसूत्रस्य, चैत्यनुत्यादि तद्विधिः ॥ ८५ ॥

सापेक्षो निरपेक्षश्च, यतिधर्मो द्विधा मतः ।
सापेक्षस्तत्र शिक्षायै, गुर्वन्तेवासिताऽन्वहम् ॥ ८६ ॥

विशुद्धमुपधानेन, प्राप्तं कालक्रमेण च ।
योग्याय गुरुणा सूत्रं, सम्यग्देयं महात्मना ॥ ८७ ॥

औघिकी दशधाख्या च, तथा पदविभागयुक् ।
सामाचारी त्रिधेत्युक्ता, तस्याः सम्यक् प्रपालनम् ॥ ८८ ॥

प्रतिलेखनिका १ पिण्डो २ पध्य ३ नायतनानि ४ च ।
प्रतिसेवा ५ ऽऽलोचने ७ च, शुद्धि ७ श्चेत्यौघिकी मता ॥ ८९ ॥

निशान्त्ययामे जागर्या, गुरोश्चावश्यकक्षणे ।
उत्सर्गो देवगुर्वादिनतिः स्वाध्यायनिष्ठता ॥ ९० ॥

काले च कालग्रहणं, ततश्चावश्यकक्रिया ।
द्राक् प्रत्युपेक्षणा सम्यग्, स्वाध्यायश्चाद्यपौरुषीम् ॥ ९१ ॥

प्रतिलिख्य ततः पात्राण्यर्थस्य श्रवणं गुरोः ।
एवं द्वितीयपौरुष्यां, पूर्णायां चैत्यवन्दनम् ॥ ९२ ॥

कृत्वोपयोगं निर्दोषभिक्षार्थमटनं तदा ।
आगत्यालोचनं चैत्यवन्दनादिविधिस्ततः ॥ ९३ ॥

गुर्वादिच्छन्दनापूर्वं, विधिना भोजनक्रिया ।
यतनापात्रशुद्धौ च, पुनश्चैत्यनमस्क्रिया ॥ ९४ ॥

गुरुवन्दनपूर्वं च प्रत्याख्यानस्य कारिता ।
आवश्यिक्या बहिर्गत्वा स्थण्डिले विड्विसर्जनम् ॥ ९५ ॥

आगत्य वसतौ गत्यागत्योरालोचनं स्फुटम् ।
शेषेऽथ पश्चिमे याम, उपधिप्रतिलेखना ॥ ९६ ॥

ततः स्वाध्यायकरणं, मुहूर्त्तं यावदन्तिमम् ।
तत्रोच्चारप्रश्रवणकालभूमिप्रमार्जनम् ॥ ९७ ॥

आवश्यककृतिः कालग्रहस्तारात्रयेक्षणे ।
ततः कालिकसूत्राद्यध्ययन्नादि तथाविधि ॥ ९८ ॥

साधुविश्रामणाद्यैश्च, निशाद्यप्रहरे गते ।
गुर्वादेशादिविधिना, संस्तारे शयनं तथा ॥ ९९ ॥

स्थविराणां द्वितीयेऽपि यामे सूत्रार्थभावनम् ।
अर्द्धरात्रिककालस्य, तृतीये ग्रहणं च तैः ॥ १०० ॥

ततोऽवबोधश्च गुरोस्तेषां च शयनं तथा ।
उद्वर्त्तनादियतना, सन्मनोरथचिन्तनम् ॥ १०१ ॥

प्राप्ते चतुर्थयामे तु विश्रामणकृतिर्गुरोः ।
स्थविराद्यैर्जागरित्वा, तत्र वैरात्रिकग्रहः ॥ १०२ ॥

ततः स्वाध्यायकरणं, यावत्प्राभातिकक्षणम् ।
इत्येवं दिनचर्यायाश्चरणं शुभयोगतः ॥ १०३ ॥

इच्छामिच्छातथाकारा, गताऽवश्यनिषेधयोः ।
आपृच्छा प्रतिपृच्छा च, छन्दना च निमन्त्रणा ॥ १०४ ॥

उपसंपच्चेति जिनैः, प्रज्ञप्ता दशधाभिधा ।
भेदः पदविभागस्तु स्यादुत्सर्गापवादयोः ॥ १०५ ॥

एवमाराधयन् सामाचारीं सर्वात्मना यतिः ।
भवेदुपस्थापनार्हः, सा च कार्या यथाविधि ॥ १०६ ॥

ज्ञातशस्त्रपरिज्ञादिस्त्यागादिगुणसंयुतः ।
प्रियधर्मावद्यभीरुरुपस्थाप्योऽयमुच्यते ॥ १०७ ॥

प्राप्तोऽनुक्तकायादिरज्ञातार्थोऽपरीक्षितः ।
अनुपस्थापनीयोऽयं, गुरुणा पापभीरुणा ॥ १०८ ॥

देवगुर्वोर्वन्दनं च; व्रतोच्चारः प्रदक्षिणाः ।
दिग्बन्धस्तप आख्यानं, मण्डलीवेशनं विधिः ॥ १०९ ॥

अहिंसा सत्यमस्तेयं, ब्रह्माऽऽकिञ्चन्यमेव च ।
महाव्रतानि षष्ठं च, व्रतं रात्रावभोजनम् ॥ ११० ॥

प्रमादयोगाद्यत्सर्वजीवासुव्यपरोपणम् ।
सर्वथा यावज्जीवं च प्रोचे तत् प्रथमं व्रतम् ॥ १११ ॥

सर्वथा सर्वतोऽलीकादप्रियाच्चाहितादपि ।
वचनाद्विनिवृत्तिर्या, तत्सत्यव्रतमुच्यते ॥ ११२ ॥

सकलस्याप्यदत्तस्य ग्रहणाद्विनिवर्त्तनम् ।
सर्वथा जीवनं यावत्तदस्तेयव्रतं मतम् ॥ ११३ ॥

दिव्यमानुषतैरश्चमैथुनेभ्यो निवर्त्तनम् ।
त्रिविधं त्रिविधेनैव तद् ब्रह्मव्रतमीरितम् ॥ ११४ ॥

परिग्रहस्य सर्वस्य, सर्वथा परिवर्जनम् ।
आकिञ्चन्यव्रतं प्रोक्तमर्हद्भिर्हितकाङ्क्षिभिः ॥ ११५ ॥

एतानि भावनाभिश्च, प्रत्येकं पञ्चभिः स्फुटम् ।
भवन्ति भावितान्येव, यथोक्तगुणभाञ्जि तु ॥ ११६ ॥

चतुर्विधस्याहारस्य, सर्वथा परिवर्जनम् ।
षष्ठं व्रतमिहैतानि, जिनैर्मूलगुणाः स्मृताः ॥ ११७ ॥

शेषाः पिण्डविशुद्ध्याद्याः स्युरुत्तरगुणाः स्फुटम् ।
एषां चानतिचाराणां, पालनं ते त्वमी मताः ॥ ११८ ॥

आद्यव्रते ह्यतीचारा, एकाक्षादिवपुष्मताम् ।
सङ्घट्टपरितापोपद्रावणाद्याः स्मृता जिनैः ॥ ११९ ॥

असौ द्विधाणु-स्थूलाभ्यां, तत्राद्यः प्रचलादितः ।
द्वितीयः क्रोध-लोभादेर्मिथ्याभाषा द्वितीयके ॥ १२० ॥

एवं तृतीयेऽदत्तस्य, तृणादेर्ग्रहणादणुः ।
क्रोधादिभिर्बादरोऽन्यसचित्ताद्यपहारतः ॥ १२१ ॥

ब्रह्मव्रतेऽतिचारस्तु, करकर्मादिको मतः ।
सम्यक्तदीयगुप्तीनां, तथा चाननुपालनम् ॥ १२२ ॥

काकादिरक्षणं बालममत्वं पञ्चमेऽप्यणुः ।
द्रव्यादिग्रहणं लोभात्, स्थूलश्चाधिकधारणम् ॥ १२३ ॥

दिनात्तदिनभुक्तादिचतुर्भङ्ग्यादिरन्तिमे ।
सर्वेष्वप्येषु विज्ञेया दोषा वातिक्रमादिभिः ॥ १२४ ॥

ज्ञानादिपञ्चाचाराणां पालनं च यथागमम् ।
गच्छवासकुसंसर्गत्यागोऽर्थपदचिन्तनम् ॥ १२५ ॥

विहारोऽप्रतिबद्धश्च, सम्यग्गीतार्थनिश्रया ।
महामुनिचरित्राणां, श्रवणं कथनं मिथः ॥ १२६ ॥

अतिचारालोचनेन, प्रायश्चित्तविधेयता ।
उपसर्गतितिक्षा च, परीषहजयस्तथा ॥ १२७ ॥

अनुयोगगणानुज्ञाऽप्यनवद्यक्रमागता ।
तमेव सूत्रविदितं, वर्णयामो यथास्थितम् ॥ १२८ ॥

व्रतग्रहेऽष्टौ सूत्रार्थविहारे द्वादश क्रमात् ।
पञ्चचत्वारिंशवर्षे, योग्यतैवं गणिस्थितेः ॥ १२९ ॥

ईदृक्पर्यायनिष्पन्नः, षट्त्रिंशद्गुणसंगतः ।
दृढव्रतो यतियुतो, मुक्त्यर्थी सङ्घसम्मतः ॥ १३० ॥

श्रुतानुयोगाऽनुज्ञायाः, पात्रं न तु गुणोज्झितः ।
अपात्रे तत्प्रदाने यन्महत्याशातना स्मृता ॥ १३१ ॥

तस्मादुक्तगुणाढ्याय, देयं सूरिपदं ध्रुवम् ।
विधिपूर्वं विधिश्चात्र, सामाचार्यां प्रपञ्चितः ॥ १३२ ॥

ततोऽसौ नित्यमुद्युक्तः, कार्ये प्रवचनस्य च ।
व्याख्यानं कुरुतेऽर्हेभ्यः, सिद्धान्तविधिना खलु ॥ १३३ ॥

एतस्यैव गणानुज्ञाऽन्यस्य वा गुणयोगिनः ।
गुरुणा विधिना कार्या, गुणयोगी त्वयं मतः ॥ १३४ ॥

सूत्रार्थज्ञः प्रियदृढधर्मा सर्वानुवर्त्तकः ।
सज्जातिकुलसंपन्नो, गम्भीरो लब्धिमांस्तथा ॥ १३५ ॥

संग्रहोपग्रहपरः, श्रुतरागी कृतक्रियः ।
एवंविधो गणस्वामी, भणितो जिनसत्तमैः ॥ १३६ ॥

गीतार्था कुलजाऽभ्यस्तसत्क्रिया पारिणामिकी ।
गम्भीरोभयतोवृद्धा, स्मृताऽऽर्याऽपि प्रवर्तिनी ॥ १३७ ॥

एतद्गुणवियोगे तु, गणीन्द्रं वा प्रवर्तिनीम् ।
स्थापयेत्स महापाप, इत्युक्तं पूर्वसूरिभिः ॥ १३८ ॥

दीक्षावयःपरिणतो, धृतिमाननुवर्त्तकः ।
स्वलब्धियोग्यः पीठादिज्ञाता पिण्डैषणादिवित् ॥ १३९ ॥

एषोऽपि गुरुणा सार्द्धं, विहरेद्वा पृथग्गुरोः ।
तद्दत्तार्हपरीवारोऽन्यथा वा पूर्णकल्पभाक् ॥ १४० ॥

उपाध्यायपदादीनामप्यनुज्ञैवमेव च ।
गीतार्थत्वगुणस्तुल्यस्तेषु व्यक्त्या त्वमी क्रमात् ॥ १४१ ॥

सम्यक्त्वज्ञानचारित्रयुगाचार्यपदोचितः ।
सूत्रार्थविदुपाध्यायो, भवेत्सूत्रस्य वाचकः ॥ १४२ ॥

तपःसंयमयोगेषु, योग्यं यो हि प्रवर्त्तयेत् ।
निवर्त्तयेदयोग्यं च, गणचिन्ती प्रवर्त्तकः ॥ १४३ ॥

तेन व्यापारितेष्वर्थेष्वनगारांश्च सीदतः ।
स्थिरीकरोति सच्छक्तिः, स्थविरो भवतीह सः ॥ १४४ ॥

प्रभावनोद्भावनयोः, क्षेत्रोपध्येषणासु च ।
अविषादी गणावच्छेदकः सूत्रार्थविन्मतः ॥ १४५ ॥

विधिना गुर्वनुज्ञातगण्यादिपदपालनम् ।
तावद्यावच्च चरमकालो न स्यादुपस्थितः ॥ १४६ ॥

उपस्थितेऽथ तस्मिंस्तु, सम्यग्संलेखनाकृतिः ।
सा चोत्कृष्टादिभेदेन, त्रिविधा गदिता जिनैः ॥ १४७ ॥

ऐहिकामुष्मिकाशंसाऽऽशंसा जीवितकालयोः ।
निदानं चेत्यतीचारा मताः संलेखनाव्रते ॥ १४८ ॥

मरणस्याभ्युद्यतस्य, प्रपत्तिर्विधिना ततः ।
तदप्युक्तं पादपोपगमनादित्रिभेदकम् ॥ १४९ ॥

आद्यसंह[न]निनामेव, तत्रादिममचेष्टने ।
इङ्गिनीमरणं चेष्टावतामाहारवर्जनात् ॥ १५० ॥

आहारस्य परित्यागात्, सर्वस्य त्रिविधस्य वा ।
भवेद्भक्तपरिज्ञाख्यं, द्विधा सपरिकर्मणाम् ॥ १५१ ॥

कान्दर्प्पी कैल्बिषिकी चाभियोगिक्यासुरी तथा ।
सांमोही चेति पञ्चानां, भावनानां विवर्जनम् ॥ १५२ ॥

सापेक्षयतिधर्मोऽयं, परार्थकरणादिना ।
तीर्थप्रवृत्तिहेतुत्वाद्वर्णितः शिवसौख्यदः ॥ १५३ ॥

प्रमादपरिहाराय, महासामर्थ्यसंभवे ।
कृतार्थानां निरपेक्षयतिधर्मोऽतिसुन्दरः ॥ १५४ ॥

स चाल्पोपधिता, सूत्रगुरुतोग्रविहारिता ।
अपवादपरित्यागः, शरीरेऽप्रतिकर्मता ॥ १५५ ॥

देशनायामप्रबन्धः, सर्वदा चाप्रमत्तता ।
ऊर्ध्वस्थानं च बाहुल्याच्छुभध्यानैकतानता ॥ १५६ ॥

उद्धृताद्येषणाभिक्षा, क्षेत्रे षड्भागकल्पिते ।
गमनं नियते काले, तुर्ये यामे त्ववस्थितिः ॥ १५७ ॥

संक्षेपान्निरपेक्षाणां, यतीनां धर्म ईरितः ।
अत्युग्रकर्मदहनो, गहनोग्रविहारतः ॥ १५८ ॥

इत्येष यतिधर्मोऽत्र, द्विविधोऽपि निरूपितः ।
ततः कात्स्नर्येन धर्मस्य, सिद्धिमाप निरूपणम् ॥ १५९ ॥

पूर्वधरश्रीमदुमास्वातिविरचिता

## ॥ पूजाविधिः ॥

स्नानं पुर्वामुखीभूय, प्रतीच्यां दन्तधावनम् ।
उदीच्यां श्वेतवस्त्राणि, पूजा पूर्वोत्तरामुखी ॥ १ ॥

गृहे प्रविशतां वामभागे शल्यविवर्जिते ।
देवतावसरं कुर्यात्, सार्धहस्तोर्ध्वभूमिके ॥ २ ॥

नीचैर्भूमिस्थितं कुर्याद्, देवतावसरं यदि ।
नीचैर्नीचैस्ततो वंशः, सन्तत्यापि सदा भवेत् ॥ ३ ॥

यथाऽर्चकः स्यात्पूर्वस्या, उत्तरस्याश्च संमुखः ।
दक्षिणस्या दिशो वर्जं, विदिग्वर्जनमेव च ॥ ४ ॥

पश्चिमाभिमुखः कुर्यात्, पूजां जैनेन्द्रमूर्तये ।
चतुर्थसन्ततिच्छेदो, दक्षिणस्यामसन्ततिः ॥ ५ ॥

आग्नेय्यां तु यदा पूजां, धनहानिर्दिने दिने ।
वायव्यां सन्ततिर्नैव, नैऋत्यां च कुलक्षयः ॥ ६ ॥

ऐशान्यां कुर्वतां पूजां, संस्थितिर्नैव जायते ।
अंह्रिजानुकरांसेषु, मूर्ध्नि पूजा यथाक्रमम् ॥ ७ ॥

श्रीचन्दनं विना नैव, पूजां कुर्यात्कदाचन ।
भाले कण्ठे हृद्याम्भोजो-दरे तिलककारणम् ॥ ८ ॥

नवभिस्तिलकैः पूजा, करणीया निरन्तरम् ।
प्रभाते प्रथमं वास-पूजा कार्या विचक्षणैः ॥ ९ ॥

मध्याह्ने कुसुमैः पूजा, सन्ध्यायां धूपदीपयुक् ।
वामाङ्गे धूपदाहः स्या-दग्रपूजा तु संमुखी ॥ १० ॥

अर्हतो दक्षिणे भागे, दीपस्य विनिवेशनम् ।
ध्यानं च दक्षिणे भागे, चैत्यानां वन्दनं तथा ॥ ११ ॥

हस्तात्प्रस्खलितं क्षितौ निपतितं लग्नं क्वचित्पादयो-
र्यन्मूर्ध्वोर्ध्वगतं धृतं कुवसनैर्नाभेरधो यद्धृतम् ।
स्पृष्टं दुष्टजनैर्घनैरभिहतं यद् दूषितं कीटकै-
स्त्याज्यं तत्कुसुमं दलं फलमथो भक्तैर्जिनप्रीतये ॥ १२ ॥

नैकपुष्पं द्विधा कुर्या-न्न छिन्द्यात् कलिकामपि ।
चम्पकोत्पलभेदेन, भवेद्दोषो विशेषतः ॥ १३ ॥

गन्धधूपाक्षतैः स्रग्भिः प्रदीपैर्बलिवारिभिः ।
प्रधानैश्च फलैः पूजा, विधेया श्रीजिनेशितुः ॥ १४ ॥

शान्तौ श्वेतं जये श्यामं, भद्रे रक्तं भये हरित् ।
पीतं ध्यानादिके लाभे, पञ्चवर्णं तु सिद्धये ॥ १५ ॥

(शान्तौ श्वेतं तथा पीतं, लाभे श्यामं पराजये ।
मङ्गलार्थं तथा रक्तं, पञ्चवर्णं तु सिद्धये ॥)

खण्डिते सन्धिते छिन्ने, रक्ते रौद्रे च वाससि ।
दानपूजातपोहोम-सन्ध्यादि निष्फलं भवेत् ॥ १६ ॥

पद्मासनसमासीनो, नासाग्रन्यस्तलोचनः ।
मौनी वस्त्रावृतास्योऽयं, पूजां कुर्याज्जिनेशितुः ॥ १७ ॥

स्नात्रं विलेपनविभूषणपुष्पवासधूपप्रदीपफलतण्डुलपत्रपूगैः ।
नैवेद्यवारिवसनैश्चमरातपत्रवादित्रगीतनटनस्तुतिकोशवृद्धया ॥ १८ ॥

इत्येकविंशतिविधा जिनराजपूजा,ख्याता सुरासुरगणेन कृता सदैव ।
खण्डीकृताकुमतिभिः कलिकालयोगाद्यद्यत्प्रियं तदिह भाववशेन योज्यम्

## ॥ उपदेशसार ॥

यत्कल्याणकरोऽवतारसमयः स्वप्नानि जन्मोत्सवो,
यद्रत्नादिकवृष्टिरिन्द्रविहिता यद्रूपराज्यश्रियः ।
यद्दानं व्रतसम्पदुज्ज्वलतरा यत्केवलश्रीर्नवा,
यद्रम्यातिशया जिने तदखिलं धर्मस्य विस्फूर्जितम् ॥ १ ॥

आयुर्वृद्धिर्यशोवृद्धि-र्वृद्धिः प्रज्ञासुखश्रियाम् ।
धर्मसन्तानवृद्धिश्च धर्मात्सप्तापि वृद्धयः ॥ २ ॥

धम्मो मंगलमुक्किट्ठं, अहिंसा संजमो तवो ।
देवा वि तं नमंसंति, जस्स धम्मे सया मणो ॥ ३ ॥

बुद्धेः फलं तत्त्वविचारणं च, देहस्य सारं व्रतधारणं च ।
अर्थस्य सारं किल पात्रदानं, वाचः फलं प्रीतिकरं नराणाम् ॥ ४ ॥

दिने दिने मञ्जुलमङ्गलावलिः, सुसम्पदः सौख्यपरम्परा च ।
इष्टार्थसिद्धिर्बहुला च बुद्धिः, सर्वत्र सिद्धिः सृजतां सुधर्मम् ॥ ५ ॥

पुंसां शिरोमणीयन्ते, धर्मार्जनपरा नराः ।
आश्रीयन्ते च संपद्भिर्लताभिरिव पादपाः ॥ ६ ॥

शिष्टे संगः श्रुतौ रङ्गः सद्ध्याने धीर्धृतौ मतिः ।
दाने शक्तिर्गुरौ भक्तिः षडेते सुकृताकराः ॥ ७ ॥

दानं वित्तादृतं वाचः, कीर्तिधर्मौ तथायुषः ।
परोपकरणं काया-दसारात्सारमुद्धरेत् ॥ ८ ॥

अतिनिर्मला विशला, सकलजनानन्दकारिणी प्रवरा ।
कीर्तिर्विद्या लक्ष्मीर्धर्मेण विजृम्भते लोके ॥ ९ ॥

फलं च पुष्पं च तरुस्तनोति, वित्तं च तेजश्च नृपप्रसादः ।
ऋद्धि प्रसिद्धि तनुते सुपुत्रो, भुक्ति च मुक्ति च जिनेन्द्रधर्मः॥ १० ॥

राजप्रसादो दिव्यास्त्रं, बाणिज्यं हस्तिरत्नयोः ।
जैनधर्मस्तथैकोऽपि महालाभाय जायते ॥ ११ ॥

धर्मो महामङ्गलमङ्गभाजां, धर्मः पिता पूरितसर्वकामः ।
धर्मो जनन्युद्दलिताखिलार्तिः धर्मः सुहृद्वर्धितनित्यहर्षः ॥ १२ ॥

आरोग्यं सौभाग्यं धनाढ्यता नायकत्वमानन्दः ।
कृतपुण्यस्य स्यादिह सदा जयो वाञ्छितावाप्तिः ॥ १३ ॥

सुकुलजन्म विभूतिरनेकधा, प्रियसमागमसौख्यपरम्परा ।
नृपकुले प्रभुता विमलं यशो, भवति धर्मतरोः फलमीदृशम् ॥ १४ ॥

आधारो यस्त्रिलोक्यां जलधिजलधरार्केन्दवो यन्नियोज्या,
भुज्यन्ते यत्प्रसादादसुरसुरनराधीश्वरैः सम्पदस्ताः ।
आदेश्या यस्य चिन्तामणिसुरसुरभीकामकुम्भादिभावाः,
श्रीमज्जैनेन्द्रधर्मः किसलयतु स वः शाश्वतीं सौख्यलक्ष्मीम् ॥ १५ ॥

देहे द्रव्ये कुटुम्बे च सर्वसंसारिणां रतिः ।
जिने जिनमते सङ्घे पुनर्मोक्षाभिलाषिणाम् ॥ १६ ॥

वसुधाभरणं पुरुषाः पुरुषाभरणं प्रधानतरलक्ष्मीः ।
लक्ष्म्याभरणं दानं, दानाभरणं सुपात्रं च ॥ १७ ॥

नाणं नियमग्गहणं नवकारो नयरुइ अनिट्ठा य ।
पंचनञ्विभूसियाणं न दुल्हा सुग्गइ लोए ॥ १८ ॥

पूआ पच्चक्खाणं पडिक्कमणं पोसहो परुवयारो ।
पंच पयारा जस्स उ न पयारो तस्स संसारे ॥ १९ ॥

वरपूजया जिनानां धर्मश्रवणेन सुगुरुसेवनया ।
शासनमासनयोगैः सृजन्ति सफलं निजं जन्म ॥ २० ॥

दया दानेषु वैराग्यं विधिवज्जिनपूजनम् ।
विशुद्धा न्यायवृत्तिश्च पुण्यं पुण्यानुबन्ध्यदः ॥ २१ ॥

जिनबिम्बार्चनं सेवा गुरूणां प्राणिनां दया ।
शमो दानं तपः शीलमेष धर्मो जिनोदितः ॥ २२ ॥

देवपूजा गुरूपास्तिः, स्वाध्यायः संयमस्तपः ।
दानं चेति गृहस्थानां, षट् कर्माणि दिने दिने ॥ २३ ॥

देवं श्रेणिकवत् प्रपूजय गुरुं वन्दस्व गोविन्दवत्,
दानं शीलतपःप्रसङ्गसुभगां चाभ्यस्य सद्भावनाम् ।
श्रेयांसश्च सुदर्शनश्च भगवानाद्यः स चक्री यथा,
धर्म्ये कर्मणि कामदेववदहो चेतः स्थिरं स्थापय ॥ २४ ॥

भक्तिर्जिनेषु दृढता गुरुभाषितेषु श्रद्धा च धर्मकरणेषु गुणेषु रागः ।
दानेषुतीव्ररुचिता विनयेषु वृत्तिः कस्यापि पुण्यपुरुषस्य भवन्त्यवश्यम्

जिनपूजनं विवेकः, सत्यं शौचं सुपात्रदानं च ।
महिमक्रीडागारः, श्रृङ्गारः श्रावकत्वस्य ॥ २६ ॥

जिनभवनं जिनबिम्बं, जिनपूजां जिनमतं च यः कुर्यात् ।
तस्य नरामरशिवसुखफलानि करपल्लवस्थानि ॥ २७ ॥

यद्भक्तिः सर्वज्ञे, यद्यत्नस्तत्प्रणीतसिद्धान्ते ।
यत्पूजनं यतीनां, फलमेतज्जीवितव्यस्य ॥ २८ ॥

पूआ जिणाण आणं वित्ती साहम्मिआणं वच्छल्लं ।
सीलं परोवयारो, विवेगतरुपल्लवा एए ॥ २९ ॥

देवपूजा दया दानं दाक्षिण्यं दक्षता दमः ।
यस्यैते षट् दकाराः स्युः स देवांशो नरः स्मृतः ॥ ३० ॥

अरिहंतो असमत्थो तारण लोयाण दीहसंसारे ।
मग्गद्देसणकुसलो तरंति जे मग्ग लग्गंति ॥ ३१ ॥

दानं सुपात्रे विशदं च शीलं तपो विचित्रं शुभभावना च ।
भवार्णवोत्तारणसत्तरण्डं धर्मं चतुर्धा मुनयो वदन्ति ॥ ३२ ॥

जिनभवन-बिम्ब-पुस्तंक-चतुर्विधश्रमणसङ्घरूपाणि ।
सप्त क्षेत्राणि सदा जयन्ति जिनशासनोक्तानि ॥ ३३ ॥

पुण्याट्टं पौषधागारं तत्रैत्य ग्राहको जनः ।
व्रतादिपण्यं क्रीणाति क्रमेणानन्तलाभदम् ॥ ३४ ॥

अङ्गुष्ठमानमपि यः प्रकरोति बिम्बं वीरावसानवृषभादिजिनेश्वराणाम् ।
स्वर्गे प्रधानविपुलर्द्धिसुखानि भुक्त्वा पश्चादनुत्तरगतिं समुपैति धीरः

लेखयन्ति नरा धन्या ये जैनागमपुस्तकान् ।
ते सर्ववाङ्मयं ज्ञात्वा सिद्धिं यान्ति न संशयः ॥ ३६ ॥

जिनभक्तिः कृता तेन, शासनस्योन्नतिस्तथा ।
साधर्मिकेषु वात्सल्यं, कृतं येन सुबुद्धिना ॥ ३७ ॥

जिनौकः पौषधौकश्च तत्सारं ज्ञानलेखनम् ।
साधौ साधर्मिके भक्तिं कुर्वन्नल्पभवो भवेत् ॥ ३७।१ ॥

पूजया पूर्यते सर्वं, पूज्यो भवति पूजया ।
ऋद्धिवृद्धिकरी पूजा, पूजा सर्वार्थसाधनी ॥ ३८ ॥

सयं पमज्जणे पुण्णं सहस्सं च विलेवणे ।
सयसाहस्सिया माला अणंतं गीयवाइए ॥ ३९ ॥

संसाराम्भोधिबेडा शिवपुरपदवी दुर्गदारिद्र्यभूभृद्,
भङ्गे दम्भोलिभूता सुरनरविभवप्राप्तिकल्पद्रुकल्पा ।

दुःखाग्नेरम्बुधारा सकलसुखकरी रूपसौभाग्यकर्त्री,
पूजा तीर्थेश्वराणां भवतु भवभृतां सर्वकल्याणकर्त्री ॥ ४० ॥

वस्त्रैर्वस्त्रविभूतयः शुचितरालङ्कारतोऽलङ् कृतिः,
पुष्पैः पूज्यपदं सुगन्धतनुता गन्धैर्जिने पूजिते ।
दीपैर्ज्ञानमनावृतं निरुपमा भोगर्द्धिरत्नादिभिः,
सन्त्येतानि किमद्भुतं शिवपदप्राप्तिस्ततो देहिनाम् ॥ ४१ ॥

स्वर्गस्तस्य गृहाङ्गणं सहचरी साम्राज्यलक्ष्मीः शुभा,
सौभाग्यादिगुणावलिर्विलसति स्वैरं वपुर्वेश्मनि ।
संसारः सुतरः शिवं करतलक्रोडे लुठत्यञ्जसा,
यः श्रद्धाभरभाजनं जिनपतेः पूजां विधत्ते जनः ॥ ४२ ॥

जिनपूजनं जनानां जनयत्येकमपि सम्पदो विपुलाः ।
जलमिव जलदविमुक्तं काले शस्यश्रियो ह्यखिलाः ॥ ४३ ॥

नौरेषा भववारिधौ शिवपदप्रासादनिःश्रेणिका,
मार्गः स्वर्गपुरस्य दुर्गतिपुरद्वारप्रवेशार्गला ।
कर्मग्रन्थिशिलोच्चयस्य दलने दम्भोलिधारासमा,
कल्याणैकनिकेतनं निगदिता पूजा जिनानां परा ॥ ४४ ॥

दर्शनाद्दुरितध्वंसी वन्दनाद्वाञ्छितप्रदः ।
पूजनात्पूरकः श्रीणां जिनः साक्षात् सुरद्रुमः ॥ ४५ ॥

पापं लुम्पति दुर्गतिं दलयति व्यापादयत्यापदं,
पुण्यं सञ्चिनुते श्रियं वितनुते पुष्णाति नीरोगताम् ।
सौभाग्यं विदधाति पल्लवयति प्रीतिं प्रसूते यशः,
स्वर्गं यच्छति निर्वृतिं च रचयत्यर्चार्हतां निर्मिता ॥ ४६ ॥

संवच्छरचाउम्मासी एसु अट्ठाहियासु अ तिहीसु ।
सव्वायरेण लग्गइ जिणवरपूआतवगुणेसु ॥ ४७ ॥

नेत्रानन्दकरी भवोदधितरी श्रेयस्तरोर्मञ्जरी,
श्रीमद्धर्ममहानरेन्द्रनगरी व्यापल्लताधूमरी ।
हर्षोत्कर्षशुभप्रभावलहरी भावद्विषां जित्वरी,
पूजा श्रीजिनपुङ्गवस्य विहिता श्रेयस्करी देहिनाम् ॥ ४८ ॥

ये देवं स्नपयन्ति शाम्यतितमां तेषां रजः कर्मणां,
ये नाथं परिपूजयन्ति जगतः पूज्या भवन्त्येव ते ।
माङ्गल्यानि जिनस्य ये विदधतस्तद्विघ्ननाशो भवेत्,
पादाब्जे प्रणमन्ति ये भगवतस्ते वन्दनीयाः सताम् ॥ ४९ ॥

आरम्भाणां निवृत्तिर्द्रविणसफलता सङ्घवात्सल्यमुच्चै-
र्नैर्मल्यं दर्शनस्य प्रणयिजनहितं जीर्णचैत्यादिकृत्यम् ।
तीर्थौन्नत्यं जिनेन्द्रोदितवचनकृतिस्तीर्थकृत्कर्मबन्धः,
सिद्धेरासन्नभावः सुरनरपदवी तीर्थयात्राफलानि ॥ ५० ॥

सदा शुभध्यानमसारलक्ष्म्याः, फलं चतुर्धा सुकृताप्तिरुच्चैः ।
तीर्थोन्नतिस्तीर्थकृतां पदाप्ति-र्गुणा हि यात्राप्रभवाः स्युरेते ॥ ५१ ॥

संसारेऽसुमता नरामरभवाः प्राप्ताः श्रियोऽनेकशः,
कीर्तिस्फूर्तिमदर्जितं च शतशः साम्राज्यमप्यूर्जितम् ।
स्वाराज्यं बहुधा सुधाभुजचयाराध्यं समासादितं,
लेभे पुण्यमयं कदापि न पुनः सङ्घाधिपत्यं पदम् ॥ ५२ ॥

तैरात्मा सुपवित्रितो निजकुलं तैर्निर्मलं निर्मितं,
तैः संसारमहान्धकूपपततां हस्तावलम्बो ददे ।
लब्धं जन्मफलं कृतं च कुगतिद्वारैकसंरोधनं,
ये शत्रुञ्जयमुख्यतीर्थनिवहे यात्रासु क्लृप्तोद्यमाः ॥ ५३ ॥

शत्रुञ्जयः शिवपुरं नदी शत्रुञ्जयाभिधा ।
श्रीशान्तिः शमिनां दानं शकारा पञ्च दुर्लभाः ॥ ५४ ॥

रुचिरकनकधाराः प्राङ्गणे तस्य पेतुः, प्रवरमणिनिधानं तद्गृहान्तः प्रविष्टम्
अमरतरुलतानामुद्गमस्तस्य गेहे, भवनमिह सहर्षं यस्य पस्पर्श सङ्घः ५५

यज्जन्मैव गुणास्पदं जगति यत् शृङ्गार आद्यो नृणां,
शीतोष्णाद्यमुपद्रवं हरति यन्निर्लज्जभावापहम् ।
प्रासादध्वजकैतवादिव सुरैरारोप्यते मूर्ध्नि यत्,
तद्देयं गुरवे विशुद्धवसनं धन्यैः सुपुण्याध्वने ॥ ५६ ॥

रत्नानामिव रोहणक्षितिधरः खं तारकाणामिव,
स्वर्गः कल्पमहीरुहामिव सरः पङ्केरुहाणामिव ।
पाथोधिः पयसामिवेन्दुमहसां स्थानं गुणानामसा-
वित्यालोच्य विरच्यतां भगवतः सङ्घस्य पूजाविधिः ॥ ५७ ॥

उर्वी गुर्वी तदनु जलदः सागरः कुम्भजन्मा,
व्योमाऽथातो रविहिमकरौ तौ च यस्यांह्रिपीठे ।
स प्रौढश्रीर्जिनपरिवृढः सोऽपि यस्य प्रणन्ता,
स श्रीसङ्घस्त्रिभुवनगुरुः कस्य न स्यान्नमस्यः ॥ ५८ ॥

पुत्रजन्मविवाहादिमङ्गलानि गृहे गृहे ।
परं भाग्यवतां पुंसां श्रीसङ्घार्चादिमङ्गलम् ॥ ५९ ॥

श्रीचारित्रसुन्दरगणिविरचितः

# ॥ आचारोपदेशः ॥

## वर्गः-१

चिदानन्दस्वरूपाय, रूपातीताय तायिने ।
परमज्योतिषे तस्मै, नमः श्रीपरमात्मने ॥ १ ॥

पश्यन्ति योगिनो यस्य, स्वरूपं ध्यानचक्षुषा ।
दधाना मनसः शुद्धिं, तं स्तुवे परमेश्वरम् ॥ २ ॥

जन्तवः सुखमिच्छन्ति, निस्तुषं तच्छिवे भवेत् ।
तद् ध्यानात्तन्मनःशुद्ध्या कषायविजयेन सा ॥ ३ ॥

स इन्द्रियजयेन स्यात्सदाचारादसौ भवेत् ।
स जायते सूपदेशान्नृणां गुणनिबन्धनम् ॥ ४ ॥

सुबुद्धिः सूपदेशेन, ततोऽपि च गुणोदयः ।
इत्याचारोपदेशाख्यग्रन्थः प्रारभ्यते मया ॥ ५ ॥

सदाचारविचारेण रुचिश्चतुरोचितः ।
देवानन्दकरो ग्रन्थः श्रोतव्योऽयं शुभात्मभिः ॥ ६ ॥

पुद्गलानां परावर्त्ते-र्दुर्लभं जन्म मानुषम् ।
लब्ध्वा विवेकिना धर्मे विधेयः परमादरः ॥ ७ ॥

धर्मः श्रुतोऽपि दृष्टोऽपि कृतोऽपि कारितोऽपि च ।
अनुमोदितोऽपि नियतं पुनात्यासप्तमं कुलम् ॥ ८ ॥

विना त्रिवर्गं विफलं पुंसो जन्म पशोरिव ।
तत्र स्यादुत्तमो धर्म-स्तं विना न यतः परौ ॥ ९ ॥

मानुष्यमार्यदेशश्च जातिः सर्वाक्षपाटवम् ।
आयुश्च प्राप्यते तत्र कथञ्चित्कर्मलाघवात् ॥ १० ॥

प्राप्तेषु पुण्यतस्तेषु श्रद्धा भवति दुर्लभा ।
ततः सद्गुरुसंयोगो लभ्यते गुरुभाग्यतः ॥ ११ ॥

लब्धं हि सर्वमप्येतत्सदाचारेण शोभते ।
नयेनेव नृपः पुष्पं गन्धेनाज्येन भोजनम् ॥ १२ ॥

शास्त्रदृष्टेन विधिना सदाचारपरो नरः ।
परस्पराविरोधेन त्रिवर्गं साधयेत्सदा ॥ १३ ॥

तुर्ये यामे त्रियामाया ब्राह्मे मुहूर्त्ते कृतोद्यमः ।
मुञ्चेन्निद्रां सुधीः पञ्च-परमेष्ठिस्तुतिं पठन् ॥ १४ ॥

वामा वा दक्षिणा वापि या नाडी वहते सदा ।
शय्योत्थितस्तमेवादौ पादं दद्याद् भुवस्तले ॥ १५ ॥

मुक्त्वा शयनवस्त्राणि परिधायापराणि च ।
स्थित्वा सुस्थानके धीमान् ध्यायेत्पञ्चनमस्क्रियाम् ॥ १६ ॥

उपविश्य च पूर्वाशाभिमुखो वाप्युदङ्मुखः ।
पवित्राङ्गः शुचिस्थाने जपेन्मन्त्रं समाहितः ॥ १७ ॥

अपवित्रः पवित्रो वा सुस्थितो दुःस्थितोऽपि वा ।
ध्यायन्पञ्चनमस्कारं सर्वपापैः प्रमुच्यते ॥ १८ ॥

अंगुल्यग्रेण यज्जप्तं यज्जप्तं मेरुलङ्घने ।
संख्याहीनं च यज्जप्तं तत्प्रायोऽल्पफलं भवेत् ॥ १९ ॥

जपो भवेत् त्रिधोत्कृष्टमध्यमाधमभेदतः ।
पद्मादिविधिना मुख्योऽपरः स्याज्जपमालया ॥ २० ॥

विना मौनं विना संख्यां विना चेतोनिरोधनम् ।
विना स्थानं विना ध्यानं जघन्यो जायते जपः ॥ २१ ॥

ततो गत्वा मुनिस्थानमथवात्मनिकेतनम् ।
निजपापविशुद्ध्यर्थं कुर्यादावश्यकं सुधीः ॥ २२ ॥

रात्रिकं स्याद्दैवसिकं पाक्षिकं चातुर्मासिकम् ।
सांवत्सरं चेति जिनैः पञ्चधाऽवश्यकं कृतम् ॥ २३ ॥

कृतावश्यककर्मा च स्मृतपूर्वकुलक्रमः ।
प्रमोदमेदुरस्वान्तः कीर्त्तयेन्मङ्गलस्तुतिम् ॥ २४ ॥

मङ्गलं भगवान् वीरो मङ्गलं गौतमः प्रभुः ।
मङ्गलं स्थूलभद्राद्या जैनो धर्मोऽस्तु मङ्गलम् ॥ २५ ॥

नाभेयाद्या जिनाः सर्वे भरताद्याश्च चक्रिणः ।
कुर्वन्तु मङ्गलं सीरि-विष्णवः प्रतिविष्णवः ॥ २६ ॥

नाभिसिद्धार्थभूपाद्या जिनानां पितरः समे ।
पालिताखण्डसाम्राज्या जनयन्तु जयं मम ॥ २७ ॥

मरुदेवात्रिशलाद्या विख्याता जिनमातरः ।
त्रिजगज्जनितानन्दा मङ्गलाय भवन्तु मे ॥ २८ ॥

श्रीपुण्डरीकेन्द्रभूतिप्रमुखा गणधारिणः ।
श्रुतकेवलिनोऽन्येऽपि मङ्गलानि दिशन्तु मे ॥ २९ ॥

*ब्राह्मीचन्दनबालाद्या महासत्यो महत्तराः ।*
अखण्डशीलीलालीलाढ्या यच्छन्तु मम मङ्गलम् ॥ ३० ॥

चक्रेश्वरीसिद्धायिकामुख्याः शासनदेवताः ।
सम्यग्दृशां विघ्नहरा रचयन्तु जयश्रियः ॥ ३१ ॥

कपर्दिमातङ्गमुख्या यक्षा विख्यातविक्रमाः ।
जैनविघ्नहरा नित्यं देयासुर्मङ्गलानि मे ॥ ३२ ॥

यो मङ्गलाष्टकमिदं पटुधीरधीते, प्रातर्नरः सुकृतभावितचित्तवृत्तिः ।
सौभाग्यभाग्यकलितो धुतसर्वविघ्नो, नित्यं स मङ्गलमलं लभते जगत्याम्

ततो देवालये यायात्कृतनैषेधिकीक्रियः ।
त्यजन्नाशातनाः सर्वास्त्रिः प्रदक्षिणयेज्जिनम् ॥ ३४ ॥

विलासहासनिष्ठ्यूतनिद्राकलहदुःकथाः ।
जिनेन्द्रभवने जह्यादाहारं च चतुर्विधम् ॥ ३५ ॥

नमस्तुभ्यं जगन्नाथेत्यादि स्तुतिपदं वदन् ।
फलमक्षतपूगं वा ढौकयेच्छ्रीजिनाग्रतः ॥ ३६ ॥

रिक्तपाणिर्न पश्येत राजानं दैवतं गुरुम् ।
नैमित्तिकं विशेषेण फलेन फलमादिशेत् ॥ ३७ ॥

दक्षिणवामाङ्गगतो नरनारीजनो जिनम् ।
वन्दतेऽवग्रहं मुक्त्वा षष्टिं नव करान् विभोः ॥ ३८ ॥

ततः कृतोत्तरासंगः स्थित्वा सद्योगमुद्रया ।
ततो मधुरया वाचा कुरुते चैत्यवन्दनम् ॥ ३९ ॥

उदरे कूर्परे न्यस्य कृत्वा कोशाकृती करौ ।
अन्योन्याङ्गुलिसंश्लेषाद्योगमुद्रा भवेदियम् ॥ ४० ॥

पश्चान्निजालयं गत्वा कुर्यात्प्राभातिकीं क्रियाम् ।
विदधीत गेहचिन्तां भोजनाच्छादनादिकाम् ॥ ४१ ॥

आदिश्य स्वस्वकार्येषु बन्धून् कर्मकरानपि ।
पुण्यशालां पुनर्यायादष्टभिर्धीगुणैर्युतः ॥ ४२ ॥

शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा ।
ऊहापोहोऽर्थविज्ञानं तत्त्वज्ञानं च धीगुणाः ॥ ४३ ॥

श्रुत्वा धर्मं विजानाति श्रुत्वा त्यजति दुर्मतिम् ।
श्रुत्वा ज्ञानमवाप्नोति श्रुत्वा वैराग्यमेति च ॥ ४४ ॥

पञ्चाङ्गप्रणिपातेन गुरून् साधून् परानपि ।
उपविशेन्नमस्कृत्य त्यजन्नाशातनां गुरोः ॥ ४५ ॥

उत्तमाङ्गेन पाणिभ्यां जानुभ्यां च भुवस्तलम् ।
विधिना स्पृशतः सम्यक् पञ्चाङ्गप्रणतिर्भवेत् ॥ ४६ ॥

पर्यस्तिकां न बध्नीयात् न च पादौ प्रसारयेत् ।
पादोपरि पदं नैव दोर्मूलं न प्रदर्शयेत् ॥ ४७ ॥

न पृष्ठे न पुरो नापि पार्श्वयोरुभयोरपि ।
स्थेयान्नालापयेदन्यमागतं पूर्वमात्मनः ॥ ४८ ॥

सुधीर्गुरुमुखन्यस्तदृष्टिरेकाग्रमानसः ।
शृणुयाद्धर्मशास्त्राणि भावभेदविचक्षणः ॥ ४९ ॥

अपाकुर्यात्स्वसंदेहान् जाते व्याख्याक्षणे सुधीः ।
गुर्वर्हद्गुणगातृभ्यो दद्याद्दानं निजोचितम् ॥ ५० ॥

अकृतावश्यको दत्ते गुरूणां वन्दनानि च ।
प्रत्याख्यानं यथाशक्त्या विदध्याद्विरतिप्रियः ॥ ५१ ॥

तिर्यग्योनिषु जायन्तेऽविरता दानिनोऽपि हि ।
गजाश्वादिभवे भोगान् भुञ्जाना बन्धनान्वितान् ॥ ५२ ॥

न दाता नरकं याति न तिर्यग् विरतो भवेत् ।
दयालुर्नायुषा हीनः सत्यवक्ता न दुःस्वरः ॥ ५३ ॥

तपःसर्वाक्षसारङ्गवशीकरणवागुरा ।
कषायतापमृद्वीका कर्माजीर्णहरीतकी ॥ ५४ ॥

यद् दूरं यद्दुराराध्यं दुर्लभं यत्सुरैरपि ।
तत्सर्वं तपसा साध्यं तपो हि दुरतिक्रमम् ॥ ५५ ॥

चतुष्पथमथो यायात्कृतधर्मविधिः सुधीः ।
कुर्यादर्थार्जनोपायं व्यवसायं निजं निंजम् ॥ ५६ ॥

सुहृदामुपकाराय बन्धूनामुदयाय च ।
अर्ज्यते विभवः सद्भिः स्वोदरं को बिभर्त्ति न ॥ ५७ ॥

व्यवसायभवा वृत्तिरुत्कृष्टा मध्यमा कृषिः ।
जघन्या भुवि सेवा तु भिक्षा स्यादधमाधमा ॥ ५८ ॥

व्यवसायमतो नीचं न कुर्यान्नापि कारयेत् ।
पुण्यानुसारिणी संपन्न पापाद्वर्द्धते क्वचित् ॥ ५९ ॥

बह्वारम्भं महापापं यद्भवेज्जनगर्हितम् ।
इहामुत्र विरुद्धं यत्तत्कर्म न समाचरेत् ॥ ६० ॥

लोहकारचर्मकारमद्यकृत्तैलिकादिभिः ।
सत्यप्यर्थागमे कामं व्यवसायं परित्यजेत् ॥ ६१ ॥

एवं चरन् प्रथमयामविधिं समग्रं,
श्राद्धो विशुद्धहृदयो नयराजमानम् (नः) ।

विज्ञानमानजनरञ्जनसावधानो,
जन्मद्वयं विरचयेत्सफलं स्वकीयम् ॥ ६२ ॥

## वर्गः-२

अथ स्वमन्दिरं यायाद् द्वितीये प्रहरे सुधीः ।
निर्जन्तुभुवि पूर्वाशाभिमुखः स्नानमाचरेत् ॥ ६३ ॥

सप्रणालं चतुःपट्टं स्नानार्थं कारयेद्वरम् ।
तदुद्धृते जले यस्माज्जन्तुबाधा न जायते ॥ ६४ ॥

रजस्वलास्त्रीमलिनस्पर्शे जाते च सूतके ।
मृतस्वजनकार्ये च सर्वाङ्गस्नानमाचरेत् ॥ ६५ ॥

अन्यथोत्तमाङ्गवर्जं वपुः प्रक्षालयेत्परम् ।
कवोष्णेनाल्पपयसा देवपूजाकृते कृती ॥ ६६ ॥

चन्द्रादित्यकरस्पर्शात्पवित्रं जायते जगत् ।
तदाधारं शिरो नित्यं पवित्रं योगिनो विदुः ॥ ६७ ॥

दयासाराः सदाचारास्ते सर्वे धर्महेतवे ।
शिरः प्रक्षालनान्नित्यं तज्जीवोपद्रवो भवेत् ॥ ६८ ॥

नापवित्रं भवेच्छीर्षं नित्यं वस्त्रेण वेष्टितम् ।
अप्यात्मनः स्थितेः शश्वन्निर्मलद्युतिधारिणः ॥ ६९ ॥

स्नाने येऽतिजलोत्सर्गाद् घ्नन्ति जन्तून् बहिर्मुखाः ।
मलिनीकुर्वते जीवं शोधयन्तो वपुर्हिते ॥ ७० ॥

विहाय पोतिकं वस्त्रं परिधाय जिनं स्मरन् ।
यावज्जलार्द्रौ चरणौ तावत्तत्रैव तिष्ठति ॥ ७१ ॥

अन्यथा मलसंश्लेषादपावित्र्यं पुनः पदोः ।
तल्लग्नजीवघातेन भवेद्वा पातकं महत् ॥ ७२ ॥

गृहचैत्यान्तिकं गत्वा भूमिसंमार्जनादनु ।
परिधायार्चावस्त्राणि मुखकोशं दधात्यथ ॥ ७३ ॥

मनोवाक्कायवस्त्रेषु भूपूजोपस्करस्थितौ ।
शुद्धिः सप्तविधा कार्या देवतापूजनक्षणे ॥ ७४ ॥

पुमान् परिदधेन्न स्त्रीवस्त्रं पूजाविधौ क्वचित् ।
न नारी नरवस्त्रं तु कामरागविवर्द्धनम् ॥ ७५ ॥

भृङ्गारानीतनीरेण संस्नाप्याङ्गं जिनेशितुः ।
रूक्षीकृत्य सुवस्त्रेण पूजां कुर्यात्ततोऽष्टधा ॥ ७६ ॥

सच्चन्दनेन घनसारविमिश्रितेन कस्तूरिकाद्रवयुतेन मनोहरेण ।
रागादिदोषरहितं महितं सुरेन्द्रैः श्रीमज्जिनं त्रिजगतीपतिमर्चयामि ७७

जातीजपाबकुलचम्पकपाटलाद्यैर्मन्दारकुन्दशतपत्रवरारविन्दैः ।
संसारनाशकरणं करुणाप्रधानं पुष्पैः परैरपि जिनेन्द्रमहं यजामि॥ ७८ ॥

कृष्णागुरुप्रचितं सितया समेतं कर्पूरपूरसहितं विहितं सुयत्नात् ।
धूपं जिनेन्द्रपुरतो गुरुतोषतोऽहं भक्त्योत्क्षिपामि निजदुष्कृतनाशनाय ७९

ज्ञानं च दर्शनमथो चरणं विचिन्त्य पुञ्जत्रयं च पुरतः प्रविधाय भक्त्या ।
चोक्षाक्षतैश्च करणैरपरैरपीह श्रीमन्तमादिपुरुषं जिनमर्चयामि ॥ ८० ॥

सन्नालिकेरपनसामलबीजपूरजम्बीरपूगसहकारमुखैः फलैस्तैः ।
स्वर्गाद्यनल्पफलदं प्रमदप्रमोदाद्देवाधिदेवमसमप्रशमं महामि॥ ८१ ॥

सन्मोदकैर्वटकमण्डकशालिदालिमुख्यैरसंख्यरसशालिभिरन्नभोज्यैः ।
क्षुत्तृड्व्यथाविरहितं स्वहिताय नित्यं तीर्थाधिराजमहमादरतो यजामि

विध्वस्तपापपटलस्य सदोदितस्य विश्वावलोकनकलाकलितस्य भक्त्या
उद्योतयामि पुरतो जिननायकस्य दीपं तमःप्रशमनाय शमाम्बुराशेः८३

तीर्थोदकैर्धुतमलैरमलस्वभावं शश्वन्नदीनदसरोवरसागरोत्थैः ।
दुर्वारमारमदमोहमहाहिताक्ष्र्यं संसारतापशमनाय जिनं यजामि॥ ८४ ॥

पूजाष्टकस्तुतिमिमामसमामधीत्य योऽनेन चारुविधिना वितनोति पूजाम्
भुक्त्वा नरामरसुखान्यविखण्डितानि धन्यः सुवासमचिराल्लभते शिवेऽपि

शुचिप्रदेशे निःशल्ये कुर्याद्देवालयं सुधीः ।
सौधे यातां वामभागे सार्द्धहस्तोच्चभूमिके ॥ ८६ ॥

पूर्वाशाभिमुखोऽर्चाकृदुत्तराभिमुखोऽथवा ।
विदिग्भिः सह नियतं दक्षिणां वर्जयेद्दिशाम् ॥ ८७ ॥

पूर्वस्यां लभ्यते लक्ष्मीरग्नौ संतापसंभवः ।
दक्षिणस्यां भवेन्मृत्युर्नैर्ऋते स्यादुपद्रवः ॥ ८८ ॥

पश्चिमायां पुत्रदुःखं वायव्यां स्यादसंततिः ।
उत्तरस्यां महालाभ ईशान्यां धर्मवासना ॥ ८९ ॥

अंघ्रिजानुकरांसेषु मस्तके च यथाक्रमम् ।
विधेया प्रथमं पूजा जिनेंद्रस्य विवेकिभिः ॥ ९० ॥

सच्चन्दनं सकाश्मीरं विनार्चा न विरच्यते ।
ललाटे कण्ठे हृदये जठरे तिलकं पुनः ॥ ९१ ॥

प्रभाते शुद्धवासेन मध्याह्ने कुसुमैस्तथा ।
संध्यायां धूपदीपाभ्यां विधेयार्चा मनीषिभिः ॥ ९२ ॥

नैकपुष्पं द्विधा कुर्यान्न च्छिन्द्यात्कलिकामपि ।
पत्रपङ्कजभेदेन हत्यावत्पातकं भवेत् ॥ ९३ ॥

हस्तात्प्रस्खलितं पुष्पं लग्नं पादेऽथवा भुवि ।
शीर्षोपरिगतं यच्च तत्पूजार्हं न कर्हिचित् ॥ ९४ ॥

स्पृष्टं नीचजनैर्दष्टं कीटैः कुवसनैर्धृतम् ।
निर्गन्धमुग्रगन्धं च तत्त्याज्यं कुसुमं समम् ॥ ९५ ॥

वामाङ्गे धूपदाहः स्याद् बीजपूरं तु सन्मुखम् ।
हस्ते दद्याज्जिनेन्द्रस्य नागवल्लीदलं फलम् ॥ ९६ ॥

स्नात्रैश्चन्दनदीपधूपकुसुमैर्नैवेद्यनीरध्वजै-
र्वासैरक्षतपूगपत्रसहितैः सत्कोशवृद्ध्या फलैः ।
वादित्रध्वनिगीतनृत्यनुतिभिश्छत्रैर्वरैश्चामरै-
र्भूषाभिश्च किलैकविंशतिविधा पूजा भवेदर्हतः ॥ ९७ ॥

इत्येकविंशतिविधां रचयंति पूजां भव्याः सुपर्वदिवसेऽपि च तीर्थयोगे ।
पूर्वोक्तचारुविधिनाष्टविधां च नित्यं यद्यद्वरं तदिह भाववशेन योज्यम्

ग्रामचैत्यं ततो यायाद्विशेषाद्धर्मलिप्सया ।
त्यजन्नशुचिमध्वानं धौतवस्त्रेण शोभितः ॥ ९९ ॥

यास्यामीति हृदि ध्यायंश्चतुर्थफलमश्नुते ।
उत्थितो लभते षष्ठं त्वष्टमं पथि च व्रजन् ॥ १०० ॥

दृष्टे चैत्येऽथ दशमं द्वारे द्वादशमं लभेत् ।
मध्ये पक्षोपवासस्य मासस्य स्याज्जिनार्चने ॥ १०१ ॥

तिस्रो नैषेधिकीः कृत्वा चैत्यान्तः प्रविशेत्सुधीः ।
चैत्यचिन्तां विधायाथ पूजयेच्छ्रीजिनं मुदा ॥ १०२ ॥

मूलनायकमर्चित्वाष्टधार्हत्प्रतिमाः पराः ।
पूजयेच्चारुपुष्पौघैर्मृष्ट्वा चान्तर्बहिः स्थिताः ॥ १०३ ॥

अवग्रहाद् बहिर्गत्वा वन्देतार्हन्तमादरात् ।
विधिना पुरतः स्थित्वा रचयेच्चैत्यवन्दनम् ॥ १०४ ॥

एकशक्रस्तवेनाद्या द्वाभ्यां भवति मध्यमा ।
पञ्चभिस्तूत्तमा ज्ञेया जायते सा त्रिधा पुनः ॥ १०५ ॥

स्तुतिपाठे योगमुद्रा जिनमुद्रा च वन्दने ।
मुक्ताशुक्तिमुद्रा तु प्रणिधाने प्रयुज्यते ॥ १०६ ॥

उदरे कूर्परे न्यस्य कृत्वा कोशाकृती करौ ।
अन्योन्याङ्गुलिसंश्लेषाद्योगमुद्रा भवेदियम् ॥ १०७ ॥

पुरोऽगुलानि चत्वारि पश्चादूनानि तानि तु ।
अवस्थितिः पादयोर्या जिनमुद्रेयमीरिता ॥ १०८ ॥

समौ च गर्भितौ हस्तौ ललाटे यत्र योजयेत् ।
मुक्ताशुक्तिकमुद्रा सा प्रणिधाने प्रयोजना ॥ १०९ ॥

नत्वा जिनवरं यायाद्वदन्नावश्यिकां गृहम् ।
अश्नीयाद् बन्धुभिः सार्द्धं भक्ष्याभक्ष्यविचक्षणः ॥ ११० ॥

अधौतपादः क्रोधान्धो वदन् दुर्वचनानि यत् ।
दक्षिणाभिमुखो भुङ्क्ते तत्स्याद्राक्षसभोजनम् ॥ १११ ॥

पवित्राङ्गः शुभे स्थाने निविष्टो निश्चलासने ।
स्मृतदेवगुरुर्भुङ्क्ते तत्स्यान्मानवभोजनम् ॥ ११२ ॥

स्यनात्वा देवान् समभ्यर्च्य नत्वा पूज्यजनान् मुदा ।
दत्वा दानं सुपात्रेभ्यो भुङ्क्ते भक्तं तदुत्तमम् ॥ ११३ ॥

भोजने मैथुने स्नाने वमने दन्तधावने ।
विड्डुत्सर्गे निरोधे च मौनं कुर्यान्महामतिः ॥ ११४ ॥

आग्नेयीं नैर्ऋत्यं भुक्तौ दक्षिणां वर्जयेद्दिशम् ।
संध्ये ग्रहणकालं च स्वजनादेः शबस्थितिम् ॥ ११५ ॥

कार्पण्यं कुरुते यो हि भोजनादौ धने सति ।
मन्ये मन्दमतिः सोऽत्र दैवाय धनमर्जति ॥ ११६ ॥

अज्ञातभाजने नाद्याद् ज्ञातिभ्रष्टगृहेऽपि च ।
अज्ञातानि निषिद्धानि फलान्यन्यानि च त्यजेत् ॥ ११७ ॥

बालस्त्रीभ्रूणगोहत्याकृतामाचारलोपिनाम् ।
स्वगोत्रभेदिनां पङ्क्तौ जानन्नोपविशेत्सुधीः ॥ ११८ ॥

मद्यं मांसं नवनीतं मधूदुम्बरपञ्चकम् ।
अनन्तकायमज्ञातफलं रात्रौ च भोजनम् ॥ ११९ ॥

आमगोरससंपृक्तं द्विदलं पुष्पितौदनम् ।
दध्यहर्द्वितयातीतं क्वथितान्नं च वर्जयेत् ॥ १२० ॥

जन्तुमिश्रं फलं पुष्पं पत्रं चान्यदपि त्यजेत् ।
संधानमपि संसक्तं जिनधर्मपरायणः ॥ १२१ ॥

भोजनं च विड्डुत्सर्गं कुर्यादतिचिरं न हि ।
वारिपानं तथा स्नानं पुनः स्थिरतया सृजेत् ॥ १२२ ॥

भोजनादौ विषसमं भोजनान्ते शिलोपमम् ।
मध्ये पीयूषसदृशं वारिपानं भवेदहो ॥ १२३ ॥

अजीर्णे भोजनं जह्यात् कालेऽश्नीयाच्च सात्म्यतः ।
भुक्त्वोत्थितो वक्त्रशुद्धिं पत्रपूगादिभिः सृजेत् ॥ १२४ ॥

विवेकवान् न ताम्बूलमश्नीयाद्विचरन् पथि ।
पूगाद्यमक्षतं दन्तैर्दलयेन्न तु पुण्यवित् ॥ १२५ ॥

भोजनादनु नो स्वप्याद्दिना ग्रीष्मं विचारवान् ।
दिवा स्वपयतो देहे जायते व्याधिसंभवः ॥ १२६ ॥

## वर्गः-३

ततो गेहश्रियं पश्यन् विद्वद्गोष्ठीपरायणः ।
सुतादिभ्यो ददच्छिक्षां सुखं तिष्ठेद् घटीद्वयम् ॥ १२७ ॥

आत्मायत्ते गुणग्रामे दैवायत्ते धनादिके ।
विज्ञाताखिलतत्त्वानां नृणां न स्याद् गुणच्युतिः ॥ १२८ ॥

गुणैरुत्तमतां याति वंशहीनोऽपि मानवः ।
पङ्कजं ध्रियते मूर्ध्नि पङ्कः पादेन घृष्यते ॥ १२९ ॥

नखानिरुत्तमानां स्यात् कुलं वा जगति क्वचित् ।
प्रकृत्या मानवा एव गुणैर्जाता जगन्नुताः ॥ १३० ॥

सत्त्वादिगुणसंपूर्णो राज्यार्हः स्याद्यथा नरः ।
एकविंशतिगुणः स्याद् धर्मार्हो मानवस्तथा ॥ १३१ ॥

अक्षुद्रहृदयः सौम्यो रूपवान् जनवल्लभः ।
अक्रूरो भवभीरुश्चाशठो दाक्षिण्यवान् सदा ॥ १३२ ॥

अपत्रपिष्णुः सदयो मध्यस्थः सौम्यदृक् पुनः ।
गुणरागी सत्कथाढ्यः सुपक्षो दीर्घदर्श्यपि ॥ १३३ ॥

वृद्धानुगतो विनीतः कृतज्ञः परहितोऽपि च ।
लब्धलक्ष्यो धर्मरत्नयोग्योऽमीभिर्गुणैर्भवेत् ॥ १३४ ॥

प्रायेण राजदेशस्त्रीभक्तवार्त्तां त्यजेत्सुधीः ।
यतो नार्थागमः कश्चित्प्रत्युतानर्थसंभवः ॥ १३५ ॥

सुमित्रैर्बन्धुभिः सार्द्धं कुर्याद्धर्मकथां मिथः ।
विद्वद्भिः सह शास्त्रार्थरहस्यानि विचारयेत् ॥ १३६ ॥

पापबुद्धिर्भवेद्यस्माद् वर्जयेत् तस्य संगतिम् ।
कायेन वचनेनापि न्यायं भुञ्जेन्न कर्हिचित् ॥ १३७ ॥

अवर्णवादं कस्यापि न वदेदुत्तमाग्रणीः ।
पित्रोर्गुरोः स्वामिनोऽपि राजादिषु विशेषतः ॥ १३८ ॥

मूर्खैर्दुष्टैरनाचारैर्मलिनैर्धर्मनिन्दकैः ।
दुःशीलोर्मिभिश्चौरैः संगतिं वर्जयेदलम् ॥ १३९ ॥

अज्ञातप्रतिभूः कीर्त्त्यै अज्ञातस्थानदो गृहे ।
अज्ञातकुलसंबन्धी, अज्ञातभृत्यरक्षकः ॥ १४० ॥

स्वस्योर्ध्वं कोपकर्त्ता च स्वस्योर्ध्वं रिपुविग्रही ।
स्वस्योर्ध्वं गुणगर्वी च स्वस्योर्ध्वं भृत्यसंग्रही ॥ १४१ ॥

उद्धाराद्दणमोक्षार्थी भोक्ता भृत्यस्य दण्डनात् ।
दौःस्थ्ये पूर्वार्जिताशंसी स्वयं स्वगुणवर्णकः ॥ १४२ ॥

ऋणाद्धर्मं विजानाति त्याज्यं दत्ते धने सति ।
विरोधं स्वजनैः सार्द्धं स्नेहं च कुरुते परैः ॥ १४३ ॥

उक्त्वा स्वयं च हसति यत्तत्खादति वक्ति च ।
इहामुत्र विरुद्धानि मूर्खचिह्नानि संत्यजेत् ॥ १४४ ॥

न्यायार्जितधनश्चर्यामदेशाकालयोस्त्यजन् ।
राजविद्वेषिभिः संगं विरोधं च घनैः समम् ॥ १४५ ॥

अन्यगोत्रैः कृतोद्वाहः कुलशीलसमैः समम् ।
सुप्रातिवेश्मिके स्थाने कृतवेश्मान्वितः स्वकैः ॥ १४६ ॥

उपप्लुतं त्यजन् स्थानं कुर्वन्नायोचितं व्ययम् ।
वेषं वित्तानुसारेणाप्रवृत्तो जनगर्हिते ॥ १४७ ॥

देशाचारं चरन् धर्ममुञ्चन्नाश्रिते हितः ।
बलाबलं विदन् जानन् विशेषं च हिताहितम् ॥ १४८ ॥

वशीकृतेन्द्रियो देवे गुरौ च गुरुभक्तिमान् ।
यथावत् स्वजने दीनेऽतिथौ च प्रतिपत्तिकृत् ॥ १४९ ॥

एवं विचारचातुर्यं रचयंश्चतुरैः समम् ।
कियतीमतिक्रमन्वेलां शृण्वन् शास्त्राणि वा भणन् ॥ १५० ॥

कुर्वीतार्थार्जनोपायं न तिष्ठेद्दैवतत्परः ।
उपक्रमं विना भाग्यं पुंसां फलति न क्वचित् ॥ १५१ ॥

शुद्धेन व्यवहारेण व्यवहारं सृजेत्सदा ।
कूटतुलां कूटमानं कूटलेख्यं च वर्जयेत् ॥ १५२ ॥

अङ्गारवनशकटभाटकस्फोटजीविका ।
दन्तलाक्षारसकेशविषवाणिज्यकानि च ॥ १५३ ॥

यन्त्रपीडा निर्लाञ्छनमसतीपोषणं तथा ।
दवदानं सरःशोषः इति पञ्चदश त्यजेत् ॥ १५४ ॥

लोहं मधूकपुष्पाणि मदनं माक्षिकं तथा ।
वाणिज्याय न गृह्णीयात् कन्दान् पत्राणि वा सुधीः ॥ १५५ ॥

स्थापयेत्फाल्गुनादूर्ध्वं न तिलानतसीमपि ।
गुडटुप्परकादीनि जन्तुघ्नानि घनागमे ॥ १५६ ॥

शकटं वा बलीवर्द्दान् नैव प्रावृषि वाहयेत् ।
प्राणिहिंसाकरं प्रायः कृषिकर्म न कारयेत् ॥ १५७ ॥

विक्रीणीयात्प्राप्तमूल्यं न हीच्छेदधिकाधिकम् ।
अतिमूल्यकृतां प्रायो मूलनाशः प्रजायते ॥ १५८ ॥

उद्धारके न प्रदद्यात् सति लाभे महत्यपि ।
ऋते ग्रहणकाद् व्याजे न प्रदद्याद्धनं खलु ॥ १५९ ॥

जानन् स्तेनाहृतं नैव गृह्णीयाद्धर्ममर्मवित् ।
वर्जयेत् तत्प्रतीरूपं व्यवहारं विचारवान् ॥ १६० ॥

तस्करैरन्त्यजैर्धूर्तैर्मलिनैः पतितैः समम् ।
इहामुत्र हितं वाञ्छन् व्यवहारं परित्यजेत् ॥ १६१ ॥

विक्रीणानः स्ववस्तूनि वदेत्कूटक्रयं न हि ।
आददानोऽन्यसत्कानि सत्यंकारं न लोपयेत् ॥ १६२ ॥

अदृष्टवस्तुनो नैव साटकं दृढयेद् बुधः ।
स्वर्णरत्नादिकं प्रायो नाददीतापरीक्षितम् ॥ १६३ ॥

राजतेजो विना न स्यादनर्थापन्निवारणम् ।
नृपाद्याननुसरेत्तत्पारवश्यमनाश्रयन् ॥ १६४ ॥

तपस्विनं कविं वैद्यं मर्मज्ञं भोज्यकारकम् ।
मान्त्रिकं निजपूज्यं च कोपयेज्जातु नो बुधः ॥ १६५ ॥

अतिक्लेशं च धर्मातिक्रमणं नीचसेवनम् ।
विश्वस्तघातकरणं नाचरेदर्थतत्परः ॥ १६६ ॥

आदाने च प्रदाने च न कुर्यादुक्तलोपनम् ।
प्रतिष्ठां महतीं याति नरः स्ववचने स्थिरः ॥ १६७ ॥

धीरः सर्वस्वनाशेऽपि पालितां यो निजां गिरम् ।
नाशयेत्स्वल्पलाभार्थे वसुवत्स्यात्स दुःखितः ॥ १६८ ॥

एवं व्यवहापरः प्रहरं तुर्यमर्जयेत् ।
वैकालिककृते गच्छेदथो मन्दिरमात्मनः ॥ १६९ ॥

एकाशनादिकं येन प्रत्याख्यानं कृतं भवेत् ।
आवश्यककृते सायं मुनिस्थानमसौ व्रजेत् ॥ १७० ॥

दिवसस्याष्टमे भागे कुर्याद्वैकालिकं सुधीः ।
प्रदोषसमये नैव निश्यद्यान्नैव कोविदः ॥ १७१ ॥

चत्वारि खलु कर्माणि संध्याकाले विवर्जयेत् ।
आहारं मैथुनं निद्रां स्वाध्यायं च विशेषतः ॥ १७२ ॥

आहाराज्जायते व्याधि-मैंथुनाद् गर्भदुष्टता ।
भूतपीडा निद्रया स्यात् स्वाध्यायाद् बुद्धिहीनता ॥ १७३ ॥

प्रत्याख्यानं द्युचरिमं कुर्याद्वैकालिकादनु ।
द्विविधं त्रिविधं चापि चाहारं वर्जयेत्समम् ॥ १७४ ॥

अह्नो मुखेऽवसाने च यो द्वे द्वे घटिके त्यजेत् ।
निशाभोजनदोषज्ञो यात्यसौ पुण्यभाजनम् ॥ १७५ ॥

करोति विरतिं धन्यो यो सदा निशि भोजनात् ।
सोऽर्द्धं पुरुषायुष्कस्य स्यादवश्यमुपोषितः ॥ १७६ ॥

वासरे च रजन्यां च यः खादन्नेव तिष्ठति ।
शृंगपुच्छपरिभ्रष्टः स्पष्टं स पशुरेव हि ॥ १७७ ॥

उलूककाकमार्जारगृध्रशंबरसूकराः ।
अहिवृश्चिकगोधाश्च जायन्ते रात्रिभोजनात् ॥ १७८ ॥

नैवाहुतिर्न च स्नानं न श्राद्धं देवतार्चनम् ।
दानं वा विहितं रात्रौ भोजनं तु विशेषतः ॥ १७९ ॥

एवं नयेद्यश्चतुरोऽपि-यामान् नयाभिरामः पुरुषो दिनस्य ।
नयेन युक्तो विनयेन दक्षो भवेदसावच्युतसौख्यभाग् वै ॥ १८० ॥

## वर्गः-४

प्रक्षाल्य स्वल्पनीरेण पादौ हस्तौ तथा मुखम् ।
धन्यंमन्यः पुनः सायं पूजयेच्छ्रीजिनं मुदा ॥ १८१ ॥

सत्क्रियासहितं ज्ञानं जायते मोक्षसाधकम् ।
जानन्निति पुनः सायं कुर्यादावश्यकक्रियाम् ॥ १८२ ॥

क्रियैव फलदा लोके न ज्ञानं फलदं मतम् ।
यतः स्त्रीभक्ष्यभेदज्ञो न ज्ञानात् सुखितो भवेत् ॥ १८३ ॥

गुर्वभावे निजे गेहे कुर्वीतावश्यकं सुधीः ।
विन्यस्य स्थापनाचार्यं नमस्कारावलीमथ ॥ १८४ ॥

धर्मात्सर्वाणि कार्याणि सिद्ध्यन्तीति विदन् हृदि ।
सर्वदा तद्गतस्वान्तो धर्मवेलां न लङ्घयेत् ॥ १८५ ॥

अतीतानागतं कर्म क्रियते यज्जपादिकम् ।
वापिते चोषरक्षेत्रे धान्यवन्निष्फलं भवेत् ॥ १८६ ॥

विधिं सम्यक् प्रयुञ्जीत कुर्वन् धर्मक्रियां सुधीः ।
हीनाधिकं सृजन् मन्त्रविधिं यद्दुःखितो भवेत् ॥ १८७ ॥

धर्मानुष्ठानवैतथ्यात्प्रत्युतानर्थसंभवः ।
रौद्ररन्ध्रादिजनको दुःप्रयुक्तादिवौषधात् ॥ १८८ ॥

वैयावृत्यकृतं श्रेयोऽक्षयं मत्वा विचक्षणः ।
विहितावश्यकः श्राद्धः कुर्याद्विश्रामणां गुरोः ॥ १८९ ॥

वस्त्रावृतमुखो मौनी हरन् सर्वाङ्गजं श्रमम् ।
गुरुं संवाहयेद्यत्नात्पादस्पर्शं त्यजन्निजम् ॥ १९० ॥

ग्रामचैत्ये जिनं नत्वा ततो गच्छेत्स्वमन्दिरम् ।
प्रक्षालितपदः पञ्चपरमेष्ठिस्तुतिं स्मरेत् ॥ १९१ ॥

अर्हन्तः शरणं संतु सिद्धाश्च शरणं मम ।
शरणं जिनधर्मो मे साधवः शरणं सदा ॥ १९२ ॥

नमः श्रीस्थूलभद्राय कृतभद्राय तायिने ।
शीलसन्नाहमाधृत्य यो जिगाय स्मरं रयात् ॥ १९३ ॥

गृहस्थस्यापि यस्यासीच्छीललीला बृहत्तरा ।
नमः सुदर्शनायास्तु सद्दर्शनकृतश्रिये ॥ १९४ ॥

धन्यास्ते कृतपुण्यास्ते मुनयो जितमन्मथाः ।
आजन्म निरतिचारं ब्रह्मचर्यं चरन्ति ये ॥ १९५ ॥

निःसत्त्वो भूरिकर्माहं सर्वदाप्यजितेन्द्रियः ।
नैकाहमपि यः शक्तः शीलमाधातुमुत्तमम् ॥ १९६ ॥

संसार ! तवनिस्तारपदवी न दवीयसी ।
अन्तरा दुस्तरा न स्युर्यदि रे मदिरेक्षणाः ॥ १९७ ॥

अनृतं साहसं माया मूर्खत्वमतिलोभता ।
अशौचं निर्दयत्वं च स्त्रीणां दोषाः स्वभावजाः ॥ १९८ ॥

या रागिणि विरागिण्यः स्त्रियस्ताः कामयेत कः ।
सुधीस्तां कामयेन्मुक्तिं या विरागिणि रागिणी ॥ १९९ ॥

एवं ध्यायन् भजेन्निद्रां स्वल्पकालं समाधिमान् ।
भजेन्न मैथुनं धीमान् धर्मपर्वसु कर्हिचित् ॥ २०० ॥

नातिकालं निषेवेत प्रमीलां धीनिधिः पुनः ।
अत्यादृता भवेदेषा धर्मार्थसुखनाशिनी ॥ २०१ ॥

अल्पाहारा अल्पनिद्रा अल्पारम्भपरिग्रहाः ।
भवन्त्यल्पकषाया ये ज्ञेयास्तेऽल्पभवभ्रमाः ॥ २०२ ॥

निद्राहारभयस्नेहलज्जाकामकलिक्रुधः ।
यावन्मात्रा विधीयन्ते तावन्मात्रा भवन्त्यमी ॥ २०३ ॥

विघ्नव्रातलतानेमिं श्रीनेमिं मनसि स्मरन् ।
स्वापकाले नरो नैव दुःस्वप्नैः परिभूयते ॥ २०४ ॥

अश्वसेनावनीपालवामादेवीतनूरुहम् ।
श्रीपार्श्वं संस्मरन् नित्यं दुःस्वप्नं नैष पश्यति ॥ २०५ ॥

श्रीलक्ष्मणाङ्गसंभूतं महसेननृपाङ्गजम् ।
चन्द्रप्रभं स्मरंश्चित्ते सुखनिद्रां लभेदसौ ॥ २०६ ॥

सर्वविघ्नाहिगरुडं सर्वसिद्धिकरं परम् ।
ध्यायन् शान्तिजिनं नैति चौरादिभ्यो भयं नरः ॥ २०७ ॥

इत्यवेत्य दिनकृत्यमशेषं श्राद्धवर्गजनितोत्तमतोषम् ।
यच्चरन्निह परत्र च लोके श्लोकमेति पुरुषो धुतदोषम् ॥ २०८ ॥

## वर्गः-५

लब्ध्वैतन्मानुषं जन्म सारं सर्वेषु जन्मसु ।
सुकृतेन सदा कुर्यात्सकलं सफलं सुधीः ॥ २०९ ॥

निरन्तरकृताद्धर्मात्सुखं नित्यं भवेदिति ।
अवन्ध्यं दिवसं कुर्याद्दानध्यानतपःश्रुतैः ॥ २१० ॥

आयुषस्तृतीये भागे जीवोऽत्यसमयेऽथवा ।
आयुः शुभाशुभं प्रायो बध्नाति परजन्मनः ॥ २११ ॥

आयुस्तृतीयभागस्थः पर्वघस्रेषु पञ्चसु ।
श्रेयः समाचरन् जन्तुर्बध्नात्यायुर्निजं ध्रुवम् ॥ २१२ ॥

जन्तुराराधयेद्धर्मं द्विविधं द्वितीयादिने ।
सृजन् सुकृतसंघातं रागद्वेषद्वयं जयेत् ॥ २१३ ॥

पञ्च ज्ञानानि लभते चारित्राणि व्रतानि च ।
पञ्चमीं पालयन् पञ्च प्रमादान् जयति ध्रुवम् ॥ २१४ ॥

दुष्टाष्टकर्मनाशायाष्टमी भवति रक्षिता ।
स्यात्प्रवचनमातृणां शुद्धयेऽष्टमदान् जयेत् ॥ २१५ ॥

एकादशांगानि सुधीराराधयति निश्चितम् ।
एकादश्यां शुभं तन्वन् श्रावकप्रतिमास्तथा ॥ २१६ ॥

चतुर्दशरज्जूपरिवासमासादयत्यहो ।
चतुर्दश्यामाराधयन् पूर्वाणि च चतुर्दश ॥ २१७ ॥

एकैकोच्चफलानि स्युः पञ्चपर्वाण्यमूनि वै ।
तदत्र विहितं श्रेयोऽधिकाधिकफलं भवेत् ॥ २१८ ॥

धर्मक्रियां प्रकुर्वीत विशेषात्पर्ववासरे ।
आराधयन्नुत्तरगुणान् वर्जयेत्स्नानमैथुने ॥ २१९ ॥

विदध्यात्पौषधं धीमान् मुक्तिवश्यौषधं परम् ।
तदशक्तौ विशेषेण श्रयेत्सामायिकव्रतम् ॥ २२० ॥

च्यवनं जननं दीक्षा ज्ञानं निर्वाणमित्यहो ।
अर्हतां कल्याणकानि सुधीराराधयेत्तथा ॥ २२१ ॥

एकस्मिन्नेकाशनकं द्वयोर्निर्विकृतेस्तपः ।
त्रिष्वाचाम्लं सपूर्वार्द्धं चतुर्षूपोषितं सृजेत् ॥ २२२ ॥

सपूर्वार्द्धमुपवासं पुनः पञ्चसु तेष्विति ।
पञ्चभिर्वत्सरैः कुर्यात्तानि चोपोषितैः सुधीः ॥ २२३ ॥

अर्हदादिपदस्थानि विंशतिस्थानकानि च ।
कुर्वीत विधिना धन्यस्तपसैकाशनादिना ॥ २२४ ॥

तत्तद्विधिध्यानपरो योऽमून्याराधयत्यहो ।
लभते तीर्थकृन्नामकर्माशर्महरं परम् ॥ २२५ ॥

उपवासेन यः शुक्लामाराधयति पञ्चमीम् ।
सार्द्धानि पञ्चवर्षाणि स लभेत् पञ्चमीं गतिम् ॥ २२६ ॥

उद्यापनं व्रते पूर्णे कुर्याद्वा द्विगुणं व्रतम् ।
तपोदिनप्रमाणानि भोजयेन्मानुषाणि च ॥ २२७ ॥

कारयेत्पञ्चपञ्चोच्चैर्ज्ञानोपकरणानि च ।
पञ्चम्युद्यापने तद्वच्चैत्योपकरणान्यपि ॥ २२८ ॥

पाक्षिकावश्यकं तन्वन् चतुर्दश्यामुपोषितम्(तः) ।
पक्षं विशुद्धं तनुते द्विधापि श्रावको निजम् ॥ २२९ ॥

त्रिषु चतुर्मासिकेषु कुर्यात्षष्ठं तपः सुधीः ।
ज्येष्ठपर्वण्यष्टमं च तदावश्यकयुक् सृजेत् ॥ २३० ॥

अष्टाहिकासु सर्वासु विशेषात् पर्ववासरे ।
आरम्भान् वर्जयेद् गेहे खण्डनोत्पेषणादिकान् ॥ २३१ ॥

पर्वणि शृणुयाज्ज्येष्ठे श्रीकल्पं स्वच्छमानसः ।
शासनोत्सर्पणां कुर्वन्नमारिं कारयेत्पुरे ॥ २३२ ॥

श्राद्धो विधाय सद्धर्मकर्म नो निर्वृतिं व्रजेत् ।
अतृप्तमानसः कुर्याद्धर्मकर्माणि नित्यशः ॥ २३३ ॥

ज्येष्ठे पर्वणि श्रीकल्पं सावधानः शृणोति यः ।
अन्तर्भवाष्टकं धन्यः स लभेत्परमं पदम् ॥ २३४ ॥

सम्यक्त्वसेवनान्नित्यं सद्ब्रह्मव्रतपालनात् ।
यत्पुण्यं जायते लोके श्रीकल्पश्रवणेन तत् ॥ २३५ ॥

दानैस्तपोभिर्विविधैः सत्तीर्थोपासनैरहो ।
यत्पापं क्षीयते जन्तोस्तत्कल्पश्रवणेन वै ॥ २३६ ॥

मुक्तेः परं पदं नास्ति तीर्थं शत्रुञ्जयात्परम् ।
सद्दर्शनात्परं तत्त्वं शास्त्रं कल्पात्परं न हि ॥ २३७ ॥

अमावास्याप्रतिपदोर्दीपोत्सवदिनस्थयोः ।
प्राप्तनिर्वाणसद्ज्ञानौ स्मरेच्छ्रीवीरगौतमौ ॥ २३८ ॥

उपवासद्वयं कृत्वा गौतमं दीपपर्वणि ।
यः स्मरेत्स लभेन्नूनमिहामुत्र महोदयम् ॥ २३९ ॥

स्वगृहे ग्रामचैत्ये च विधिनार्चां जिनेशितुः ।
कृत्वा मङ्गलदीपं चाश्नीयात्सार्द्धं स्वबन्धुभिः ॥ २४० ॥

कल्याणकं जिनानां हि स्थापयन्परमं दिनम् ।
निजशक्त्या सदर्थिभ्यो दद्याद्दानं यथोचितम् ॥ २४१ ॥

इत्थं सुपर्वविहितोत्तमकृत्यचार्वा-
चारप्रचारपिहिताश्रववर्गमार्गः ।
श्राद्धः समृद्धविधिवर्द्धितशुद्धबुद्धि-
र्भुक्त्वा सुपर्वसुखमेति च मुक्तिसौख्यम् ॥ २४२ ॥

## वर्गः—६

श्राद्धो विधाय सद्धर्मकर्म नो निर्वृतिं व्रजेत् ।
अतृप्तमानसः कुर्याद्धर्मकर्माणि नित्यशः ॥ २४३ ॥

धर्मादधिगतैश्वर्यो धर्ममेव निहन्ति यः ।
कथं शुभायतिर्भावी स्वस्वामिद्रोहपातकी ॥ २४४ ॥

दानशीलतपोभावभेदैर्धर्मश्चतुर्विधः ।
आराध्यः सुधिया शश्वद् भुक्तिमुक्तिफलप्रदः ॥ २४५ ॥

देयं स्तोकादपि स्तोकं न व्यपेक्षो महोदयः ।
इच्छानुरूपो विभवः कदा कस्य भविष्यति ॥ २४६ ॥

ज्ञानवान् ज्ञानदानेन निर्भयोऽभयदानतः ।
अन्नदानात्सुखी नित्यं निर्व्याधिर्भेषजाद् भवेत् ॥ २४७ ॥

कीर्त्तिः संजायते पुण्यान्न दानाद्यच्च कीर्त्तये ।
कैश्चिद्वितीर्यते दानं ज्ञेयं तद् व्यसनं बुधैः ॥ २४८ ॥

दातुर्दानमपापाय ज्ञानिनां न प्रतिग्रहः ।
विषशीतापहौ मन्त्रवह्नी किं दोषभाजिनौ ॥ २४९ ॥

व्याजे स्याद्द्विगुणं वित्तं व्यवसाये चतुर्गुणम् ।
क्षेत्रे शतगुणं प्रोक्तं पात्रेऽनन्तगुणं भवेत् ॥ २५० ॥

चैत्यप्रतिमापुस्तकवेदश्रीसंघभेदरूपेषु ।
क्षेत्रेषु सप्तसु धनं वपेद् भूरिफलाप्तये ॥ २५१ ॥

चैत्यं यः कारयेद्धन्यो जिनानां भक्तिभावतः ।
तत्परमाणुसंख्यानि पल्यान्येष सुरो भवेत् ॥ २५२ ॥

यत्कारितं चैत्यगृहं तिष्ठेद्यावदनेहसम् ।
स तत्समयसंख्यानि वर्षाणि त्रिदशो भवेत् ॥ २५३ ॥

सुवर्णरूप्यरत्नमयीं दृषल्लेख(प्य)मयीमपि ।
कारयेद्योऽर्हतां मूर्त्तिं स वै तीर्थंकरो भवेत् ॥ २५४ ॥

अङ्गुष्ठमात्रामपि यः प्रतिमां परमेष्ठिनः ।
कारयेदाप्य शक्रत्वं स लभेत्परमं पदम् ॥ २५५ ॥

धर्मद्रुमूलं सच्छास्त्रं जानन्मोक्षफलप्रदम् ।
लेखयेद्वाचयेद्यच्च शृणुयाद् भावशुद्धिकृत् ॥ २५६ ॥

लेखाप्यागमशास्त्राणि यो गुणिभ्यः प्रयच्छति ।
तन्मात्राक्षरसंख्यानि वर्षाणि त्रिदशो भवेत् ॥ २५७ ॥

ज्ञानभक्तिं विधत्ते यो ज्ञानविज्ञानशोभितः ।
प्राप्नोति स नरः प्रान्ते केवलिपदमव्ययम् ॥ २५८ ॥

निदानं सर्वसौख्यानामन्नदानं विभावयन् ।
साधर्मिकाणां वात्सल्यं कुर्याच्छक्त्या समाः प्रति ॥ २५९ ॥

वात्सल्यं बन्धुमुख्यानां संसारार्णवमज्जनम् ।
तदेव समधर्माणां संसारोदधितारकम् ॥ २६० ॥

प्रतिवर्षं संघपूजां शक्त्या कुर्याद्विवेकवान् ।
प्रासुकानि श्रीगुरुभ्यो दद्याद्वस्त्राणि भक्तितः ॥ २६१ ॥

वसत्यशनपानानि पात्रवस्त्रौषधानि च ।
चेन्न पर्याप्तविभवो दद्यात् तदपि शक्तितः ॥ २६२ ॥

सत्पात्रे दीयते दानं दीयमानं न हीयते ।
कूपारामगवादीनां ददतामेव संपदः ॥ २६३ ॥

प्रदत्तस्य च भुक्तस्य दृश्यते महदन्तरम् ।
प्रभुक्तं जायते वर्चो दत्तं भवति चाक्षयम् ॥ २६४ ॥

आयासशतलब्धस्य प्राणेभ्योऽपि गरीयसः ।
दानमेकैव वित्तस्य गतिरन्या विपत्तयः ॥ २६५ ॥

क्षेत्रेषु सप्तसु वपन् न्यायोपात्तं निजं धनम् ।
साफल्यं (सफलं) कुरुते श्राद्धो निजयोर्धनजन्मनोः ॥ २६६ ॥

पं. सुमतिविजयगणिकृता

## ॥ उपदेशकल्पवल्लिः ॥

प्रणम्य पुण्यपद्मार्क-पञ्च श्रीपरमेष्ठिनः ।
पुण्योपदेशाः प्रोच्यन्ते, केचित्प्रस्तावचारवः ॥ १ ॥

पूर्वाङ्गोपाङ्गसार्वज्ञ-चरित्रादिश्रुतोदधेः ।
सारं सुधेयं श्रीधर्मो, बुध्यतां विबुधप्रियः ॥ २ ॥

मनोऽभिमतवस्तूनां, संस्तवो जायते यतः ।
बुधाः विदधतां धर्मं, तं श्रद्धाविधिबन्धुरम् ॥ ३ ॥

मृदुलासरला मिश्रा, यथा बीजोद्गमाय भूः ।
चेतोवृत्तिस्तथा धर्मो-दयाय गदिताऽङ्गिनाम् ॥ ४ ॥

धर्मस्थानेषु गन्तव्यं, श्रोतव्यं सद्गुरोर्वचः ।
धर्तव्यं हृदि तन्नित्यं, कर्तव्यं क्रियया तथा ॥ ५ ॥

तीर्थं देवगृहं शा -श्रवणं साधुसङ्गतिः ।
पुण्यकृतोत्सवा ज्ञेयं, धर्मस्थानकपञ्चकम् ॥ ६ ॥

द्यूतं पणाङ्गना मद्यं, चौरिका जीवहिंसनम् ।
इदं धर्मार्थिना हेयं, पापस्थानकपञ्चकम् ॥ ७ ॥

सुतश्चिलात्याः स्त्रीहन्ता, व्यसनी समरो नृपः ।
पदमेकैकमाकर्ण्य, प्रबुद्धौ द्वावपि द्रुतम् ॥ ८ ॥

श्रुताः क्षेत्रपतिक्रीड-द्बालकुम्भकृतां मुखात् ।
श्रीयवर्षेः शिवायासन्, ग्राम्यार्था अपि गाथिकाः ॥ ९ ॥

सद्गुरोर्गुणकारि स्यादरुच्यापि श्रुतं वचः ।
इहोदाहरणं रौहिणेयश्चौरो विचार्यताम् ॥ १० ॥

उन्मार्गमिन्द्रियग्रामा-नुगा नैति गुणप्रजा ।
आत्मप्रभौ गुरुवचोऽवहितस्वान्तमन्त्रिणि ॥ ११ ॥

भृत्वा चित्तालवालं श्री-गुरुवाक्तत्त्ववारिभिः ।
श्रीमान् धर्मद्रुमो वृद्धिं, लम्भितः सफलो भवेत् ॥ १२ ॥

क्षुल्लकः क्ष्मापतिमिण्ठ-मन्त्रीभुक्सार्थपाङ्गनाः ।
प्रबुद्धा नर्तकीगीतां, स्वान्ते धृत्वा ध्रुवामपि ॥ १३ ॥

श्रुत्वा गुरोर्वचो धृत्वा, चित्ते ज्ञात्वा च तद्गुणम् ।
नाप्नोति सद्गतेः सौख्य-मकुर्वाणो क्रियारुचिम् ॥ १४ ॥

न क्रिया यदि किं ज्ञानं ?, न ज्ञानं यदि का क्रिया ? ।
योग एव द्वयोः कार्यः, सिद्धौ पङ्ग्वन्धयोरिव ॥ १५ ॥

फलाय स्यात् क्रिया नैका, ज्ञानं फलति कर्हिचित् ।
वनं विना वसन्तर्तु न भवेत् फलवत् क्वचित् ॥ १६ ॥

यान्ति ग्रैवेयकं यावदभव्या अपि सत्क्रियाः ।
ज्ञात्वेति नियतं कार्या, वीर्याचारप्रियैः क्रिया ॥ १७ ॥

तदेव सफलं जन्म, कृतार्थं जीवितं हि तत् ।
श्लाघनीयं धनं तच्च, धर्मार्थमुपयोगि यत् ॥ १८ ॥

धर्मः शर्मकरः पुंसां, धर्मो दुष्कर्ममर्महा ।
सर्वार्थसाधको धर्म-स्तस्माद्धर्मं समाचरेत् ॥ १९ ॥

श्रीधर्मात्सुकुले जन्म, दीर्घायुर्बहुसम्पदः ।
निरोगता सुरूपत्वं, वाञ्छितासिश्च जायते ॥ २० ॥

आरोग्यभाग्यसौभाग्यसिद्धिबुद्धिसमृद्धयः ।
सकलत्रमित्रपुत्राः प्राप्यन्ते पूर्वपुण्यतः ॥ २१ ॥

आधयो व्याधयो विघ्नाः दुःस्वप्नाः कुग्रहा ग्रहाः ।
दुर्जना दुष्टशकुनाः, बाधन्ते नैव धर्मिणाम् ॥ २२ ॥

विलीयन्ते स्वयं विघ्नाः, हीयन्ते क्वापि न श्रियः ।
क्षीयन्ते शत्रवः सर्वे, प्रसादात्पुण्यभूपतेः ॥ २३ ॥

धर्मभूमिभुवं भव्य-भावं भजति यो भवी ।
क्वापि नो विपदस्तस्य, सम्पदस्तु पदे पदे ॥ २४ ॥

कमला विमला विद्याऽनवद्या विशदं यशः ।
मूर्तिः स्फूर्तिमती पुम्भिः लभ्यते शुभवैभवात् ॥ २५ ॥

सत्कर्मकारणं धर्मो, धर्मो लक्ष्मीप्रवर्धकः ।
कामसौख्यप्रदो धर्मो, धर्मो मोक्षाय कल्पते ॥ २६ ॥

सुरासुरनराधीश-सम्पदो वशवर्तिनी ।
कुर्वते हेलया तैर्यैः, सेव्यते धर्मवर्तिनी ॥ २७ ॥

लक्ष्मीः लक्षविपक्षाणां, क्षयोऽक्षुण्णा मृगेक्षणाः ।
रक्षः सल्लक्षणः पक्षो, दक्षत्वं पुण्यसाक्षिणः ॥ २८ ॥

रमाभोगाः समायोगाः, प्रियैर्भोगा अभङ्गुराः ।
रोगाभावा अनुद्वेगा, पुण्योद्योगानुगा अमी ॥ २९ ॥

ऐश्वर्यं शौर्यमौदार्यं, गाम्भीर्यं वर्यवीर्यता ।
चातुर्यं कार्यधुर्यत्वं, पुण्यप्राभाव्यजा गुणाः ॥ ३० ॥

प्रभा प्रभुत्वं प्रतिभा, प्रमदाः प्रमदप्रदाः ।
प्रत्यनीकप्रमाथित्वं, प्राणिः प्राप्नोति पुण्यतः ॥ ३१ ॥

तेजस्वित्वं यशस्वित्वं रूपस्वित्वं विदग्धता ।
सर्वकामाऽवाप्तिमत्त्वं, पुण्यात्संपद्यते सदा ॥ ३२ ॥

दीर्घमायुः स्थिरा लक्ष्मीः सुभगत्वमरोगता ।
सद्‌बुद्धिरथवा श्लाघ्या, जायते सुकृतोदयात् ॥ ३३ ॥

जन्ममृत्युजराचौरै-र्भवारण्यं भयङ्करम् ।
लङ्घयन्ति गुणानर्घ्य-धर्मकर्मपरा नराः ॥ ३४ ॥

रोगारिचौरनीराग्निगजसिंहभुजङ्गमाः ।
प्रेतवेतालभूताद्या, बाधयन्ति न धार्मिकान् ॥ ३५ ॥

पुष्पं सांसारिकं सौख्यं, छाया कीर्तेरतुच्छता ।
फलं सिद्धिपदं वृद्धिमीयुषो धर्मशाखिनः ॥ ३६ ॥

धर्मकल्पद्रुमच्छायामाश्रयध्वं बुधा यथा ।
पापतापा विशीर्यन्ते, पूर्यन्ते वाञ्छितानि च ॥ ३७ ॥

सेव्यः श्रीधर्मजीमूतो, ध्रुवं श्रावकचातकैः ।
कर्माष्टकाष्ठमसौस्थ्यं, दुःखं दैन्यं छिनत्ति यः ॥ ३८ ॥

युक्तो विवेकिचक्रस्य, स्नेहः श्रीधर्मभास्करे ।
रमारथाङ्गिसंयोगं, शं दत्ते यस्तमोरिपुः ॥ ३९ ॥

धर्मो यत्र धनं तत्र, समराशितया स्थितम् ।
यत्राधर्मो न तत्रेदं, नवपञ्चमयोगतः ॥ ४० ॥

रमां निरूपमां विद्यां, हृद्यां वाञ्छन्ति के नहि ? ।
अस्तोकसुकृतैः स्तोकैस्ते प्राप्यन्ते परं नरैः ॥ ४१ ॥

सर्वेऽपि सफलाः पुण्यौजसां पुंसां मनोरथाः ।
भवन्ति विफलाः विघ्नव्याधिव्यसनविद्विषः ॥ ४२ ॥

सुखमाद्यं वपुर्नीरुग्, द्वितीयमनृणं व्ययः ।
सुस्थानवासस्तृतीयं, चतुर्थं चाप्रवासिता ॥ ४३ ॥

पञ्चमं स्वधनं हस्ते, षष्ठं सज्जनसङ्गतिः ।
सप्तमं मधुरा वाणी, प्राप्यन्तेऽमूनि पुण्यतः ॥ ४४ ॥

सति दीपे यथा दीपो, धने सति यथा धनम् ।
शक्तौ सत्यां तथा धर्मो, धीमतां युज्यते न हि ? ॥ ४५ ॥

वीक्ष्य धर्मस्य दुर्भिक्षं, तिर्यङ्-नारक-नाकिषु ।
मानुष्ये धर्मसामग्र्यां, रङ्काघ्राणं विधत्त भोः ॥ ४६ ॥

अर्थकामापवर्गाः स्युः, प्रसन्ने पुण्यभूपतौ ।
तदभावोऽप्रसन्नेऽस्मिन्, यत् प्रियं तत्प्रणीयताम् ॥ ४७ ॥

मृण्मया अपि सिंहाश्च, पत्तयः सत्यरूपिणः ।
शातवाहनभूपस्य, पुण्यतो युधि जज्ञिरे ॥ ४८ ॥

सुखाय दुःखदं मूर्ख ! मा कृथा दुष्कृतं वृथा ।
कोऽपि किं जीविताकाङ्क्षी, विषं पिबति मृत्युदम् ॥ ४९ ॥

यथेन्दुः क्षीयते कृष्ण-पक्षे ध्वान्तं च वर्धते ।
तथा सौख्यमसौख्यं च, पुसां पापोदयेऽनिशम् ॥ ५० ॥

दुःख-दौर्गत्य-दौर्भाग्य-दास्य-दीनत्व-दुर्गतीः ।
प्राप्नोति पापतः प्राणी, तस्मात्पापं परित्यज ! ॥ ५१ ॥

शिलादित्यस्य तुरगो, विक्रमार्कस्य चाग्निकः ।
स्मृतोऽपि नागतः शत्रु-कष्टे पुण्यविपर्ययात् ॥ ५२ ॥

सर्वस्यापि प्रियं सौख्यं, दुःखं कस्यापि न प्रियम् ।
मुक्त्वेति दुःखदं पापं, धर्मं शर्मदमाश्रय ! ॥ ५३ ॥

कुर्वन्तः पातकं पश्चात्, न पश्यन्ति दुराशयाः ।
शोचन्ति पतिता दुःखे, वीक्ष्य शर्माणि धर्मिणाम् ॥ ५४ ॥

सुखं स्यात् पुण्यतो दुःखं, पापतो नात्र संशयः ।
लगन्ति निम्बे नाम्राणि, नाम्रे निम्बोलिका यतः ॥ ५५ ॥

सुखिनो दुःषमायां चेत्, सुषमायां च दुःखिनः ।
स्युः केऽपि केऽपि तत् पुण्य-पापदत्तसुखासुखे ॥ ५६ ॥

पुण्यसंपर्कतः सम्पद् विपत्पापप्रसङ्गतः ।
स्वयं सम्पद्यते पुंसां, कारणं नापरं तयोः ॥ ५७ ॥

रूपस्वित्वं कुरूपत्वं, लक्ष्मीवत्त्वं दरिद्रता ।
नीरोगित्वं च रोगित्वं, पुण्यपापफलं स्फुटम् ॥ ५८ ॥

सारं समस्तशास्त्राणां दध्नामिव नवोद्धृतम् ।
श्रीधर्मोपार्जनं पाप-वर्जनं च मतं सताम् ॥ ५९ ॥

सुखाभिलाषिणः सर्वे, जन्तवोऽत्र जगत्त्रये ।
न च धर्मं विना सौख्यं, न धर्मः स्यात् प्रमादतः ॥ ६० ॥

यान्ति ये दिवसा नैते, प्रत्यायान्तीति चिन्तयन् ।
सामग्रीं प्राप्य को धीमान्, श्रीधर्मे स्यात्प्रमद्वरः ॥ ६१ ॥

लब्ध्वापि धर्मसामग्रीं, ये प्रमाद्यन्ति दुर्धियः ।
पश्चात् शोचन्ति दुःखार्ता, भृशं ते शशिराजवत् ॥ ६२ ॥

ये धर्मसमये मूढाः, प्रमादे प्रेम कुर्वते।
ते विषीदन्ति निर्दैवादृष्टनष्टधना इव ॥ ६३ ॥

यः शत्रुः स्वीयमित्रेषु, यो मित्रं स्वीयशत्रुषु।
प्रमादेन समं तेन, वरं वैरं न सङ्गतिः ॥ ६४ ॥

स्वधर्मजीवितोच्छेदादिहामुत्र च दुःखदम्।
प्रमादमुद्यमास्त्रेण, धीरो हन्ति महारिपुम् ॥ ६५ ॥

प्रमादेन मनुष्याणां, न लक्ष्मीर्न सरस्वती।
न कीर्तिः सुगतिर्न स्यात्, प्राज्ञस्तेनोद्यमी भवेत् ॥ ६६ ॥

यथा सरोवरेष्वापः प्रासादे प्रतिमा यथा।
यथा कनीनिका नेत्रे, धर्मे श्रद्धा तथा मता ॥ ६७ ॥

विना गन्धं यथा पुष्पं, विना जीवं यथा वपुः।
विना दीप्तिं यथा रत्नं, धर्मः श्रद्धां विना तथा ॥ ६८ ॥

सकला सुलभा सम्पत्, सकला सुलभा कला।
सकला सुलभा विद्या, मतिर्धर्मेऽतिदुर्लभा ॥ ६९ ॥

यथा नीत्या नृपो मत्या, मन्त्री गत्या तुरङ्गमः।
धृत्या व्रती तथा धर्मो, श्रद्धया सर्वसिद्धये ॥ ७० ॥

निश्चिनोति फलं धर्मः सेव्यमानः सनिश्चयम्।
संदेग्धि फलमाराध्यमानोऽयं निश्चयं विना ॥ ७१ ॥

दानादिदेवपूजादि-दयाद्यावश्यकादिकम्।
कुर्वन् सनियमं पुण्य-कर्म तत्फलभाग् भवेत् ॥ ७२ ॥

श्रीवीरवाक्यतो मुक्त्वा, संशयं विशदाशया।
आराध्य विधिना धर्मं, जयन्ती मुक्तिमासदत् ॥ ७३ ॥

सम्यक्त्वेन विना धर्मो, विनाऽऽलोचनया तपः।
कल्पतेऽल्पफलायातः, प्रथमं तद् द्वयं श्रयेत् ॥ ७४ ॥

देवेऽर्हति गुरौ चारुक्रिये धर्मे दयोत्तमे ।
या रुचिः स्यात् समीचीना, तत् सम्यक्त्वमुदाहृतम् ॥ ७५ ॥

सम्यक्त्वदीपो दीप्येत, यदा हृदयमन्दिरे ।
तत्त्वधर्मस्थितिं जन्तुस्तदा प्रत्यक्षमीक्षते ॥ ७६ ॥

सम्यक्त्वं रत्नवत्प्राप्य, मिथ्यात्वविभवे भवे ।
भव्यस्तद् व्यवसायेन, शाश्वतीं श्रियमर्जयेत् ॥ ७७ ॥

यथाऽन्तर्वर्तिरोगस्य, नाङ्गे लगति जेमनम् ।
तथान्तः सातिचारस्य, न कृत्वाङ्गे बहिस्तपः ॥ ७८ ॥

मायामदविनिर्मुक्तैः शान्तचित्तैः समाहितैः ।
आलोचना किलादेया, रहः सद्गुरुसन्निधौ ॥ ७९ ॥

यस्मिन् पञ्चाधिरूढव्यास्ते महाव्रतमेरवः ।
प्रत्येकं चूलिका येषु, पञ्च पञ्च स्वभावनाः ॥ ८० ॥

विषयाः पञ्च सिंहाश्च, जेतव्या यत्र दुर्जयाः ।
तरणीयाः सदा पूर्णाः, पञ्चाचारमहाहृदाः ॥ ८१ ॥

भटनीयं क्रियाधाट्या, यत्र पञ्चप्रकारया ।
पञ्चत्वं पञ्च नेयाश्च, प्रमादाः पश्यतोहराः ॥ ८२ ॥

यत्र पञ्चनमस्कारः, स्थाप्यो हृत्पत्तने प्रभुः ।
पञ्चबाणो महाप्राणो, भेद्यस्त्रयोदयी रिपुः ॥ ८३ ॥

दीपनीयः सदा पञ्च-वर्तिस्वाध्यायदीपकः ।
पञ्चज्ञानावृत्तिध्वान्त-च्छिदे यत्र क्रियाशिखः ॥ ८४ ॥

यत्र पञ्चेन्द्रियव्याघ्राः, करणीया वशेऽनिशम् ।
अविश्रामश्च पञ्चम्या, गतेर्गन्तव्यमध्वनि ॥ ८५ ॥

प्रगल्भन्ते यतेर्धर्मं, तदङ्गीकर्तुमङ्गिनः ।
अहो केऽपि महासत्त्वाः, सत्वरं मुक्तिसङ्गिनः ॥ ८६ ॥

गेहिधर्मः सुखं साध्यो, यथाशक्तिविधानतः ।
तस्मिन्श्रद्धावताऽऽराध्या, शुद्धेयं द्वादशव्रती ॥ ८७ ॥

तथाहि-निर्मन्तवो न हन्तव्याः, सङ्कल्पात् त्रसजन्तवः ।
कन्यालीकादि नो वाच्यं, स्थूलासत्यं हि कर्हिचित् ॥ ८८ ॥

ग्राह्यं नादत्तमन्येषां, रत्नस्वर्णतृणादिकम् ।
नाब्रह्म सर्वथा सेव्यं, परिणीतस्त्रियं विना ॥ ८९ ॥

कार्यं निजेच्छया मानं, नवभेदे परिग्रहे ।
नोल्लङ्घनीया मर्यादा, कृता दिक्षु दशस्वपि ॥ ९० ॥

कर्तव्यं मानमन्नादि-स्त्र्यादिभोगोपभोगयोः ।
वर्जनीयोऽनर्थदण्डोऽपध्यानाचरितादिकः ॥ ९१ ॥

विधेयं विधिना सामा-यिकं च घटिकाद्वयम् ।
ह्रासाद् दिग्व्रतमानस्य, धार्यं देशावकाशिकम् ॥ ९२ ॥

चतुर्विधश्चतुष्पर्व्यां, प्रतिपाल्यश्च पौषधः ।
संविभागोऽतिथिभ्योऽयं, व्रतद्वादशके विधिः ॥ ९३ ॥

गृहिधर्मद्वादशात्मा, यदि चित्तोदयाचले ।
तत्त्वद्युतिरुदेति स्म, तदा भवतमोऽगमत् ॥ ९४ ॥

कर्मकाकारवोऽनश्यत्, मोक्षमार्गः स्फुटोऽभवत् ।
*विकसत्पुण्यपद्मौघः, सुप्रभातमजायत ॥ ९५ ॥*

दानतः सम्पदो भोगाः, शीलं सौभाग्यभाग्यदम् ।
तपः कर्मच्छिदे लब्धौ, भावः सर्वार्थसिद्धिकृत् ॥ ९६ ॥

प्रत्यूहोपशमः कीर्तिः, प्रतिष्ठा विश्ववश्यता ।
भोगाः स्वर्गापवर्गौ च, सर्वं सिद्ध्यति दानतः ॥ ९७ ॥

पूज्यन्ते जगति दिव्य-द्रुमणिकम्बुगोघटाः ।
काष्ठोपलास्थिपशुमृत्प्रकारा अपि दानतः ॥ ९८ ॥

भावशुद्ध्या वस्तुशुद्ध्या, पात्रशुद्ध्या प्रसाधितम् ।
दानमेकं नरस्वर्गा-पवर्गश्रीनिबन्धनम् ॥ ९९ ॥

सामर्थ्ये सति दानेन, सज्जने दुर्जने समः ।
यो नैवाऽजनि जानेऽस्य, वसुधायां मुधा जनिः ॥ १०० ॥

यत्कष्टमललाभेयं, कमलोक्ता ततो बुधैः ।
दाता नन्दति येनेदं दानं तद्दोषमोषकम् ॥ १०१ ॥

ते धन्यास्ते महात्मानस्तेषां विश्वे स्थितं यशः ।
यैरात्मोपार्जितं वित्तं, पुण्यकृत्ये नियोज्यते ॥ १०२ ॥

शालिभद्रः कृतपुण्यो, धन्या चन्दनबालिका ।
मूलदेवादयो दानात्, समृद्धिं लेभिरेऽद्भुताम् ॥ १०३ ॥

सान्निध्यं कुर्वते देवा, मित्रतां यान्ति शत्रवः ।
फलन्ति मन्त्रयन्त्राश्च, शीलादासाद्यते शिवम् ॥ १०४ ॥

कलावती-शीलवती-दमयन्त्यादयः स्त्रियः ।
सुदर्शनाद्याः पुरुषाः शीलतो विश्रुता भुवि ॥ १०५ ॥

क्षीयन्ते सर्वकर्माणि, जायन्ते सर्वलब्धयः ।
दुःसाध्यं साध्यते सर्वं, तपसाऽनल्पतेजसा ॥ १०६ ॥

नृपत्वं वासुदेवत्वं, चक्रवर्तित्वमिन्द्रता ।
तीर्थङ्करत्वं सिद्धत्वं, नाप्यते तपसा विना ॥ १०७ ॥

श्रीनन्दिषेणर्षिः शिवकुमाराद्यास्तपोगुणैः ।
भेजिरेऽद्भुत-सौभाग्य-भाग्य-भोगादिसम्पदः ॥ १०८ ॥

धर्मारामवसन्तर्तुः, कर्मकन्दकुठारिका ।
संसारसागरतरी, भावनैका विभाव्यताम् ॥ १०९ ॥

चक्रिश्रीभरतेलाति-पुत्रवल्कलचीरिणाम् ।
भावना केवलैवासीत्, केवलज्ञानदायिनी ॥ ११० ॥

विनयश्च विवेकश्च, द्वयं धर्मस्य साधनम् ।
तद्द्वयेन विना धर्मो, निर्मितोऽपि निरर्थकः ॥ १११ ॥

विद्या-विज्ञान-विश्वास-विभूति-विभुतादिकम् ।
गुणानामग्रणीः सर्वं, विधत्ते विनयो विशाम् ॥ ११२ ॥

विनयी लभते विद्यां, सविद्यस्तत्त्वमीक्षते ।
तत्त्वज्ञस्तनुते धर्मं, धर्मवान् सुखमश्नुते ॥ ११३ ॥

एका लक्ष्मीः परा विद्या, दानेन विनयेन च ।
सम्पन्ना सधवेव स्त्री, सर्वकल्याणकार्यकृत् ॥ ११४ ॥

रसनाश्रवणघ्राणे-क्षणान्वितः गुणोज्झितः ।
विवेकविकलो पञ्चे-न्द्रियोऽप्येकेन्द्रियायते ॥ ११५ ॥

स्थितं जैनमतास्थाने, व्रतपञ्चकुलाञ्चितम् ।
दानादिसैन्यसम्पन्नं, सर्वजीवदयाप्रदम् ॥ ११६ ॥

द्विरूपं धर्मभूपालं, विवेको धीसखः सुखम् ।
त्रयोदशाऽऽलस्यमुखान्, दण्डिनोऽपास्य दर्शयेत् ॥ ११७ ॥

स्वीयवित्तवयोवंश-महत्त्वावसरोचितम् ।
वेषं वचो विधिं तन्वन्, मान्यतामेति मानवः ॥ ११८ ॥

निजमातृपितृज्ञाति-गुरुदेववृषस्थितिः ।
नोचितज्ञा विमुञ्चन्ति, मर्यादामिव सिन्धवः ॥ ११९ ॥

गुरुविद्याकुलाचारैः, परतन्त्राः भवन्ति ये ।
स्वतन्त्राः सम्पदस्तेषामिहामुत्र गतापदः ॥ १२० ॥

यथा क्षयः कषायाणामिन्द्रियाणां यथा जयः ।
ससक्षेत्र्या यथा पोष-स्तथा धर्मो विधीयताम् ॥ १२१ ॥

ग्रीष्मवत्परितापाय, वर्षावत्पङ्कपुष्टये ।
हेमन्तवत्प्रकम्पाय, कोपोऽयं रिपुरुत्कटः ॥ १२२ ॥

गुणेन्दुमण्डलीराहु-स्तपोमार्तण्डदुर्दिनम् ।
क्रोधोऽयं सिद्धिविद्वेषी क्षमया योध्यतां बुधैः ॥ १२३ ॥

प्रोन्मूल्य विनयालानं, विघट्य गुणशृङ्खलाम् ।
भनक्ति मानमत्तेभो, धर्मारामं निरङ्कुशः ॥ १२४ ॥

येषां हृदि गुणद्वेषी, मानो नैवावतिष्ठते ।
तैरिहाश्रीयते श्रेयो, मानो मानोचितः सताम् ॥ १२५ ॥

माया मायाकृते मूर्ख ! मायामायापहामिमाम् ।
सन्तोऽसन्तोषभाजोऽपि सन्तः सन्तोषतः स्मृताः ॥ १२६ ॥

सत्यधाराधरे वात्या, दुर्ध्यानध्वान्तयामिनी ।
विश्वासाचलदम्भोली माया हेया हितार्थिना ॥ १२७ ॥

सन्ति क्षमान्विता मान-मुक्ता मायोज्झिता पुनः ।
न ज्ञायतेऽस्ति नास्तीति, निर्लोभः कोऽपि विष्टपे ? ॥ १२८ ॥

अर्तिकर्तिकया लोकं, क्षोभितं लोभरक्षसा ।
निरीक्ष्य रक्ष्यते दक्षैः, स्वात्मा संतोषरक्षया ॥ १२९ ॥

एते कषायाश्चत्त्वारः चतुर्गतिभवाध्वनि ।
सध्र्यञ्चः सर्वथा हेयाः प्राञ्चद्भिः पञ्चमीं गतिम् ॥ १३० ॥

क्षमा क्रोधाग्निपानीयं, मानाद्रौ मार्दवं पविः ।
मायातमोऽर्क ऋजुताऽनीहा लोभविषामृतम् ॥ १३१ ॥

सक्तः स्पर्शे करी मीनो, रसे गन्धे मधुव्रतः ।
रूपे पतङ्गो हरिणः, शब्दे व्यापादमाप्नुयात् ॥ १३२ ॥

श्रेयोविषयवृक्षाग्रे, व्यापार्येन्द्रियमर्कटान् ।
आत्मारामाश्रमाः कामं, निवृत्तिं यान्ति योगिनः ॥ १३३ ॥

सत्कर्मभूपभक्त्याप्त-ससक्षेत्रोर्वरासु ये ।
वपन्ति वित्तबीजानि, तेषां सस्यश्रियोऽतुषाः ॥ १३४ ॥

कार्ये कार्यान्तरं कुर्यादितरश्चतुरो यथा ।
धर्मं संसारकर्मान्तं, विदधाति सुधीस्तथा ॥ १३५ ॥

गेहापणाङ्गसत्कार-कुटुम्बोद्वाहवस्त्रजाः ।
षडारम्भा विना प्रत्यारम्भं पापाय गेहिनाम् ॥ १३६ ॥

प्रासादः पौषधागारं, देवार्चाऽऽस्तिकगौरवम् ।
तीर्थयात्रा सङ्घपूजा, प्रत्यारम्भाः शुभाय षट् ॥ १३७ ॥

निःस्वा जीवन्मृता जीवा, जीवन्तः स्वार्थसम्पदः ।
स्युर्जीवन्मृतजीवन्तो लक्ष्मीधर्मगुणान्विताः ॥ १३८ ॥

गङ्गाङ्घ्रौ श्रीपतेर्लग्नाऽऽरोहत् शीर्षं सतीपतेः ।
देवेष्वेवं यदि तदा, क्वाधने नरि गौरवम् ॥ १३९ ॥

जातिः कुलं कला शीलं, रूपं नैपुण्यमाकृतिः ।
धनमेकं विना सर्वं, वृथा निर्नाथसैन्यवत् ॥ १४० ॥

कष्टदा जीविका शोको, दीनता कोऽपि न स्वकः ।
पराभवोऽनिशं यस्मिन्, धिग् नैःस्वं विश्वदुःखदम् ॥ १४१ ॥

अलं कुलेन कलया, पूर्णरूपेण लक्षणैः ।
सृतं श्रुतेन शौर्येण, श्रीरेकाऽस्तु जगन्मता ॥ १४२ ॥

अकुल्यः सुकुलो मूर्खो, मनीषी दोषवान् गुणी ।
अनार्योऽपि सपर्यावान्, गीयतेऽधिष्ठितः श्रिया ॥ १४३ ॥

विवर्णो लब्धवर्णत्वं, बहुमानमनर्हणः ।
कनिष्ठो ज्येष्ठतां विन्देत्, पद्मादेवी प्रसादतः ॥ १४४ ॥

या स्वगात्रे स्वगोत्रे, सत्पात्रे नैवोपयुज्यते ।
सा क्षत्रैः क्षीयते लक्ष्मीर्भवद्वितयभर्त्सिता ॥ १४५ ॥

न्यायोपायाः श्रियो धर्मः, शुद्धो लज्जादयो गुणाः ।
त्रयं जगत्त्रयश्लाध्यं, लभ्यतेऽद्भुतभाग्यतः ॥ १४६ ॥

सात्त्विको यः श्रियं लब्ध्वा, कुर्वन्धर्मगुणोन्नतिम् ।
दानवान् विजयेताऽरीन्, स विश्वे पुरुषोत्तमः ॥ १४७ ॥

अर्था मूलमनर्थानामिति प्राहुर्मुधा बुधाः ।
यैः सर्वं साध्यते साध्य-मैहिकं पारलौकिकम् ॥ १४८ ॥

व्यवसायः श्रियै कार्यः, परं श्रीर्भाग्यतो भवेत् ।
भाग्यं च पुण्यतः पुण्यं, पापोच्छेदनकर्मतः ॥ १४९ ॥

पूजनं देवराजस्य, सद्गुरोः क्रमवन्दनम् ।
स्मरणं मन्त्रराजस्य, सर्वं पापं व्यपोहति ॥ १५० ॥

प्रभुः शरीरं प्रत्यात्मा, कर्मात्मानं प्रति प्रभुः ।
कर्म प्रति प्रभुश्चार्हन्, सतां मान्यः स नापरः ॥ १५१ ॥

चराचरजगद्व्यापी सदा चित्सम्पदास्पदम् ।
अचिन्त्यशक्तिसम्पन्नः, प्रभुरात्मा प्रसाद्यताम् ॥ १५२ ॥

वक्रोऽयमात्मानं दत्ते, निगोदं नरकादिकम् ।
अवक्रश्चक्रिशक्रादिपदं कर्मप्रभुर्बली ॥ १५३ ॥

इन्द्रोपेन्द्रनतोऽनर्घ्यः सङ्घसैन्योऽष्टकर्मजित् ।
भाति सातिशयो धर्म-चक्रवर्तिजिनप्रभुः ॥ १५४ ॥

जिनस्नात्रेण नैर्मल्यं, पूज्यत्वं जिनपूजनात् ।
जिनवन्दनतो विश्व-वन्द्यतामर्जयेत् कृती ॥ १५५ ॥

प्राचीनपुण्यसुप्रापा, चित्तचिन्तितदायिनी ।
विधिपूर्वा जिनाधीश-पूजा चिन्तामणीयते ॥ १५६ ॥

संसारश्रमसंहन्त्री, यच्छन्ती विश्ववाञ्छितम् ।
दुर्लभा कल्पवल्लीव, जिनार्चा परिचीयताम् ॥ १५७ ॥

शुद्धचित्तवपुर्वस्त्रै-श्चारुपुष्पाक्षतस्तवैः ।
जिनपूजां विधत्ते यो, भुक्तिं मुक्तिं स विन्दति ॥ १५८ ॥

निःशेषदुःखदलनी, सम्पत्तिसुखवर्धिनी ।
सम्यक्त्वशुद्धिजननी, श्रीजिनार्चा विरच्यताम् ॥ १५९ ॥

उत्तमं जन्म मानुष्यं, जैनो धर्मस्तदुत्तमः ।
देवपूजोत्तमा तत्र, तां कुर्यादुत्तमार्थदाम् ॥ १६० ॥

वपुः स्नानैर्मनः पूजा-श्रद्धया वचनं स्तवैः ।
त्रयं पवित्रीभवति, त्रिजगत्प्रभुपूजनात् ॥ १६१ ॥

विहायाष्टमदान् प्राति-हार्याष्टकभृतप्रभोः ।
पूजामष्टविधां कुर्वन्-नष्टकर्मजयी भवेत् ॥ १६२ ॥

ध्येयाः क्षीणाष्टकर्माणो, लब्धानन्तचतुष्टयाः ।
एकत्रिंशद्गुणाः पञ्च-दशभेदाः शिवं गताः ॥ १६३ ॥

गुणाष्टकयुजोऽशीति-भावमन्तो महोमयाः ।
लोकोर्ध्वस्थितयो मुक्तो-पमाः सिद्धाः प्रकीर्तिताः ॥ १६४ ॥

मुक्तजन्म-जरा-मृत्यु-रोग-शोक-भयार्तयः ।
विश्वातीतसुखाः सिद्धा, ध्यातव्या तत्पदाप्तये ॥ १६५ ॥

गुणाढ्यो गुप्तषट्कायो, रुग्जेता रुचिरार्थवाक् ।
गुरुर्निरुक्तः स प्राज्ञै-र्मान्यो ज्ञानक्रियोज्ज्वलः ॥ १६६ ॥

गृणाति धर्मतत्त्वं यो, गुरूते यश्च मुक्तये
हितः स्वपरयोः ज्ञेयः, स गुरुर्गौरवोचितः ॥ १६७ ॥

ये षट्त्रिंशत्सूरेर्गुण-दण्डायुधकृतश्रमाः ।
जयन्ति कुमतद्वेषि-गणं च रणतत्पराः ॥ १६८ ॥

क्षमावरा धर्मधरा, धीराः समितिसादराः ।
राजन्ते मुनिराजानस्तेषां भक्तिः शुभश्रिये ॥ १६९ ॥

उद्यच्छेत् श्रुतमध्येतुं, पाठ्यते संयतान् श्रुतम् ।
ध्यायेत् श्रुतं तदाचारे, यतते यः श्रुतोदिते ॥ १७० ॥

उपाध्यायो निरुक्तोऽसौ, पञ्चविंशतिसद्गुणः ।
मान्यते मुनिसार्थेन, श्रुतसामायिकार्थिना ॥ १७१ ॥

पराभूतभवानीका, ये महाव्रतिनोऽपि हि ।
सकलत्राऽपि प्रेक्ष्यन्ते, परित्यक्तपरिग्रहाः ॥ १७२ ॥

सप्तविंशतिनिर्ग्रन्थगुणसैन्यमनोहराः ।
अष्टादशसहस्रोरु-शीलाङ्गरथसुस्थिताः ॥ १७३ ॥

ससत्याचरणैर्भेदैः करणैरपि वर्मिताः ।
विजित्य वैरिणः पञ्च, प्रमादाः पञ्चसप्ततिः (?) ॥ १७४ ॥

कुर्वन्तः स्ववशां रत्न-त्रयीदूत्या शिवश्रियम् ।
वैराग्यरङ्गिणः सेव्याः, साधवोऽमी क्षमाभृतः ॥ १७५ ॥

क्रियावान् विनयी प्राज्ञः सौम्यः श्रीमान् स्थिरो वशी ।
एवं सप्तगुणः शिष्यो, गुरोः स्वस्यापि सम्पदे ॥ १७६ ॥

गुर्वाज्ञां मुकुटीकुर्वन्, गुरूक्तं कर्णपूरयन् ।
गुरुभक्तिं धरन् हारं, सुशिष्यः शोभते भृशम् ॥ १७७ ॥

सर्वतीर्थमयो वर्णै-र्ग्रहार्तिशमनः पदैः ।
जेता कर्माणि संपद्भि-र्भयभित् संयुताक्षरैः ॥ १७८ ॥

पञ्चध्येयपदैर्दत्ते, मन्त्रोऽयं पञ्चमीं गतिम् ।
चतुर्गतिं भवं छित्त्वा, चतुर्भिश्चूलिकापदैः ॥ १७९ ॥

सर्वार्थसाधकः सर्व-पापव्यापनिवारकः ।
स्मर्यते सर्वकार्येऽसौ, सर्वदा सर्वमन्त्रराट् ॥ १८० ॥

मन्त्रराजं स्वान्तराज-धान्यां राजयतीह यः ।
तस्योपसर्गसंसर्गो, नृवर्गस्य कदापि न ॥ १८१ ॥

येषां मनोवने मन्त्राधिपकल्पद्रुमो वसेत् ।
तेषां स्यादचलैश्वर्यं, विश्वे कल्याणशालिनाम् ॥ १८२ ॥

भूतौष्ट्रिकपौर्णिमिकागामिकाञ्चलिकादयः ।
दूषमादोषतो भेदा, मते जैनेऽपि जज्ञिरे ॥ १८३ ॥

मतिः प्रतिजनं भिन्ना, गम्भीरा भगवद्गिरः ।
विच्छित्तिर्ज्ञानिनां तस्मात्, सन्मतं मार्गमाश्रयेत् ॥ १८४ ॥

यत्र पञ्चनमस्कारो, यत्र सत्यदयादमाः ।
यत्र ज्ञानक्रिये तत्र, श्रीधर्मोऽस्तीति सन्मतम् ॥ १८५ ॥

मिथ्यावादपुषो हिंसाजुषोऽसंख्या यतः कलौ ।
स्तोकात्मरक्षकौ तेन, सत्यधर्मौ भृशं भृशौ ॥ १८६ ॥

तथा च लोके-अर्धो विंशोपकः सत्यं, धर्मःसार्धो विंशोपकः ।
पापं विंशोपका अष्टा-दशाः प्रोक्ता कलौ युगे ॥ १८७ ॥

स्थितौ जैनमते सत्यधर्मौ यौ तौ विंशोपकौ ।
वर्णाष्टादशके शेष-पापं मिथ्यात्वदूषिते ॥ १८८ ॥

न जैना यदि रक्षन्ति, सत्यधर्मौ प्रमादिनः ।
तदा पूर्णीभवत्पाप-बलेन कलिना जितम् ॥ १८९ ॥

श्राति धर्मश्रुतौ श्रद्धां, वपते क्षेत्रसप्तके ।
करोति शुद्धमाचारं, श्रावको निरवाचि सः ॥ १९० ॥

गुरौ गुरुत्वं श्राद्धेषु, स्मृतं सन्मार्गदेशनात् ।
श्रावकत्वं श्रावकेषु, गुरावेकान्तभक्तितः ॥ १९१ ॥

देवगुरुधर्मकार्ये, कुर्वन् हिंसामृषे अपि ।
निर्दोषोऽवाचि सिद्धान्ते, श्रावकः श्रमणोऽपि वा ॥ १९२ ॥

गुरुः स किं गुरुः ? श्राद्धः, स किं श्राद्धः प्रकथ्यते ? ।
परस्परं ययोः प्रीति-र्नैधते हिततेतुभिः ॥ १९३ ॥

श्राद्धा नृपा हि साधूनां, श्राद्धानां साधवो नृपाः ।
वनसिंहमुखघ्राणन्यायेनैव मिथो गुणः ॥ १९४ ॥

कायोत्सर्गी चतुर्मास्यामायात् सङ्घनृपाज्ञया ।
मेरौ विष्णुकुमारर्षिः शिक्षितुं नमुचिं न किम् ? ॥ १९५ ॥

माहेश्वरीपुरीं नीत्वा, श्रावकान् सेवकानिव ।
दुर्भिक्षे रक्षयामास, वज्रस्वामी गुरुर्न किम् ? ॥ १९६ ॥

गोदानं सत्यवाग्दानात्, सर्वेभ्यः सफलीकुरु ।
देहि सद्गुणपात्रेभ्यः, सुवर्णं विशदं यशः ॥ १९७ ॥

क्षमोक्ता रत्नगर्भा सा, कल्पतामक्षमावते ।
दीयते यत्नतो रत्न-त्रयी योग्याय रान्तिकैः ॥ १९८ ॥

नवश्रोतोमलक्लिन्नकायस्नाने किमात्मनः ।
मनः शुद्ध्यम्बुना स्नानं, कुर्वान्तरमलच्छिदे ॥ १९९ ॥

भैरवो रौद्रकर्माद्रिः, पातस्तस्मादधोगतौ ।
प्रोक्तो भैरवपातः स, निषेद्धुं केन शक्यते ? ॥ २०० ॥

वियोग-विभवाभाव-व्यलीक-व्याधि-विद्विषः ।
पञ्चाग्नयोऽमी दुःसह्याः, साध्याः कर्मच्छिदे सदा ॥ २०१ ॥

क्रोधमानमायालोभ-स्मराः पञ्चान्तराग्नयः ।
धर्मद्रुमान् भस्मयन्तः, साध्यतां श्रेयसे बुधैः ॥ २०२ ॥

पतिमृत्यौ-सुताभावे-निःस्वने यौवने गता ।
तपोग्निना स्वदुष्कर्म-काष्ठभर्क्षणमाचरेत् ॥ २०३ ॥

नोत्तमाः पुरुषा एव, नाधमा एव योषितः ।
उत्तमत्वं गुणैर्दोषैरधमत्वं द्वयोः समम् ॥ २०४ ॥

यतः-दमयन्तीं नलोऽत्याक्षीत्, सीतां रामो वनेऽमुचत् ।
नारक्षि पाण्डवैः कृष्णा, सुतारापि हरीन्दुना ॥ २०५ ॥

रावणोऽन्यस्त्रियं जह्रे, खाण्डवं चार्जुनोऽदहत् ।
महान्तोऽपि नरा एवं, दोषिणोऽन्यस्य का कथा ॥ २०६ ॥

पतिमार्यवधीत्कान्तं, नयनाली यशोधरम् ।
प्रदेशिनं सूर्यकान्ता, चुलणी चक्रिणं सुतम् ॥ २०७ ॥

श्वसुरं नुपूराभिज्ञाऽभयाराज्ञी सुदर्शनम् ।
चिक्षेप व्यसने चैवं, योषितोऽपि सदूषणाः ॥ २०८ ॥

तीरद्रुमाः प्रयच्छन्ति, फलं छिन्दन्ति चातपम् ।
तेभ्योऽपि निम्नगा द्रुह्येत्, सस्नेहा क्वापि न स्त्रियः ॥ २०९ ॥

क्षुरी-नारी-बहुकरी-श्रीखण्डी-खटिका-शुकी ।
प्राप्यन्ते घृष्टपृष्टां षट्, प्रायः परकरं गताः ॥ २१० ॥

तन्नास्ति विश्वे यद्वस्तु, रक्तैः स्त्रीभ्यो न दीयते ।
आस्तामन्यः स्वदेहार्धं, पार्वत्यै शम्भुरप्यदात् ॥ २११ ॥

अत्यन्तमिलितः स्त्रीभिर्नरो नारीत्वमश्नुते ।
लब्धं क्षिप्रचटीर्नाम, शालिभिर्दालिसङ्गतैः ॥ २१२ ॥

वरो गुणवरो धन्या, कन्या पक्षे द्वयेऽप्ययम् ।
संयोगः सर्वपुण्यैः स्यात्, पुनः पुण्यविवर्धकः ॥ २१३ ॥

वपुर्वंशो वयो वित्तं, विद्या विधिर्विदग्धता ।
विवेको विनयश्चेति, वरे वरगुणा अमी ॥ २१४ ॥

विकलाङ्गो विलक्ष्मीको, विद्याहीनो विरूपवाक् ।
विरोधी व्यसनासक्तो, वधूवधकरो वरः ॥ २१५ ॥

कुल्या कलावती कार्य-कल्पा कथितकारिणी ।
कलस्वरा कम्रकथा, कन्या कान्तकुलर्द्धये ॥ २१६ ॥

कुलक्षणा कालमुखी, कलाहीना कलिप्रिया ।
कटुस्वरा कटुकथा, कन्या कान्तकुलान्तकृत् ॥ २१७ ॥

यथा तडागीमहिष-श्चाक्रिकश्च यथा वृषः ।
यथा निगडबद्धांह्रिः, परिणीतः पुमांस्तथा ॥ २१८ ॥

परिणीतस्त्रियो भर्तृ-तत्कुटुम्बानुवर्तनम् ।
गृहकर्मास्वतन्त्रत्वं, प्रसवाद्यसुखं बहु ॥ २१९ ॥

प्रेमकाले यदि क्वापि, चपलोऽयं मनःकपिः ।
न स्थिरीक्रियते तर्हि, तदीशात्मा कथं सुखी ॥ २२० ॥

गृहं न भित्तिस्थूणाद्यं, प्रोच्यते गृहिणी गृहम् ।
यतोऽस्मादेव देवार्चा-दानपुण्यशुभोत्सवाः ॥ २२१ ॥

कल्याणकार्यधूर्यत्वं, श्रृङ्गारस्वाङ्गसत्क्रियाः ।
सनाथत्वं शुभा रीतिः, प्रायः स्यात् सत्प्रियात् स्त्रियः ॥ २२२ ॥

चारित्री क्रियया धर्मो, दयया छायया द्रुमः ।
तपस्वी क्षमया गेही, रमया तमया शशी ॥ २२३ ॥

कार्यं शक्त्या वाग्विलासो, युक्त्या भक्त्या विनेयकः ।
वेलया सागर इव, पुमान् भाति महेलया ॥ २२४ ॥

विना विवेकं सम्पत्ति-र्विद्या च विनयं विना ।
विना दानगुणं कीर्तिः, पृथ्वी पृथ्वीपतिं विना ॥ २२५ ॥

विना प्रतापं प्रभुता, वल्ली तरुवरं विना ।
विना रसं यथा वाणी, तथा नारी नरं विना ॥ २२६ ॥

अथान्यत्र समुत्पद्य, शालयो वप्रसंगतीः ।
लभन्ते फलसम्पत्तिं, तथा कन्या वराश्रिता ॥ २२७ ॥

फलन्ति कन्या सद्विद्या, प्रतिष्ठा शालयस्तथा ।
रसाद्भुते वरक्षेत्रे, योज्यन्ते यदि युक्तितः ॥ २२८ ॥

माता मातृष्वसा मातुलानी पितृष्वसा स्वसा ।
नात्मनीनस्तथा पुंसो, यथा जाया रुजादिषु ॥ २२९ ॥

श्रित्वा यथैधते वल्ली, पादपं मण्डपं वृतिम् ।
तथाङ्गनापि सङ्गत्य, पतिं पितरमात्मजम् ॥ २३० ॥

यथा पृथिव्याः सूर्येन्दु-दीपा दीप्तिकरा क्रमात् ।
काले निजनिजे नार्या, भर्तृभ्रातृसुतास्तथा ॥ २३१ ॥

सर्वे तीर्थङ्कराः सिद्धि-श्रीवरा विश्वशङ्कराः ।
वरवध्वोरिवाशीरन्, सुखसन्तानसम्पदः ॥ २३२ ॥

सुकुलं रूपमारोग्यं, सम्पदात्मेष्टसङ्गमः ।
येनादायि स वो देयात्, श्रीधर्मः पुनरीप्सितम् ॥ २३३ ॥

श्रियो न्यायोर्जिता भार्या, शीलवर्या सुहृद् गुणी ।
सुता भक्ता वपुर्नीरुक्, पुण्यात्पञ्च भवन्त्यमी ॥ २३४ ॥

अत्येति वन्ध्यता पित्रोः, परितुष्यन्ति बान्धवाः ।
त्यजति क्षामतां वंशो, येनापत्यं समुच्यते ॥ २३५ ॥

सपुत्रा याति निःस्वापि, शीर्षारुढा गृहान्तरे ।
तामपुत्रां जनो द्वारि, स्थितामाक्रामति क्रमैः ॥ २३६ ॥

यथा तरुवरो मूलै-र्यथा पाल्या सरोजलम् ।
यथा चावसथं स्तम्भैस्तथा पुत्रैः कुलं स्थिरम् ॥ २३७ ॥

भाग्यवान् यदि पुत्रः स्यात्, किं तत्सञ्चीयते धनम् ।
निर्भाग्यो यदि पुत्रः स्यात्, किं तत्सञ्चीयते धनम् ॥ २३८ ॥

फलैः शाखी जलैर्मेघो, जयैर्योद्धो नयैर्नृपः ।
छात्रैरध्यापकः पुत्रै-र्गृहस्थो भाति सान्वयः ॥ २३९ ॥

मलयश्चन्दनैर्विन्ध्यो, गजै रत्नैश्च रोहणः ।
तेजोभिस्तपनो गेही, सुतैर्भाति गुणान्वितैः ॥ २४० ॥

लोचनागोचरानर्थां-श्चर्मचक्षुर्न हीक्षते ।
विना शास्त्रदृशं तेना-धीते शास्त्रं सुधिषणः ॥ २४१ ॥

प्रज्ञा नौर्विनयं कूपं, श्रद्धासितपटं श्रिता ।
शास्त्रसागरमुत्तीर्य, नरं तत्त्वपुरं नयेत् ॥ २४२ ॥

कस्तुरीमलयो रत्नो-पलयोः पश्यदन्धयोः ।
जीवत्कबन्धयोर्ज्ञेय-मन्तरं दक्षमूर्खयोः ॥ २४३ ॥

अज्ञानध्वान्तसूराय, दुष्कृतामलजाह्नवे ।
तत्त्वसेवधिकल्पाय, शास्त्राय स्पृहयेन्न कः ॥ २४४ ॥

लज्जया दूषणत्यागो, लज्जया गुणसङ्ग्रहः।
लज्जयारब्धनिर्वाहः सर्वं सिद्ध्यति लज्जया ॥ २४५ ॥

लज्जया क्रियते धर्मः, पापान्मुच्यते लज्जया ।
पूज्यन्ते लज्जया मातृ-पितृदेवगुरूत्तमाः ॥ २४६ ॥

विवेक-विनय-न्याय-सत्य-शील-कुलक्रमाः ।
लज्जया प्रतिपाल्यन्ते, जनन्येव निजाङ्गजाः ॥ २४७ ॥

जायते दौर्जनी पीडा, सर्वः स्वार्थो विनश्यति ।
हानिमायाति माहात्म्य-मस्थाने लज्जया नृणाम् ॥ २४८ ॥

पुंसामसमये लज्जा, धर्मकामार्थहानये ।
प्रस्तावे सेविता सा तु, भवेत्सर्वार्थसिद्धये ॥ २४९ ॥

यथा स्वकाले सफला, शीततापाम्बुमारुताः ।
वेलायां निर्मितः श्रीमान्, धर्मोऽयं सफलस्तथा ॥ २५० ॥

मज्जनं भोजनं यानं, स्थानं शयनमासनम् ।
जल्पनं मौनमादानं, दानं कालोचितं मतम् ॥ २५१ ॥

पठनं गुणनं स्वामि-सेवनं द्रविणार्जनम् ।
कर्षणं वर्षणं क्रीडा, व्रीडा स्यात्समये श्रिये ॥ २५२ ॥

बभारावसरं ज्ञात्वा, विश्वरूपोऽपि केशवः ।
मात्स्यं रूपमतो धीमान्, समयोचितमाचरेत् ॥ २५३ ॥

प्रसन्नवदनं स्मेर-नेत्रे सम्भ्रमदर्शनम् ।
वार्ताभिलषिता रक्त-चित्तचिह्नचतुष्टयम् ॥ २५४ ॥

(अत्र त्रय श्लोका हस्तलिखितादर्शे न प्राप्ता)

शुदिचन्द्र इव स्नेहः, प्रत्यहं वर्धते सताम् ।
वदिचन्द्र इवान्येषां, हानिं याति दिने दिने ॥ २५८ ॥

राकाचन्द्राष्टमीचन्द्र-द्वितीयाचन्द्रवत् क्रमात् ।
स्त्रीपुंसोः प्रेम संपूर्ण-मध्यमस्वल्पपुण्ययोः ॥ २५९ ॥

चन्द्रः सतन्द्रः सूरोऽपि, दूरो भवति यत्प्रति ।
तत्प्रदीपस्तमो हन्ति, पात्रस्नेहदशोज्ज्वलः ॥ २६० ॥

स्वार्थस्नेहापि सा माता, भ्राता जाया सुतः सुहृत् ।
वैधुर्ये विघटन्तेऽमी, धर्मो बन्धुरयं ध्रुवः ॥ २६१ ॥

परोपकारः कर्तव्यो, धनेन वचमेन वा ।
शक्त्या युक्त्याथवा यस्मात्, कृत्यं नातः परं सताम् ॥ २६२ ॥

तैलक्षेपो यथा दीपे, जलसेको यथा द्रुमे ।
उपकारस्तथान्यस्मिन्, स्वोपकाराय कल्पते ॥ २६३ ॥

यथेन्दोः कौमुदी भानोः, प्रभा जलमुचो जलम् ।
महतामिह सम्पत्तिः, परोपकृतये तथा ॥ २६४ ॥

शत्रुभिर्विग्रही मित्र-संग्रही खलनिग्रही ।
सज्जनानुग्रही न्याय-ग्रही पञ्चग्रही महान् ॥ २६५ ॥

महान् कस्यापि नो वक्ति, स्वगुणं परदूषणम् ।
स्वमहिम्नैव सर्वत्र, मान्यते रत्नवत् पुनः ॥ २६६ ॥

यः सम्पद्यपि नोन्मादी, न विषादी विपद्यपि ।
परात्मसमसंवादी, स महान्मानवो मतः ॥ २६७ ॥

दुर्जनोदीरितैर्दोषै-र्गुणैर्मार्गणवर्णितैः ।
असतीदर्शितस्नेहैः, समानं महतां मनः ॥ २६८ ॥

सद्वृत्तिशशिनं पुण्य-श्रियं चारुवचः सुधाम्।
सत्त्वकामगवीं सूते, सज्जनोऽयं महोदधिः ॥ २६९ ॥

सर्वसाधारणः साधु-र्मधु-मेघार्कचन्द्रवत्।
स्वयं विधत्ते सर्वेषां, दोषोच्छेदं गुणोन्नतिम् ॥ २७० ॥

उपकारः प्रियं वाक्यं, सम्यग्स्नेहो गुणाग्रहः।
भवद्वयहिताचारः, पञ्च सज्जानि सज्जनैः ॥ २७१ ॥

दोषं परेषां भाषन्ते, साधवो नाधमा इव।
किरत्यवकरं क्वापि, किं हंसाः कुर्कुटा इव ? ॥ २७२ ॥

विबुधेष्टो भवाम्भोधौ, साधुरेकः सुधायते।
उग्रतेजो गलग्राही, खलो हालाहलायते ॥ २७३ ॥

कलौ कर्णेजपैः पूर्णे, शिष्टः कोऽपि न विष्टपे।
किं ग्रीष्मे काकसंकीर्णे, कासारे स्यात्सितच्छदः ? ॥ २७४ ॥

कुले कुले खलाः सन्ति, बहुला न हि सज्जनाः।
वने वने परे लक्षाः, परे वृक्षा न चन्दनाः ॥ २७५ ॥

दृश्यन्ते कोटिशो विश्वे, दुर्जना दोषपोषिणः।
नैकोऽपि सज्जनः कोऽपि, गुणग्रहणसज्जवाक् ॥ २७६ ॥

सर्वदोषाश्रया दुष्ट-हृदया विश्वविप्रियाः।
जल्पन्तोऽपि खला दुःख-मुलूका इव कुर्वते ॥ २७७ ॥

अपवित्रमुखा विश्व-कुत्सिता चरणोन्मुखाः।
पृष्ठौ दृष्टौ खलाः सर्वं, भषन्ति भषणा इव ॥ २७८ ॥

त्यक्त्वा सद्गुणवस्तुनि, किलानार्यैर्विकीर्यते।
परापवादावकरो, निःशूकैरिव शूकरैः ॥ २७९ ॥

चित्ते दुष्टा मुखे मिष्टा, स्वदोषे परदूषकाः।
प्रविश्यान्तर्जनं घ्नन्ति, विषमिश्रगुला खलाः ॥ २८० ॥

पुरीषं भषणः पङ्कं, मण्डुका भस्म रासभाः ।
परदोषान् खलः प्रायः, स्वभावात् परिचिन्वते ॥ २८१ ॥

चौराश्चौरं च दुःशीला, दुःशीलं साधु साधवः ।
ये यादृशा भवेयुस्ते, तादृशं मन्वते जगत् ॥ २८२ ॥

का सङ्ख्याकाशतारासु, का सङ्ख्या वार्द्धिवीचिषु ।
का सङ्ख्या घनधारासु, का सङ्ख्या दुर्जनोक्तिषु ? ॥ २८३ ॥

उलूकः शुकतां काको, हंसतां रासभोऽश्वताम् ।
महिषो हस्तितां नीचः, साधुतां नाश्नुति क्वचित् ॥ २८४ ॥

सैव लक्ष्मीवतां लक्ष्मीः, कला सैव कलावताम् ।
विद्या विद्यावतां सैव, जीयते दुर्जनो यया ॥ २८५ ॥

इदं पुण्यवतां पुण्यं, प्रतापोऽयं प्रतापिनाम् ।
मनीषिणां मनीषेयं, खण्ड्यते यत्खलाननम् ॥ २८६ ॥

खलजिह्वा त्वहेर्दंष्ट्रा, वृश्चिकस्य च कण्टकम् ।
युक्तिः शक्तिमतां विश्व-प्रीत्यै नैतदितीक्ष्यताम् ॥ २८७ ॥

जानाति विप्रियं वक्तुं, रमते निन्द्यकर्मसु ।
जहाति साधुसङ्गं यः, प्राज्ञैः प्रोक्तः स जारजः ॥ २८८ ॥

परदोषमविज्ञातं, विज्ञातं चाश्रुतं श्रुतम् ।
अदृष्टं दृष्टमाख्याति, जारजातो जनः स्फुटम् ॥ २८९ ॥

कल्पनात्परदोषस्य, परदोषस्य जल्पनात् ।
स्थापनात्परदोषस्य, परजातः परीक्ष्यताम् ॥ २९० ॥

पितृ-मातृ-गुरु-स्वामि-द्रोहिविश्वासघातकृत् ।
कृतघ्नो धर्मविघ्नो यः, सोऽन्यजन्मपुमान्मतः ॥ २९१ ॥

दोषवादी गुणाच्छदी, पूज्यपूजाविपर्ययी ।
निर्लज्जोऽकार्यसज्जः स्यात्, परजायाप्रियात्मजः ॥ २९२ ॥

अन्यायी १ पिशुनः २ पापी ३, बहुव्यापारस्त्रयः कलौ ।
खद्योत १ चर्मचटिका २ घुका ३ इव तमोभरे ॥ २९३ ॥

जितेन्द्रियो १ गुणग्राही २, परकार्यप्रियः ३ कलौ ।
त्रयोऽमी क्वापि नाप्यन्ते, सिंहपीयूषहंसवत् ॥ २९४ ॥

मन्त्र-यन्त्रौ-षधि-विद्या-मणीनां महिमाल्पकः ।
जने हीनायुरज्ञानं, नीचमानं कलौ युगे ॥ २९५ ॥

स्वके वैरं परे प्रीति-र्निःस्वता मतिमन्दता ।
सत्त्वाभावोऽभिमानित्वं, कलौ लोकेषु वीक्ष्यते ॥ २९६ ॥

वाणिज्या विफलाः सन्तो, विरलाः बहुलाः खलाः ।
मेघा मन्दफला भूमि-पाला लोभाकुलाः कलौ ॥ २९७ ॥

यतयः क्षत्रियाः षण्डो मेषा निःस्वामिका अमी ।
क्षिपन्ति दुःखिताः कालं, कलिकालप्रभावतः ॥ २९८ ॥

बाह्यं तपोऽभूदल्पिष्ठं, नष्टं चाभ्यन्तरं तपः ।
कलिप्रसङ्गो निःसङ्गेष्वपि के सङ्गिनोऽङ्गिनः ॥ २९९ ॥

गुर्वाज्ञाकारिता विद्या, क्रिया लज्जा धृतिः क्षमा ।
लक्ष्मीरिव कुभूपालः, साधुभ्योऽप्यहरत्कलिः ॥ ३०० ॥

नास्ति कश्चित्प्रभावज्ञः, सत्यधर्मस्य सन्मतिः ।
नास्तिकश्चित्प्रभावज्ञः, कलौ लोकोऽस्ति दुर्मतिः ॥ ३०१ ॥

बान्धवा हि रिपूयन्ते, दोषायन्ते गुणा अपि ।
विषायतेऽपि पीयूषं, विपरीते विधौ विशाम् ॥ ३०२ ॥

स्वकीयाः परकीयन्ति, न्यायोऽप्यन्यायतां श्रयेत् ।
सत्कारोऽपि तिरस्कारो, भवेदशुभदैवतः ॥ ३०३ ॥

पिशाचसङ्गी दिग्वासः, क्लीबः प्रेतवनप्रियः ।
विषादी स महेशोऽपि, विधौ वक्रे किलाभवत् ॥ ३०४ ॥

तेजोवानपि निस्तेजाः, कलावानपि निष्कलः ।
दुर्दिने जायते प्रायः, पुष्पदन्तौ निदर्शनम् ॥ ३०५ ॥

अन्यायोऽपि जयाय स्यात्, सानुकूले विधातरि ।
अत्रोदाहरणं मन्त्रान्धकुब्जौ राजतस्करौ ॥ ३०६ ॥

दत्ते पुण्यवते दैवो, नैवोत्पत्तिं कदापि ताम् ।
यत्र स्वाभिमतापूर्तिः, शत्रुस्फूर्तिश्च वीक्षते ॥ ३०७ ॥

प्रसिद्धिरात्मशुद्धिर्वा, नायतौ येन जायते ।
कार्यं न कार्यमार्येण, तत्कदापि कदाग्रहात् ॥ ३०८ ॥

मन्दारदाम्नि दौर्गन्ध्यं, क्षारत्वं क्षीरसागरे ।
काञ्चने कालिमा शिष्टे, दुष्टतानिष्टसिद्धये ॥ ३०९ ॥

यदि सिन्धुरमर्यादो, यदि मेरुश्चलाचलः ।
मार्तण्डो यदि खण्डः स्यात्, प्रतिकारोऽस्ति कस्तदा ॥ ३१० ॥

सन्नीरैश्चन्दनैः पुष्पैः, स्नात्वा लिप्त्वा विभूष्य च ।
परिधाय दुकूलानि, नार्हं क्षालावगाहनम् ॥ ३११ ॥

भुक्त्वा फलावलिं पूर्वं, खाद्यं मोदकमण्डकान् ।
कूरदाल्या च घोलानि, चुलुर्मूत्रेण नोचितः ॥ ३१२ ॥

आरुह्य हस्तिनं शस्तं, समर्थमथवा रथम् ।
तुरङ्गं वेगवन्तं वा, खरे नारोहणं वरम् ॥ ३१३ ॥

दोषः सत्योऽस्तु नैकोऽपि, कूटानां सन्तु कोटयः ।
कर्मबन्धो न वः सत्यैः, प्राक्कर्मणां क्षयश्च वः ॥ ३१४ ॥

वृतिश्चर्भटिकाचौरी, माता यस्याशिवङ्करी ।
सुधा च जीवितहरी, यदि कस्य तदोच्यते ? ॥ ३१५ ॥

दारिद्र्यं तनुते लक्ष्मीः, सूते मौर्ख्यं सरस्वती ।
दौर्भाग्यं कुरुते गौरी, यदि कस्य तदोच्यते ? ॥ ३१६ ॥

विधत्तेऽब्दो रजोवृष्टिं, चन्द्रस्तापं रविस्तमः ।
दोषाविर्भावमाप्नोति, यदि कस्य तदोच्यते ? ॥ ३१७ ॥

उत्तमाः सद्गुणैः पूर्णा मध्यमाः स्वल्पसद्गुणाः ।
अधमा गुणनिर्मुक्ताः त्रिधैवं भुवि मानवाः ॥ ३१८ ॥

रम्भा-राजादनी-निम्ब-फलप्रकृतयः क्रमात् ।
संपूर्ण-बाह्य-सञ्जात-माधुर्या मनुजास्त्रिधा ॥ ३१९ ॥

दोषान् सन्तोऽपि नो पश्ये, दसन्तोऽपि गुणान् वदेत् ।
अपकारकृतोऽपि स्या-दुपकर्ता किलोत्तमः ॥ ३२० ॥

पूर्णेन्दुरिव सद्वृत्तो, मार्गदर्शी दिनेशवत् ।
अम्भोधिरिव गम्भीरः, स्थिरो मेरुवदुत्तमः ॥ ३२१ ॥

परापवादं प्रवदेत्, पराभूतोऽपि नोत्तमः ।
क्षुधाक्षामोऽपि किं हंसो-ऽवकरं विकिरेत् क्वचित् ॥ ३२२ ॥

वीक्षते परदोषं यो, भाषते क्वापि नो पुनः ।
कृते प्रत्युपकुर्वीत, कीर्तिकामः स मध्यमः ॥ ३२३ ॥

धर्मार्थकामतुल्यात्मा, गीतनृत्यादिकौतुकी ।
मनाग्मनोवचः कायाऽभिन्नो भवति मध्यमः ॥ ३२४ ॥

परापराधं व्याकुर्यात्, स्वापराधमपह्नुयात् ।
क्षणं रुष्येत् क्षणं तुष्येत्, सन्धया विधुरोऽधमः ॥ ३२५ ॥

मन्ये परोपकारित्वमुत्तमादधमेऽधिकम् ।
येनापनीयते दोषरजोऽन्येषां स्वजिह्वया ॥ ३२६ ॥

परमान्नं शुनः कुक्षौ, जर्जरे कलशे जलम् ।
सिंहीपयः कुप्यपात्रेऽधमे गुह्यं न तिष्ठति ॥ ३२७ ॥

निर्भाग्यनिलये लक्ष्मी-र्विद्या विनयवर्जिते ।
अभव्यहृदि धर्मश्चाधमे गुह्यं न तिष्ठति ॥ ३२८ ॥

बूडद्वक्त्रा इवोद्बद्ध-वक्त्रा लोका इमेऽधमाः ।
जडोचितगुणैर्बद्धाः, क्षिप्यन्ते धिगधोगतौ ॥ ३२९ ॥

वपुषो भूषणं वक्त्रं, वक्त्रस्यालङ्कृतिर्वचः ।
वचसो मण्डनं सत्यं, धर्मः सत्येन शोभते ॥ ३३० ॥

सत्यं विघ्नाम्बुधौ सेतुः, सत्यं केतुः कुकर्मणाम् ।
सत्यं विश्वासिताहेतुः वचः सत्यं तदुच्यताम् ॥ ३३१ ॥

ध्यानमध्ययनं देव-पूजनं भजनं गुरोः ।
प्रत्याख्यानमनुष्ठानं, निष्फलं क्षमया विना ॥ ३३२ ॥

भवनीरनिधौ नौका, कर्मद्रुमकुठारिका ।
दर्शने मोक्षमार्गस्य, दीपिका पोष्यतां क्षमा ॥ ३३३ ॥

क्षमया तत्क्षणं क्षामी-कृतदुष्कर्मविद्विषः ।
दृढप्रहारिमेतार्यगजाद्या मुक्तिमेयरुः ॥ ३३४ ॥

पञ्च प्रतिभुवः कुर्वन्, कलाः सप्तदशाश्रयन् ।
जितैकविंशतिस्तेनो, राज्यं राजाश्नुते चिरम् ॥ ३३५ ॥

सत्कर्मरुचिरौचित्यं, ज्ञानं पुरुषसङ्ग्रहः ।
दानं सप्रभुता पञ्चैश्वर्यप्रतिभुवो मताः ॥ ३३६ ॥

मति-सत्त्व-गति-ज्ञानौदार्य-तेजो-नयोद्यमाः ।
मन्त्ररक्षण-सामर्थ्य-सुसहाय-कृतज्ञता ॥ ३३७ ॥

अस्तम्भताश्रितवात्सल्य-प्रतिपत्त्यनृशंसता ।
मित्रार्जनं प्रजारागो, प्रभुतायाः कला इमे ॥ ३३८ ॥

न्यायधर्मप्रतापेषु, प्रकृतौ योग्यकर्मसु ।
विमुखत्वमथाज्ञान-लज्जादानानृतानि च ॥ ३३९ ॥

अन्तरङ्गारिषड्वर्ग-व्यापो व्यसनसप्तकम् ।
अमी राज्याश्रयाश्चौरा, विज्ञेया एकविंशतिः ॥ ३४० ॥

प्रतिज्ञा प्रत्ययः प्रज्ञा, प्रतापश्च प्रसन्नता ।
प्रभा प्रसिद्धिर्यत्रैवं, प्रकाराः सप्त स प्रभुः ॥ ३४१ ॥

प्रिया यस्य कुमुद्वत्यो, यस्य दोषोदये रुचिः ।
कलङ्कितश्च यो राजा, साधुचक्रहितो न सः ॥ ३४२ ॥

दान-मान-क्षमा-शक्ति-युक्तिभिः स्वगणं नृपः ।
वशीकरोति यस्तस्यावश्यमैश्वर्यमेधते ॥ ३४३ ॥

प्रयुज्यते हितं राज्ञे, धार्यते धीचतुष्टयम् ।
नश्यन्ते व्यसना येन, प्रधानः सोऽभिधीयते ॥ ३४४ ॥

व्याप्नोति सर्वशौर्येण, पाति निम्नोन्नतं जनम् ।
रीयते रीतिमार्गञ्च, स व्यापारी प्ररूप्यते ॥ ३४५ ॥

सेवते स्वामिनं भक्त्या, वदति स्वामिनो गुणान् ।
करोति स्वामिकार्यं यः, सेवकः स निरूप्यते ॥ ३४६ ॥

प्रज्ञावान् विक्रमी स्वामि-भक्तोऽनुद्धतवेशभाक् ।
गम्भीरो मितभाषीति, षड्गुणः सेवको मतः ॥ ३४७ ॥

पुरुषं प्राज्ञपार्श्वस्थं, पराभवति नो परः ।
सविधस्थे बुधे चन्द्रं, बाधते किं विधुन्तुदः ॥ ३४८ ॥

सदूषणोऽपि तेजस्वी, न स्वीयस्त्याज्य उन्नतैः ।
किं क्वापि मुच्यते मेघैर्मेघाग्निर्जगदप्रियः ॥ ३४९ ॥

नरेन्द्रमान्या ये मन्त्री-श्वराः प्रवरगारुडाः ।
तै रुध्यते द्विजिह्वानां, दंष्ट्रा दौष्ट्यकरी सताम् ॥ ३५० ॥

खड्ग-खेटक-कोदण्ड-भस्त्र-भल्ल-गदाभृतः ।
बहवोऽत्र बहिर्वीरा, योद्धारो युधि पञ्चषाः ॥ ३५१ ॥

न सन्नाहा न शस्त्रौघाः, न हया न च हस्तिनः ।
नोद्भटाः सुभटाः किन्तु, न्यायधर्मौ जयप्रदौ ॥ ३५२ ॥

लेभिरे न्यायधर्माभ्यां, जयं पञ्चापि पाण्डवाः ।
पराजयं विना ताभ्यां, प्रापुः सर्वेऽपि कौरवाः ॥ ३५३ ॥

न शक्यन्ते विजेतुं यै, रिपवः षट् पुरः स्थिताः ।
दुरस्था वैरिणोऽनेके, तैर्जीयन्ते कथं जडैः ॥ ३५४ ॥

धर्मवर्मभृतो न्याय-हेतयः सत्यसङ्गराः ।
विजयन्ते सुखं धीराः, सर्वान् बाह्यान्तरान् द्विषः ॥ ३५५ ॥

अनङ्गोऽप्यङ्गिनां वर्मा-ण्येकोऽपि त्रिजगद्गतान् ।
बलीष्ठानबलास्त्रोऽपि, बाढं बध्नाति मन्मथः ॥ ३५६ ॥

मृगायते समग्रोऽपि, यदग्रे जगतीजनः ।
धर्मध्यानौजसा काम-केसरी स निरस्यताम् ॥ ३५७ ॥

ब्रह्मा-विष्णु-विरूपाक्ष-मुख्यानपि विगोप्य यः ।
स्वाज्ञामाधारयन्मारो, दुर्वारस्तं न विश्वसेत् ॥ ३५८ ॥

यो रागबडिशैर्बद्ध्वा, पुंस्त्रीमत्स्यान् भवाम्बुधौ ।
बाधते बहुधा दूरी-कुरु तं स्मरधीवरम् ॥ ३५९ ॥

रागद्वेषौ जितौ येन, जगत्त्रितयजित्वरौ ।
तमेकं सुभटं मन्ये, पराजितास्त्वतः परे ॥ ३६० ॥

ये भग्ना भवदुःखेभ्यो, ये मोक्षसुखकाङ्क्षिणः ।
तैरेव जेतुं शक्येते, रागद्वेषौ जगद्द्विषौ ॥ ३६१ ॥

रत्नत्रयं त्रिरूपोऽयं, हरते रागतस्करः ।
वैराग्यास्त्रेण तं जित्वा, भव्यः शिवपुरं व्रजेत् ॥ ३६२ ॥

मनोवने द्वेषदवो, दहन् सद्गुणभूरूहान् ।
सत्वरं समतानीरैः, शमनीयो मनीषिणा ॥ ३६३ ॥

मनो मध्यस्थताशुद्धं, वचो सत्यामृताञ्चितम् ।
सत्कर्मकर्मठः कायः, प्रायः पुण्यवतां भवेत् ॥ ३६४ ॥

मनःपवनवत्सर्व-जगद्व्यापिमहाबलम् ।
माध्यस्थ्ये सुधियः केऽपि, निबध्नन्ति दृताविव ॥ ३६५ ॥

प्रियं हितं हि चरितं,-गोः श्रेयो रसवृद्धये ।
अप्रियां हितवाक्चारिं, चारयेत् तां कृती न तत् ॥ ३६६ ॥

धन्यं मन्ये मनुष्येषु, तमेव भुवि यद्वपुः ।
कुव्यापारनिरभ्यास-मध्वन्यमनघाध्वनि ॥ ३६७ ॥

चतुर्दशांशकं चित्तं, वचनं चतुरंशकम् ।
शरीरं द्व्यंशकं प्रोक्तं, तत्त्वज्ञैः सर्वकर्मसु ॥ ३६८ ॥

तृष्णातरङ्गिणी चिन्ता-नीरपूरसुदुस्तरा ।
संतोषपोतैश्चारित्र-धारिभिस्तीर्यते सुखम् ॥ ३६९ ॥

दुर्वेव कदलीवेन्दु-मण्डलीव पुनः पुनः ।
खण्डीभूतापि सामग्रीं, प्राप्याशा परिवर्धते ॥ ३७० ॥

ध्रुवं चौरा इवातुच्छ-वाञ्छारज्जुनियन्त्रिताः ।
नैते संसारकारायाः, निःसरन्ति शरीरिणः ॥ ३७१ ॥

आशया वञ्च्यते विश्वं, न सा केनापि वञ्च्यते ।
नित्यं नवनवाकारा, विद्येव नवरूपिणी ॥ ३७२ ॥

स्वमनोमण्डपे काङ्क्षा-विषवल्लीं विचक्षणः ।
प्रसरन्तीं निरुन्धीत, पुण्यप्राणापहारिणीम् ॥ ३७३ ॥

श्लोक-काव्य-कथा-गाथा-गीत-षट्पद-दोधकाः ।
रसैकहेतवः पुंसां, न चिन्ताक्रान्तचेतसाम् ॥ ३७४ ॥

न स्यात् स्वादोऽन्नपानादे-र्देवगुर्वोश्च न स्मृतिः ।
चिन्तापिशाचीग्रस्तानां, नैहिकामुत्रिका क्रिया ॥ ३७५ ॥

स्वशब्दमर्थसन्तोषी, अर्थसिद्ध्या कृतार्थयेत् ।
एकस्वार्थमसन्तोषी, सर्वस्वार्थं विनाशयेत् ॥ ३७६ ॥

यथा मोक्षाय सम्यक्त्वं, धर्माय प्राणिनां दया।
युक्तिवाक्याय शास्त्रं स्यात्, सन्तोषः शर्मणे तथा ॥ ३७७ ॥

न वासरो विना सूरं, नोर्वरा वारिदं विना।
न संसारो विना नारीं, न संतोषं विना सुखम् ॥ ३७८ ॥

स्त्री-श्री-स्वाद्येषु लाम्पट्यं, संसारस्थितये स्मृतम्।
मुक्तये तेषु सन्तोषः, शेषः सर्वोऽपि विस्तरः ॥ ३७९ ॥

कटाक्षच्छायया नर्म-पुष्पैः प्रेमफलैः स्त्रियः।
शीलप्राणापहाः प्राज्ञैः, न सेव्याः विषवल्लीवत् ॥ ३८० ॥

सख्यो मायामृषासूयाः, रागद्वेषौ च बान्धवौ।
यस्यां पार्श्वेऽनिशं कस्तां, शिवार्थी सेवते स्त्रियम् ॥ ३८१ ॥

इन्दिरा मदिरा सेयं, यन्मत्तो मनुजस्त्यजेत्।
विवेक-विनयन्यायान् पतन् संसारचत्वरे ॥ ३८२ ॥

शाश्वतानन्तसिद्धिश्री-दर्शिरत्नत्रयी न हि।
अध्रुवश्रीलवाखर्वगर्वान्धेनाधिगम्यते ॥ ३८३ ॥

लोला लोलायते येषां, भक्ष्याभक्ष्येषु वस्तुषु।
दीना मीना इव क्लेशं, ते लभन्ते भवस्थले ॥ ३८४ ॥

नरोऽप्यवशजिह्वो यः सोऽन्नकीटोऽम्बुपूतरः।
जितजिह्वस्तु सन्तोष-सुधाहारः सुधायते ॥ ३८५ ॥

प्रायः सोपद्रवे स्थाने, वसन्ति पशवोऽपि न।
भवौकसि बहुक्लेशे, कृतिनां स्यात्कुतो रतिः ॥ ३८६ ॥

संसार-सन्निवेशोऽयं, सक्लेशो यदि नो भवेत्।
को यियासति तन्मुक्तिपुरीं धीमान् दवीयसीम् ॥ ३८७ ॥

यामुरीचक्रिरे तीर्थङ्करचक्रिबलादयः।
मुक्तिदूतीं मनस्वी तां, वृणीते चरणश्रियम् ॥ ३८८ ॥

चतुर्थपञ्चमज्ञान-वन्दनीयत्वमुक्तयः ।
कष्टकोट्यापि नाप्यन्ते, विनैकां संयमश्रियम् ॥ ३८९ ॥

सबलो निर्बलं हन्त्वा, देषा भाषा मृषा न हि ।
किं नैकः मनसाराद्ध-संयमो यमभीतिभित् ? ॥ ३९० ॥

वल्लीवृत्तैकवृक्षेऽस्ति, पुष्पमेकं फलद्वयम् ।
क्रमात्सुस्वादकुस्वादं, शुक्लकृष्णखगोचितम् ॥ ३९१ ॥

तनुर्वल्ली द्रुमो जीवः मनःपुष्पं शुभाशुभे ।
ध्याने फले सौख्यदुःखे, स्वादौ भव्येतरौ खगौ ॥ ३९२ ॥

केषाञ्चित् पञ्चपर्वी स्यादष्टमीपाक्षिके अथ ।
चातुर्मासं वार्षिकं वा, सर्वार्हं पर्व धर्मिणाम् ॥ ३९३ ॥

कार्या विशेषेण तथाऽप्यागमोक्तेषु पर्वसु ।
पौषधावश्यकतपो-जिनार्चागुरुवन्दनाः ॥ ३९४ ॥

पुण्यरक्षापुटी शुद्धा, येन बद्धान्तरात्मनि ।
तस्य क्षेमङ्करं सम्यग्, बलिपर्वाऽस्ति सर्वदा ॥ ३९५ ॥

कार्या विजययात्रेयं, दानं यत्राग्रजन्मनि ।
स्वाद्यते गुरुवाक्सौख्य-भक्षिका पूज्यते शमी ॥ ३९६ ॥

सुवस्त्रान्नगृहैः पुण्य-वतां दीपालिका सदा ।
वर्षान्ते स्वल्पपुण्यानां, निष्पुण्यानां कदापि न ॥ ३९७ ॥

यस्मिन् विवेकः श्रीखण्डं, धर्मरङ्गस्तु नागजम् ।
गुणाश्चूर्णचयः सन्त-स्तं वसन्तं वितन्वते ॥ ३९८ ॥

भवारिगर्हिणो दग्ध्वा, दुष्कर्मणां गुणोच्चयैः ।
रजो विकीर्य चित्रैरैः स्नात्वा कुर्वन्तु होलिकाम् ॥ ३९९ ॥

सौजन्यं लज्जा मर्यादा, गाम्भीर्यं धैर्यमार्जवम् ।
दया दक्षत्वमौदार्यं, निधीयन्ते गुणा नव ॥ ४०० ॥

सम्यक्त्व-समता-सत्य-सत्त्व-सन्तोष-संयमः ।
समाधिश्चेति साधूनां, सकाराः सप्त सौख्यदाः ॥ ४०१ ॥

भर्तृत्वं भक्तवात्सल्यं, भद्रकत्वं भटक्रिया ।
भरक्षमत्वं भाण्डं च, भकारा भाग्यभाजि षट् ॥ ४०२ ॥

दम-दान-दया-देवपूजा-दाक्षिण्य-दीप्तयः ।
दार्ढ्यदाक्ष्यदेहदिष्टा, दकारा दुर्लभा दश ॥ ४०३ ॥

दर्प-दर्पक-दारिद्र्य-दास्य-दुर्मति-दीनताः ।
दस्युर्दम्भो दरोऽदैवं, दकारा सुलभा दश ॥ ४०४ ॥

विद्या-विनय-विज्ञान-विमात्सर्य-विधिज्ञताः ।
विचार-विरती सप्त, विकारा व्रतिनां हिताः ॥ ४०५ ॥

विनोद-विकथा-वित्त-विधिच्युति-विरोधिताः ।
विगानं विषयाः सप्त, विकारा मुनिवैरिणः ॥ ४०६ ॥

बहुतुल्येऽधिकारेऽपि, कश्चिदेकः प्रसिद्धिभाक् ।
समाप्तसप्तधान्येषु, यवादिषु यवो यथा ॥ ४०७ ॥

लोकोऽवलोकते प्रायः, प्रसिद्धिं न गुणागुणौ ।
निर्गुणोऽपि शमी पूज्यो, नाम्रस्तु सुगुणोऽपि यत् ॥ ४०८ ॥

यतः-आमूलकुटिलःसुस्थदलः कण्टकसङ्कुलः ।
कुभूपाल इवासारः, बब्बुलो विफलः किल ॥ ४०९ ॥

कन्दे ह्यद्यतमो वर्णे, पूर्णः कल्याणवान् दले ।
फलेऽखिलरसो भाति, सहकारः सुभूपवत् ॥ ४१० ॥

व्याजान्मनोवचोऽङ्गेभ्यो, लात्वा पापधनं भुवि ।
तेभ्यो दत्ते स्वयं वृद्धान्, शोकानादेयतागदान् ॥ ४११ ॥

रोगोरगैरयं कायः, सापायश्चन्दनद्रुवत् ।
परं सुकृतसौरभ्यलाभान् मान्यो मनस्विनाम् ॥ ४१२ ॥

अथ कल्येऽथ मासान्ते, वर्षान्ते प्रलयेऽपि वा ।
कृतसत्कर्मणां मृत्योः, का शङ्काऽवश्यभाविनः ? ॥ ४१३ ॥

मर्तव्यं वर्ततेऽवश्यं; कर्तव्यं कुरु सत्वरम् ।
धर्तव्यं धर शक्तः सन्, स्मर्तव्यं स्मर सुस्थितः ॥ ४१४ ॥

रोगपात्रमिदं गात्रं, न स्थिरे धनयौवने ।
संयोगाश्च वियोगान्ताः, कर्तव्या सुकृते रतिः ॥ ४१५ ॥

सर्वसाधारणे मृत्यौ, कः शरण्यः शरीरिणः ।
श्रीमद्धर्मं विहायैकं, जन्ममृत्युजरापहम् ॥ ४१६ ॥

कालेन भक्ष्यते सर्वं, न स केनाऽपि भक्ष्यते ।
अनादिनिधनत्वेन, बलिष्ठो विष्टपत्रये ॥ ४१७ ॥

कवलीकुरुते कालः, त्रैलोक्यमखिलं सुखम् ।
अनाद्यनन्तरूपोऽयं, न केनाऽपि कवल्यते ॥ ४१८ ॥

षट्खण्डक्षितिपा यक्षाः, रत्नानि निधयः स्त्रियः ।
सद्वैद्याश्च वशे येषां, विपन्नास्तेऽपि चक्रिणः ॥ ४१९ ॥

येऽब्धिं चुलुकसात् मेरुं, दण्डसात् छत्रसान्महीम् ।
कर्तुं शक्ताः सुधाहारास्ते म्रियन्तेऽमरा अपि ॥ ४२० ॥

यत्पुरः किङ्करायन्ते, सुरासुरनरेश्वराः ।
तेऽपि तीर्थङ्करा विश्वप्रवरा न भुवि स्थिराः ॥ ४२१ ॥

अहो ! उच्छ्वासनिःश्वास-करपत्रगतागतैः ।
विदार्यमाणं मोहान्धैर्निजमायुर्न वीक्ष्यते ॥ ४२२ ॥

वर्धते हीयते विद्या, वित्तं स्नेहो यशो भुवि ।
मणिमन्त्रौषधियोगैर्वृद्धिहानी तु नायुषः ॥ ४२३ ॥

विनष्टनगरागार-कर्णालङ्करणादयः ।
प्रायः संस्कारमर्हन्ते, संस्कारो नायुषः पुनः ॥ ४२४ ॥

यथेन्द्रजालं स्वप्नो वा, बालधूलिगृहक्रिया ।
मृगतृष्णा चेन्द्रधनुः, तथा सांसारिकी स्थितिः ॥ ४२५ ॥

श्रीजिनाश्चक्रिणो रामा, विष्णवः प्रतिविष्णवः ।
महर्षयोऽपि कर्माग्नेर्नाछूटन् केऽपरे नराः ॥ ४२६ ॥

सत्वशाली हरिश्चन्द्रः, सत्यसन्धो युधिष्ठिरः ।
पुण्यश्लोको नलो न्यायी, रामोऽप्यास्कन्दि कर्मणा ॥ ४२७ ॥

कुर्वन्ते जन्तवः कर्म, स्वयमेव शुभाशुभम् ।
तत्फलं सुखदुःखं च, भुज्यते तत्परेण किम् ? ॥ ४२८ ॥

परेषु रोषतोषाभ्यां, कार्यसिद्धिर्न काचन ।
रुष्यते तुष्यते प्राज्ञैस्तस्मात्स्वकृतकर्मसु ॥ ४२९ ॥

कोऽपि कस्यापि नो सौख्यं, दुःखं वा दातुमीश्वरः ।
आरङ्कशक्रं लोकोऽयं भुङ्क्ते कर्म निजं निजम् ॥ ४३० ॥

कर्मकुम्भकृता तावत्, मृत्पिण्डा इव जन्तवः ।
भ्राम्यन्ते भवचक्रेऽमी, यावत्पात्रीभवन्ति न ॥ ४३१ ॥

तावत्कर्मकशाक्षिप्त-श्चतुर्गतिभवभ्रमी ।
जीवाश्वो नाश्नुते यावत्, स्वशक्त्या पञ्चमीं गतिम् ॥ ४३२ ॥

दुष्कर्मदोषतो दुःखी, मूर्खस्तदपि तत्प्रियः ।
दोषज्ञस्तदपोहाय, कामं सत्कर्मकर्मठः ॥ ४३३ ॥

शृङ्गारार्हकृति-स्नेह-गीत-नाटक-नर्तनैः ।
भोजनोत्सवचीरादौ, प्रबोधः कर्मलाघवात् ॥ ४३४ ॥

दानं देवार्चनं ध्यानं, दमो दीक्षा तपः क्रिया ।
कुर्वतामपि केषाञ्चित्, पातः स्यात्कर्मगौरवात् ॥ ४३५ ॥

श्रीसम्पूर्णो जयस्फूर्जद्भुजः सुन्दरविग्रहः ।
भूरिवर्ण्यगुणग्रामः, पुमान् सत्कर्मणा भवेत् ॥ ४३६ ॥

श्रीमत्सोमधर्मगणिविरचिता

# ॥ उपदेशसप्ततिः ॥

## प्रथमोऽधिकारः

श्रीसोमसुन्दरगुरूज्ज्वलकीर्त्तिपूरः, श्रीवर्द्धमानजिन एष शिवाय वः स्तात्
भव्या भवन्ति सुखिनो यदुदाहृतं श्रीचारित्ररत्नममलं परिपालयन्तः १

श्रीरत्नशेखरगुरुप्रवरा जयन्तु, नैकक्षमाधरनिषेव्यपदारविन्दाः ।
ऐदंयुगीनमुनिषु प्रवरक्रियेषु, श्रीसार्वभौमपदवीं दधतेऽधुना ये॥ २ ॥

कथाप्रबन्धादिषु भूरिविस्तरे-ष्वनादरं ये दधतेऽल्पमेधसः ।
हिताय तेषामुपदेशसप्ततिः, प्रारभ्यते सर्वजनोपयोगिनी ॥ ३ ॥

सम्यक्त्वमूलं देवादि-तत्त्वत्रयमुदाहृतम् ।
तस्य स्वरूपं ज्ञातव्यं, सम्यग्ध्येयं च तत्त्रिधा ॥ ४ ॥

देवतत्त्वे गुरौ तत्त्वे, धर्म्मतत्त्वे तृतीयके ।
द्वावेको द्वौ च वक्ष्यन्ते-ऽधिकारा अत्र पञ्च तु ॥ ५ ॥

पूजाचतुर्विशतिकाऽत्र वाच्या, प्राच्ये कियत्तीर्थनुतिद्वितीये ।
गुरुस्तृतीये द्विविधश्च धर्म-स्तुर्ये तथा पञ्चमकेऽधिकारे ॥ ६ ॥

अर्हद्गुणस्मृतिध्यान-यात्राचैत्यस्तवार्चनैः ।
सद्धर्म्मगुरुसेवाद्यैः, सम्यक्त्वस्थिरता भवेत् ॥ ७ ॥

प्रायः कुटुम्बधनधान्यसुवर्णरत्न-प्रायेषु वस्तुषु नृणां सुलभो विवेकः ।
सद्देवधर्म्मगुरुतत्त्वविवेचने तु, केषाञ्चिदेव मतिरुल्लसितं तनोति ८

विधीयमानं गुणवज्जनार्चनं पुंसामसीमास्तनुते सुसम्पदः ।
गुणाश्च सम्पूर्णतया जिनं विना, न स्युस्ततोऽर्च्यो भविकैर्जिनेश्वरः १।९

यज्जन्मावसरे देवा, देव्योऽनाकारिता अपि ।
आगत्य सर्वे कुर्वन्ति, प्रौढोत्सवपरम्पराः ॥ १।१० ॥

ज्ञानदर्शनचारित्रप्रमुखा सद्गुणावली ।
विलक्षणाऽन्यदेवेभ्यो, येषां जागर्त्यऽनुत्तरा ॥ १।११ ॥

जयत्यतिशयश्रेणी, यदीया जगदद्भूता ।
लक्षणानां दशशती, येषामष्टाधिका पुनः ॥ १।१२ ॥

येषां पञ्चाऽधिकत्रिंशद्वचनातिशयाः पुनः ।
भ्राजन्तेऽष्टाङ्गयोगश्च, येषां तादात्म्यमीयिवान् ॥ १।१३ ॥

यथावस्थितवस्तूनां, व्यवस्थापनतत्परम् ।
अनेकान्तमतं येषां, जागर्त्यद्यापि सिंहवत् ॥ १।१४ ॥

लोकेषु शान्तिकाद्यं, यच्च चतुस्त्रिंशिकादिलिखनेन ।
स जिनातिशयानां खलु, महिमा तत्संख्यया ज्ञेयः ॥ १।१५ ॥

इति सदतिशयसमृद्धिं, प्रतिप्रभातं जिनाधिनाथानाम् ।
ये संस्मरन्ति मनुजा-स्ते स्युः श्रेयोभिराढ्यतमाः ॥ १।१६ ॥

भो भव्या ! यदि वः शिवं जिगमिषा सम्यक्त्वमेकं तदा,
स्वस्वान्ते ध्रियतां स्थिरं किमपरैर्बाह्यक्रियाडम्बरैः ।
अन्तःसागरकोटिकोटिविहितायुर्वर्जकर्मस्थितौ,
यल्लभ्यं प्रतिभूश्च मोक्षविषये तस्मिन् कथं नादरः ? ॥ २।१७ ॥

बलादपि श्राद्धजनस्य दीयते, सद्दर्शनं सर्वसुखैकजन्मभु ।
व्यदीधपद्वीरजिनस्तदुद्यमं, श्रीगौतमेनापि न किं कृषीवले ? ॥ २।१८ ॥

श्रीवीतरागस्मरणैकताना, भवन्ति ये ते सुखभाजनं स्युः ।
यथाम्बिका रैवतदैवतं श्री-नेमिं स्मरन्ती भवति स्म देवी ॥ ३।१९ ॥

दुःखिनोऽपि न परित्यजन्ति ये, श्रीजिनार्चनविधावभिग्रहम् ।
धर्म्मकर्म्मणि रताः सुखान्विता-स्ते भवन्ति धनदः पुरा यथा॥ ४।२० ॥

अष्टप्रकारां मनुजा जिनार्चनां, सृजन्तु सिध्यन्ति यथाष्टसिद्धयः ।
सहोदरा अष्ट यथा महर्द्धय-श्छित्त्वाष्टकर्म्माणि शिवश्रियं श्रिताः ५।२१

भवन्ति पुंसां जिनपादवन्दना-ऽभिसन्धिमात्रादपि सौख्यसम्पदः ।
विवन्दिषुर्वीरजिनं स दर्दुरो-ऽप्यभून्महर्द्धिस्त्रिदशो यथा दिवि ६।२२

अल्पापि पूजा विहिता जिनेशितुः, फलं महत्किं न तनोति देहिनाम् ?।
कूष्माण्डवल्ली तनुकापि यच्छति, स्फारं फलं स्वाश्रितमानवेषु यत् २३

गूर्जरत्राभुवि त्राता, कुमारः परमार्हतः ।
अत्र चौलुक्यभूपालो, दृष्टान्तः परिकीर्त्यते ॥ ७।२४ ॥

अज्ञानभावादपि पूजितो जिनो, विश्राणयत्यात्मपदं नृणां यतः ।
अरण्यमध्यस्थितबिम्बपूजकः, स देवपालोऽपि हि मुक्तिमाप्तवान् ८।२५

जिनेन्द्रचन्द्रप्रतिमा तरीयते, निमज्जतां प्राणभृतां भवाम्बुधौ ।
तद्दर्शनादेव यतः प्रपन्नवान्, शय्यंभवः सूरिवरः सुदर्शनम् ॥ ९।२६ ॥

गतानुगत्यापि विधीयमाना, पूजा परां सम्पदमादधाति ।
चटत्प्रकर्षां प्रतिजन्म लक्ष्मीं, यथाऽऽप्य कीरोऽपि बभूव चक्री१०।२७

क्रोधोदयेऽप्यर्हति पूज्यमाने, भवेत्सुबोधिः सुलभो नराणाम् ।
दृष्टान्तमत्र प्रकटं वदन्ति, तं वामनं श्रेष्ठिवरं कवीन्द्राः ॥ ११।२८ ॥

नादपूजां वितन्वन्ति ये मानवाः, श्रीजिनेन्दोः स्थिरस्फीतभावोद्यताः ।
तीर्थकृत्त्वं लभन्तेऽद्भुतं ते यथा, रावणो राक्षसानामधीशः पुरा १२।२९

द्रव्यतोऽपि विहिता जिनपूजा, स्याच्छुभायतिकृते तनुभाजाम् ।
श्रीनमिं च विनमिं च मुनीन्द्राः, प्राहुरुत्तमनिदर्शनमत्र ॥ १३।३० ॥

हस्तात् प्रस्खलितं क्षितौ निपतितं लग्नं तथा पादयो-
र्यन्मूर्द्धोर्ध्वगतं धृतं कुवसनैर्नाभेरधो यद्धृतम् ।
स्पष्टं दुष्टजनैर्घनैरभिहतं यद्दूषितं कीटकै-
स्त्याज्यं तत्कुसुमं फलं दलमपि श्राद्धैर्जिनार्चाक्षणे ॥ १४।३१ ॥

पुष्पैरेवंविधैः पूजां, ये कुर्वन्ति जिनेशितुः ।
तेषां हीनकुले जन्म, भूवल्लभनरेन्द्रवत् ॥ १४।३२ ॥

विधाय दीपं जिनपुङ्गवाना-मग्रेऽथ सर्वं निजगेहकृत्यम् ।
तेनैव चेन्मन्दमतिः करोति, प्राप्नोति मूर्खः स कुयोनिभावम् १५।३३

चेतः पुनाति घनकर्म्मवनं लुनाति, स्वर्गं ददाति शिवसम्पदमादधाति ।
पुण्योदयं वितनुते (च)सुखानि(दत्ते), श्रीजैनपूजनमिदं किल किं न दत्ते ?

मिथ्यादृग्भव्यभावेन, पूजां कृत्वा जिनेशितुः ।
अशोको मालिको लेभे-ऽद्भूतां सौख्यपरम्पराम् ॥ १६।३५ ॥

गुणदोषाऽपरिज्ञानात्सर्वदेवेषु भक्तिमान् ।
यः स्यात् श्रीधरवत् पूर्वं, स तु नैवाश्नुते सुखम् ॥ १७।३६ ॥

निष्काङ्क्षमानसः साक्षा-ल्लभते स्वर्गसम्पदः ।
पश्चाद्यथा स एवेह, त्यक्ताकाङ्क्षोऽभवत्सुखी ॥ १७।३८ ॥

नैकाग्रचित्ताः परितन्वते ये, सुश्रावकाः श्रीजिनराजपूजाम् ।
ते हास्यपात्रं विदुषां भवन्ति, श्राद्धो यथाभूज्जिणहाभिधानः ॥ ३९ ॥

कुर्वन्ति देवद्रविणोपभोगं, ये ते नरा दुर्गतिगामिनः स्युः ।
कथानकान्यत्र बहूनि सन्ति, तथापि दिग्मात्रमुदाह्रियेत ॥ १९।४० ॥

ये सङ्कटेऽपि नियमं न परित्यजन्ति, ते वासवैरपि नराः परिपूजनीयाः ।
प्राप प्रसिद्धिमसमां वणिजो यथैकः, श्रीजैनपूजनविनिश्चयवान् धनाख्यः

नो मत्सरः क्वापि विवेकिभिर्जिन-प्रासादपूजादिकधर्मकर्मणि ।
कार्यो ह्यनर्थाय भवेदयं यथा, श्रीकुन्तलायाः समजायत स्फुटम्२२।४२

श्रीजिनेन्द्रक्रमाम्भोजपूजाविधि-ध्यानमात्रादपीष्टं लभन्ते सुखम् ।
सा यथा दुर्गता वीरतीर्थेशितुः, पूजनायोत्सुका देवभूयङ्गता २३।४३

विनापि भावं विहितः प्रणामो, जिनेषु न स्यादफलः कदापि ।
स दुःसुतः श्रेष्ठिवरस्य मीनो-ऽप्यापत् प्रबोधं यत उद्धतोऽपि २४।४४

## द्वितीयोऽधिकारः

समुद्धरन्ति प्रथमानसम्मदाः, केऽपि स्ववित्तैर्जिनमन्दिराण्यपि ।
यथा कृतार्थद्रविणः स सज्जनः, श्रीनेमिचैत्यं गिरिनारपर्वते २६।४५

आत्मीयतातप्रतिपन्नमर्थं, ये निर्वहन्ते तनयास्त एव ।
अमात्यमुख्योदयनस्य पुत्रौ, श्रीवाग्भटश्चाम्रभटो यथैव ॥ २६।४६ ॥

अथाम्रदेवोऽपि पितुर्निजस्य, श्रेयोनिमित्तं पुनरुद्दिधीर्षुः ।
शकुन्तिचैत्यं भृगुकच्छनाम्नि, पुरे गतो भूरिपरिच्छदेन ॥ २७।४७ ॥

येन त्रिषष्टिलक्षाभि-ष्टङ्ककानां व्यधाप्यत ।
गिरिनारगिरौ पद्या, स श्लाघ्यो भुवनत्रये ॥ २७।४८ ॥

मल्लिकार्जुनराजेन्द्रं, जित्वा प्रौढपराक्रमैः ।
रत्नाष्टकेन सुप्रीतं, भूपतिं यश्चकार च ॥ २७।४९ ॥

धन्याः पुमांसः स्पृहयालवः शिवं, निर्म्मापयन्त्यार्हतमन्दिराण्यपि ।
यथा स मन्त्री विमलोऽर्बुदे गिरौ, युगादिचैत्यं निरमापयत्सुधीः २८।५०

प्रासादं श्रीअर्हतां कारयन्तो, धन्याः पुण्यां सम्पदं प्राप्नुवन्ति ।
दृष्टान्तोऽत्र स्पष्टयते कोविदेन्द्रै-र्मन्त्री तेजःपालनामास्ति केन्द्रः २९।५१

श्रीजीरिकापल्लिपुरीनितम्बिनी, कण्ठस्थले हारतुलां दधाति यः ।
प्रणम्य तं पार्श्वजिनं प्रकाश्यते, तत्तीर्थसम्बन्धकथा यथाश्रुतम् ३०।५२

निर्म्मापितं जैनगृहं क्रमेण तीर्थं भवेदत्र यथा प्रसिद्धम् ।
अद्यापि सुश्रावकपारसेन, प्रवर्त्तितं श्रीफलवर्द्धितीर्थम् ॥ ३१।५३ ॥

निर्म्मापितं पासिलसंज्ञकेन, श्रद्धावता श्राद्धवरेण चैत्यम् ।
आरासणे श्रीगुरुदेवसूरि-प्रतिष्ठितं तीर्थमभूत्क्रमेण ॥ ३२।५४ ॥

प्रोद्दामममाहात्म्यरमाभिरामं, श्रीपार्श्वविश्वाधिपतिं प्रणम्य ।
यथाश्रुतं श्रीकलिकुण्डतीर्थो-त्पत्तिं भणिष्यामि गुरूपदेशात् ३३।५५

श्रीअन्तरिक्षप्रभुपार्श्वनाथः, श्रेयांसि स प्राणभृतां तनोतु ।
यदङ्गसम्पर्कि पयो निपीय, श्रीपालराजाऽजनि नष्टकुष्ठः ॥ ३४।५६ ॥

दुर्वारमारिप्रमुखोपसर्ग्गाः देवाधिदेवार्चनतः क्षयन्ति ।
श्रीशङ्कराख्यक्षितिपस्य यद्व-न्माणिक्यदेवं यजतो जिनेन्द्रम् ३५।५७

जयत्यसौ स्तम्भनपार्श्वनाथः, प्रभावपूरैः परितः सनाथः ।
स्फुटीचकाराऽभयदेवसूरि-र्यां भूमिमध्यस्थितमूर्त्तिमिद्धम् ३६।५८

जीर्णोद्धारं नूतनं वा जिनानां, ये प्रासादं कारयन्त्यास्तिकौघाः ।
ते स्युः पूज्या रामनामा यथेह, श्रेष्ठी श्रेयः श्रीनिवासो बभूव ३७।५९

धन्यस्य कस्यापि भवन्ति भाग्यतः, श्रीतीर्थयोगाः सकलेष्टदायिनः ।
तत्रापि सिद्धाचलभूरियं यया, हत्यादिदोषा अपि दूरतः कृताः ३८।६०

लक्ष्मीः कृतार्था खलु सैव या जिन-प्रासादपूजाद्युपयोगिनी भवेत् ।
सपादकोटीमणिना विभूषितं, हारं यथा श्रीजगडो व्यधापयत् ३९।६१

यात्रां सृजन्तो विदधत्यमात्रां, भक्तिं जिने ते सुखिनो नराः स्युः ।
शत्रुञ्जयादौ कृतपूर्विणस्तां, मुक्तिं ययुः श्रीभरतादयो यत् ॥ ४०।६२ ॥

श्रीतीर्थयात्रामतिमात्रभक्त्या, वितन्वते ये मनुजौघयुक्ताः ।
आभूरिव प्रौढसमृद्धियुक्ता-स्ते पूजनीया जगतां भवन्ति ॥ ४१।६३ ॥

## तृतीयोऽधिकारः

निवर्त्तयत्यन्यजनं प्रमादतः स्वयं च निष्पापपथे प्रवर्त्तते ।
गृणाति तत्त्वं हितमिच्छुरङ्गिनां, शिवार्थिनां यः स गुरुर्निगद्यते ४२।६४

ददाति यो वन्दनकानि पादयोः, श्रीमद्गुरूणां विनयेन भावितः ।
उच्चैः पदं तस्य न दुर्लभं भवे-दर्थेऽत्र कृष्णः क्रियते निदर्शनम्४३।६५

सम्यगृहृदयशुद्ध्या श्री-गुरुपादा निषेविताः ।
तुष्यन्त्यत्रोच्यते योगि-नागार्जुननिदर्शनम् ॥ ४४।६६ ॥

साधर्मिकास्था गुरुभक्तितीर्थो-न्नती निवृत्तिश्च परिग्रहादेः ।
अमी गुणाः पेथडदेवसाधो-र्यथा बभूवुर्न तथा परेषाम् ॥ ४५।६७ ॥

श्रीसूरयः केऽपि कलौ युगेऽभवन्, दीपा इव श्रीजिनशासनौकसि ।
अत्रोच्यते म्लेच्छपतिप्रबोधक-ज्जिनप्रभः सूरिवरो निदर्शनं ४६।६८

# चतुर्थोऽधिकारः

प्रातः समुत्थाय विहाय शय्या-मुपासकाः श्रीपरमेष्ठिमन्त्रम् ।
स्मरन्तु यस्मात्सकलेष्टयोगाः, श्रीदेववत् प्राग् भवतां भवन्ति ४७।६९

कषो भवः प्राणिगणस्य हिंसना-त्तस्याय एभ्यो भवतीति युक्तितः ।
उक्ताः कषाया भुजगा इवाङ्गिना-मेते कथं स्युः कुशलाय वर्द्धिताः

सकारणास्ते गतकारणा वा, विधीयमाना भववृद्धये स्युः ।
द्विरुक्तिकोद्वेजित एककुम्भकृद्यथावृथानर्थततीर्वितेनिवान् ॥ ४८।७१ ॥

तेष्वप्यसौ क्रोधदवानलोऽङ्गिनां, प्रज्वालयत्यद्भुतपुण्यकाननम् ।
आसेवितो यः स्वपरोपतापकृत्, भवेदिहामुत्र च सूरविप्रवत् ४९।७२

मानोऽपि मान्योऽस्तु मनस्विनां कथं, विडम्बयन्नष्टविधाभिरङ्गिनः ।
यं प्राप्य स क्ष्मापतिपुत्र उज्झिताभिधोऽपि जज्ञे निजजीवितोज्झितः

मायापिशाचीविवशा नरा ये, स्वार्थैकनिष्ठाः परवञ्चनानि ।
सृजन्ति तेऽधोगतयो भवन्ति, निदर्शनं त्वत्र स पापबुद्धिः॥ ५१।७४ ॥

यो द्वादशं यावदुपागतो गुण-स्थानं निषेधं स्थिरसंविदः सृजेत् ।
इहाप्यमुत्रापि विडम्बयेन्न कं, स लोभवैरी किल सागरं यथा ५२।७५

श्रीधर्म्मतत्त्वं गुणिनां नृणां पुरः, प्रोक्तं प्रदत्तं च हितावहं द्वयोः ।
तदुज्झितानां पुनरेतदुक्तयो, वृथाऽऽमकुम्भस्थपयोभरा यथा॥ ५३।७६ ॥

एकलज्जागुणेनापि, यद्यश्वो बहुमानितः ।
ये तु भूरिगुणैर्लोक-प्रियास्तेषां किमुच्यते ? ॥ ५३।७७ ॥

गुणान् गुणवतां प्रेक्ष्य, मत्सरस्तेषु नोचितः ।
कर्त्तुं विवेकिनामत्र, ब्राह्मणानां निदर्शनम् ॥ ५४।७८ ॥

लोकोत्तरा कापि वचःकला भवे-न्नृणां प्रभूते सति भाग्यवैभवे ।
वाग्मी कुरूपोऽपि नृपादिभिर्यतो, मान्यो भवेड्डामरदूतवत्पुमान्५५।७९

न्यायो नराणां परमं निधानं,न्यायेन विश्वानि सुखीभवन्ति,
न्यायोपपन्नं पुरुषं श्रयन्ति। श्रियः श्रवन्त्यः सरितामिवेशम् ५६।८०

श्रीरामनाम स्मरति प्रतिप्रगे, जनः समग्रो न तु रावणाऽभिधाम्।
पूर्वो ददौ किं जगृहे च किं परः सन्न्याय एवात्र बिभर्त्ति हेतुताम् ८१

सदाऽपि धर्मः फलदो नृणां मतो, विशेषतः पर्वदिनेषु निर्मितः।
प्रावृट्पयः सर्वमपीप्सितप्रदं, स्यात् स्वातिजं वारि तु मौक्तिकप्रदम्८२

प्रायेण बन्धं तु भविष्यदायुषो, वदन्ति यत् पर्वदिने जिनादयः।
विशिष्य धर्म्मे दृढता विलोक्यते, तस्मिंस्ततः सूर्ययशोनरेन्द्रवत् ५७।८३

आराध्यमानो विधिनैव दत्ते, धर्मः फलं नैव हठे कृतेऽपि।
न तं विना कामदुघापि दुग्धं, कृतव्ययस्यापि ददौ नृपस्य।। ५८।८४ ॥

यस्तामलिः षष्टिसहस्त्रवर्षा-वधि स्वरुच्या विदधे तपांसि।
अल्पं फलं सोऽपि विना विवेकाल्लेभे ततः किं बहुकष्टयोगैः ?५८।८५

कूरगडुमुनिर्नित्यभुक्तिसक्तोऽपि केवलम्।
लेभे विवेकसाहाय्याच्छ्रमणैरपि तैर्न तु ॥ ५८।८६ ॥

## पञ्चमोऽधिकारः

श्रीधर्म एव निधिरक्षय एष सौख्यश्रीणां हितः स्वपरयोश्च भवान्तरेऽपि
श्रीधर्मराजचरितं विनिशम्य सम्यक् कस्तत्र वा शिथिलमादरमातनोति

साम्राज्यमारोग्यमनेकसम्पदः, प्रधानरूपं शुभमायुरायतम्।
जीवाऽनुकम्पा परचेतसां नृणां, भवे भवे स्युः किमिहोच्यते बहु ८८

वेदे पुराणे स्मृतिषु प्ररूप्यते, यस्याः प्रधानत्वमनेककोविदैः।
विशिष्य तु श्रेष्ठतमे जिनागमे, कस्को न तां जीवदयां हि मन्यते ?८९

श्रूयते हि कपोतेन, शत्रुरप्यात्ममन्दिरैः।
प्राप्तो निमन्त्रितः स्वीय-मांसैः सदयचेतसा ॥ ६०।९० ॥

यस्याऽस्ति धर्म्मे दृढता पराभवं, न व्यन्तराद्या अपि तेषु कुर्वते ।
देवी च देवश्च वणिग्वरेण, न वञ्चितौ किं निजशुद्धबुद्ध्या ? ६१।९१

धर्म्मे प्रधाना यतना मनीषिभिः, प्ररूपिता सा गृहिणस्तु दुर्लभा ।
तथापि तस्यां यतमान आस्तिकः, स्यात्सौख्यभाक् सा मृगसुन्दरी यथा

विचार्य वाच्यं वचनं हितं मितं, न कर्कशं क्वापि निगद्यते बुधैः ।
अप्येकशः प्रोक्तकठोरवाक्यतो, न किं विगुप्तौ जननी सुतावपि॥ ९३ ॥

छिनद्मि हस्तौ चरणौ च लोचने, निष्काशयामि त्वमरे ! म्रियस्व वा ।
इत्यादयः कर्कशवाक्परम्परास्त्याज्या बुधैर्दुर्गतिमार्गदीपिकाः६३।९४

पूजात्रयावश्यकयुग्मरूपा, यो लग्नवत् प्रत्यहं पञ्च वेलाः ।
सत्यापयेत्स प्रवरस्तनूमान्, बुधैर्जगत्सिंह इव प्रशस्यः ॥ ६४।९५ ॥

श्लाघ्यस्तदीयतनयोऽपि वणिग्वरेण,
रुद्धोऽपि यो निजपितुः शपथं न चक्रे ।
श्रीदेवतीर्थगुरुराड्जनकादिकानां,
कार्ये महत्यपि यतः शपथो न कार्यः ॥ ६५।९६ ॥

हिंसा बुधैः प्राणवियोग उच्यते, प्राणाश्च बाह्या द्रविणानि देहिनाम् ।
हताश्च ते तेन हृतानि येन चा-ऽन्यस्वानि तक्ष्णोऽत्र निदर्शनं प्रिया ९७

विषयामिषलम्पटो जनः, सहतेऽत्रैव भवे विडम्बनाम् ।
यजमानविगोपितो यथा, लघुतां प्राप स तापसब्रुवः ॥ ६७।९८ ॥

परिग्रहप्रौढशिलावलम्बिनः, पतन्ति संसारमहाम्बुधौ जनाः ।
सन्तोषवज्रेण विभिद्य तां पुन-स्तरन्ति विद्यापतिवत्सुमेधसः ६८।९९

जिनमतानुगतैः प्रतिषिध्यते, रजनीभोजनमन्त्यजनोचितम् ।
स्वपरसामयिकोक्तिविवर्ज्जितं, तनुगुणं बहुदोषविशेषितम् ६९।१००

योगशास्त्रोदितां रात्रे-र्भोजने दोषसन्ततिम् ।
श्रुत्वा कस्तत्त्वविज्जन्तु-स्तत्र भोजनमाचरेत् ? ॥ ६९।१०१ ॥

रात्रिभुक्तेर्निश्चयस्या-ऽऽराधनेऽथ विराधने।
मित्रत्रयस्य दृष्टान्तः, प्रोच्यमानो निशम्यताम् ॥ ६९।१०२ ॥

सामायिकं स्यात्समताविहीनं, निरर्थकं भव्यजनास्तदेतत्।
आराध्यतां केसरिवद्धवद्धि-र्यथा समस्तानि सुखानि वः स्युः७०।१०३

भव्यैः प्रतिक्रमणमादरणीयमेत-द्यत्पञ्चधा जिनवरैर्गदितं हितार्थम्।
पापान्निवृत्तिरसकृत्सुकृते प्रवृत्तिरित्थं बुधैर्यदभिधार्थ उदीरितश्च ७१।१०४

दानादिधर्म्मस्य विशेषपोषं, धत्ते ततः पौषधमाहुरार्याः।
तं केऽपि धन्याः प्रतिपालयन्ति, यथा सुदत्तव्यवहारिधुर्यः ७२।१०५

वित्तानि पात्रेषु वपन्तु हे जनाः !, भवाभिलाषो यदि वो न विद्यते।
तादृक्षमक्षूणमसारसम्पदां, फलं हि दानादपरं न विद्यते ॥ ७३।१०६ ॥

गुणानुरागं गुणवज्जनेषु, साधर्म्मिकाणां सृजतां विधेयम्।
वात्सल्यमुत्फुल्लधियाऽऽस्तिकौघैः, श्रीदण्डवीर्येण यथा कृतं तत् ॥

श्रीज्ञानसाधारणवित्तमास्तिकैः, सङ्घानुमत्या न पुनर्निजेच्छया।
व्यापार्यमत्राऽपि जिनागमोदितं, श्राद्धद्वयोदाहरणं निगद्यते॥ ७५।१०८ ॥

आचार्यप्रवरश्रीमद्वर्धमानसूरिविरचितः

# ॥ धर्मरत्नकरण्डकः ॥

सर्वनीतिप्रणेतारं, सर्वधर्मप्रदर्शकम्।
सर्वविद्यालतामूलं नौमि श्रीनाभिनन्दनम् ॥ १ ॥

सर्वकर्मविनिर्मुक्तं, सर्वलोकैकभास्करम्।
सर्वामरनरैर्वन्द्यं, वन्दे वीरं जिनेश्वरम् ॥ २ ॥

अन्यानपि नमस्यामि, श्रीमतस्तीर्थनायकान्।
सिद्धांश्च सर्वसूरींश्च, वाचकांश्च मुनींस्तथा ॥ ३ ॥

एवं कृतनमस्कारः, स्वान्योरकृतिवाञ्छया ।
वक्ष्ये प्रकरणं नाम्ना, धर्मरत्नकरण्डकम् ॥ ४ ॥

धर्माधर्मौ १ जिने-पूजा २, गुरुभक्तिरकृत्रिमा ३ ।
परोपकारः ४ सन्तोषः ५, संसारासारतामतिः ६ ॥ ५ ॥

शोकशङ्कोः समुच्छेद ७ श्चेतसो निष्कषायिता ८ ।
सर्वलोकविरुद्धानां, दूरतः परिवर्जनम् ९ ॥ ६ ॥

दानं १० शीलं ११ तपो १२ भावः १३, शिष्टसङ्गो १४ विनीतता १५ ।
विषयेषु च वैमुख्यं १६, विवेको १७ मृदुभाषिता १८ ॥ ७ ॥

सर्वधर्मशिरोरत्नं, दयाधर्मः सदोत्तमः १९ ।
विधिवत्सङ्घपूजा च २०, सर्वत्रामी न सद्गुणाः ॥ ८ ॥

धर्माधर्मादिकामेनां, सङ्घपूजावसानिकाम् ।
वक्ष्येऽहमधिकाराणा - मानुपूर्व्येह विंशतिम् ॥ ९ ॥

धर्मः पुण्यं वृषः श्रेयः, सद्वृत्तं सुकृतं शुभम् ।
सदनुष्ठानमित्याद्याः, शब्दास्तुल्यार्थवाचकाः ॥ १० ॥

अधर्मः किल्बिषं पाप - मवद्यं दुष्कृतं तथा ।
दुरनुष्ठानमित्याद्याः, शब्दास्तुल्यार्थवाचकाः ॥ ११ ॥

मानुष्यं शोभनो देशः, शुभा जातिः शुभं कुलम् ।
सुरूपं दीर्घमायुष्य - मारोग्यं बुद्धिपाटवम् ॥ १२ ॥

कल्याणमित्रसंसर्गः, पापमित्रविवर्जनम् ।
शुश्रूषा सुश्रुतिश्चैव, सुकलत्रादिपरिच्छदः ॥ १३ ॥

अन्तरङ्गद्विषां मान्द्य - मौदार्यं पापभीरुता ।
सुनीतौ प्रीतिरित्याद्या, बहवो धर्महेतवः ॥ १४ ॥

कुदेशः कुत्सितो वासः, कुजातिः कुत्सिता गतिः ।
कुशास्त्राणि कुमित्राणि, कुकलत्रादिपरिच्छदः ॥ १५ ॥

कुश्रुतिः कुमतिश्चैव, कुविद्या कुत्सितो गुरुः ।
अत्यन्तमुत्कटो रागो, द्वेषो मोहश्च कुग्रहः ॥ १६ ॥

महारम्भो महादम्भो, महालोभो महामदः ।
कुनीतौ प्रीतिरित्याद्या, बहवः पापहेतवः ॥ १७ ॥

यत्राहिंसावचः सत्य-मस्तेयं ब्रह्मसेवनम् ।
सन्तोषश्च स विज्ञेयो, धर्मः सर्वज्ञभाषितः ॥ १८ ॥

यत्र हिंसा मृषा भाषा, चौर्यं मैथुनसेवनम् ।
महालोभश्च सोऽधर्मो, विज्ञेयो जिनदेशितः ॥ १९ ॥

सत्कुले जातिरारोग्यं, सौभाग्यं रूपसम्पदः ।
आयुर्दीर्घं वरा लक्ष्मीः कीर्तिर्विद्या वरस्त्रियः ॥ २० ॥

यदन्यदपि सद्वस्तु, सुन्दरं हृदयेप्सितम् ।
जीवानां जायते लोके, सर्वं धर्मस्य तत्फलम् ॥ २१ ॥

हीना जातिः सरोगत्वं, दरिद्रत्वं पराभवः ।
अल्पमायुः कुरूपत्वं, दौर्भाग्यं दीनवृत्तिता ॥ २२ ॥

यदन्यदपि वस्त्वत्र, प्राणभाजां न सुन्दरम् ।
दुःखाय जायते लोके, तत्सर्वं पापजृम्भितम् ॥ २३ ॥

निवृत्ताः सर्वपापेभ्यः प्रवृत्ता धर्मकर्मसु ।
इहैव धार्मिका लोकाः पूज्यन्ते मनुजामरैः ॥ २४ ॥

इहैव पापकर्माणि, कुर्वन्तः पापिनो जनाः ।
निन्द्यन्ते सर्वलोकेन, प्राप्यन्ते च कदर्थनाः ॥ २५ ॥

तस्मादधर्ममुत्सृज्य, धर्मे चित्तं निवेश्यताम् ।
स्वर्गापवर्गसंसर्ग - हेतुर्धर्मो यतोऽङ्गिनाम् ॥ २६ ॥

सेतुर्भवार्णवे धर्मो, दुर्गतिद्वाररोधकः ।
कृशानुः कर्मकान्तारे, निःश्रेणिः शिवमन्दिरे ॥ २७ ॥

सर्वापायविनिर्मुक्तः, सर्वशिष्टनिषेवितः ।
माभीः प्रदायको लोके, धर्म एव न चापरः ॥ २८ ॥

जननी जनको भ्राता, पुत्रः पुत्री सुहृद्धनम् ।
एतानि कृत्रिमाण्येव, धर्मः पुनरकृत्रिमः ॥ २९ ॥

तिष्ठन्त्यर्था गृहेष्वेव, श्मशानेषु च बान्धवाः ।
दत्त्वा जलाञ्जलिं भूयो, मोदन्ते गृहमागताः ॥ ३० ॥

परलोकप्रयाणस्थं, विमुक्तं मित्रबान्धवैः ।
धर्माधर्माविमं जीवं, गच्छन्तमनुगच्छतः ॥ ३१ ॥

यत्र यत्र प्रयात्येष, जीवो धर्मसहायकः ।
तत्र तत्रास्य सौख्यानि, जायन्ते चोत्तराः श्रियः ॥ ३२ ॥

यत्र यत्र प्रयात्येष, जीवः पापसमन्वितः ।
तत्र तत्रास्य दुःखानि, दारिद्र्यं च प्रजायते ॥ ३३ ॥

दुःखद्विषो जनाः सर्वे, सर्वेऽपि सुखलिप्सवः ।
सुखं च धर्मतः सर्वं, दुःखं पुनरधर्मतः ॥ ३४ ॥

जानन्तोऽप्येवमत्यर्थं, महामोहवशंगताः ।
सक्ताः सांसारिके सौख्ये, धर्म्यं कर्म न कुर्वते ॥ ३५ ॥

सुखे वैषयिके लुब्धाः, प्रार्थयन्तस्तदेव हिं ।
दुःसहान्यपि दुःखानि, गणयन्ति न देहिनः ॥ ३६ ॥

हस्त्यादिभ्यो महाभीतिं, विगणय्य विमूढधीः ।
मधुबिन्दुरसासक्तो, यथा कूपगतो नरः ॥ ३७ ॥

तदहो मानुषत्वादि - सामग्रीं प्राप्य दुर्लभाम् ।
सर्वसौख्यकरे जैने, धर्मे यत्नो विधीयताम् ॥ ३८ ॥

मानुषत्वं हि सद्धर्म-मूलनीवीसमं बुधैः ।
कथ्यते समये श्रेष्ठि - पुत्रत्रयनिदर्शनात् ॥ ३९ ॥

सम्प्राप्य मानुषं जन्म, दुर्लभं भवकोटिभिः ।
व्यापारितं सदा धर्मे, यैस्ते ह्यत्र नरोत्तमाः ॥ ४० ॥

गच्छतां दुर्गसंसार - मार्गे पर्यन्तवर्जिते ।
धर्मसम्बलमृते पुंसां, दुःषमानि पदे पदे ॥ ४१ ॥

सीदन्त्यत्र न यैर्धर्मः, सम्यगासेवितः पुरा ।
साम्प्रतं न च कुर्वन्ति, तेषामग्रेऽपि नो सुखम् ॥ ४२ ॥

तदेष भगवान् धर्मो, दुर्गतिगतधारकः ।
सद्भिः सदैव कर्तव्यः, सर्वसौख्यनिबन्धनम् ॥ ४३ ॥

धर्मो विजयी सर्वत्रा - ऽधर्मो विजयवर्जितः ।
ततोऽधर्मं परित्यज्य, धर्मे यत्नो विधीयताम् ॥ ४४ ॥

द्रव्यतो भावतश्चैव, द्विविधं देवतार्चनम् ।
द्रव्यतो जिनवेश्मादि, स्तुतिस्तोत्रादि भावतः ॥ ४५ ॥

अस्याधिकारिणो ज्ञेया, द्विविधस्याप्यगारिणः ।
प्रायो भावस्तवे चैव, साधूनामधिकारिता ॥ ४६ ॥

विधाप्य विधिना श्राद्धैः, सुन्दरं जिनमन्दिरम् ।
तत्र बिम्बं प्रतिष्ठाप्य, पूजयेत् प्रतिवासरम् ॥ ४७ ॥

विधिना शुचिभूतेन, काले सत्कुसुमादिभिः ।
स्तुतिस्तोत्रैश्च गम्भीरैः, कर्तव्यं जिनपूजनम् ॥ ४८ ॥

चारुपुष्पामिषस्तोत्रै - स्त्रिविधा जिनपूजना ।
पुष्पगन्धादिभिश्चान्यै - रष्टधेयं निगद्यते ॥ ४९ ॥

शुभैः सुगन्धिभिः पुष्पै - र्यः कुरुते जिनार्चनम् ।
स प्राप्नोति समं कीर्त्या, रत्नचन्द्र इव श्रियः ॥ ५० ॥

पुटपाकादिभिर्गन्धै - र्येऽर्चयन्ति जिनेश्वरम् ।
लभन्ते तेऽचिरात्सिद्धिं, रत्नसुन्दरवज्जनाः ॥ ५१ ॥

धूपं दहति यः सारं, भावसारं जिनाग्रतः ।
स याति लब्धसर्वर्द्धि - र्नरकेसरिवच्छिवम् ॥ ५२ ॥

प्रदीपयति यो भक्त्या, प्रदीपं जिनमन्दिरे ।
स हि स्यादखिलश्रीणां, भानुप्रभ इव प्रभुः ॥ ५३ ॥

योऽक्षतैरक्षतैः शुभ्रै - रर्हतां कुरुते बलिम् ।
कणसार इवात्यन्तं, वर्धतेऽसौ कणश्रिया ॥ ५४ ॥

जिनानामग्रतो दद्यात्, सुन्दराणि फलानि यः ।
फलवत्यः क्रियास्तस्य, भवन्ति फलसारवत् ॥ ५५ ॥

सुगन्धसर्पिषा यस्तु, करोति जिनमज्जनम् ।
सद्घृतभृतपात्राणि, स्थापयेद्वा तदग्रतः ॥ ५६ ॥

स गोधन इवोदग्रां, भुक्त्वा भोगपरम्पराम् ।
क्षीणनिःशेषकर्मांशः, प्रयाति परमां गतिम् ॥ ५७ ॥

यः स्नापयति बिम्बानि, सुगन्धवरवारिणा ।
सदम्भः पूर्णकुम्भान् वा, ढौकयेद्यस्तदग्रतः ॥ ५८ ॥

स प्राप्य सुन्दरां लक्ष्मीं, रससार इवेप्सिताः ।
सम्पूर्णधर्मसम्पत्त्या, ततो याति शिवालयम् ॥ ५९ ॥

अष्टस्वङ्गेषु वा पूजा, पुष्पैरष्टभिरर्हतः ।
विशुद्धप्रणिधानेन, कर्माष्टकक्षयङ्करी ॥ ६० ॥

अष्टकर्मविनिर्मुक्त - पूज्यसद्गुणसूचिका ।
अष्टपुष्पी समाख्याता, फलं भावनिबन्धनम् ॥ ६१ ॥

एकेनापि हि पुष्पेण, पूजा सर्वविदः कृता ।
त्रिजगत्यपि तन्नास्ति, वस्तु सद्यन्न यच्छति ॥ ६२ ॥

आदाय कुङ्कुमं रम्यं, कर्पूरोन्मिश्रचन्दनम् ।
विलेपनं जिनेन्द्रस्य धन्यैरेव विधीयते ॥ ६३ ॥

नानारत्नसमाकीर्णै - र्हारिहाटकनिर्मितैः ।
कण्ठकैः कुण्डलैः कान्तैः, कङ्कटैः कर्णपूरकैः ॥ ६४ ॥

हारिहारैर्महामूल्यैः, कङ्कणैर्बीजपूरकैः ।
सद्रत्नस्वर्णपद्मादि - भूषणैर्भवभेदिनम् ॥ ६५ ॥

शान्तं कान्तं शिवं सौम्यं, जिनबिम्बं यैर्न भूषितम् ।
श्रीणां कर्मकरा मूढा - स्ते नरा मूर्खशेखराः ॥ ६६ ॥

यदि ब्रूयान्नरः कोऽपि, पूजया किं प्रयोजनम् ।
वीतरागस्य ? वाच्योऽसौ, सत्यमेव त्वयोदितम् ॥ ६७ ॥

शीतोष्णकालयोर्यद्व - ज्जनो यत्नेन सेवते ।
जलानलौ तयोर्नैव, गुणः कोऽपि प्रजायते ॥ ६८ ॥

तथापीहोपकारोऽस्ति, तत्सेवाकारिणामलम् ।
एवमेव स विज्ञेयो, जिनपूजाविधायिनाम् ॥ ६९ ॥

रागद्वेषसमुद्भूत - ग्रन्थेरत्यन्तदुर्भिदः ।
यदि भो ! भेदने वाञ्छा, कुरुध्वं तज्जिनार्चनम् ॥ ७० ॥

जिनार्चनान्महापुण्यं, महापुण्याच्च सम्पदः ।
सम्पदः शिष्टलोकस्य, स्वर्गमोक्षप्रसाधिकाः ॥ ७१ ॥

प्राणैः प्राहुणकप्रायैः, विशरारुणि शरीरके ।
करिकर्णचले वित्ते, चित्ते चिन्तासमाकुले ॥ ७२ ॥

एतदेव हि साफल्यं, जन्मजीवितयोर्जनाः ! ।
यज्जिने क्रियते पूजा, त्रिसन्ध्यं शुद्धचेतसा ॥ ७३ ॥

जिनं पूजयतो यस्य, यान्त्यहानि निरन्तरम् ।
तस्यैव सफलं वित्तं, स पुमान् स च पण्डितः ॥ ७४ ॥

प्रणिधानमपि प्राहु - र्जिनपूजनगोचरम् ।
स्वर्गादिसाधनायालं, दुर्गताया इव स्त्रियः ॥ ७५ ॥

ऐश्वर्येणापि किं तेन, किं प्रभुत्वेन भूयसा ।
पाण्डित्येनापि किं तेन ?, जिनो यत्र न पूज्यते ॥ ७६ ॥

गुरुभक्तिर्भवाम्भोधे - स्तारिका दुःखवारिका ।
धन्यानां वर्तते चित्ते, प्रत्यहं नौरिव दृढा ॥ ७७ ॥

यत्र शिष्टसमाचारो, यत्र धर्मव्यवस्थितिः ।
तत्राविगानतो दृष्टं, गुरुतत्त्वं विचक्षणैः ॥ ७८ ॥

प्रथमान्तिमतीर्थेशै - स्तीर्थकृन्नामकर्मणः ।
बीजं लब्धमटव्यां यद् - गुरुभक्तिस्तत्र कारणम् ॥ ७९ ॥

पापोपहतबुद्धीनां, येषां चेतसि न स्थिता ।
गुरुभक्तिः कुतस्तेषां, सम्यग्दर्शनमुत्तमम् ॥ ८० ॥

तद्भावादुत्तरो धर्मः, साधुश्रावकलक्षणः ।
तस्मान्मिथ्यादृशः पापाः, साधुनिह्नवकारिणः ॥ ८१ ॥

न विना साधुभिस्तीर्थं नाऽतीर्थे साधुसम्भवः ।
समं सत्ता तयोर्गीता, सर्वज्ञैः सर्वदर्शिभिः ॥ ८२ ॥

अद्यापि दुःषमाकाले, यावद्दुष्प्रसहप्रभुः ।
तावच्चरणसत्तापि, भगवद्वाक्यतः स्थिता ॥ ८३ ॥

कृत्यमार्गोपदेष्टारो, यत्र सन्ति न साधवः ।
न तत्र धर्मनामापि, कुतो धर्मः कुतः क्रिया ? ॥ ८४ ॥

क्षमादिब्रह्मपर्यन्त - गुणरत्नैरलङ्कृताः ।
साधवः कलिकालेऽपि, चलन्तः कल्पपादपाः ॥ ८५ ॥

कल्पपादपतुल्येषु, ये साधु(षु)पराङ्मुखाः ।
आत्मद्रुहो निर्मर्यादा - स्ते नरा नरकोन्मुखाः ॥ ८६ ॥

गौरव्या गुरवो मान्या, धर्ममार्गोपदेशकाः ।
सेवनीयाः प्रयत्नेन, संसाराम्बुधिसेतवः ॥ ८७ ॥

[श्रोतव्यं शुद्धसिद्धान्त -सारं च साधुभ्य: सदा ।
तथा तदनुसारेण, विधेया सदनुष्ठिति: ॥ ८८ ।

कार्यश्च सदौदासीन्य - भावपरिहारस्तथा ।
निन्दाऽश्रवणं दोषेषु, मूकता दुष्टनिग्रह: ॥ ८९ ।

सदाचारप्रमत्तानां, मतमेकान्तशिक्षणम् ।
यथाऽन्योऽपि न जानाति, तथा हितं मिताक्षरैः] ॥ ९० ।

अत्रार्थे श्रेणिको ज्ञात - मभयश्च महामति: ।
धर्मदृढमना आद्यो, द्वितीय: स्थिरकारक: ॥ ९१ ॥

तिलानां यादृशो वास - स्तैलस्यापि च तादृश: ।
एवंविधा च सङ्गीता, जिनैर्बोधिर्भवान्तरे ॥ ९२ ॥

चौरयुग्ममिह ज्ञातं, वासनाविषये मतम् ।
एकस्य सुलभा बोधि - र्द्वितीयस्य च दुर्लभा ॥ ९३ ॥

सर्वदा मानसे येषां, गुरुभक्तिर्गरीयसी ।
पुण्यानुबन्धिपुण्येन, तेषां जन्मेह गीयते ॥ ९४ ॥

औदासीन्यं गुरौ येषा - मृद्धयादि च विलोक्यते ।
पापानुबन्धिपुण्येन, तेषां जन्म निगद्यते ॥ ९५ ॥

अभक्तिर्मानसे येषां, गुरौ भवति भूयसी ।
पापानुबन्धिपापेन, तेषां जन्मेति लक्ष्यते ॥ ९६ ॥

पूर्वं कृता करिष्याम:, साम्प्रतं व्याकुला वयम् ।
गुरुभक्तिं प्रति प्रोचु-र्ये तेषां ननु विस्मृता ॥ ९७ ॥

कालरात्रिर्यकारूढा, अविज्ञातसमागमा
समाप्यते क्षणादेव, यस्यां कार्यपरम्परा ॥ ९८ ॥

किं बहुना विचारेण, यदि कार्यं सुखैर्जना: ।
तत्सर्वकुग्रहत्यागाद्-गुरुभक्तिर्विधीयताम् ॥ ९९ ॥

उत्पद्यन्ते विनश्यन्ति, कोटिशः क्षुद्रजन्तवः ।
परार्थबद्धबुद्धीनां, सतां पुण्यैः समुद्भवः ॥ १०० ॥

परोपकारप्रवणाः, सदा स्वार्थपराङ्मुखाः ।
क्वचित्क्वचिद्विलोक्यन्ते, विरलाः सज्जना जनाः ॥ १०१ ॥

जन्मापि च प्रमोदाय, शोकाय च तदत्ययः ।
अशिष्टानां तु लोकाना - मुभयस्मिन् विपर्ययः ॥ १०२ ॥

धराधरा महीयांसो, गम्भीरा वारिराशयः ।
तथापि च समं शिष्टै - रौपम्यं लेभिरे न ते ॥ १०३ ॥

येषां चित्तं च वित्तं च, वचः कायो विनश्वरः ।
परेषामुपकाराय, वेधसेह विनिर्मितः ॥ १०४ ॥

आत्मानं दुःस्थितं कृत्वा, परं कुर्वन्ति सुस्थितम् ।
यथा वृक्षास्तथा सन्तः, परोपकृतये रताः ॥ १०५ ॥

छायया सुखयन्त्यन्यं, सहन्ते स्वयमातपम् ।
पुष्पन्ति च परस्यार्थे, फलन्ति च महाद्रुमाः ॥ १०६ ॥

स्वोदरं भ्रियते कष्टा - द्दिनान्ते वायसैरपि ।
परार्थकरणासक्तो, यो जीवति स जीवति ॥ १०७ ॥

क्लेशेनोपार्ज्य वित्तानि, ददुर्धर्मे नरोत्तमाः ।
यथा लोकोपकाराय, पयः पीत्वा पयोधराः ॥ १०८ ॥

कथं सन्तो न शस्यन्ते, हिमांशुकिरणोज्ज्वलाः ।
येषां सदुपकारेण, जायन्ते सुखिनो जनाः ॥ १०९ ॥

सज्जनाश्चन्दनं चन्द्रो, यदि न स्युर्महीतले ।
तदा दुःखोपतप्तानां, किं स्यान्निर्वृत्तिकारणम् ॥ ११० ॥

अज्ञानध्वान्तसन्तान - विध्वंसनपटीयसः ।
रवेरिव कराः सन्तः, परोपकृतिकारिणः ॥ १११ ॥

अर्थाभावेऽपि दातारः, सत्यसन्धा निराकुलाः ।
सदारम्भाः सदा सन्तो, निर्भया व्यसनागमे ॥ ११२ ॥

कार्यशतेऽप्यसंमूढा, गूढमन्त्रा दिवानिशम् ।
परार्थमेव कुर्वन्ति, प्राणैरपि धनैरपि ॥ ११३ ॥

कैः कैर्वा न प्रशस्यन्ते परोपकृतिकारिणः ।
कुर्वन्तो जनतानन्दं नरचन्द्रकुमारवत् ॥ ११४ ॥

मिथ्येदं कूर्मशेषाभ्यां, यन्मही विधृता किल ।
परोपकर्तृभिः सद्भि - र्धृता भूरिति मे मतिः ॥ ११५ ॥

परोपकारकर्तृणां, मृतानामप्यनर्गलम् ।
बम्भ्रमीति जगत्कृत्स्नं, कुन्देन्दुधवलं यशः ॥ ११६ ॥

सर्वतोऽपि प्रसर्पन्ती, तृष्णावल्ली निरर्गला ।
यैः सन्तोषासिना छिन्ना, त एव सुखिनो जनाः ॥ ११७ ॥

निःस्पृहस्य तृणं राजा, तृणं शक्रस्तृणं धनी ।
काञ्चनोऽपि तृणं मेरु - र्धनदोऽपि तृणायते ॥ ११८ ॥

अनाद्यनन्तसंसार - मार्गस्तस्य सुखोत्तरः ।
वामेतरकरे यस्य, सन्तोषः सम्बलं वरम् ॥ ११९ ॥

सन्तोषामृततृप्तानां, यत्तेषां सुखमुत्तमम् ।
कुतस्तद्धनलुब्धानां, दिवारात्रौ च धावताम् ॥ १२० ॥

दुःखदारुकुठाराय, बह्वाशापाशनाशिने ।
निःशेषसुखमूलाय, सन्तोषाय नमो नमः ॥ १२१ ॥

यद्दीनानि न जल्पन्ति, यत्सेवां नैव कुर्वते ।
यद्गुरुत्वं ययुर्लोकाः सन्तोषस्तत्र कारणम् ॥ १२२ ॥

यद्वा तद्वा जलं येषां, यद्वा तद्वा च भोजनम् ।
आसनं शयनं यानं, जायते सुखकारणम् ॥ १२३ ॥

तेषां दूरतरं दुःखं, सुखं च निकटस्थितम् ।
यतः सन्तोषसाराणि, सुखानि जगदुर्जिनाः ॥ १२४ ॥

न च पृथ्वी तथा पृथ्वी, स्वयम्भूरमणोऽपि वा ।
ब्रह्माण्डमपि नो तादृग् - यादृशो निःस्पृहो जनः ॥ १२५ ॥

कृतं शेषगुणैस्तावत् - सन्तुष्टस्येह देहिनः ।
एतावतैव पर्याप्तं, यदधीनो न कस्यचित् ॥ १२६ ॥

कुटुम्बककृते धाव - न्नितश्चेतश्च सन्ततम् ।
किं कृतं ? किं करिष्यामि ?, किं करोमीति ? चिन्तयन् ॥ १२७ ॥

खिद्यते प्रत्यहं प्राणी, बह्वाशापाशपाशितः ।
वाञ्छाविच्छेदजं सौख्यं, स्वप्नेप्येष न विन्दति ॥ १२८ ॥

असन्तोषो हि दोषाय; सन्तोषः सुखहेतवे ।
कपिलो ज्ञातमत्रार्थे, पिङ्गला च पणाङ्गना ॥ १२९ ॥

आशापिशाचिका नित्यं, देहस्था दुःखदायिनी ।
सन्तोषवरमन्त्रेण, स सुखी येन नाशिता ॥ १३० ॥

चिन्ताचक्रसमारूढो, योगदण्डसमाहतः ।
कर्माष्टककुलालेन, भ्राम्यते घटवन्नरः ॥ १३१ ॥

आतपच्छाययोर्यद्व - त्सहावस्थानलक्षणः ।
विरोधस्तद्वदत्रापि, विज्ञेयः सुखवाञ्छयोः ॥ १३२ ॥

वाञ्छा चेन्न सुखं जन्तो - स्तदभावे शर्म सन्ततम् ।
न भूतानि न भावीनि, सुखानि सह वाञ्छया ॥ १३३ ॥

सन्तोषसुखशय्यायां, सद्विवेकपटावृताः ।
स्वपन्ति ये महात्मानः, शेरते ते निराकुलाः ॥ १३४ ॥

यौवनं जरयाऽऽघ्रातं, रूपं रोगैरभिद्रुतम् ।
जीवितं यमराजस्य, वशवर्ति क्व सारता ? ॥ १३५ ॥

पर्वता अपि शीर्यन्ते, शुष्यन्ति च जलाशयाः ।
यत्र तत्रान्यवस्तूनां, सारता कुत्र कल्प्यते ? ॥ १३६ ॥

एवं सांसारिकाः सर्वे, भावा वैरस्य हेतवः ।
रम्भास्तम्भोपमाः प्रायो, निस्साराः क्षणभङ्गुराः ॥ १३७ ॥

जीवेनानन्तशः क्षुण्णे, चतुर्गतिगतागतैः ।
तथाप्यलब्धपर्यन्ते, ह्यनादौ भवसागरे ॥ १३८ ॥

अलब्धान्तः परिस्पन्दे, दुःखश्वापदसङ्कुले ।
व्याधिजन्मजरामृत्यु - वारिवारभयङ्करे ॥ १३९ ॥

प्रमादमदिरामूढो, विचेता नष्टसद्गतिः ।
कः प्राणी पतितो, नात्र, व्यूढो विषयवीचिभिः ॥ १४० ॥

नानायोनिसमाकीर्णे, जीवः कर्मविनिर्मिताम् ।
त्रैलोक्यरङ्गे नटव - द्धत्तेऽनेकस्वरूपताम् ॥ १४१ ॥

क्वचिन्नारकभावेन, क्वचित्तिर्यग्योनिकः ।
क्वचिच्च जायते मर्त्यो, दिवि देवः कदाचन ॥ १४२ ॥

क्वचिद्राजा क्वचिद्रङ्कः, क्वचिद्दुःखी क्वचित्सुखी ।
क्वचिन्निन्द्यः क्वचिद्वन्द्यः, क्वचिद् ज्ञानी क्वचिज्जडः ॥ १४३ ॥

सुरूपः सुभगः क्वापि, कुरूपो दुर्भगः क्वचित् ।
क्वचिद् द्वेष्यः प्रियः क्वापि, जीवो जगति जायते ॥ १४४ ॥

प्रियाप्रयोजने केचि - त्केचिच्चापत्यचिन्तया ।
नीरोगताकृते केचित्, केचिद्धनजिगीषया ॥ १४५ ॥

खिद्यन्ते सर्वदा जीवा असम्पूर्णमनोरथाः ।
रागद्वेषग्रहग्रस्ता, विवदन्तः परस्परम् ॥ १४६ ॥

चिन्तितान्यपि जीवा ........ ॥ १४७ ॥

शुक्रशोणितसम्भूते, सप्तधातुमलाश्रये ।
त्वङ्मात्राऽऽवृते पुंसां, काये का रमणीयता ? ॥ १४८ ॥

रमणीया रमणी या, निगद्यते काममोहितमनोभिः ।
तस्या अपि निस्सारं, शरीरकं पूतिमलगन्धि ॥ १४९ ॥

संसारासारता येषा - मेषा नो मनसि स्थिता ।
भ्रमन्ति ते सदा त्रस्ता, भवारण्ये मृगा यथा ॥ १५० ॥

जनयित्री जनी यत्र, जनी च जनिका जायते ।
कुबेरदत्तया दत्तो, दृष्टान्तोऽत्र जिनागमे ॥ १५१ ॥

संसारासारतामेनां, विभाव्य निजमानसे ।
ते धन्या येऽत्र संसारे, कुर्वते न रतिं जनाः ॥ १५२ ॥

अज्ञातभववैरस्याः, कील्यन्ते शोकशङ्कुना ।
अतस्तदपनोदार्थं, किञ्चिदेवोपदिश्यते ॥ १५३ ॥

स्वबन्धुनाशे जीवानां, हृदयं शोकशङ्कुना ।
कील्यते कुशलस्यापि, निर्विवेकस्य किं पुनः ? ॥ १५४ ॥

तथापि निष्प्रतीकारे, सर्वसाधारणे सदा ।
किमर्थं क्रियते शोको, मरणे समुपागते ॥ १५५ ॥

सममेव प्रवृत्तानां, गन्तुमेकत्र पत्तने ।
यद्येकः पुरतो याति, का तत्र प्रतिवेदना ? ॥ १५६ ॥

शोकोऽपि युज्यते कर्तुं, स्वस्य वा तस्य वा गुणम् ।
यदि कुर्यात्कृतः किंचि-न्नो चेदेष निरर्थकः ॥ १५७ ॥

आयातः स कुतोऽपीह, स्थित्वाऽहानि कियन्ति च ।
न ज्ञायते गतः क्वापि, का तत्र प्रतिबन्धधीः ? ॥ १५८ ॥

यथैकत्र द्रुमे रात्रा - वुषित्वा पक्षिणः प्रगे ।
दिशो दिशं प्रयान्त्येव - मेकगेहेऽपि जन्तवः ॥ १५९ ॥

शक्रचक्रिसहस्राणि, राजरङ्कशतानि च ।
मूर्खपण्डितलक्षाणि, क्षुण्णानि समवर्तिना ॥ १६० ॥

समं च वर्तते येन, सर्वेषां प्राणिनामयम् ।
समवर्ती भण्यते तेन, निर्गुणस्याप्ययं गुणः ॥ १६१ ॥

आसतां बहवस्ताव - देकैकस्यापि देहिनः ।
येऽतीताः पितरस्तेषां, सङ्ख्यां कः कर्तुमीश्वरः ? ॥ १६२ ॥

रे मूढाः ! किं समारब्धं, रुद्यते यदहर्निशम् ।
मृतः किं कोऽपि नो दृष्टः ? स्वगृहे परगृहेऽपि वा ॥ १६३ ॥

आगच्छद्भिर्विगच्छद्भि - र्जीवैः कर्मकदर्थितैः ।
न कदापि हि शून्यैषा, घोरा संसारवर्तिनी ॥ १६४ ॥

पण्डिता नैव शोचन्ति, मुञ्चन्त्यश्रूणि मध्यमाः ।
नीचास्त्वर्थप्रदानेन, रोदयन्ति रुदन्ति च ॥ १६५ ॥

भो जना ! वोऽपि नैकट्ये, परलोकप्रयाणकम् ।
धर्मसम्बलमादाय, प्रगुणैः किं न भूयते ? ॥ १६६ ॥

स्वकार्यासिद्धितः क्रुद्धः, पुत्रः शत्रूयतेतराम् ।
अतो बन्धुरबुद्धीनां, बन्धुबुद्धिरतात्त्विकी ॥ १६७ ॥

युगादिदेवनिर्वाणे, सह शक्रेण चक्रिणा ।
भरतेन भूरिशब्देन, रुदता रोदिता मही ॥ १६८ ॥

तथापि वालितो नैव, तेन स्नेहवतापि हि ।
श्रीमदादिजिनाधीशः, सर्वलोकैकबान्धवः ॥ १६९ ॥

पुत्राणं मरणं श्रुत्वा, द्विजादाकस्मिकं नृपः ।
प्रभुः प्रभूतमेदिन्याः, सगरः शोकविह्वलः ॥ १७० ॥

क्षणमात्रं मूर्च्छितः स्थित्वा, महाऽऽक्रन्दं चकार सः ।
तथापि रुदता तेन, स्वौरसा नैव वालिताः ॥ १७१ ॥

तस्माच्छोकं परित्यज्य, तत्कर्तव्यं मनीषिणा ।
भूयो न भूयते येन, संसारे शुभकर्मणा ॥ १७२ ॥

शोकेन चाभिभूयन्ते, कषायवशवर्तिनः ।
अतः फलं कषायाणां, तन्यमानं निशम्यताम् ॥ १७३ ॥

वनवह्निर्यथा दीप्तो, भस्मसात्कुरुते वनम् ।
क्रोधानलस्तथा दीप्तो, दहत्येव तपोवनम् ॥ १७४ ॥

यस्मादुत्तिष्ठते वह्नि - र्दहत्येव तदाश्रयम् ।
क्रोधोऽपि क्रोधिनं पूर्वं, दहत्येव न संशयः ॥ १७५ ॥

जितरोषरयाः सन्तो, नीचाः कोपेन निर्जिताः ।
जितेन ये जितास्तेषां, तैः समं का विरोधिता ? ॥ १७६ ॥

अपकारिणि कोपश्चे - त्कोपे कोपो विधीयताम् ।
मित्रद्रुहि कृतोद्वेगे, चित्तसन्तापकारिणि ॥ १७७ ॥

सर्वकार्याणि सिद्ध्यन्ति, अर्थसाराणि तस्य नु ।
सुरङ्गधूलिवत्कोपो यस्य न प्रकटो भवेत् ॥ १७८ ॥

बुद्ध्या कार्याणि साध्यन्ते, सा तु क्रुद्धस्य नश्यति ।
तस्मात्क्षमा क्षमैवोच्चैः, सर्वकार्यप्रसाधिका ॥ १७९ ॥

न नमस्यति देवेभ्यो, वरिवस्यति नो गुरुन् ।
अहङ्कारग्रहग्रस्तः पितृनपि न मन्यते ॥ १८० ॥

अहं दाता अहं भोक्ता, रूपवान् धनवानहम् ।
एवं सर्वगुणाधारं, स्वमानी मन्यते स्वयम् ॥ १८१ ॥

अमानमानमारुढ - स्तृणतुल्यं मन्यते जगत् ।
मेरोरप्यधिकं मूढः, पश्यत्यात्मानमात्मना ॥ १८२ ॥

अहो मानस्य दौरात्म्यं, येन प्राप्तो न केवलम् ।
सुनन्दानन्दनः साधु - र्यावन्मानं न मुक्तवान् ॥ १८३ ॥

अद्विजिह्वाः फणभृतो, बहिः, श्लक्ष्णा भयङ्कराः ।
अन्तर्विषभृतो दूरं, वर्जनीयाः शठा जनाः ॥ १८४ ॥

शठानि यस्य मित्राणि, शठा यस्य गृहे स्त्रियः ।
उन्नतिस्तस्य दूरस्था, जीवितव्येऽपि संशयः ॥ १८५ ॥

येषां योगत्रयस्यापि, संवादो नैव दृश्यते ।
तेषां शठात्मनां कार्ये, संवादः केन मृग्यते ॥ १८६ ॥

यदि मायाहतो धर्मो, हतं सत्यं शठात्मनः ।
सर्वाविश्वासहेतुश्च, मायावी जायते नरः ॥ १८७ ॥

निर्दोषोऽपि च मायावी, जनसन्त्रासकारणम् ।
अथवाऽहेर्मृतस्यापि, किं न बिभ्यति देहिनः ? ॥ १८८ ॥

ततो माया परित्याज्या, सर्वथा धार्मिकैर्जनैः ।
ततो धर्मस्ततः सत्यं, ततः सर्वेऽपि सद्गुणाः ॥ १८९ ॥

नदीनाथं तरन्त्येके, विशन्त्यन्ये रसातलम् ।
खनन्त्येके खनिं लोका, लोभः सर्वत्र कारणम् ॥ १९० ॥

रङ्गभूमौ च वंशाग्रे, कृतनानाविडम्बना ।
नृत्यन्ति यन्नराः केचिल्लोभस्तत्रापि कारणम् ॥ १९१ ॥

यत्सेवां कुर्वते केचित्खड्गव्यग्रकरा नराः ।
जीव नन्देन्ति जल्पन्तो, हेतुस्तत्रापि नापरः ॥ १९२ ॥

वञ्चयति पिता पुत्रं, पुत्रोऽपि पितरं निजम् ।
यत्र लोभो न तत्रान्यो, धिग्धिग्लोभमहो जनाः ॥ १९३ ॥

स ज्ञानलाभकालेऽपि, लोभः कष्टात्प्रलीयते ।
शेषेष्वपि कषायेषु, तिलतैलमिव स्थितः ॥ १९४ ॥

त्रैलोक्यगतजीवानां, चित्ते चित्ते व्यवस्थितः ।
एकधा बहुधा लोभो, दृश्यते जलचन्द्रवत् ॥ १९५ ॥

अहो ! लोभस्य साम्राज्यं, यदधीनोऽखिलो जनः ।
तत्र तत्र प्रयात्येव, यत्र कुत्रापि नीयते ॥ १९६ ॥

यदटन्ति महीमेके, समारोहन्ति रोहणम् ।
तृषार्ताः क्षुधिता दीना, लोभस्तत्रापि जृम्भते ॥ १९७ ॥

ये नराः क्रोधसन्दग्धा, ये नरा मानविह्वलाः ।
ये च मायामयाः केचि -द्ये च लोभवशं गताः ॥ १९८ ॥

तेषामिहैव दुःखानि परलोकेऽधमा गतिः ।
दृष्टान्तोऽत्र कषायार्त्तं रुद्रदेवकुटुम्बकम् ॥ १९९ ॥

लोकः सर्वोऽप्ययं बोको, ध्यान्ध्यादन्धायतेतराम् ।
सन्मार्गपदन्यासे च, प्रस्खलन्नापराध्यति ॥ २०० ॥

राजानो न प्रजापाला, मन्त्रहीनाश्च मन्त्रिणः ।
आचार्या नाममात्रेण, वाचका वाचनां विना ॥ २०१ ॥

इत्येवं सर्वलोकस्य, निन्दको निन्द्यते जने ।
राजादिहीलकः कोऽपि, कारागारे प्रवेश्यते ॥ २०२ ॥

ऋजुधर्मस्य कर्तारं, प्राणिनं वीक्ष्य पापभाक् ।
हसत्येव यथा तस्य, धर्मभ्रंशः प्रजायते ॥ २०३ ॥

सर्वलोकविरुद्धेन, नरेण सह सङ्गतिम् ।
कुरुते सोऽपि तत्तुल्यो -ऽशेषलोकेन गण्यते ॥ २०४ ॥

यत्रावासस्तदाचार - चातुर्यं शस्यते जने ।
अतीवोल्बणवेषो हि, विरुद्धः प्रतिभासते ॥ २०५ ॥

पुरग्रामप्रवेशेषु, निर्गमेषु च दीयते ।
यद्दानं कीर्तिकामेन, लोके तदपि हस्यते ॥ २०६ ॥

साधूनां व्यसनं दृष्ट्वा, हृष्यते तत्र सङ्गतम् ।
प्रतीकारं तु सामर्थ्ये, सति न कुरुतेऽपि यः ॥ २०७ ॥

साधुभक्ता जना येन, तन्निन्दा नैव सङ्गता ।
ये तु तामपि कुर्वन्ति, ते नूनमधमाधमाः ॥ २०८ ॥

समस्ति जीवनोपायो, येषामन्योऽपि कोऽप्यहो ।
स्वस्तुतिं परनिन्दां च, कथं कुर्वन्ति ते जनाः ? ॥ २०९ ॥

महापापवतामेतन्महल्लिङ्गं प्रकीर्तितम् ।
एकं परजने निन्दा, स्वप्रशंसा द्वितीयकम् ॥ २१० ॥

यदि धर्मः कर्तुमारब्धः, स एव क्रियतां जनाः ! ।
परनिन्दा महापापा, कथ्यतां क्वोपयुज्यते ॥ २११ ॥

अनुष्ठानानि तान्येव, स एव च जिनागमः ।
परमाजीविकाहेतो - र्दण्डादण्डिसमर्गलम् ॥ २१२ ॥

यो यथा कुरुते पुण्यं, स तथा लभते फलम् ।
किमिदं क्रियते लोकाः !, केशाकेशि निरर्थकम् ? ॥ २१३ ॥

स्वपक्षपरपक्षाभ्यां, सम्बद्धाः क्षेत्रभूमयः ।
बहुभिर्बहुधा तत्र, वसतामेषणा कथम् ? ॥ २१४ ॥

अन्यत्रान्यत्र तत्रैव, तिष्ठतां कारणं विना ।
का वैदग्धी कुतो धर्मो, मुक्त्वैकं मुग्धमोहनम् ? ॥ २१५ ॥

सर्वलोकविरुद्धानि, जल्पन्ति दुर्जना जनाः ।
धार्मिकाः कथमुच्यन्ते, स्वपरोद्वेगकारिणः ? ॥ २१६ ॥

एतस्मिन् दुःषमाकाले, विप्रकीर्णवचस्विनाम् ।
तत्पक्षपातिनां चैव, पर्यन्तोऽपि न लभ्यते ॥ २१७ ॥

सङ्क्लेशपरिहारेण, धर्मो वीरेण दर्शितः ।
तापसाश्रममुत्सृज्या - ऽसमयेऽन्यत्र गच्छता ॥ २१८ ॥

धर्मलोकविरूद्धानि, शक्त्या यः परिवर्जयेत् ।
सोऽर्थसिद्धिं सुकीर्तिं च, लभते शुभसङ्गवत् ॥ २१९ ॥

धर्मलोकविरुद्धानि, निःशङ्को यः समाचरेत् ।
सोऽर्थहानिमकीर्तिं च, लभतेऽत्र कुसङ्गवत् ॥ २२० ॥

तस्माल्लोकविरुद्धानां, परिहारः पुण्यकारणम् ।
तत्रादरो महान् कार्यो, विदुषा धर्ममिच्छता ॥ २२१ ॥

धर्माधारार्यदेशेषु, मानुष्यं प्राप्य दुर्लभम् ।
तत्रापि शासनं जैनं, सद्रत्नमिव निर्मलम् ॥ २२२ ॥

वाताहतवीचीवच्चञ्चलं वीक्ष्य जीवितम् ।
कल्याणमित्रसत्साधु - सामग्रीमवाप्य च ॥ २२३ ॥

विपदाकुलमालोक्य, वित्तं चित्तं च चञ्चलम् ।
पुण्यपुष्टिकरे धर्मे किं साम्प्रतमुदासितुम् ? ॥ २२४ ॥

सोऽपि दानादिभेदेन, चतुर्भेदो भवान्तकृत् ।
तत्रापि प्रथमं दानं तीर्थनाथैः प्ररूपितम् ॥ २२५ ॥

यद्गृहे पेशला सम्प - द्यच्च लोकेषु मान्यता ।
सत्पुत्राः सत्कलत्राणि, यदन्यदपि सुन्दरम् ॥ २२६ ॥

तदेतद्दानतः सर्वं, तच्च दानं त्रिधा मतम् ।
विज्ञानाभयभेदेन, धर्मोपग्रहतस्तथा ॥ २२७ ॥

किं किं दत्तं न तेनेह, किं किं नोपकृतं नृणाम् ।
येनागणितखेदेन, ज्ञानसत्रं प्रवर्तितम् ॥ २२८ ॥

सर्वजीवाभयं भावाद् - दत्तं येन दयालुना ।
यद्दातव्यं तकत्सर्वं, दत्तं तेन महात्मना ॥ २२९ ॥

धर्मोपग्रहदानं, यदुपष्टम्भात्करोति शुभकर्म ।
तेन च तारयति यति - र्भवाब्धेर्दायकं स्वं च ॥ २३० ॥

तच्च चतुर्धा वीरैः, शिवसुखफलसाधकं समाख्यातम् ।
दातृग्राहकशुद्धं, शुद्धं कालेन भावेन ॥ २३१ ॥

यः प्रयच्छति पुण्यार्थं, यतिभ्यः शुद्धभावतः ।
सर्वाशंसादिनिर्मुक्तं, दातृशुद्धं तदुच्यते ॥ २३२ ॥

चराचरजगज्जन्तु - जातसन्त्राणकारिणे ।
ज्ञानदर्शनचारित्र - धारिणे ब्रह्मचारिणे ॥ २३३ ॥

एवंभूताय शान्ताय, गुप्ताय च तपस्विने ।
दानं ग्राहकसंशुद्धं, जगाद जगतां गुरुः ॥ २३४ ॥

यत्काले दीयते दानं, तस्यार्घोऽपि न विद्यते ।
अकाले तु वितीर्णस्य, ग्राहकोऽपि न सम्भवी ॥ २३५ ॥

आत्मनः स्वधनादेश्च, साफल्यमिति चिन्तयन् ।
यो दत्ते शुद्धभावेन, भावशुद्धं तदीरितम् ॥ २३६ ॥

आसन्नसिद्धिकः कोऽपि, दानधर्मे सदा रतः ।
शेषस्य सङ्कुचत्येव, मनो दानभयाद् द्रुतम् ॥ २३७ ॥

शूराणां पण्डितानां च, वाग्मिनां काव्यकारिणाम् ।
सर्वेषामपि चैतेषां, दानदाताऽतिदुर्लभः ॥ २३८ ॥

श्रेयांसश्चन्दना धन्या, कृतपुण्यकवाणिजः ।
इत्येवमादयो दृष्टा, दृष्टान्ता दानगोचराः ॥ २३९ ॥

अमुं भवाम्भोधिमगाधमुल्बणं, गृही कथङ्कारमपारमुत्तरेत् ।
निराश्रवे पोत इवाविनश्वरे, स दानधर्मे न कृतादरो यदि ॥ २४० ॥

शीलं चित्तसमाधानं, तच्च द्वेधा प्रकीर्तितम् ।
सर्वतो देशतश्चैव, सर्वतः साधुसत्क्रिया ॥ २४१ ॥

देशतः सदनुष्ठानं, श्रावकाणां जिनोदितम् ।
अथवा शीलशब्देन, ब्रह्मचर्यं निगद्यते ॥ २४२ ॥

शीलं वृत्तं च चारित्रं, विरतिश्चरणं तथा ।
धर्मः संयम इत्याद्याः, शब्दा एकार्थवाचकाः ॥ २४३ ॥

पालयन्ति पुनश्चैत - द्विशुद्धं सर्वसाधवः ।
पञ्चधा चरणोद्युक्ता, पञ्चधाऽऽचारकारिणः ॥ २४४ ॥

कालोचितक्रियासक्ताः, सामाचारीत्रयोद्यताः ।
परीषहोपसर्गाणां, जेतारो विजितेन्द्रियाः ॥ २४५ ॥

ब्रह्मचर्यं पुनः सर्व - व्रतेष्वप्यतिदुश्चरम् ।
लोके लोकोत्तरे चैव, ख्यातं शीलमिति स्फुटम् ॥ २४६ ॥

यौवनेऽपि समारूढा, वृद्धायन्ते विवेकिनः ।
अनाचारे न वर्तन्ते, शीलमालिन्यभीरवः ॥ २४७ ॥

वधबन्धनदुःखानि, नानाकाराः कदर्थनाः ।
राजादिलोकतो नैव, लभन्ते शीलशालिनः ॥ २४८ ॥

विश्वासकारणं शीलं शीलमुन्नतिकारणम् ।
सर्वसौख्यकरं शीलं, शीलं कीर्तिकरं परम् ॥ २४९ ॥

शीलाभरणेन ये नित्यं, सर्वाङ्गेषु विभूषिताः ।
किमन्यैर्भूषणैस्तेषां, भारभूतैर्निरर्थकैः ॥ २५० ॥

करिकेशरिशार्दूल - सर्पाऽनलजलान्यमी ।
स्तम्भयन्ति क्षणादेव, सुशीलाः शीलमन्त्रतः ॥ २५१ ॥

सिंहासनायते शूला, कालकूटं सुधायते ।
मालायन्ते च शस्त्राणि, येषां शीलं समुज्ज्वलम् ॥ २५२ ॥

शीलसारगुणाऽऽकृष्ट - चेतसोऽमृतभोजिनः ।
आगच्छन्ति स्मृताः सन्तो, व्रजन्ति च विसर्जिताः ॥ २५३ ॥

विशालशीले सरलः सुरूपः, सुदर्शनः श्रेष्ठिसुतो निदर्शनम् ।
महासती पालितशुद्धशीला, ज्ञातं द्वितीयं त्विह शीलसुन्दरी ॥ २५४ ॥

तपः प्रतप्यमानस्य, क्षीयन्ते कर्मसञ्चयाः ।
तत्क्षयाच्च निर्वाणं, परमानन्दसुखं ततः ॥ २५५ ॥

षट्खण्डमहीनाथा, यन्नमन्ति कृतादराः ।
प्राकृतस्यापि सत्त्वस्य, तपस्या तत्र कारणम् ॥ २५६ ॥

यन्नीचकुलजातोऽपि, देवानां पूज्यतां गतः ।
हरिकेशबलः साधु - स्तपस्तत्र निबन्धनम् ॥ २५७ ॥

हीनजातितयोत्पन्नौ, नानालब्धिसमन्वितौ ।
चित्रसम्भूतिनामानौ, तपसा पूज्यतां गतौ ॥ २५८ ॥

तपस्विनस्तपस्येव, वसन्तीह निरन्तरम् ।
शापानुग्रहसामर्थ्यं, तेषां तदनुभावतः ॥ २५९ ॥

भूरिभोगकरं दानं, शीलं श्लाघादिकारकम् ।
तपश्चाचिन्त्यसामर्थ्यं, यस्माच्छक्रोऽपि शङ्कते ॥ २६० ॥

यथा तेपे तपः कोऽपि, महाटव्यां महातपाः ।
क्षोभाय प्रेषयामास, भीत इन्द्रः सुरस्त्रियः ॥ २६१ ॥

येन तीव्रं तपस्तप्तं, संयम्येन्द्रियपञ्चकम् ।
मनोऽपि मारितं येन, भवाब्धिस्तस्य गोष्पदम् ॥ २६२ ॥

मोहं निहन्त्यशुभतानवमातनोति, भिन्ते च संसृतिभयं भविनां भविष्णु ।
नागेन्द्रचन्द्रसुरराजपदं विधत्ते, तप्तं तपस्तनुभृतां किमु यन्न दत्ते ?॥ २६३ ॥

भो भव्या ! भावना भाव्या, निर्मूल्या शर्मसाधिका ।
भावनयैव भव्यानां, भवान्तो जायते यतः ॥ २६४ ॥

द्रव्येण दीयते दानं, शीलं सत्त्वेन पाल्यते ।
तपोऽपि तप्यते कष्टं, स्वाधीना भुवि भावना ॥ २६५ ॥

भावनातोऽपि ये भ्रष्टा - स्ते भ्रमन्ति भवोदधौ ।
नात्मलाभं लभन्ते ते, बीजाभावादिवाङ्कुराः ॥ २६६ ॥

भावनातः क्षयं याति, भवकोटीभिरर्जितम् ।
संसारनिम्बवृक्षस्य, कटुबीजं कर्म देहिनाम् ॥ २६७ ॥

सुबह्वपि तपस्ततं, चारित्रं च चिरं कृतम् ।
यदि भावो न सञ्जात - स्तदा तत्तुषकण्डनम् ॥ २६८ ॥

अधीतानि च शास्त्राणि, लोकानां देशना कृता ।
कृतानि दिव्यकाव्यानि, जिता वादे च वादिनः ॥ २६९ ॥

भावना यदि नो जाता सद्गतिद्वारकुञ्चिका ।
स्वकार्यासाधकत्वेन, तदा सर्वं निरर्थकम् ॥ २७० ॥

रथकारः स्वयं दाता, गृहीता पात्रमुत्तमम् ।
निकटस्थो भावनासार - मनुमन्ता मृगस्तथा ॥ २७१ ॥

वाताहतार्धच्छिन्नेन, वृक्षेण पतता सता ।
त्रयोऽपि चूर्णिताः सन्तो, ब्रह्मलोकमुपागताः ॥ २७२ ॥

हृदयगिरिगुहान्तः संसृतं यत्तमिस्रं, तदपनयनदक्षः केवलज्ञानभानुः ।
स पुनरुदयमेति कृत्स्नदोषावसाने, तदपि च न दुरापं वर्तते भावनायाः २७३

महामोहभराक्रान्ता, दुःखौघावर्तवर्तिनः ।
स्वहिताय न चेष्टन्ते, शिष्टसङ्गादृते नराः ॥ २७४ ॥

मोक्षमार्गपरिज्ञानं, न तावज्जायते नृणाम् ।
यावन्नोन्मीलिते नेत्रे, शिष्टसङ्गशलाकया ॥ २७५ ॥

दुर्गतिद्वारहेतूनि, सर्वानर्थकराणि च ।
सुलभानि कुमित्राणि, शिष्टसङ्गस्तु दुर्लभः ॥ २७६ ॥

तमस्तानवकर्तारः, प्रशमामृतवर्षिणः ।
शरदिन्दुसमाः सन्तः, सन्तोषितजगज्जनाः ॥ २७७ ॥

एको द्वौ वा त्रयो वापि, पुरग्रामेषु सज्जनाः ।
यद्वा सन्ति न सर्वत्र, कल्पोपपदपादपाः ॥ २७८ ॥

मालतीचन्दनचन्द्र - सुधा येन विनिर्मिताः ।
तेनैव दलेनैते, स्रष्ट्रा सृष्टा हि सज्जनाः ॥ २७९ ॥

शरद्भ्रदजलाकारं, गम्भीरं मलवर्जितम् ।
कोपेऽपि शिशिरं मध्ये, बहिरुष्णं सतां मनः ॥ २८० ॥

असारोऽप्येष संसारः, सारवानिव लक्ष्यते ।
परदुःखदुःखितैः सद्भिः, परोपकृतिचञ्चुभिः ॥ २८१ ॥

सागरादपि गम्भीरा, मेरोरपि गरीयसी ।
भूयसी भूरिशः कार्या, सङ्गतिः सह सज्जनैः ॥ २८२ ॥

क्रूरकर्मापि सत्सङ्गा - ल्लभते फलमुत्तमम् ।
केशिसङ्गाद्यथा लब्धं, फलम् राज्ञा प्रदेशिना ॥ २८३ ॥

यैः स्वार्थं परिहृत्य हृद्यहृदयैः प्रायः परार्थः कृतः,
यैरेकान्तहितावहा तनुमतां दत्ता मतिः पृच्छताम् ।
यैराजन्म जितेन्द्रियैर्जगदिदं शुभ्रैर्गुणैः शुभ्रितं
ते संसारसरः सरोरुहसमाः सेव्याः सदा सज्जनाः ॥ २८४ ॥

यत्र तत्र प्रयातोपि, दुर्विनीतो न शोभते ।
न चापि सेव्यतामेति, निर्जलेव यथा नदी ॥ २८५ ॥

किं किं यन्न प्रयच्छन्ति, किं किं यन्न प्रकुर्वते ।
स्वबन्धुमिव पश्यन्ति, विनयाराधिता नराः ॥ २८६ ॥

अङ्गजोऽपि हि दुष्टात्मा, व्रणः सन्तापकारणम् ।
पुत्रोऽपि दुर्विनीतात्मा, पितुर्निर्वेदकारणम् ॥ २८७ ॥

कोदण्डस्यैव नम्रस्य, कोटिमारोहते गुणः ।
ततोऽपि च टणत्कारो, बम्भ्रमीति महीतले ॥ २८८ ॥

दुर्विनीतं परित्यज्य, स्वपुत्रं मेदिनीपतिः ।
अन्यस्यापि ददात्येव, राज्यं विनयरञ्जितः ॥ २८९ ॥

हन्ता जन्मद्वयस्यापि, दुर्विनीतो दुराशयः ।
हितेष्वप्यहितः पापः, कूलवालो यथा मुनिः ॥ २९० ॥

नेत्रहीनं यथा वक्त्रं, दानहीनं यथा धनम् ।
चन्द्रहीनं यथाकाशं, पद्महीनं यथा सरः ॥ २९१ ॥

निर्नायकं यथा सैन्यं, तपोहीनश्च संयमः ।
निःसंस्कारं यथा वाक्यं, निरपत्यं यथा गृहम् ॥ २९२ ॥

तथैव दुर्विनीतस्य, चेष्टितं जल्पितं स्थितम् ।
पाण्डित्यं च क्रियाकाण्डं, सर्वथैव न शोभते ॥ २९३ ॥

गुर्वादिषु शुभं चित्तं, विनयो मानसो मतः ।
हितं मितं प्रियं वाक्यं, विनयस्तेषु वाचिकः ॥ २९४ ॥

कायिकश्च यथाशक्ति, तत्कार्याणां प्रसाधकः ।
सर्वथाऽऽशातनात्यागः, सर्वदा नीचवर्तिता ॥ २९५ ॥

ज्ञानदर्शनचारित्र - रत्नत्रितयभाजनम् ।
विनयादेव जायन्ते, गुरूणां योग्यजन्तवः ॥ २९६ ॥

लिम्बतां दुर्विनीतत्वात्, पश्चाच्चागमदाम्रताम् ।
यथैष क्षुल्लको गच्छे, पित्रा सार्धं कृतव्रतः ॥ २९७ ॥

वरविनयगुणौघप्राप्तलोकप्रशंसः, सफलितनिजजन्मा भूरिधामा महात्मा ।
कतिपयदिनमध्ये क्षीणनिःशेषकर्मा, सकलजनविनीतः शाश्वतं स्थानमेति

हृत्पूरकाशिनो यद्व - तृणेष्वपि सुवर्णधीः ।
दुःखात्मकेषु कामेषु, कामिनां सुखवासना ॥ २९९ ॥

स्वप्ने दृष्टं यथा पुंसः, क्षणमात्रं सुखायते ।
प्रबुद्धस्य न तत्किञ्चि - देवं विषयजं सुखम् ॥ ३०० ॥

त्यजन्ति कामिनं कामा - स्त्यज्यन्ते ते न कामिभिः ।
कामानां न प्रियः कोऽपि, कामाः सर्वजनप्रियाः ॥ ३०१ ॥

शब्दादिविषयासक्ता, धर्ममार्गपराङ्मुखाः ।
अजरामरवन्मूढा - श्चेष्टन्ते नष्टचेतनाः ॥ ३०२ ॥

गर्त्ताशूकरसङ्काशा, विषयाशुचिकर्दमे।
ये रमन्ते रमन्ते ते, नरके नरकीटकाः ॥ ३०३ ॥

विषयेषु विषीदन्तौ, न पश्यन्ति हिताहितम्।
शृण्वन्ति न हितं वाक्य - मन्धबधिरसन्निभाः ॥ ३०४ ॥

आदौ हृद्यरसास्वादाः, पर्यन्ते परितापिनः।
विषया विषवत्त्याज्या, पुंसा स्वहितमिच्छता ॥ ३०५ ॥

एकवारं विषं हन्ति, भुक्तमेव न चिन्तितम्।
विषयाश्च चिन्तनादेव, बहुधा च विनाशकाः ॥ ३०६ ॥

प्राप्ता अपि नरैः कामा, दुःखं ददति केवलम्।
क्षणं दृष्टाः क्षणं नष्टा, गन्धर्वनगरोपमाः ॥ ३०७ ॥

यथा यथा निषेव्यन्ते, विषया मोहमोहितैः।
तथा तथा प्रवर्धन्ते, यथा चाहुर्महर्षयः ॥ ३०८ ॥

उपभोगोपायपरो, वाञ्छति यः शमयितुं विषयतृष्णाम्।
इच्छत्याक्रमितुमसौ, पूर्वाऽपराह्णे निजच्छायाम् ॥ ३०९ ॥

विषयेषु प्रसक्तानां, प्रजायन्ते सुदारुणाः।
लोकद्वयविघातिन्यो, नानानर्थपरम्पराः ॥ ३१० ॥

विवेको निर्मलं चक्षु - रेकं यस्य महात्मनः।
तद्वद्भिः सङ्गतिश्चैव, द्वितीयं चक्षुरुज्ज्वलम् ॥ ३११ ॥

एतन्नेत्रयुगं यस्य, वस्तुसद्भावदर्शकम्।
स द्रष्टा परमार्थेन, शेषा अन्धसमा नराः ॥ ३१२ ॥

निर्विवेका न शस्यन्ते, जन्तवः पशवो यथा।
विवेको हि परं रत्नं, सतां हृदयमण्डनम् ॥ ३१३ ॥

सततं तीव्रदुःखौघ - मन्दरोद्दामवेगतः।
मथितस्य मनोम्भोधे - रुत्पन्नं न कदाचन ॥ ३१४ ॥

विवेकसंज्ञितं रत्न – मनर्घ्येयमनुत्तरम्।
सतां सदा समीपस्थ – महार्यं तस्करादिभिः ॥ ३१५ ॥

स्वदेशे च विदेशे च, ग्रामे मार्गे च गच्छताम्।
रात्रौ दिवा च कण्ठस्थं, नृणां मण्डनमुत्तमम् ॥ ३१६ ॥

निर्विवेककृतं कार्यं, परिणामे न सुन्दरम्।
पाताय जायते नूनं, जात्यन्धस्येव चेष्टितम् ॥ ३१७ ॥

विवेकदण्डमादाय, मार्गमन्धोऽपि लङ्घते।
वाञ्छितं स्थानमाप्नोति, सुखानि च समश्नुते ॥ ३१८ ॥

असारे सारतावाञ्छा, शत्रावपि च मित्रधीः।
मित्रेष्वमित्रताबुद्धि – र्निर्विवेकस्य लक्षणम् ॥ ३१९ ॥

नमस्तस्मै विवेकाय, हृदयानन्दकारिणे।
सद्गुणाय सुवृत्ताय, श्रेयसे हारहारिणे ॥ ३२० ॥

सविवेकं दुर्लभं दानं, सविवेकं दुर्लभं तपः।
सविवेकं दुर्लभं शीलं, सविवेका दुर्लभा श्रियः ॥ ३२१ ॥

विवेकाद्धोगदेवेन, सम्पदः सफलीकृताः।
विवेकादेव तेनैव, त्यक्ताः प्रथमतश्च ताः ॥ ३२२ ॥

भव्या भक्तिर्भगवति जिने यत्सदा निष्प्रकम्पा,
संसाराब्धेस्तरणतरिका सेवना यद्यतीनाम्।
यन्निर्लोभं हृदयमनघं यज्जयश्चेन्द्रियाणा –
मेतत्सर्वं शिवसुखफलं सद्विवेकस्य कार्यम् ॥ ३२३ ॥

तदेवेहामृतं मन्ये, यत्सत्यं कोमलं वचः।
वार्तैषा यत्सुरैः सिन्धु – र्मथितादुद्गतं तु तत् ॥ ३२४ ॥

न तस्यास्ति रिपुः कोऽपि, न चापि च परो जनः।
वस्त्वसाध्यं न चास्त्यस्य, यस्यास्ति मधुरं वचः ॥ ३२५ ॥

एषैव देवता वन्द्या, जिह्वाग्रे या सरस्वती ।
अशुभेतरभेदेन, वक्त्रे वक्त्रे व्यवस्थिता ॥ ३२६ ॥

मित्राणिं चाप्यमित्राणि, बन्धूनपि ह्यबान्धवान् ।
शत्रूभूतं करोत्याद्या, विश्वं विश्वं सरस्वती ॥ ३२७ ॥

अमित्राण्यपि मित्राण्य-बन्धूनपि च बान्धवान् ।
मित्रभूतं करोत्याद्या, विश्वं विश्वं सरस्वती ॥ ३२८ ॥

स्वरुच्या दीयते दानं, विद्यमानं निजे गृहे ।
स्वाधीनं दुर्गतस्यापि, मोदकं मधुरं वचः ॥ ३२९ ॥

किं किं तेन न दत्तं स्यात्, किं किं नोपकृतं जने ।
प्रथमं हृष्टवक्त्रेण, मधुरं येन भाषितम् ॥ ३३० ॥

गुणान् स्मरन् सदा शेते, स्मरन्नेव प्रबुध्यते ।
दानं विनापि लोकोऽयं, पुंसो मधुरभाषिणः ॥ ३३१ ॥

सुधया किं गुडेनाथ, किं वा खण्डेन निर्मिता ।
किंवा शर्करया सृष्टा, स्रष्ट्रा जिह्वा महात्मनाम् ॥ ३३२ ॥

यदेषा सर्वदा सूते, सुनृतं मधुरं वचः ।
कठोरकारणाद्यस्मा - न्मृदुकार्यं न जायते ॥ ३३३ ॥

शुभाशुभानि भावीनि, जीवानं कर्मयोगतः ।
दुःखमुत्पादयत्येव, तत्क्षणाद् दुर्वचः श्रुतम् ॥ ३३४ ॥

दग्धा दवेन रोहन्ति, छिन्ना अपि पुनः पुनः ।
वचोदग्धा वचश्छिन्ना, न रोहन्ति नरांह्रिपाः ॥ ३३५ ॥

मितमधुरमुदारं जन्तुसन्तोषकारं,
वदत वदत लोकाः ! सद्वचश्चित्तहारम् ।
हरहसितहिमानीहारनीहारहारि,
भ्रमति भुवि समन्तात्सद्यशो येन सारम् ॥ ३३६ ॥

इह लोकेऽपि कल्याणं, जायते मृदुभाषिणाम्।
अत्रामृतमुखी नाम, वृद्धनारी निदर्शनम् ॥ ३३७ ॥

इह लोकेऽपि दुःखानि, लभन्ते कटुभाषिणः ।
अत्रार्थे ऋतुभिः शप्ता, वृद्धयोषा निदर्शनम् ॥ ३३८ ॥

दया धर्मस्य सर्वस्वं, दया धर्मस्य जीवितम्।
मातेव निजपुत्रस्य, दया धर्मस्य पालिका ॥ ३३९ ॥

दुःखिताः स्वत एवामी केऽपि केनापि कर्मणा।
प्राणिनोऽनादिसंसारे तेषां किं वद चिन्तया ॥ ३४० ॥

जायन्ते चात्र संसारे, शतशः सर्वेऽपि जन्तवः ।
मातृपित्रादिभावेन, कः प्रियः कोऽप्रियस्ततः ॥ ३४१ ॥

हन्मीति चिन्तनादेव, सुकृतं हन्ति जन्मजम्।
त्रिजन्मसम्भवं हन्ति, सुकृतं हेतियोगतः ॥ ३४२ ॥

घ्नंश्च जन्मशतोपात्तं, सर्वं हन्ति हितं शुभम्।
आत्मैव च हतस्तेन, परं घ्नता न संशयः ॥ ३४३ ॥

यतो हन्यादसौ हन्ता, लभते वधबन्धनम्।
दशधा शतधा चैव, लक्षशः कोटिशोऽपि वा ॥ ३४४ ॥

दृष्ट्वा च शस्त्रमुद्गीर्णं, भयात्तरललोचनः ।
वेपते विविधं प्राणी, सर्वो जीवनवाञ्छया ॥ ३४५ ॥

आक्रुष्टोऽपि म्रियस्वेति, दुःस्थो भवति मानसे।
मार्यमाणस्य यद्दुःखं, तद्वेत्ति यदि केवली ॥ ३४६ ॥

अर्थवन्तोऽर्थसारेण, राजा राज्येन रक्षति।
येन तेन प्रकारेण, रक्षामर्हति जीवितम् ॥ ३४७ ॥

यथा स्वयं प्रणश्यन्ति, दुरं दूरेण देहिनः।
मृत्योस्तथापरस्यापि, न प्रियं मरणं क्वचित् ॥ ३४८ ॥

निःशेषं विश्वमेकत्र, धृतमन्यत्र जीवितम्।
विश्वं विश्वं परित्यज्य, जीवो गृह्णाति जीवितम् ॥ ३४९ ॥

एतद्धर्मस्य सर्वस्वं, शेषो वचनविस्तरः।
परेषां तन्न कर्तव्यं, यदात्मनि न रोचते ॥ ३५० ॥

सर्वदानाग्रिमं दानं, शौचानां शौचमुत्तमम्।
कारणं सर्वसौख्यानां, यदेतत्प्राणिरक्षणम् ॥ ३५१ ॥

शेषदानान्यदानानि, मरणे समुपस्थिते।
जीवितं यो ददात्यस्य, स दाता सर्वदायकः ॥ ३५२ ॥

दृष्टान्तोऽत्र नरः कोऽपि, राजरत्नमलिम्लुचः।
राजप्रसादतो राज्या मरणाद्विनिर्मोचितः ॥ ३५३ ॥

परप्राणप्रहाणोत्थ - पापपूरेण पूरिताः।
पतन्ति प्राणिनः पापा, नरके तीव्रवेदने ॥ ३५४ ॥

सदयहृदयदत्ता त्रातनिःशेषसत्त्वा,
विधृतगुणविताना सर्वधर्मप्रधाना।
यति दलितदोषा सर्वकल्याणपोषा,
जनजनितसदक्षा पालिता जीवरक्षा ॥ ३५५ ॥

कर्मद्रुमकुठाराय, सर्वकल्याणकारिणे।
जगन्मङ्गलभूताय, सत्पात्राय महात्मने ॥ ३५६ ॥

ज्ञानदर्शनचारित्र - सम्पदां कुलसद्मने।
संसारसारभूताय, सर्वदा सुखहेतवे ॥ ३५७ ॥

श्रीमत्सङ्घसमुद्राय, गुणरत्नभृतात्मने।
पूजां पुण्यजनः कोऽपि, कुरुते भक्तिनिर्भरः ॥ ३५८ ॥

शिवसद्मसमारोह - निःश्रेणिः सरला समा।
गुणगात्रैः समाकीर्णा, सङ्घभक्तिर्गरीयसी ॥ ३५९ ॥

किं किं न पूजितं तेन ? सङ्घो येनेह पूजितः ।
न चान्यदीदृशं पात्रं, पवित्रं भुवि विद्यते ॥ ३६० ॥

यस्य निःशेषसंसार –पारवर्ती जिनेश्वरः ।
त्रिलोककृतपूजोऽपि सपर्यां कुरुते स्वयम् ॥ ३६१ ॥

तीर्थप्रवर्तनाकाले, भ्रामरीदानपूर्वकम् ।
कृतज्ञतां पुरस्कुर्वन्, यतो नौति जिनोऽपि तम् ॥ ३६२ ॥

सङ्घवात्सल्यतः पूर्वं, पश्चात्तीर्थकरोऽजनि ।
अतः कारणभावेन, सङ्घः, पूर्वो निगद्यते ॥ ३६३ ॥

सर्वोऽपि पूजितः सङ्घः, सङ्घदेशेऽपि पूजिते ।
यथैकपुष्पदानेऽपि, देवो भवति पूजितः ॥ ३६४ ॥

सर्वसङ्घसपर्यायाः, फलमाप्नोति मानवः ।
परिणामभेदतो यस्मात् पुण्यापुण्यव्यवस्थितिः ॥ ३६५ ॥

आसन्नसिद्धिकस्येदं, लिङ्गमाहुर्मनीषिणः ।
यत्सङ्घपूजनं शक्त्या, भक्तिसारं विधीयते ॥ ३६६ ॥

सङ्घपूजाफलं प्रोक्तं, परं सिद्धिस्तथाऽपरम् ।
मर्त्यामरेन्द्रनागेन्द्र – श्रियः सर्वसुखप्रदाः ॥ ३६७ ॥

त्यक्ता दुर्गतिवर्तनी प्रतिहता कष्टा परप्रेष्यता,
मानुष्यं सफलीकृतं शशधरे स्वं नाम संलेखितम् ।
सन्ध्यारागचलाः श्रियः सफलतां तैरेव सम्प्रापिता,
यैः सद्वित्तचयेन शुद्धमनसा श्रीसङ्घपूजा कृता ॥ ३६८ ॥

संसारसागरे पोतो, ज्ञानादिगुणभाण्डभृत् ।
येनायमर्चितः सङ्घ – स्तेन तीर्णो भवोदधिः ॥ ३६९ ॥

यशाशक्ति यथाभक्ति, यथाकालं यथाधनम् ।
सङ्घपूजा सदा कार्या, जन्मसाफल्यमिच्छता ॥ ३७० ॥

गृहिणा सद्विवेकेन, संसारभयभीरुणा।
पूजनीयः सदा सङ्घः, कृतार्थं जन्म कुर्वता ॥ ३७१ ॥

आसन्नसिद्धिकैरेव, सङ्घश्च पूज्यते नरैः।
सङ्घपूजारतश्चात्र, धनसारो निदर्शनम् ॥ ३७२ ॥

सुभाषितसुधाधाम – धर्मरत्नकरण्डकम्।
भव्यसत्त्वोपकाराय, कृत्वा यदुपार्जितं शुभम् ॥ ३७३ ॥

तेनैव मम भूयोऽपि, भूयाज्जन्मनि जन्मनि।
ज्ञानदर्शनचारित्र – भावश्रीवर्धमानता ॥ ३७४ ॥

श्रीमदभयदेवाख्य – सूरिशिष्येण निर्मितः।
सूरिणा वर्धमानेन, धर्मरत्नकरण्डकः ॥ ३७५ ॥

ग्रथितेऽपि हि विज्ञेयं, श्लोकानां सर्वसङ्ख्यया।
पूर्वापर्येण सम्पिण्ड्य, पञ्चत्रिंशं शतत्रयम् ॥ ३७६ ॥

पू.आ.श्रीहरिप्रभसूरिविरचितम्

## ॥ यतिदिनकृत्यम् ॥

श्रीवीरः श्रेयसे यस्य चित्रं स्नेहदशात्यये।
सद्ध्यानदीपोऽदीपिष्ट जलसङ्गमविप्लवात् ॥ १ ॥

साधूनां दिनकृत्यं षड्विधमावश्यकञ्च यतिगृहिणाम्।
अभिधास्ये संक्षेपात् तत्रादौ दिवसकृत्यमिदम् ॥ २ ॥

सर्वोऽपि साधुवर्गः पश्चिमयामे निशोऽवबुध्येत।
सप्ताष्ट–नमस्कारा–नुच्चरमाणोऽप्रमत्तमनाः ॥ ३ ॥

कायोत्सर्गं कुर्या–दीर्यापथिकीं प्रतिक्रमणपूर्वम्।
कुस्वप्नास्वप्नोद्भव–जीववधादेर्विशुद्ध्यर्थम् ॥ ४ ॥

तत्रोद्द्योतांश्चतुरः स्मरेन्नमस्कृतियुजोऽङ्गनाभोगे ।
शक्रस्तवं भणित्वा वन्देत ज्येष्ठमुनिवर्गम् ॥ ५ ॥

कुर्वन्ति स्वाध्यायं मन्दध्वनिनाऽथवा शुभध्यानम् ।
चिन्तयति वा तपोऽभि-ग्रहादि किमकारि किन्नेति ॥ ६ ॥

प्राभातिके चं काले विधिनोपात्ते गुरौ प्रबुद्धे च ।
ग्लानादिके च कुर्यात् सम्भूय तथा प्रतिक्रमणम् ॥ ७ ॥

पर्यन्ते तस्य तथा प्रतिलिखिते चोपधौ रविरुदेति ।
न यथा च पापजीवा जाग्रति गृहकोकिलप्रमुखाः ॥ ८ ॥

अत्र क्रमात्प्रतिलिखेन्मुखपटधर्मध्वजौ निषद्ये द्वे ।
पट्टककल्पत्रितये संस्तरकोत्तरपटौ च दश ॥ ९ ॥

तत्र प्रमाणतः षो-डशाङ्गुला वदनवस्त्रिका कार्या ।
निजनिजमुखमाना वा ज्ञेयाऽऽदेशो द्वितीयोऽयम् ॥ १० ॥

सम्पातिमसत्त्वरजोरेणूनां रक्षणाय मुखवस्त्रम् ।
वसतेः प्रमार्जनार्थं मुखनासं तेन बध्नन्ति ॥ ११ ॥

द्वात्रिंशदङ्गुलमितं रजोहरणमस्य करमितिर्दण्डः ।
अष्टाङ्गुला दशा अथ निशीथसमये विशेषोऽयम् ॥ १२ ॥

मानं विंशतिरथवा षड्विंशतिरङ्गुलानि दण्डस्य ।
दशिकानां तु क्रमतो द्वादश षड् वाऽङ्गुलानि स्यात् ॥ १३ ॥

आदानत्वग्वर्तन-निक्षेपस्थाननिषदनादिकृते ।
पूर्वं प्रमार्जनार्थं मुनिलिङ्गायेदमादेयम् ॥ १४ ॥

कम्बलमयी निषद्यादशिका सहिता च सा रजोहरणम् ।
उपरितनपट्टमाने अधिके वा द्वे निषद्ये स्तः ॥ १५ ॥

तत्रैकक्षौमीया दशोज्झिता हस्तमानिका प्रथमा ।
अपराऽपि हस्तमाना पादप्रोञ्छनमयी ज्ञेया ॥ १६ ॥

द्विगुणश्चतुर्गुणो वा चतुरस्त्रः पट्टकः करप्रमितः ।
स्थविरयुवश्रमणकृते सूक्ष्मे स्थूलेऽपि च विभाषा ॥ १७ ॥

कल्पत्रयं निजाङ्गाऽऽयामं सार्द्धकरयुग्मविस्तारि ।
तत्र द्वौ सूत्रमयावेकस्तूर्णामयो ज्ञेयः ॥ १८ ॥

कल्पेन येन भिक्षा चैत्ये गमनञ्च तेन चान्यानि ।
कार्याणि नैव कुर्याद् द्वौ सूत्रमयौ ततो भणितौ ॥ १९ ॥

ध्यानार्थमनलसेवा–तृणग्रहणवारणार्थमुपकारि ।
कल्पग्रहणं ग्लाना–य मृतपरिधापनार्थञ्च ॥ २० ॥

ऊर्णामये च कल्पे बहिःकृते शीतरक्षणं भवति ।
यूकापनकावश्या–य रक्षणं भूषणत्यागः ॥ २१ ॥

सार्द्धकरयुगं दै–र्घ्येऽष्टाविंशत्यङ्गुलानि विस्तारे ।
उत्तरपटसंस्तरकौ विनोत्तरपटं तु दोषः स्यात् ॥ २२ ॥

साध्व्याः पुनरुपकरणान्यवग्रहाऽनन्तकं तथा पटः ।
अर्द्धोरुकश्चरणिका तदुपरि चान्तर्निवसनी स्यात् ॥ २३ ॥

षष्ठी बहिर्निवसनी कञ्चुक उपकक्षिकाऽष्टमी कथिता ।
वैकक्षिका च नवमी संघाटी स्कन्धकरणी च ॥ २४ ॥

तत्रावग्रहवसनं नौ संस्थानं वराङ्गरक्षार्थम् ।
एकं प्रमाणतस्तद् घनमसृणं देहमाश्रित्य ॥ २५ ॥

पट्टोऽपि भवेदेको भजनीयो निजशरीरमानेन ।
छादयति गुह्यवसनं प्रतिबद्धो मल्लकक्षेव ॥ २६ ॥

अर्द्धोरुकोऽपि ते द्वे गुह्णानश्छादयेत्कटीदेशम् ।
जानुप्रमाणं चरणिकाऽपि लङ्खिकाया (?) इवाऽस्यूला ॥ २७ ॥

निजजङ्घार्द्धद्वयसी लीनतराऽन्तर्गता निवसनी स्यात् ।
बाह्या त्वाप्रपदीना–दवरकबद्धा कटीदेशे ॥ २८ ॥

अस्यूतः कञ्चुककः स्तनौ यथाऽनुद्धतौ समावृणुते ।
उपकक्षिका तु समचतु-रस्रा सार्द्धकरमानैव ॥ २९ ॥

वक्षोदेशं पृष्ठं दक्षिणपार्श्वं स्थिता समावृत्य ।
वामस्कन्धे बीटक-प्रतिबद्धा वामपार्श्वे च ॥ ३० ॥

तद्विपरीता वैकक्षिकार्पिता कञ्चुकं च पिदधाति ।
संघटयस्तु चतस्रस्तत्र द्विकरा भवेद्वसतौ ॥ ३१ ॥

हस्तत्रयाय ते द्वे एका भिक्षाकृतेऽपरोच्चारे ।
तुर्या तु निषद्याच्छादनी सभायां चतुर्हस्ता ॥ ३२ ॥

स्कन्धकरणी चतुःकर-विस्तरदैर्ध्या चतुःपुटीकृत्य ।
स्कन्धे ध्रियते प्रावर-णस्यानिलधुवनरक्षार्थम् ॥ ३३ ॥

कुडभोर्ध्वस्कन्धाधः पृष्ठे संवर्तिता वसनबद्धा ।
क्रियते कुब्जकरण्य-प्येषैव सुरूपसाध्वीनाम् ॥ ३४ ॥

अर्द्धोरुककञ्चुकयोः पट्टेऽपि च दवरकाश्चरणिकायाम् ।
प्रत्येकं चत्वारो भवन्ति वैकक्षिकायां षट् ॥ ३५ ॥

षट् चोपकक्षिकायां सर्वेऽष्टाविंशतिर्दवरकाः स्युः ।
एतद्बन्धविशेषाश्चतुर्दश ग्रन्थयोऽभिहिताः ॥ ३६ ॥

आवश्यके च पूर्णे विहिते तिमिरे रविप्रभोपहते ।
उत्कटिकासनसंस्थो मौनी प्रेक्षेत मुखवसनी ॥ ३७ ॥

आभ्यन्तरिकीं पूर्वं प्रेक्ष्य निषद्यां प्रगे ततो बाह्याम् ।
अपराह्णे विपरीतं प्रेक्षेत रजोहरणदशिकाः ॥ ३८ ॥

दत्त्वा लघुवन्दनयुग-मङ्गप्रतिलेखनाञ्च सन्देश्य ।
मुनिनाऽङ्गप्रेक्षायां प्रतिलेख्यः पट्टको नान्यत् ॥ ३९ ॥

साध्व्या तु यथासम्भव-मवग्रहानन्तकादिकं प्रेक्ष्यम् ।
स्थाप्योऽथ नमस्कृत्य प्रतिलेख्यः स्थापनाचार्यः ॥ ४० ॥

तदनुप्रेक्ष्य मुखपटं दत्त्वा लघुवन्दनद्वयं विधिना ।
सन्दिश्यैकेन तयोरपरेण प्रतिलिखेदुपधिम् ॥ ४१ ॥

उदिते सवितरि वसतिं प्रमृज्य यत्नेन रेणुपटलमथ ।
संशोध्य कीटिकादिक-मृतजन्तूं स्तत्र संख्याय ॥ ४२ ॥

संगृह्य च षट्पादिकाश्छायायां पुञ्जकं परिष्ठाप्य ।
खेलादिकृते कार्या मल्लकभूतिर्नवोद्धृत्य ॥ ४३ ॥

निक्षिप्ते पुञ्जादा-वीर्यापथिकां यतिः प्रतिक्रामेत् ।
यः संसक्तां वसतिं प्रमार्जयेत् सोऽपि च तथैव ॥ ४४ ॥

प्रातः प्रेक्षाद्वितये (?) विहिते वसतिः प्रमृज्यते प्रकटम् ।
अङ्गप्रेक्षानन्तर-मपराह्णे मृज्यते वसतिः ॥ ४५ ॥

दृष्टिप्रेक्षणपूर्वं प्रमार्जयेद्दण्डकाँश्च कुड्यं च ।
भूमिश्च रजोहरणे-नाभिग्रहिकस्तदितरो वा ॥ ४६ ॥

प्रतिलेखनाऽत्र कथिता यत्किल दृष्ट्या निरीक्षणं क्रियते ।
वसनरजोहरणाभ्यां प्रमार्जनामाहुरर्हन्तः ॥ ४७ ॥

संशोध्य च हस्तशतं ज्ञात्वा प्रसवश्च योषिदादीनाम् ।
अस्थ्यादि बहिः क्षिप्त्वा वसतिं शुद्धां प्रवेदयति ॥ ४८ ॥

कालग्राही तु मुनिः प्रेक्ष्य मुखानन्तकं विनयकर्म ।
कृत्वा वसतिं शुद्धां कालं च गुरोः प्रवेदयति ॥ ४९ ॥

उपयुक्तः स्वाध्यायं प्रस्थापयेत्तत्र वाचनाचार्यः ।
सिद्धान्तोदितविधिना तदनुज्ञातस्ततः शिष्यः ॥ ५० ॥

शीतर्तुचतुर्मास्यां प्रेक्ष्य मुखानन्तकं गुरोः पुरतः ।
सन्दिश्य च कल्पं ह्रस्ववन्दनाभ्यां परिदधीत ॥ ५१ ॥

दत्त्वाऽध्यापकपुरतो वन्दनकं ह्रस्ववन्दनयुगेन ।
सन्देश्य वाचनामथ सूत्रमधीयीत मण्डल्याम् ॥ ५२ ॥

मण्डल्यः सप्तैताः सूत्रेष्वर्थे च भोजने काले ।
आवश्यकं विदधतां स्वाध्याये संस्तरेऽभिहिताः ॥ ५३ ॥

साधुभ्य उपाध्यायो दत्ते सूत्रस्य वाचनां निपुणः ।
सिंहगिरेः शिष्येभ्यो वज्रस्वामीव गणनाथः ॥ ५४ ॥

कुर्वन्ति स्वाध्यायं गीतार्था यदुपयोगवेलायाम् ।
स हि दर्शितोऽधुना तै-राचारः सूत्रपौरुष्याः ॥ ५५ ॥

उपयोगः किल भक्ता-दिलब्ध्यनुज्ञा ततश्च भङ्गोऽस्य ।
पतितरजोहरणादा-वन्यज्जल्पति च किमपि मुनौ ॥ ५६ ॥

गुरवे निवेदिते बहु परिपूर्णा पौरुषीति लघुमुनिना ।
पादोनप्रहरे सति पर्यन्तं सूत्रपौरुष्याः ॥ ५७ ॥

सूत्रेऽनधीतीनां सू-त्रगोचरः पौरुषी द्वितीयाऽपि ।
अपवादेऽर्थस्यैव प्रथमाऽपि गृहीतसूत्राणाम् ॥ ५८ ॥

अथ पादप्रोञ्छनिकाऽऽसीना दत्त्वा क्षमाश्रमणमेकम् ।
सर्वेऽपि साधवो मुख-वसनमनुगुरुं प्रतिलिखेयुः ॥ ५९ ॥

प्रतिलेखनाक्षणोऽयं साध्यो यत्नेन लग्नसमय इव ।
अस्मिन् काले स्फिटिते प्रायश्चित्तं हि कल्याणम् ॥ ६० ॥

आगन्तुक-संमूर्च्छज-जन्तुपरिज्ञानहेतवे प्रथमम् ।
दृक्कर्णनासिकेनो-पयोगमनुपात्रकं कुर्यात् ॥ ६१ ॥

तिष्ठति किमिह भुजङ्गो यत्प्रेक्ष्यत एवमिति विवदमानः ।
अत्र किल कोऽपि शैक्षो देवतया शिक्षयांञ्चक्रे ॥ ६२ ॥

पूर्वभवविहित-सम्यग्-भावप्रतिलेखनामनुस्मृत्य ।
वल्कलचीरिकुमारो जडोऽपि जातिस्मृतिं लेभे ॥ ६३ ॥

आज्ञा जैनीयमिति ज्ञात्वा सप्तविधपात्रनिर्योगम् ।
मुखवसनवत्प्रतिलिखेत् पञ्चाधिकविंशतिस्थानैः ॥ ६४ ॥

पात्रे तानि द्वादश बहिरन्तश्चैकक: करस्पर्श: ।
पात्रकनिर्योगोऽयं यति–साध्व्योरेक एव स्यात् ॥ ६५ ॥

पात्रं पात्रकबन्ध: पात्रस्थापनकपात्रकेसरिके ।
पटलानि रजस्त्राणं च गोपुच्छक: पात्रनिर्योग: ॥ ६६ ॥

चत्वारिंशत्तलपरि–धिनाङ्गुलानि प्रमाणहिम–मध्यम् ।
पात्रेऽस्मादकपिं ही–नं जघन्यमुत्कृष्टमधिकं तु ॥ ६७ ॥

यस्माद्द्रवन्ति जीवा: केषुचिदन्येषु पानकेषु तत: ।
तेषां रक्षाहेतो: पात्रग्रहणं जिनैरिष्टम् ॥ ६८ ॥

पात्रकबन्धे मानं पात्रकमानेन भवति कर्तव्यम् ।
ग्रन्थौ यथा कृते सति भवन्ति चतुरङ्गुला: कोणा: ॥ ६९ ॥

पात्रप्रतिलेखिन्या विज्ञेया षोडशाङ्गुलानि मिति: ।
इदमेव मानमुक्तं पात्रस्थानकगोपुच्छकयो: ॥ ७० ॥

षट्त्रिंशद्विस्तारे पटलानामङ्गुलानि दैर्घ्ये तु ।
षष्टिरथवा प्रमाणं स्वशरीरात् पात्रतो वापि ॥ ७१ ॥

तानि कदलीदलाभान्युत्तममध्यमजघन्यतस्त्रीणि ।
प्राणिगणकरक्षार्थं निदाघहेमन्तवर्षासु ॥ ७२ ॥

ग्रीष्मे स्युस्त्रिचतु:पञ्चसंख्यया तानि शीतकाले तु ।
चत्वारि पञ्च षट् चाथ पञ्च षट् सप्त वर्षासु ॥ ७३ ॥

क्रामति मध्ये चतुरङ्गुलं यथा पात्रकं प्रदक्षिणयत् ।
तावत्प्रमाणमुक्तं जिनै रजस्त्राणमनुपात्रम् ॥ ७४ ॥

क्रोशयुगागतसाधो: सूपादिभृतेन यावता तृप्ति: ।
तावन्मात्रं मात्रकमस्य च वर्षासु परिभोग: ॥ ७५ ॥

पात्रकनिर्योगोऽयं मात्रक–कल्पत्रये रजोहरणम् ।
मुखवसनपट्टकाविति चतुर्दशोपकरणानि मुने: ॥ ७६ ॥

एतानि विना पट्टकमवग्रहानन्तकादिहरसंख्यम् ।
एकश्च कमठकमिति व्रतिनीनां पञ्चविंशतिधा ॥ ७७ ॥

यष्टिर्वियष्टिदण्डौ विदण्डको नालिका कटित्रञ्च ।
संस्तारकोत्तरपट्ट-वित्याद्यौपग्रहिक उपधिः ॥ ७८ ॥

यष्टिर्निजदेहमितिस्तया यवनिका निबध्यते वसतौ ।
अङ्गुलचतुष्टयेन न्यूना यष्टेर्वियष्टिः स्यात् ॥ ७९ ॥

क्वाप्यनाश्रयवलजं स्तेनादिकरक्षणाय घटते तु ।
ऋतुबद्धकानयोग्यो दण्डः स्कन्धप्रमाणेन ॥ ८० ॥

वर्षासु वृष्टिसमये कक्षामात्रो विदण्डको ग्राह्यः ।
स हि नीयते लघुत्वात् कल्पान्तरितो जलभयेन ॥ ८१ ॥

अङ्गुलचतुष्टयेना-धिकप्रमाणा स्वदेहतो नाली ।
नद्यादिजलोत्तारे तया तलं ज्ञायते पयसः ॥ ८२ ॥

पर्वैकमत्र भव्यं कलहाय द्वे धनाय च त्रीणि ।
मरणाय चतुःपर्वा च पञ्चपर्वाऽध्वकुशलाय ॥ ८३ ॥

रोगकृते षट्पर्वा मान्द्योच्छेदाय सप्तपर्वा सा ।
अष्टचतुरङ्गुलात्वन्तमूलयोर्मत्तगजजयिनी (?) ॥ ८४ ॥

सम्पच्छिदेऽष्टपर्वा यशांसि यष्टिर्ददाति नवपर्वा ।
ऋद्धिकरी दशपर्वा प्रवृद्धपर्वा विशेषेण ॥ ८५ ॥

कुटिला कीटकजग्धा दग्धा शुषिरा विचित्रवर्णा या ।
सा यष्टिरूर्ध्वशुष्का च वर्जनीया प्रयत्नेन ॥ ८६ ॥

घनवर्द्धमानपर्वा वर्णे स्निग्धा तथैकवर्णा या ।
सा मसृणवृत्तपर्वा यष्टिर्योग्या यतिजनस्य ॥ ८७ ॥

हस्तप्रमितिकटित्रं चतुरस्रं तत्पुनः प्रदीपनके ।
वृत्त्याद्युपरि क्षिप्त्वा सुखेन निष्काम्यते स्थानात् ॥ ८८ ॥

तदनन्तरं प्रमृज्य स्थानं न्यस्येन्निषद्ययोर्द्वितयम् ।
एका योग्या सूरेरपराऽक्षाणां निवेशाय ॥ ८९ ॥

सविधे विधाय मात्रक-युगं गुरोःखेलकायिकायोग्यम् ।
वन्दनकञ्च विधायोत्सर्गः कार्योऽनुयोगार्थम् ॥ ९० ॥

अनुयोगे प्रारब्धे प्रत्याख्यानं न दीयते यत्र ।
तत्राऽन्यस्य मुनीनां वार्ताप्रमुखस्य का वार्ता ॥ ९१ ॥

आचार्याः सूत्रार्थं प्रपञ्चयन्ति द्वितीयपौरुष्याम् ।
विधिनाऽऽर्यरक्षिता इव दुर्बलिकापुष्पमित्राय ॥ ९२ ॥

अनुयोगश्च चतुर्धा तत्राद्यश्चरणकरणविषयः स्यात् ।
धर्मकथाया अपरो द्वौ गणितद्रव्यविषयौ स्तः ॥ ९३ ॥

स्युस्ते च कालिकश्रुत-मृषिभाषितसूत्रमृषिभिरुपदिष्टम् ।
सूर्यप्रज्ञप्तिश्रुतमनुक्रमं दृष्टिवादश्च ॥ ९४ ॥

वाचयति यत्र सूत्रं पाठयिता यत्र चार्थमाचार्यः ।
कथयति तत्र विदधते कायोत्सर्गं महाधीराः ॥ ९५ ॥

वन्दनकदानपूर्वकमनुयोगविसर्जनार्थमुत्सर्गम् ।
उच्छ्‌वासाष्टकमानं कुर्यादन्तेऽर्थपौरुष्याः ॥ ९६ ॥

गत्वाऽथ जिनायतने देवान् वन्देत जिनपतेः पुरतः ।
भूतेशाष्टम्योस्तु स्तुत्याः सर्वे जिना मुनिभिः ॥ ९७ ॥

गोचरचर्याकालो यो यस्मिन् भवति तत्र साध्यः सः ।
कुर्यात्सूत्रार्थगते पौरुष्यौ तदनुसारेण ॥ ९८ ॥

यामद्वयपर्यन्ते देवाद्यनुरोधतोऽन्यदा वाऽपि ।
मुखवस्त्रिकां प्रतिलिखेद् दद्याल्लघुवन्दनं चैकम् ॥ ९९ ॥

गुरुमापृच्छ्य विहर्तुं यामीति प्रेक्ष्य पात्रमादेयम् ।
उपयोगस्तु प्रातर्विहितो बालाद्यनुग्रहतः ॥ १०० ॥

आवश्यकीं भणित्वा भवोपयुक्त इति गुरुवचः श्रुत्वा ।
इच्छामीत्युक्त्वाथ स्मर्तव्यो गौतममुनीन्द्रः ॥ १०१ ॥

वामा च दक्षिणा वा नाडी यत्रानिलो वहति पूर्णः ।
पवनग्रहणं कुर्वन् पुरतो विदधीत तत्पादम् ॥ १०२ ॥

वसतेर्निर्यन् भूमेरुत्क्षिप्य व्योम्नि दण्डकं कुर्यात् ।
लब्धे प्रथमे मुञ्चेदवनिं ततो नार्वाक् ॥ १०३ ॥

इत्येवं समितात्माऽऽत्मना द्वितीयोऽशनादिकं निमित्तम् ।
गोचरचर्यां प्रविशेदृजुगत्याद्यष्टवीथीभिः ॥ १०४ ॥

ऋज्वी गत्वाप्रत्या-गतिका गोमूत्रिका पतङ्गाख्या ।
पेटा तथाऽर्द्धपेटा शम्बूकाऽन्तर्बहिर्द्विविधा ॥ १०५ ॥

तत्राद्यायां वसतेर्ऋजुगत्या याति भिक्षमाणः सन् ।
समपङ्क्तिचरमगेहाद्वलति तु भिक्षामगृह्णनः ॥ १०६ ॥

यस्यां तु भिक्षयित्वा गृहपङ्क्तौ तन्निवर्तमानः सन् ।
अटति द्वितीयपङ्क्तौ गत्वा प्रत्यागतिः सा स्यात् ॥ १०७ ॥

वामाद् दक्षिणगेहे दक्षिणगेहाच्च भिक्षते वामम् ।
गोमूत्रिका मता सा पतङ्गवीथी त्वनियता स्यात् ॥ १०८ ॥

मध्यं विना चतुर्दि-क्षु भिक्षते यत्र सा भवेत् पेटा ।
दिग्द्वयसम्बद्धश्रे-णिः भिक्षणे त्वर्द्धपेटा स्यात् ॥ १०९ ॥

अभ्यन्तरशम्बूका यस्यां क्षेत्रस्य मध्यतो भिक्षाम् ।
भ्राम्यन् बहिर्विनिस्सर-ति शङ्खवृत्तत्वगमनेन ॥ ११० ॥

सा तु बहिःशम्बूका यस्यां भिक्षां भ्रमन् बहिर्देशात् ।
क्षेत्रस्यान्तः प्रविश-त्येवं वीथ्यो मता अष्टौ ॥ १११ ॥

पिण्डः शय्या वस्त्रं पात्रं तुम्बादिकं चतुर्थञ्च ।
नैवाऽकल्प्यं गृह्णी-त कल्पनीयं सदा ग्राह्यम् ॥ ११२ ॥

पिण्डैषणाञ्च पानक-शय्यापात्रैषणां न योऽधिजगे ।
तेनाऽऽनीतं मुनिना न कल्पते भक्तपानादि ॥ ११३ ॥

देशोनपूर्वकोटिं विहरन् निश्चितमुपोषितः साधुः ।
निर्दोषपिण्डभोजी ततो गवेष्यो विशुद्धोञ्छः ॥ ११४ ॥

नूनमचारित्री मुनि-रशोधयन् पिण्डवसति-वस्त्रादि ।
चारित्रे पुनरसति प्रव्रज्या निष्फला भवति ॥ ११५ ॥

पिण्डः शरीरमुक्तं तस्योपष्टम्भहेतुरिति पिण्डः ।
द्रव्यमपि समयरूढे-रेकोऽनेकश्च स द्वेधा ॥ ११६ ॥

अशनाद्याश्चत्वारो वस्त्रं पात्रञ्च कम्बलं शूची ।
क्षुरपादप्रोञ्छनके नखरदनी कर्णशोधनकम् ॥ ११७ ॥

शय्यातरपिण्डोऽयं लिङ्गस्थस्योज्झतस्तदवतो वा ।
चारित्रिणोऽप्यचारि-त्रिणोऽपि वर्ज्यो रसायनवत् (?) ॥ ११८ ॥

प्राभातिकमावश्यकमन्यत्र विधीयते यदि सुविहितैः ।
यदि जाग्रियते च तदा ग्राह्योऽयं द्वादशविधोऽपि ॥ ११९ ॥

श्रीवृषभवीरवर्जं जिनैर्विदेहोद्भवैश्च लेशेन ।
अपि कर्म वर्ज्जितं ननु पिण्डः सागारिकस्यायम् ॥ १२० ॥

अशिवे रोगे च भये नियन्त्रणे दुर्लभे तथा द्रव्ये ।
प्रद्वेषे दुर्भिक्षेऽनुज्ञातं ग्रहणमप्यस्य ॥ १२१ ॥

अस्यापि ग्राह्यमिदं डगलकमलकतृणानि रक्षादि ।
सोपधिः शैक्षः शय्या-संस्तरकौ पीठलेपादि ॥ १२२ ॥

पादप्रोञ्छनमशनादि चतुष्कं वस्त्रकम्बलौ पात्रम् ।
इति नृपपिण्डोऽष्टविधो वर्ज्यः प्रथमान्त्यजिनसमये ॥ १२३ ॥

तस्य हि पिण्डो वर्ज्यो यो राज्यं पञ्चभिः सह करोति ।
नृपतिकुमाराऽमात्याः सेनाधिपतिः पुराध्यक्षः ॥ १२४ ॥

अत्र हि गवेषणायां ग्रासग्रहणे त्रिधैषणा भवति ।
द्वात्रिंशद्दश पञ्च च दोषा आसां क्रमेण स्युः ॥ १२५ ॥

आधाकर्मिकमौद्दे-शिकं तथा पूतिकर्ममिश्रञ्च ।
स्यात्स्थापना तथा प्रा-भृतिका प्राहुःकरणसंज्ञः ॥ १२६ ॥

क्रीतमपमित्यसंज्ञं परिवर्तितमभिहृतं तथोद्भिन्नम् ।
मालापहृतं च भवेदाच्छेंदाख्योऽनिसृष्टश्च ॥ १२७ ॥

अध्यवपूरक इत्यु-द्गमाभिधाना भवन्त्यमी दोषाः ।
षोडश गृहस्थविहिता एषां क्रमतःस्वरूपमिदम् ॥ १२८ ॥

आधाऽशनादिपाक-प्रणिधानं साधवे तथा क्रियते ।
यत्पाकादि तदाधा-कर्माऽऽहारोऽपि तद्योगात् ॥ १२९ ॥

आधाय मुनिं प्रणिधा-य क्रियते यत्सचेतनमचित्तम् ।
पाको यदचित्तस्य च निरुक्तिवशतस्तथा तदपि ॥ १३० ॥

यद्वाऽधः कर्म मुनिं नरकेऽधः संयमाच्च कुरुते यत् ।
आत्मघ्नं वा तद् यत् कर्मभुजो हन्ति चरणं स्वम् ॥ १३१ ॥

स्पृष्टादीनि प्रकृत्या-दिना च साधुर्यदप्रशस्तानि ।
आत्मा कर्माण्यष्टौ बध्नाति तदात्मकर्म स्यात् ॥ १३२ ॥

विष्ठा-वमथु-गवामिष-सममिदमिति पात्रमपि युतं तेन ।
पूर्वं करीषघृष्टं कृतत्रिकल्पं च कल्प्यं स्यात् ॥ १३३ ॥

चरणोपघातकत्वा-दस्यास्ति मुनेर्न चौघतो ग्रहणम् ।
अपवादपदे त्वस्ति द्रव्याद्याश्रित्य यत उक्तम् ॥ १३४ ॥

'संथरणंमि असुद्धं दुण्ह विगिण्हन्तदिन्तयाणहियं ।
आउरदिट्ठन्तेणं तं चेव हिअं असंथरणे' ॥ १३५ ॥

उद्देशः साध्वादेः प्रणिधानं तत्प्रयोजनं तेन ।
निर्वृत्तं चौद्देशिकमोघेन विभागतो द्वेधा ॥ १३६ ॥

कश्चिदनुभूतदुर्भि-क्षबुभुक्षः प्राप्तकालसौख्यः सन् ।
स्वार्थारब्धे पाके प्रचुरतरांस्तन्दुलान् क्षिप्त्वा ॥ १३७ ॥

कत्यपि भिक्षा दत्ते पुण्यार्थं यावदर्थिकेभ्यो यत् ।
ओघेन स्वपरपृथक् प्रविभजनाभावरूपेण ॥ १३८ ॥

ओघेन तदौद्देशिकमथ विवाहादिषूद्धरितमन्नम् ।
यत्कल्पितं पृथग् दा-तुमभिहितं तद्विभागेन ॥ १३९ ॥

उद्दिष्टं च कृतं कर्म तत्त्रिधा तत्र कथितमुद्दिष्टम् ।
यत्स्वार्थसिद्धमशनं शेषं दातुं पृथगकल्पि ॥ १४० ॥

तदभिदधे कृतसंज्ञकमुद्धरितं सद् यदोदनप्रमुखम् ।
भिक्षार्थिभ्यो दातुं कृतं करम्भादिरूपतया ॥ १४१ ॥

मोदकचूर्णिप्रमुखं शेषं यन्मोदकादिरूपतया ।
क्रियते पुनरपि गुडपा-कदानमुख्येन तत्कर्म ॥ १४२ ॥

त्रिविधमपि प्रत्येकमिह विभागौद्देशिकं चतुर्भेदम् ।
उद्देशसमुद्देशा-वादेशोऽपि च समादेशः ॥ १४३ ॥

क्रमतोऽपि यावदर्थिक-पाखण्डिश्रमणवर्गनिर्ग्रन्थान् ।
संकल्प्य दानविषया उद्देशाद्या अमी भेदाः ॥ १४४ ॥

अस्मिन् द्वादशभेदेऽष्टासु स्वार्थकृतमेव संस्क्रियते ।
पूर्वत्र तु साध्वर्थं कृतमित्यनयोर्विशेषोऽयम् ॥ १४५ ॥

अविशोधि कोटिभक्ता-द्यवयवसम्पर्कतो विशुद्धम् ।
पूतीभूतं भक्तं क्रियते तत् पूतिकर्म स्यात् ॥ १४६ ॥

प्रथमदिवसे तदाधा-कर्म स्यात् साधवेऽथ यत्क्रियते ।
कर्मांशयुतं पात्रं त्याज्यं दिवसत्रयं पूतेः ॥ १४७ ॥

अशुचिलवेनेवाधा-कर्माद्यंशेन युक्तमशनादि ।
शुद्धमपि भवति पूति त्याज्यं तस्माद्दिनत्रितयम् ॥ १४८ ॥

तद् द्वेधैकं सूक्ष्मं यद्युक्तं कर्म गन्धधूमाद्यैः ।
तददुष्टं स्थूलं स्याद्द्विधोपकरणेऽशनादौ च ॥ १४९ ॥

तत्राधाकर्मित्वात् पात्राद्युपकरणसंस्थितं प्रथमम् ।
तत्कल्प्यं यदि तेभ्यः पृथक्कृतं गृहिणा ॥ १५० ॥

पात्रान्तरे विनिहितं कर्माशनपानलेशलिप्ते यत् ।
तत्पूत्यशुद्धमथ पिठरकादि कल्पत्रये शुद्धम् ॥ १५१ ॥

स्वार्थाय यावदर्थिक-पाखण्डिक-यतिकृते च मिश्रतया ।
यत्प्रथममुपस्क्रियते त्रिविधं तन्मिश्रजातं स्यात् ॥ १५२ ॥

स्थापना त्रिविधाऽऽधारकालद्रव्यविभेदतः ।
द्वौ द्वौ भेदौ मतौ तस्यास्त्रिविधाया अपि क्रमात् ॥ १५३ ॥

साध्वर्थं स्वस्थाने चुल्लीस्थाल्यादिके परे स्थाने ।
सुस्थितकपटलकादौ यद्देयं स्थाप्यते वस्तु ॥ १५४ ॥

साऽऽधारतोऽथ कालाद् यावद्द्रव्यस्थिर्ति चिराद् ज्ञेयाम् ।
अपरा त्वित्वरकालं गृहत्रितयमन्तराकल्प्या ॥ १५५ ॥

द्रव्यतया तु द्विविधा क्षीरादि परंम्परा भवेदेका ।
अपरा त्वनन्तरस्था-पना यदाज्यादिकं ध्रियते ॥ १५६ ॥

स्वल्पारम्भा सूक्ष्मा प्राभृतिका बादरा महारम्भा ।
प्रत्येकश्चोपष्कणा-वष्कर्णतया द्वेधा ॥ १५७ ॥

अत्र मुनिदानसमये परतोऽर्वागगर्भकादि भोजयति ।
कुरुते परतोऽर्वाग्वा लग्नं गुर्वागमनसमये ॥ १५८ ॥

प्राहुः करणं द्विविधं प्रकाशनं प्रकटनं यदशनादेः ।
साध्वर्थं छिद्रगवाक्षदीपमण्यादिभिः प्रथमम् ॥ १५९ ॥

प्रकटीकरणं त्वपरं चुल्ल्यादेयस्य वा बहिष्करणम् ।
सतमसि गृहे यतीनां चक्षुर्विषयो भवति येन ॥ १६० ॥

क्रीतं चतुर्विधं तत्रात्मधनक्रीतमिह परस्माद् यत् ।
आवर्ज्य तीर्थशेषाद्यर्पणतो गृह्यते वस्तु ॥ १६१ ॥

अपरं तदात्मभावक्रीतं परिगृह्यते यदाक्षिप्य ।
स्वयमेव धर्मकथनादि रूपभावेन भक्तादि ॥ १६२ ॥

यद् गृहिणा साध्वर्थं सचेतनाचित्तमिश्रभावेन ।
क्रीतं भक्तादि पर-द्रव्यक्रीतं तृतीयं तत् ॥ १६३ ॥

तत्परभावक्रीतं यन्मङ्खादिः परो मुनिनिमित्तम् ।
आवर्ज्य जनं गृह्णाति निजकलारूपभावेन ॥ १६४ ॥

आदाय यत्परस्मादुद्यतकं दीयते यतिजनाय ।
अपमित्यं वा तत्प्रामित्यं वा दोषस्त्वयं ज्ञेयः ॥ १६५ ॥

स्थानद्विगुणिकया किल कस्याश्चित्तैलकर्षमुद्यतकम् ।
आनीय काऽपि मुनये दत्त्वा निःस्वा यदा सत्त्वम् ॥ १६६ ॥

परवर्त्तितं यदाज्या-दिद्रव्यं साधवे परावर्त्य ।
तद्द्रव्यान्यद्रव्यैर्दत्ते दोषोऽत्र कलहादिः ॥ १६७ ॥

स्वपरग्रामानीतं यतयेऽभिहृतं द्विधेह तत्रैकम् ।
अज्ञातमभिहृततया प्रच्छन्नं प्रकटमितरत्तु (?) ॥ १६८ ॥

आचीर्णं त्वानीतं हस्तशतान्तर्गृहत्रितयमध्ये ।
तत्रैकस्मिन् भिक्षाग्राह्युपयुक्तो द्वयोरपरः ॥ १६९ ॥

उद्भिन्नं द्वेधा स्यात्तत्र जतुच्छगणकादिपिहितं सत् ।
उद्घाट्यते मुनिकृते तत्पिहितोद्भिन्नमति दुष्टम् ॥ १७० ॥

तत् तु कपाटोद्भिन्नं यद्दत्तकपाटकेऽपवरकादौ ।
मुनिदानाय कपाटावुद्घाट्य गुडादिकं दत्ते ॥ १७१ ॥

ऊर्ध्वाध उभयतिर्यग्देशे विषमे स्थितं तु भक्तादिं ।
करदुर्ग्राह्यं दत्ते मालापहृतं चतुर्भेदम् ॥ १७२ ॥

तत्रोद्ध्वं शिक्यकगृहमालाद्यधस्तु भूमिगृहमुख्यम् ।
उभयं मञ्जूषा को-ष्ठकादि तिर्यग्गवाक्षादि ॥ १७३ ॥

आच्छेद्यं भृत्यकुटुम्ब-सहचरेभ्यस्त्रिधा यदाच्छिद्य ।
दत्ते स्वामी राजा प्रभुर्गृहेशश्च दस्युश्च ॥ १७४ ॥

दिशति बहु स्वाधीनं यदेक एवाऽनिसृष्टमाहुस्तत् ।
तत्साधारण-चोल्लगजग्धाभिस्त्रिधा तत्र ॥ १७५ ॥

आनीय हट्टगेहादिस्थं साधारणं ददात्येकः ।
तिलकुदितैलवसना-शनादिकं तद्भवेदेकम् ॥ १७६ ॥

गोष्ठिकभक्तं चोल्लक-मेकस्य प्रविशतो द्वितीयं तत् ।
जग्धस्तु गजस्तद्भक्तमिभनृपादत्तमपरं (?) स्यात् ॥ १७७ ॥

स्वार्थारब्धे पाकेऽधिकतरतिलतन्दुलादि यत्क्षिपति ।
आश्रित्य यावदर्थक-यतिपाखण्डिकसमागमनम् ॥ १७८ ॥

सोऽध्यवपूरकदोषोऽमी दोषाः षोडशोद्गमाभिमुख्याः ।
पिण्डोत्पत्तिमिहोद्गममाहुस्तद्गोचरा एते ॥ १७९ ॥

भेदैर्धात्रीत्वादिभिरुपार्जनं मूलशुद्धपिण्डस्य ।
उत्पादनोच्यते तद्विषया दोषा यतिकृताः स्युः ॥ १८० ॥

धात्री दूती च निमित्ता जीवावनीपकाश्चिकित्सा च ।
क्रोधोऽथ मानविषयो मायापिण्डश्च नवमः स्यात् ॥ १८१ ॥

लोभश्च पूर्वपश्चात् संस्तवविद्ये च मन्त्रचूर्णौ च ।
योगोऽथ मूलकर्म च षोडश दोषा इमे तत्र ॥ १८२ ॥

धात्रीपिण्डोऽसौ यल्लभते साधुर्विधाप्य कृत्वा च ।
बालस्य पयोमज्जन-मण्डनरमणाङ्कधात्रीत्वम् ॥ १८३ ॥

यस्तु मिथः सन्देशं कथयित्वा प्राप्यते निजग्रामे ।
मुनिनाऽन्यग्रामे वा दूतीपिण्डः स विज्ञेयः ॥ १८४ ॥

दूतीत्वेकप्रकटा प्रच्छन्नाऽन्या द्विधा द्वितीया स्यात् ।
लोकोत्तरविषयाद्या द्वितीया साधोरपिच्छन्ना ॥ १८५ ॥

या तु द्वितीयसांघाटिकसाधोरपि जनस्य च छन्ना ।
सा द्वैतीयिकी भवति लोकलोकोत्तरच्छन्ना ॥ १८६ ॥

सुखदुःखादिकविषयेऽतीतादि निमित्तकथनतः साधुः ।
आवर्जिताज्जनाद् यल्लभते स निमित्तपिण्डः स्यात् ॥ १८७ ॥

तत्तद्गुणमात्मानं वदतो जातिकुलकर्मशिल्पतया ।
याजीविकामुनेरत्र पञ्चधा जीवपिण्डोऽस्मौ ॥ १८८ ॥

श्रमणादिभक्तगृहिणां पुरतस्तद्वर्णनादिना मुनिना ।
यो याच्यते स पिण्डोऽप्युक्तो वनीपकत्वेन ॥ १८९ ॥

भैषज्यवैद्यसूचासूक्ष्मैकान्या स्वयं भिषग्वचनम् ।
एतद्विविधचिकित्सा-लब्धः पिण्डोऽपि तद्रूपः (?) ॥ १९० ॥

शापादिक्रोधफलं ज्ञात्वा यो दीयते भयाद् गृहिणा ।
मुनये तद्धेतुतया क्रोधाभिमुख्यः स पिण्डोऽपि ॥ १९१ ॥

एवं समानपिण्डो यस्मिन् गृहिणं तथा च य[दा]पयति ।
मुनिरभिमानेन यथा दत्तेऽनिच्छत्यपि सुतादौ ॥ १९२ ॥

यत्परवञ्चनहेतोः कृत्वा रूपान्तरादिकं साधुः ।
अर्जयति मोदकाद्यं मायाहेतुः स पिण्डःस्यात् ॥ १९३ ॥

स तु भवति लोभपिण्डो गृद्ध्या यल्लभ्यते रसोपेतम् ।
यद्वा खण्डादिपयःप्रभृतिकसंयोजनाहेतोः ॥ १९४ ॥

एषु च घृतपूरक्षपकसेवनिकाक्षुल्लकौ कषायेषु ।
ज्ञातावार्याषाढश्च सिंहकेसरमुनिः क्रमतः ॥ १९५ ॥

द्वेधा संस्तव उक्तो वचनात् सम्बन्धतश्च तत्राद्यः ।
गुणवर्णनरूपोऽन्यो जननीस्वस्रादिकल्पनया ॥ १९६ ॥

एकैकोऽपि द्विविधः पूर्वं पश्चाच्च तत्र पूर्वः सन् ।
यत्पूर्वमेव देयेऽलब्धे गुणकीर्तनं क्रियते ॥ १९७ ॥

एतद्विपरीतोऽन्योऽथ पूर्वसम्बन्धिसंस्तवस्त्वेवम् ।
यन्मात्रादेः कल्पन-मितरः स्वस्रादिकल्पनया ॥ १९८ ॥

विद्याजपादिसाध्या प्रज्ञप्तिमुखदेव्यधिष्ठात्री ।
अक्षररूपा तस्याः प्रयोगतो भवति तत्पिण्डः ॥ १९९ ॥

एवम्भूतो मन्त्रोऽप्यधिष्ठितः पुरुषरूपदेवतया ।
सिद्धश्च पठनमात्रात्तदर्जितो मन्त्रपिण्डः स्यात् ॥ २०० ॥

नयनाञ्जनादिरन्तर्धानादिफलो निगद्यते चूर्णः ।
सौभाग्यादिविधायी योगः पादप्रलेपादिः ॥ २०१ ॥

एतद्द्वयपारणतः सम्प्राप्तौ चूर्णयोगपिण्डौ स्तः ।
बहिरुपयोगी चूर्णो योगो बहिरन्तरुपयोगी ॥ २०२ ॥

मूलमिव संसृतितरौ कर्म तु सावद्ययोगकरणं च ।
गर्भाधानस्तम्भन-पाताद्यं मूलकर्म स्यात् ॥ २०३ ॥

तत्करणेन प्राप्तः पिण्डोऽप्येवमिति दोषषोडशकम् ।
इत्थं गवेषणायां द्वात्रिंशन्मीलिताः सर्वे ॥ २०४ ॥

अथ शङ्किताख्यदोषो म्रक्षितनिक्षिप्तपिहितदोषाश्च ।
संहृतदायकदोषावुन्मिश्रोऽपरिणतो लिप्तः ॥ २०५ ॥

छर्दित इति दश दोषास्तत्राहारादि दीयमानं यत् ।
दृष्ट्वा प्रचुरं शङ्कितमाधाकर्मादि दुष्टतया ॥ २०६ ॥

ग्रहणेऽपि शङ्कितो भोजनेऽपि चेत्यादिभङ्गकचतुष्कम् ।
यच्छङ्कते तमाप्नोति त्रिषु चरमस्तु शुद्धः ॥ २०७ ॥

द्वेधा म्रक्षितमुक्तं सचित्ततोऽचित्ततश्च तत्राद्यम् ।
मात्रककरादिभूजल-वनस्पतिम्रक्षितं त्रिविधम् ॥ २०८ ॥

द्वेधा चित्तम्रक्षितमेकं कल्प्यं घृतादिसंसक्तम् ।
अपरं तु लोकनिन्दित-वसनादिना म्रक्षितमकल्प्यम् ॥ २०९ ॥

चिद्रूपकायषट्कान्यतरोपरि संस्थितं तु निक्षिप्तम् ।
षड्विधमपि तदनन्तर-परम्पराभ्यां द्विभेदं स्यात् ॥ २१० ॥

तत्र सचित्ताद्यवधानस्थितमशनाद्यनन्तरं ज्ञेयम् ।
यत्तु सचित्तोपरि पिठ-रिकादि निक्षिप्तमितरत्तत् ॥ २११ ॥

यदनन्तरनिक्षिप्तं यतिना तत्कल्पनीयमेव स्यात् ।
संघट्टादि त्यजतां तु यतनया ग्राह्यमप्यपरम् ॥ २१२ ॥

एवं पिहितमपि सचित्तकायषट्केन षड्विधं स्थगितम् ।
नवरमचित्तस्थगिते भङ्गचतुष्कं त्विदं ज्ञेयम् ॥ २१३ ॥

गुरुकं पिहितं गुरुकेण गुरुलघुकेन लघु च गुरुकेण ।
लघुकं लघुकेनैषु द्वितीयतुर्यौ न दुष्टौ स्तः ॥ २१४ ॥

क्षिप्त्वाऽन्यत्राऽयोग्यं मात्रादेयं ददाति तेन यदि ।
तत्संहृतसचित्ते क्षिपति सचित्तं चतुर्भङ्गी ॥ २१५ ॥

तुर्यो भङ्गः शुद्धः सचित्तसंघट्टनादिरहितत्वात् ।
इह पूर्वत्राऽनन्तर-परम्परविकल्पना कार्या ॥ २१६ ॥

दायकदोषयुतं तद् यद्दाता भवति बालको वृद्धः ।
ज्वरितो नपुंसकोऽन्धः प्रकम्पमानाङ्गको मत्तः ॥ २१७ ॥

उन्मत्तच्छिन्नकरो बद्धच्छिन्नांह्रिपादुकारूढौ ।
विगलत्कुष्ठो व्यालोडकश्च षट्कायवधकारी ॥ २१८ ॥

कर्त्तक-लोठकपींषिक-विरोलकाभर्जकश्च भुञ्जानः ।
कण्डकपेषकदलकाः षट्कायविघटकश्चापि ॥ २१९ ॥

सापाया शिशुवत्सा परकीयपरार्थदायिका गुर्वी ।
इत्यादि दायकानां ददतामोघेन न ग्राह्यम् ॥ २२० ॥

करमर्दनादिना चेतनेन यत्पूरणादिकमचित्तम् ।
मिलितं ददाति भक्त्याऽनुपयोगेन च तदुन्मिश्रम् ॥ २२१ ॥

अपरिणतं तु द्रव्यं भावो वा तत्र तद्द्विधा द्रव्यम् ।
दातृग्राहकसत्ता-स्थितं यत्प्रासुकीभूतम् ॥ २२२ ॥

भावोऽप्येवं द्वेधा देये साधारणे यदेकस्य ।
दित्सा नैवाऽन्येषां दायकभावाऽपरिणतं तत् ॥ २२३ ॥

शुद्धमिदमिति यदेकस्य न द्वितीयस्य परिणतं भवति ।
भिक्षामटतोः साध्वोर्ग्राहकभावापरिणतं तत् ॥ २२४ ॥

दध्यादिलेपयुक्तं लिप्तं न ग्राह्यमोघतोऽत्र पुनः ।
अष्टौ भङ्गाः संसृष्ट-मात्रकरसावशेषभक्ताद्याः ॥ २२५ ॥

अत्र च शुद्धा विषमा भङ्गाश्चत्वार एव यत्तत्र ।
पश्चात्कर्म न सम्भवति सावशेषाशनग्रहणात् ॥ २२६ ॥

छर्दितमुक्तं त्यक्तं तत्र च मधुबिन्दुपतनदृष्टान्तात् ।
परिशाटिसम्भवे सं-पतन्ति काकादयो जीवाः ॥ २२७ ॥

इत्युभयकृता एते दशापि दोषाः समासतो भणिताः ।
एवं स्थिते द्विचत्वारिंशद्दोषा मताः सर्वे ॥ २२८ ॥

आधाकर्मविभागौद्देशिककर्मान्तिमास्त्रयो भेदाः ।
अथ पूतिकर्ममिश्रं प्राभृतिका बादराया च ॥ २२९ ॥

अध्यवपूरक एतेऽष्टावप्यविशोधिकोटिरस्यार्थः ।
एतत्कोटिरवयवसंमिश्रं शुद्धमपि पूति ॥ २३० ॥

न क्रीणाति न पचति च न हन्ति न च कारणादनुमतेश्च ।
पिण्डैषणा च सर्वा नवकोटिष्वासु समवैति ॥ २३१ ॥

कोणगवेल्लिचतुष्कं द्वे गुरुवेल्ल्यौ च पृष्ठवंशश्च ।
सप्तभिरेभिः स्वार्थकृतेर्वसतिर्मूलगुणशुद्धा ॥ २३२ ॥

उत्तरगुणा द्विभेदास्तत्रैके सप्तमूलपूर्वपदाः ।
अपरे विशोधिकोटौ स्युरुत्तरोत्तरगुणा अष्टौ ॥ २३३ ॥

वेल्लयोस्तिर्यगुपरिगतवंशा आच्छादनं च पार्श्वानाम् ।
बन्धश्च कम्बिकानां दर्भाद्याच्छादनं चोद्ध्र्वम् ॥ २३४ ॥

कुड्यानां लेपो द्वारविधानं भूमिकासमीकरणम् ।
सप्तभिरात्मार्थकृतैः शुद्धा मूलोत्तरगुणैः स्यात् ॥ २३५ ॥

उद्द्योतिता धवलिता संमृष्टा वा सिता कृतबलिश्च ।
सिक्ता लिप्ता धूपायितेति सा शुद्धकोटौ स्यात् ॥ २३६ ॥

एवञ्च दोषरहितां स्त्रीपशुपण्डकविवर्जितां वसतिम् ।
सेवेत सर्वकालं विपर्यये दोषसम्भूतिः ॥ २३७ ॥

संस्थाप्य ग्रामादिषु वृषभं दीर्घीकृताग्रिमैकपदम् ।
अधिनिवासकटिनिविष्टं पूर्वमुखं वसतिरादेया ॥ २३८ ॥

शृङ्गस्थाने कलहः स्थानं चरणेषु न भवति यतीनाम् ।
उदररुजाधिष्ठाने पुच्छे तु स्फेटनं विद्धि ॥ २३९ ॥

मौलौ ककुदे पूजा-सत्कारावानने प्रभूतान्नम् ।
उदरे प्राप्तिः स्कन्धे पृष्ठे च भरक्षमो भवति ॥ २४० ॥

यन्न मुनिकृते क्रीतं नवापि तद् यत्परस्य न गृहीतम् ।
प्रामित्यमभिरुतञ्च त्यक्तुं वस्त्रं मुनेरर्हम् ॥ २४१ ॥

वस्त्रे च खञ्जनाञ्जनकर्दमलिप्ते विकुट्टिते जीर्णे ।
मूषकजग्धे दग्धे जानीहि शुभाशुभं भागैः ॥ २४२ ॥

कृतनवभागे वस्त्रे चत्वारः कोणकास्तदन्तौ द्वौ ।
तत्कर्णपट्टिके द्वे मध्ये वसनं भवेदेकः ॥ २४३ ॥

चत्वारः सुरभागास्तेषु भवेदुत्तमो मुनेर्लाभः ।
द्वौ भागौ मानुष्यौ भवति तयोर्मध्यमा लब्धिः ॥ २४४ ॥

द्वावासुरौ च भागौ ग्लानत्वं स्यात्तयोस्तदुपभोगे ।
मध्यो राक्षससंज्ञस्तस्मिन् मृत्युं विजानीहि ॥ २४५ ॥

मूल्यमनगारवस्त्रस्याष्टादशरूपका जघन्येन ।
उत्कर्षेण तु रूपकलक्षं स्यान्मध्यमं शेषम् ॥ २४६ ॥

तुम्बमयं दारुमयं पात्रं मृत्स्नामयञ्च गृह्णीयात् ।
यदकल्प्यं कांस्यमयं ताम्रादिमयञ्च तत् त्याज्यम् ॥ २४७ ॥

वर्णाढ्ये ज्ञानं सु-प्रतिष्ठिते पात्रके प्रतिष्ठा स्यात् ।
व्रणरहिते (च) कीर्तिकल्पना मता संश्रुतेर्लाभः ॥ २४८ ॥

कुण्डे चरित्रभेदः शबले मतिविभ्रमो भवेत्पात्रे ।
अन्तर्बहिश्च दग्धे मृत्युं तस्मिन् विजानीहि ॥ २४९ ॥

पद्मोत्पले त्वकुशलं व्रणं पुनस्सव्रणे विनिर्देश्यम् ।
स्थानं न गणे चरणे चतुष्पदे स्थाणुसंस्थाने ॥ २५० ॥

सौवीरमम्लकणधावने तथोष्णोदकं च गृह्णीयात् ।
वर्णादिभिः परिणतं प्रासुकनीरञ्च तदभावे ॥ २५१ ॥

उष्णोदकं त्रिदण्डोत्कलितं पानाय कल्पते यतीनाम् ।
ग्लानादिकारणमृते यामत्रितयोपरि न धार्यम् ॥ २५२ ॥

तद्धि प्रहरत्रितयादूर्ध्वं वर्षासु चेतनीभवति ।
शिशिरे यामचतुष्कात्पञ्चप्रहरोपरि ग्रीष्मे ॥ २५३ ॥

संसृष्टाऽसंसृष्टोद्धृताऽल्पलेपा तथोद्गृहीता च ।
प्रगृहीतोज्झितधर्मा चैताः पिण्डैषणाः सप्त ॥ २५४ ॥

तत्र खरण्टितमात्रकहस्ताभ्यां भवति भङ्गकचतुष्कम् ।
तस्मिन् भङ्गेषु त्रिषु संसृष्टिरन्या त्वसंसृष्टा ॥ २५५ ॥

भोजनजाते गृहिणोद्भूते स्वयोगे ननूद्धृता भिक्षा ।
निर्लेपवल्लचणका-दिकदानादल्पलेपा स्यात् ॥ २५६ ॥

भोजनकाले निहिता शरावमुख्येषु सोद्गृहीता स्यात् ।
प्रगृहीता तु यदशितुं प्रदातुमथवा करे कुरुते ॥ २५७ ॥

यत्र द्विपदप्रमुखाः काङ्क्षन्त्यथवा भवेत् परित्यज्यम् ।
अर्द्धत्यक्तं यदि वा सोज्झितधर्मा भवेद्भिक्षा ॥ २५८ ॥

पिण्डैषणावदेवं ज्ञेया पानैषणापि सप्तविधा ।
केवलमिहाल्पलेपा सौवीरचाम्लकप्रमुखा ॥ २५९ ॥

आदाय मधुपवृत्त्या पिण्डं वसतौ प्रविश्य गुरुपुरतः ।
नैषेधिकीतिजल्पन्नीर्यापथिकीं प्रतिक्रामेत् ॥ २६० ॥

कायोत्सर्गे भिक्षाऽतिचारजातं विभाव्य निःशेषम् ।
गमनागमने आलोचयेत्तथा भक्तपानादि ॥ २६१ ॥

तदनु दुरालोचितभक्तपानशोधननिमित्तमुच्चार्य ।
गोचरचर्यादण्डक-मुत्सर्गे चिन्तयदेवम् ॥ २६२ ॥

"अहो जिणेहिं असावज्जा वित्ती साहूण देसिया ।
मुक्खसाहण हेउस्स साहुदेहस्स धारणा" ॥ २६३ ॥

उद्द्योतपठनपूर्वं प्रत्याख्यानस्य पारणं कुर्यात् ।
तदनु रजोहरणेन प्रमार्जयेन्मौलिभालतलम् ॥ २६४ ॥

मुक्ते पात्रेऽपरथा स्वेदः सम्पातिमादि वा पततिं ।
प्रेक्ष्य भवं मण्डल्यां पात्रं मुक्त्वा स्तुयाद्देवम् ॥ २६५ ॥

कुर्याज्जघन्यतोऽपि स्वाध्यायं श्लोकषोडशकमानम् ।
विश्राम्येत्तत्क्षणमथ देहे तप्तेऽन्यथा रोगः ॥ २६६ ॥

बाहुमुनि-मूलदेवक्षत्रियधृतवस्त्रपुष्पमित्राणाम् ।
चरितानि मनसि कृत्वा विदधीत च्छन्दनां यतीनाम् ॥ २६७ ॥

बालग्लानादीनां कुर्वीत च्छन्दनां विशेषेण ।
प्रतिलिख्य वदनमाननपढेन लघुवन्दनं दद्यात् ॥ २६८ ॥

पात्रं प्रतिगृह्णामीत्येवं मुनिकुञ्जरं समापृच्छ्य ।
उच्चार्य नमस्कारं प्रकाशदेशस्थितोऽश्नाति ॥ २६९ ॥

संयोजनाप्रमाणाङ्गारा धूमश्च हेतवः षट् षट् ।
इति पञ्चविधा ग्रासैषणा मता भोजने तत्र ॥ २७० ॥

संयोजनोपकरणेऽन्नपानयोश्च क्रमेण बहिरन्तः ।
द्वात्रिंशत्कवलाधिक-भुक्तावधिकं प्रमाणं स्यात् ॥ २७१ ॥

कवलानां मानमिदं यो द्वात्रिंशत्तमो भवेद् भागः ।
निजकाहारस्य तथा यो वाऽविकृते मुखे विशति ॥ २७२ ॥

रागेण सरसमास्वादयतश्चारित्रमत्र सागारम् ।
भुञ्जानस्यानिष्टं द्वेषेण सधूमकं भवति ॥ २७३ ॥

संयमवृद्ध्यै वैयावृत्यार्थं वेदनाधिसहनाय ।
ईर्याशुद्ध्यर्थं प्रा-णवृत्तये धर्मचिन्तायै ॥ २७४ ॥

इति हेतुषट्कतोद्या भिक्षा पि भुञ्जीत हेतुभिः षड्भिः ।
रोगोपशमनिमित्तं राजाद्युपसर्गसहनार्थम् ॥ २७५ ॥

तुर्यव्रतरक्षायै वर्षादिषु जन्तुपालनकृते च ।
तपसे संन्यासादौ तनुव्यवच्छेदनार्थञ्च ॥ २७६ ॥

प्रथमप्रहरानीतं यतीनामशनादि कल्पते भोक्तुम् ।
आयामत्रयमुपरि तु कालातिक्रान्तता तस्य ॥ २७७ ॥

तापक्षेत्राऽभावे यदात्तमशनाद्यनुक्षते तरणौ ।
तद्धि क्षेत्राऽतीतं न युज्यते जेमितुं यतीनाम् ॥ २७८ ॥

क्रोशद्वितयादर्वा-गानेतुं कल्प्यतेऽशनप्रभृति ।
तत्परतोऽप्यानीतं मार्गातीतमिति परिहार्यम् ॥ २७९ ॥

द्वात्रिंशच्चाष्टाविंशतिश्च कवलाः प्रमाणमाहारः ।
तदतिक्रमे प्रमाणा-तीतं साधोर्यतिन्याश्च ॥ २८० ॥

भक्तमशुद्धं कारणजातेनात्तमपि भोजनावसरे ।
त्यजति यदि तदा शुद्धो भुञ्जानो लिप्यते नियतम् ॥ २८१ ॥

अर्द्धमशनस्य सव्यञ्जनस्य देहे जलस्य चांशौ द्वौ ।
न्यूनञ्च षष्ठभागं कुर्यादनिलानिरोधार्थम् ॥ २८२ ॥

भुङ्क्ते स्वादमगृह्णन्नविलम्बितमद्रुतं विशब्दं च ।
केसरिभक्षितदृष्टान्ततः कटप्रतरगत्या वा ॥ २८३ ॥

जम्बुककाकोपमया यो भुक्त्वा भक्तमविधिनान्यस्मै ।
दत्ते यो गृह्णाति च वमनादि स्यात्तयोर्दोषः ॥ २८४ ॥

आवश्यकेऽपि भणितं द्वावप्येतौ गणाद् बहिष्कार्यौ ।
अपुनःकरणतयाऽभ्युत्थिते तपः पञ्चकल्याणम् ॥ २८५ ॥

भुक्ते द्विदले निर्लेप्य मुखं करं पात्रकञ्च दध्यादि ।
पात्रान्तरेण वाऽश्नाति भोज्यमादौ सदा मधुरे ॥ २८६ ॥

परिशाटिरहितमभ्यवहरेत्तथा सर्वमन्नमरसमपि ।
न ज्ञायते यथा भोजनप्रदेशस्तदितरो वा ॥ २८७ ॥

पात्राणां प्रक्षालन-सलिलं प्रथमं पिबति नियमेन ।
संशोध्याऽऽस्यं प्रक्षा-लयन्ति पात्राणि बहिरेत्य ॥ २८८ ॥

सूरेः पात्रं भिन्नं प्रथमं प्रक्षाल्य शेषपात्रेषु ।
पूर्वं यथा विशुद्धं कल्पो देयस्ततोऽन्येषाम् ॥ २८९ ॥

उद्धरितं यदि कथमपि तत्तु परिष्ठापयन्ति विधिनैव ।
निपुणाः शैक्षा अतथाकरणे चोड्डाहमुखदोषाः ॥ २९० ॥

निर्जन्तुस्थण्डिलगमनपूर्वकं रक्षया समाक्रम्य ।
व्युत्सृष्टं त्रिविधेनेत्येवं त्रिः श्रावणं कार्यम् ॥ २९१ ॥

व्रणलेपालोपाङ्ग-मक्षणवत् प्राणधारणामात्रम् ।
भुक्त्वा देयं लघुवन्दनकं ततः कल्पतेऽबादि ॥ २९२ ॥

कुर्व्वीतेर्यापथिका-प्रतिक्रमणचैत्यवन्दने तदनु ।
चितिकर्मदानपूर्वं प्रत्याख्यानं विधातव्यम् ॥ २९३ ॥

संशोध्य पात्रबन्धं पात्रं निर्माज्र्य तेन बद्ध्वा च ।
संस्थापयेच्च विधिना यावत् प्रतिलेखनासमयः ॥ २९४ ॥

पटलानि पात्रबन्धोऽथवाऽपि कल्पः प्रमादयोगेन ।
कथमपि खरण्टितः स्याद्विधिना प्रक्षालयेत्तानि ॥ २९५ ॥

प्रथमं निर्माज्र्यन्ते चीवरखण्डेन सर्वपात्राणि ।
तन्नित्यं प्रक्षाल्यं कुत्सादिकदोषघातार्थम् ॥ २९६ ॥

उच्चाराय यतिजनो जिगमिषुरेकं मुनिं विमुञ्चेत ।
वसतौ परं युवैको बालो वृद्धश्च न विमोच्यः ॥ २९७ ॥

आवश्यकीं भणित्वा त्वरमाणो युगलितो रहितविकथः ।
जलमात्रकं गृहीत्वा स बहिर्भुवि याति समितात्मा ॥ २९८ ॥

पूज्ये उत्तरपूर्वे निशाचरेभ्यो भयञ्च याम्यायाम् ।
मुक्त्वा दिशां त्रयमिदं स्थण्डिलभूप्रेक्षणं कुर्यात् ॥ २९९ ॥

अनापातसंलोकं परस्यानौपघातिकम् ।
समं चाशुषिरं चैवा-चिरकालकृतञ्च यत् ॥ ३०० ॥

विस्तीर्णं दूरावगाढमनासन्नं बिलोज्झितम् ।
प्राणबीजत्रसत्यक्तं स्थण्डिलं दशधा मतम् ॥ ३०१ ॥

स्थण्डिलभुवां चतुर्विंशतिः सहस्राणि भङ्गका एभिः ।
ते त्वेकशुद्धभङ्गक-सहिताः परिपूर्णतां यान्ति ॥ ३०२ ॥

उभयमुखे द्वे राशी तत्राद्यो यः स आद्यसंयोगः ।
स च संयोगो भक्तोऽधस्त्याङ्कानन्तरेण ततः ॥ ३०३ ॥

लब्धे भागहराङ्कोर्द्धगताङ्कहते भवेदिहाङ्को यः ।
स पुनर्द्वैतीयः संयोगाद् दशसंयुक्ताद्विशती ॥ ३०४ ॥

द्विशतीदशभिर्युक्ता षट्कसंयोगे शतं सविंशतिकम् ।
चत्वारिंशत्पञ्चाधिका दशैकश्च संयोगः ॥ ३०५ ॥

एको दशपददुष्टो दशपदशुद्धो द्वितीयको भङ्गः ।
देशविशुद्धः शेषाभङ्गसहस्त्रश्चतुर्विंशः ॥ ३०६ ॥

स्थण्डिलभुवामभावे कुर्वीतोच्चारकायिकादीनि ।
स्मृत्वाऽऽधारद्रव्यं धर्माधर्मास्तिकायादि ॥ ३०७ ॥

तत्रोपविश्य निर्लेपनाय गृह्णाति लेष्टुशकलानि ।
प्रस्फोटयति च यत्नान्न जायते येन जन्तुवधः ॥ ३०८ ॥

तत्र स्थाने पश्येदूर्ध्वं सागारिकं द्रुमादिस्थम् ।
गर्त्तादरीगतमथो गमनादि विधायिनं तिर्यग् ॥ ३०९ ॥

कृत्वा स्थण्डिलभूमेः संदंशकयोश्च यत्नतः प्रेक्षाम् ।
तद्देवतामनुज्ञापये-दितरथाच्छलादि स्यात् ॥ ३१० ॥

उत्तरमुखो यदि दिवा भूत्वा दक्षिणमुखो निशायान्तु ।
लघुवन्दनेन निगदति तनुसंज्ञां व्युत्सृजामीति ॥ ३११ ॥

दक्षिणहस्ते मात्रक-मुपकरणं वामजानुनि न्यस्य ।
वामकरगतैर्लेष्टुभिरुच्चारं व्युत्सृजेत्साधुः ॥ ३१२ ॥

पूर्वापरयोर्न देयं पृष्ठं यस्मादवर्णवादः स्यात् ।
पवने पृष्ठगतोऽर्शां-सि स्युर्घ्राणस्य विड्गन्धात् ॥ ३१३ ॥

वर्धिष्णुच्छायायां संसक्तपुरीषमुत्सृजेत्साधुः ।
तदभावे तूष्णेऽपि व्युत्सृज्य मुहूर्तकं तिष्ठेत् ॥ ३१४ ॥

तस्मिन्नन्यस्मिन् वा देशे पुतोत्पुंसनं विधायाथ ।
लघुवन्दनेन निगदति कुर्वे निर्लेपनादीनि ॥ ३१५ ॥

निर्लेपनां प्रकुर्या-दुड्डाहभयाददूरदेशस्थः ।
प्रासुकपयसस्तिसृभिः प्रसृतिभिरथ लेपकृत्यं च ॥ ३१६ ॥

यदि पश्यन्ति गृहस्थाः प्रत्येकं मात्रकाण्युपादाय ।
आचामेयुर्मुनयस्तदा सशब्दं प्रचुरपयसा ॥ ३१७ ॥

त्रिविधेन कायसंज्ञा व्युत्सृष्टेति त्रिवेलमुच्चार्य ।
भिक्षामटन्ति ये तैर्दण्डप्रक्षालनं कार्यम् ॥ ३१८ ॥

मार्गमपि श्रमणीनां परिहरमाणोऽप्रमद्वरो मौनी ।
शमितात्मा मुनिवर्गः प्रतिश्रयं प्रतिनिवर्तेत ॥ ३१९ ॥

तदनु प्रविशन् वसतौ कुरुते नैषेधिकीं बृहच्छब्दम् ।
वदति च नमो खमा-समणाणमिति विनीतविनयः सन् ॥ ३२० ॥

लघुरादाय यतीनां दण्डान् मुञ्चेत्प्रमृज्य भिक्षादि ।
क्रमयोः प्रमार्जनीयं रजो रजोहरणदशिकाभिः ॥ ३२१ ॥

अनुगुवीर्य्यापथिकी-प्रतिक्रमणपूर्वकं गुरोः पुरतः ।
गमनागमने आलोच्य स्वाध्यायं प्रकुर्वन्ति ॥ ३२२ ॥

संयमयोगे विहिते यावद् योगान्तरस्य समयो न ।
तावत् सर्वत्र मुनिः कुर्यात् स्वाध्यायविधिमेव ॥ ३२३ ॥

पूर्णं तृतीययामं ज्ञात्वा च्छायानुमानतः साधुः ।
गुरवे कथयति यदनु-प्रेक्षा-समयोऽधुना पूज्याः ॥ ३२४ ॥

प्रथमं सूरिः पश्चात् साधुर्दत्त्वा क्षमाश्रमणमेकम् ।
प्रतिलेखनां करोमीति वदति दत्त्वा द्वितीयन्तु ॥ ३२५ ॥

वसतिं प्रमार्जयामीति भाषतेऽथास्य वस्त्रिकं प्रेक्ष्य ।
त्यक्तक्रियान्तरः सन् लघुवन्दनकद्वयं दद्यात् ॥ ३२६ ॥

तत्रैकेन शरीरप्रेक्षां लघुवन्दनेन सन्देश्य ।
अन्येनाङ्गप्रति-लेखनां करोमीति भाषेत ॥ ३२७ ॥

उपवासिनाऽखिलोपधि-पर्यन्ते चोलपट्टकः प्रेक्ष्यः ।
अन्यैस्तु सर्वप्रथममेव स पश्चाद्रजोहरणम् ॥ ३२८ ॥

वसतिं प्रमृज्य तदनु प्रतिलिख्य स्थापनागुरुः स्थाप्यः ।
एकं लघुवन्दनकं दत्त्वा प्रेक्षेत मुखवसनम् ॥ ३२९ ॥

तदनु लघुवन्दनेन स्वाध्यायं मुनिजनः प्रकुर्वीत ।
यः सूत्रार्थग्राही स्वाध्यायस्तस्य तु स एव ॥ ३३० ॥

तत उपधिस्थण्डिलयोः प्रेक्षार्थं स्यात् क्षमाश्रमणयुगलम् ।
तत्रैकं सन्दंशेऽन्यत्तु प्रतिलेखनायां स्यात् ॥ ३३१ ॥

प्रातःसमये प्रेक्ष्यो दशधोपधिरेव नैव पात्राणि ।
यस्मात्प्रेक्षाऽवसर-स्तेषामुद्घाट-पौरुष्याम् ॥ ३३२ ॥

पश्चिमयामे तूपधि-पात्राद्यं प्रतिलिखेत्समस्तमपि ।
अथ पात्रकनियोगं सप्तविधं प्रेक्ष्य निक्षिपति ॥ ३३३ ॥

प्रेक्षां कुर्वन् प्रत्या-ख्यानं दत्ते यदि प्रमत्तो वा ।
वाचयति पठति च तथा षट्कायविराधको भवति ॥ ३३४ ॥

अधिकमौपग्रहिकं विधिना प्रतिलिख्य सर्वमुपकरणम् ।
अथ पुनरपि सूत्रार्थ-ग्रहणं विदधाति मुनिवर्गः ॥ ३३५ ॥

पश्चिमघटिकाद्वितये कालं प्राभातिकं प्रतिक्रम्य ।
अथ सप्तविंशतिविधान् प्रेक्षेत स्थण्डिलोद्देशान् ॥ ३३६ ॥

अधिसहमानस्यासन्नमध्यदूरे त्रयः स्युरन्तस्ते ।
एवमनधिसहमान-स्याप्येवं षड् बहिः षट् च ॥ ३३७ ॥

इत्युच्चारे द्वादश भवन्ति ते द्वादशैव नु जलेऽपि ।
स्यादेवं चतुर्विंशतिस्त्रयं कालमाश्रित्य ॥ ३३८ ॥

स्थण्डिलदेशप्रेक्षां कृत्वाऽशनपानके परिष्ठाप्य ।
विस्मृतमम्बरवसति-प्रमुखं प्रतिलेखयेत् किञ्चित् ॥ ३३९ ॥

एकं लघुवन्दनकं गोचरचर्याप्रतिक्रमणविषयम् ।
दत्त्वा ततो द्वितीयेन तेन कुर्यादिहोत्सर्गम् ॥ ३४० ॥

अर्द्धनिमग्ने बिम्बे भानोः सूत्रं भणन्ति गीतार्थाः ।
इति वचनप्रामाण्यांद्दैवसिकावश्यके कालः ॥ ३४१ ॥

अथवाऽप्येतन्निर्व्या-घाते मुनयस्तथा प्रकुर्वीरन् ।
आवश्यके कृते सति यथा प्रदृश्येत तारकत्रितयम् ॥ ३४२ ॥

धर्मकथादिव्यग्रे गुरौ तु मुनयः स्थिता यथास्थानम् ।
सूत्रार्थस्मरणपराश्चाऽऽपृच्छ्य गुरुं प्रतीक्षन्ते ॥ ३४३ ॥

आवश्यकं विदधते पूर्वमुखास्तेऽथवोत्तराभिमुखाः ।
श्रीवत्साकारस्थापनां समाश्रित्य तिष्ठन्तः ॥ ३४४ ॥

आचार्या इह पुरतो द्वौ पश्चात्तदनु च त्रयस्तस्मात् ।
द्वौ तत्पश्चादेको रचनेयं नवकगणमानात् ॥ ३४५ ॥

मुनियुगलकेन विधिना कालो व्याघातिकस्तथा ग्राह्यः ।
तस्मिन् यथा समासे सन्ध्याया अप्यपगमः स्यात् ॥ ३४६ ॥

कुर्वीत स्वाध्यायं मुनिवर्गो यावदादिम-प्रहरम् ।
विश्रामणं च कुर्यात् सुबाहुमुनिरिव यतिजनस्य ॥ ३४७ ॥

कालिकसिद्धान्ताध्ययनवाचनागुणनगोचरः कालः ।
दिवसस्य निशश्च प्रथमपश्चिमौ द्वौ मतौ प्रहरौ ॥ ३४८ ॥

अङ्गान्येकादशकालिकं श्रुतं तत्त्ववेदिभिर्भणितम् ।
सर्वोऽपि दृष्टिवादः कालिकरूपं श्रुतं च स्यात् ॥ ३४९ ॥

प्रतिलिख्य वदनवसनं लघुवन्दनकेन रात्रिसंस्तरकम् ।
सन्देश्यान्येन वदति "राई संथारए ठामि" ॥ ३५० ॥

शक्रस्तवं भणित्वा कृतमिथ्यादुष्कृतो यथा ज्येष्ठम् ।
कृतसाकारानशनो निर्जितनिद्राप्रमादः स्यात् ॥ ३५१ ॥

यतिनो यतिनः प्रत्येकं कुड्यस्य च यतेश्च रचनायाम् ।
यतिनाञ्च पात्रकाणां हस्तो हस्तोऽन्तरे कार्यः ॥ ३५२ ॥

उचिते देशे गत्वा संस्तरकोत्तरपटावथ प्रेक्ष्य ।
संयोज्यं च जानू-परि संस्थाप्य भुवं प्रमार्जयति ॥ ३५३ ॥

तत्तत्रास्तीर्य मुनिः करयुगलं न्यस्य भणतीदम् ।
"अणुजाणह निसीही णमो खमासमणपुज्जाणं" ॥ ३५४ ॥

अथ संस्तरके स्थित्वा प्रेक्ष्याऽस्य पटं त्रिवेलमुच्चार्य ।
स नमस्कारं सामायिकं ततो वामपार्श्वे च ॥ ३५५ ॥

उपधानीकृतबाहुः पादौ कुर्कुटीवदाकुञ्च्य ।
असमर्थो भूमितलं प्रमृज्य विधिना प्रसारयति ॥ ३५६ ॥

किल कुर्कुटी-प्रसूताऽपत्यत्राणाय पादयुग्ममपि ।
आकुञ्च्य स्वपिति सदा यदा तु पादौ परिक्लान्तौ ॥ ३५७ ॥

गगने तदा पुनरपि प्रमार्ज्य संस्थापयेत् प्रयत्नेन ।
कुर्कुट्या दृष्टान्तं तथाऽनगारो मनसिकृत्य ॥ ३५८ ॥

परितान्तौ निजचरणा-वुत्पाट्य स्थापयेद् गगनभागे ।
प्रतिलिख्य पदस्थानं तत्र स्थापयति यत्नेन ॥ ३५९ ॥

सुप्तो यावज्जागर्ति तावदाध्यात्मिकः शुभध्यायी ।
निद्रामोक्षं कुरुते मुहूर्त्तमेकं विशुद्धात्मा ॥ ३६० ॥

स्थविरा द्वितीययामं सूत्रार्थविभावनेन निःशेषम् ।
अतिवाह्य स्थिरहृदयाः प्राप्ते यामे तृतीयेऽथ ॥ ३६१ ॥

गृह्णन्ति चार्द्धरात्रिक-कालं गुरवस्ततो विबुध्यन्ते ।
पूर्वोदितेन विधिना स्थविरा निद्रां प्रकुर्वन्ति ॥ ३६२ ॥

उद्वर्तना-परावर्तना यदि च कुर्वते तदा मुनयः ।
प्रथमं शरीरकं प्रति-लिखति पश्चाच्च संस्तरकम् ॥ ३६३ ॥

कृत्वा शरीरचिन्ता-मीर्यापथिकीप्रतिक्रमणपूर्वम् ।
कुर्वन्ति स्वाध्यायं गाथात्रयमानमधिकं वा ॥ ३६४ ॥

निद्रापगमे गुरवस्तत्त्वं ध्यायन्ति चिन्तयन्त्यथवा ।
अभ्युद्यतं विहारं तृतीययामे जनोद्धारम् ॥ ३६५ ॥

सूरिस्थविरग्लानप्रमुखा-निजसमय एव कृतनिद्राः ।
भावेनाप्यपनिद्रा विचिन्तयन्तीदृशं हृदये ॥ ३६६ ॥

"धन्नाणं विहियोगो विहिपक्खाराहगा सया धन्ना ।
विहिबहुमाणी धन्ना विहिपक्खअदूसगा धन्ना" ॥ ३६७ ॥

तिष्ठन्ति पञ्च पुरुषा यत्र ज्ञानादिवित्तसेवधयः ।
तद्गच्छनिश्चयोऽहं कदा विधास्यामि विधिपक्षम् ॥ ३६८ ॥

पृथ्वीपतिः कुमारो मन्त्री सेनापतिः पुरारक्षः ।
पञ्चभिरेतै राज्यं यथा प्रधानैर्भवति मुदितम् ॥ ३६९ ॥

तद्वत्प्रवराचार्योपाध्यायप्रवर्तिनस्तथा स्थविरः ।
यत्र गणावच्छेदी पञ्चैते सन्ति स हि गच्छः ॥ ३७० ॥

विश्राम्यन्ति गणधराश्चतुर्थयामे तु जागृयुः सर्वे ।
वैरात्रिककालाऽऽदानपूर्वकं कुर्वतेऽध्यायम् ॥ ३७१ ॥

ग्राह्योऽर्द्धरात्रिकस्याऽऽसन्नः प्राभातिकस्य चासन्नः ।
मुनिना कालो वैरात्रिक इति सिद्धान्तपरिभाषा ॥ ३७२ ॥

साधुश्चैत्रे शुक्लत्रयोदशी-प्रभृतिके दिनत्रितये ।
कायोत्सर्गं कुर्यादचित्तरजसोऽवनमनार्थम् ॥ ३७३ ॥

स्वाभाविके पतत्यपि रजसि सवाते समीररहितेऽपि ।
सूत्रं प्रमादरहितो यावद्वत्सरमधीयीत ॥ ३७४ ॥

शुचीकार्तिकयोर्मासे सितभूतेष्टाप्रभृत्यहस्त्रितयम् ।
प्रतिपदवसानमध्ये-तव्यं न यतोऽत्र जीववधः ॥ ३७५ ॥

एवं प्रतिपत्पर्यन्तमाश्विने चैत्रिके च नाऽध्येयम् ।
द्वादशदिनानि यावत् सूत्रं सितपञ्चमीप्रभृति ॥ ३७६ ॥

ऋतुबद्धं कालमपास्य जीवघातादिदोषसम्भवतः ।
बहुवर्षासमये क्षालयन्त्युपधिमखिलमपि यत्नात् ॥ ३७७ ॥

सलिलाभावेऽनु जघन्यतोऽपि नियमेन पात्रनिर्योगः ।
आचार्यग्लानानामुपधिर्मलिनः सदा क्षाल्यः ॥ ३७८ ॥

आचार्याणां मलिनोपधिपरिभोगे ह्यवर्णवादः स्यात् ।
ग्लानानां तद्वसनप्रावरणेऽजीर्णतोपत्तिः ॥ ३७९ ॥

सामाचारीमनिशं सेवेत यथागमं यथास्थानम् ।
सा त्रिविधा स्यादोघे च पदविभागे च दशधा च ॥ ३८० ॥

आद्या तत्रौघे स्या-दिहौघनिर्युक्तिजल्पितं सर्वम् ।
ओघोऽत्र हि सामान्यं तद्विषया साऽपि तद्रूपा ॥ ३८१ ॥

प्रायश्चित्तविधिगता या कथिता जीतकल्पसमयादौ ।
सा पदविभागरूपा सामाचारी जिनैरुक्ता ॥ ३८२ ॥

या चक्रवालसामाचारी सा कालगोचरा दशधा ।
इच्छाकारो मिथ्याकारश्च तथा तथाकारः ॥ ३८३ ॥

आवश्यकी च नैषेधिकी तथा पृच्छना भवेत्षष्ठी ।
प्रतिपृच्छा च तथा छन्दनाऽपि च निमन्त्रणा नवमी ॥ ३८४ ॥

उपसंपच्चेति दशविधा तत्राऽऽद्या यदिच्छया करणम् ।
न बलाभियोगपूर्वक-मिच्छाकारप्रयोगोऽतः ॥ ३८५ ॥

संयमयोगे वितथाचरणे मिथ्येदमिति विधानं यत् ।
मिथ्यादुष्कृतदानं मिथ्याकारः स विज्ञेयः ॥ ३८६ ॥

सूरिर्बहुश्रुतो नैष्ठिकश्च यद्वाचनादिकं दत्ते ।
शिष्याय तथैव तदिति निश्चयकरणं तथाकारः ॥ ३८७ ॥

आवश्यकी विधेया गमने नैषेधिकी पुनर्विशता ।
कार्यं प्रविदातुमभी-प्सितमापृच्छा गुरोः कार्या ॥ ३८८ ॥

पूर्वं निरूपितेन च पूर्वनिषिद्धेन वा सतोऽप्यत्र ।
कार्ये गुरोः पुनः पृच्छा प्रतिपृच्छा जिनैरुक्ता ॥ ३८९ ॥

सा च्छन्दना यदशनादिके गृहीतेऽर्थ्यते मुनिर्भोक्तुम् ।
अगृहीत एव तस्मिन्निमन्त्रणामाहुरर्हन्तः ॥ ३९० ॥

यद्गम्यते बहुश्रुत-सूरिसमीपे विमुच्य निजगच्छम् ।
सम्यग्ज्ञानादित्रय-लाभार्थं सोपसम्पदिति ॥ ३९१ ॥

सामाचारी दशधाऽपि चक्रवालेतिसंज्ञया गदिता ।
चक्रमिव येन वलते भ्रमति प्रतिपदमहोरात्रम् ॥ ३९२ ॥

सामाचारी दशधाऽन्यापि प्रेक्षा प्रमार्जना चैव ।
भिक्षेर्यापथिकाऽऽलोचनानि भोजनविधिः षष्ठी ॥ ३९३ ॥

मात्रकशुद्धिविचारौ स्थण्डिलमावश्यकादिकविधानम् ।
एषाऽपि यथास्थानं विवृता दशधाऽपि पूर्वत्र ॥ ३९४ ॥

इति दिनकृत्यं कुर्वन्नवभिः कल्पैः सदापि विहरेत ।
तत्राष्टमासकल्प्यास्तेषु न पीठादिपरिभोगः ॥ ३९५ ॥

विजिहीर्ष्यवस्तुवार्षिकमासिककल्पावसानदिवसेषु ।
पीठादिकं समर्प्यौ-पग्रहिकं सर्वमुपकरणम् ॥ ३९६ ॥

शय्यातरमापृच्छ्य प्रमृज्य वसतिं तृतीयपौरुष्याम् ।
विहरन्ति पथि तु दूरे प्रथमे प्रहरे द्वितीयेऽपि ॥ ३९७ ॥

गीतार्थश्च विहारोऽपरस्तु गीतार्थनिश्रितो भवति ।
गीतं तु सूत्रमुक्तं जघन्यतोऽप्यादिमाङ्गं तत् ॥ ३९८ ॥

तद्द्वादशाङ्गमुत्कृष्टतोऽ नयोर्मध्यगन्तु मध्यमतः ।
अर्थः सूत्रव्याख्या गीतेनार्थेन युक्तो यः ॥ ३९९ ॥

तन्निश्रया विहारो युक्तो गच्छस्य बालवृद्धयुजः ।
अप्रतिबद्धस्य सदा द्रव्यादिचतुष्कमाश्रित्य ॥ ४०० ॥

नवमः कल्पो मासैर्भवति चतुर्भिर्नभो नभस्याद्यैः ।
तत्र च संस्तरकपदप्रोञ्छनकादेर्न परिभोगः ॥ ४०१ ॥

पङ्कापनयनहेतोः पादप्रतिलेखनी घना मसृणा ।
प्रतिसंयतं निषद्या बद्धा ध्रियते रजोहरणे ॥ ४०२ ॥

अभितो नखसंस्थाना प्लक्षोदुम्बरवटादिकाष्ठमयी ।
एकाङ्गुलविस्तारा वितस्तिमाने प्रमाणे सा ॥ ४०३ ॥

यतीनां फलकं शय्यासनन्तु वर्षासु पीठपट्टादि ।
शेषसमये हि संस्तरपादप्रोञ्छनकपरिभोगः ॥ ४०४ ॥

अस्मिन् वर्षाकल्पे विविधतपोऽभिग्रहेषु यतितव्यम् ।
पञ्चकहान्या जाते पर्युषणमहो विशेषोऽयम् ॥ ४०५ ॥

खेलोच्चाराद्यर्थं मात्रकसङ्ग्रहणमत्र कर्तव्यम् ।
गच्छेन्नोर्ध्वमधस्तिर्यक् सार्द्धक्रोशयुगपरतः ॥ ४०६ ॥

भस्म-डगलकादीनां प्रागात्तानां तथा परित्यजनम् ।
इतरेषां च ग्रहणं शैक्षा प्रव्राजनं चैव ॥ ४०७ ॥

औपग्रहिकं वर्षोचितमुपकरणं तथाऽधिकं ग्राह्यम् ।
न यथा वर्षामध्ये विमार्गणीयं भवत्यन्यत् ॥ ४०८ ॥

नवविकृतिपरित्यागो न्यूनोदरता च लोचकरणं च ।
पीठफलकादिमार्गणमेव पर्युषणाकल्पः स्यात् ॥ ४०९ ॥

आषाढपौर्णमासीदिवसादारभ्य पर्युषणापर्व ।
पञ्चाशत्तमदिवसादर्वाक् कार्यं तु नो परतः ॥ ४१० ॥

परिषोढव्या द्वाविंशतिः क्षुदाद्याः परिषहा यतिना ।
चरणे करणे यतितव्यमनयोस्तु स्वरूपमिदम् ॥ ४११ ॥

व्रतपञ्चकं नवब्रह्मगुप्तयो दशविधः श्रमणधर्मः ।
वैयावृत्त्यं दशधा संयमभेदाश्च सप्तदश ॥ ४१२ ॥

सम्यग्ज्ञानप्रमुखत्रितयं क्रोधादिनिग्रहचतुष्कम् ।
तपसो द्वादशभेदा एवं सप्ततिविधं चरणम् ॥ ४१३ ॥

पिण्डविशुद्धिचतुष्कं द्वादशभेदाश्च भावनायाः स्युः ।
गुप्तित्रयं समितिपञ्चकं च पञ्चेन्द्रियनिरोधः ॥ ४१४ ॥

प्रतिलेखनाविधाः पञ्चविंशतिरभिग्रहाश्च चत्वारः ।
द्वादशभेदाः प्रतिमा इत्थं करणमपि सप्ततिधा ॥ ४१५ ॥

एवं प्रतिदिवसविधेयं संयमानुष्ठितौ कृतोद्योगाः ।
सुत्राध्ययनाध्यापनपृच्छादौ व्यापृतात्मानः ॥ ४१६ ॥

नित्याऽग्रपिण्डवर्जनपरायणाः पञ्चसमितिभिः समिताः ।
सेवितगुरुकुलवासा नित्यं गुरुवचनपरतन्त्राः ॥ ४१७ ॥

गुप्तित्रितयपवित्राः पञ्चमहाव्रतधुराधरणधुर्याः ।
दमितहृषीकतुरङ्गा मनोनिरोधेऽधिगतलक्षाः ॥ ४१८ ॥

शुद्धप्ररूपका विनयवृत्तयः सत्त्वतोलनानिरताः ।
द्रव्यं क्षेत्रं कालं भावं चाश्रित्य कृतयतनाः ॥ ४१९ ॥

क्षायोपशमिकभावे स्थिताः कषायोज्झिता महामुनयः ।
आराधका भवन्ति प्रभवत्यपि दुःषमकाले ॥ ४२० ॥

इति हरिप्रभसूरिविदर्भितं, सदुपदेशरसायणगर्भितम् ।
इह विधास्यति यो विधिनोद्यमी, दिवसकृत्यमिदं स शिवंगमी ॥ ४२१ ॥

खरतरगच्छीयश्रीजिनपतिसूरिशिष्यश्रीजिनेश्वरसूरिकृतम्

# ॥ श्रावकधर्मकृत्यम् ॥

भेजुर्यस्याङ्घ्रियुग्मं पथि मथितरिपोर्जातरूपस्य यातः,
पोत्फुल्लान्यम्बुजानि प्रमदपुलकितैर्निर्जरै र्निर्मितानि ।
लक्ष्माम्भोजन्मलक्ष्मीमिव कुतुकवशात् प्रेक्षितुं कान्तकान्तिः,
शान्तिः क्लान्तिप्रशान्ति,प्रवितरणचणः प्राणिजातं स पायात् ॥ १ ॥

यस्योच्चैः शस्तहस्तस्फुरदरुणनखश्रेणिशोचि प्रपञ्चः
स्तीव्रध्वान्तं नितान्तं समवसृतिभुवि ध्वंसमानश्चकाशे ।
न्यस्तःशङ्के जनानां शरविसर इहोद्दामकामादिशत्रु
स्त्राणाय श्यामकायः स भवतु भवतां पार्श्वनाथः सुखाय ॥ २ ॥

रूपेण न्यत्कृता येन, ते सर्वार्थसुरोत्तमाः ।
स महावीरनाथो नः, शुद्धबोधं प्रयच्छतु ॥ ३ ॥

जिनाधीशगणाधीशवक्राम्भाजन्मसुस्थिता ।
अनवद्यां महाविद्यां, दद्यान्मे श्रीसरस्वती ॥ ४ ॥

अहर्निशं रच्यते यच्छ्रावकैर्धर्म्मभावुकैः ।
धर्म्मकृत्यं वक्ष्यते तत्, संक्षेपान्मोक्षसिद्धये ॥ ५ ॥

श्रीमत्तीर्थेशचैत्यानां, संसूत्रयत वन्दनम् ।
चन्दनं पापतापानां, मण्डनं धर्म्मसम्मदाम् ॥ ६ ॥

अवश्यं मानसं वश्यं, कृत्वाऽऽलस्यं विहाय च ।
षट्भेदं कर्म्मविच्छेदं, विधत्ताऽऽवश्यकं बुधाः ! ॥ ७ ॥

स्वाध्यायं क्षपितापायं, मोहराजमहाबले ।
श्रुत्यैव विहितोत्त्रासं, श्रीवासं कुरुतोद्भटम् ॥ ८ ॥

अपूर्वापूर्वसिद्धान्ताध्ययनं च दिने दिने ।
वाण्या मधुरया धत्तोत्तरोत्तरगुणावहम् ॥ ९ ॥

ये विरक्ता भवाम्भोधेर्बोधिलाभाम्बु पिप्रति ।
ते कुर्वते तीर्थराजां, भावतश्चैत्यवन्दनम् ॥ १० ॥

वन्ध्यास्तनंधयप्राया, मायालोभसमन्विताः ।
एवंविधाः कुदेवास्तैर्वन्द्यन्ते ये भवेच्छवः ॥ ११ ॥

उपयोगेन निर्मुक्ता, सम्यग्दृष्टिभिरप्यहो ।
विधीयते वन्दना या, साऽप्युक्ता द्रव्यवन्दना ॥ १२ ॥

यां च मिथ्यादृशः कुर्युर्यथाछन्दा गुणोज्झिताः ।
मुनयोऽपि च सा सूत्रे, गदिता द्रव्यवन्दना ॥ १३ ॥

प्रस्तावेऽत्राधिकारोऽस्ति, भावतो या विधीयते ।
वन्दना विधिचैत्यानां, जृम्भते यत्र नाविधिः ॥ १४ ॥

चतुर्भिरधिकाशीतिर्भवभीतिप्रवर्द्धनी ।
आशातनानां नो यत्रोत्सूत्रभाषिक्रमो न च ॥ १५ ॥

रात्रौ न नन्दिर्न बलिप्रतिष्ठे, न मज्जनं न भ्रमणं रथस्य ।
न स्त्रीप्रवेशो न च लास्यलीला, साधुप्रवेशो न तदत्र चैत्यम्॥ १६ ॥

भावोऽर्थालोचनं जैनगुणरागोऽतिविस्मयः ।
भवभीश्चेति लिङ्गानि, भावचैत्याभिवन्दने ॥ १७ ॥

निस्तीर्णोऽद्य सुविस्तीर्णो, मया संसारवारिधिः ।
मुक्तिराज्यं सुखैः प्राज्यं, शस्तं हस्तगतं मम ॥ १८ ॥

धन्योऽहं येन सम्प्राप्तं, चिन्तामणिविजित्वरम् ।
वन्दनं चैत्यरत्नानामित्थं भावविशुद्धता ॥ १९ ॥

चैत्यवन्दनसूत्रार्थश्रवणे परमादरः ।
मात्राबिन्दुपदच्छंदःसंपदक्षरशुद्धता ॥ २० ॥

अर्हदादिपदानां च, विचित्रार्थानुचिन्तनम् ।
यतः सूत्रमनन्तार्थमेकमप्युदितं श्रुतौ ॥ २१ ॥

यज्जलं सकलाब्धीनां, नदीनां याश्च वालुकाः ।
ततोऽनन्तगुणोऽर्थः स्यादेकसूत्रगतोऽपि हि ॥ २२ ॥

इत्यर्थालोचनं मिथ्याभावसङ्कोचनं कृतम् ।
सूत्रार्थोभयसत्यत्वं, कुरुते चैत्यवन्दने ॥ २३ ॥

केवलज्ञानसद्दृष्टिशालिनां कीर्त्तिमालिनाम् ।
अष्टप्रतिहार्यपूजामर्हतां श्रीमदर्हताम् ॥ २४ ॥

रत्नस्वर्णसुदुर्वर्णक्लृप्तशालत्रयान्तरे ।
देशनां कुर्वतां सर्वातिशयाभीशुभास्वताम् ॥ २५ ॥

सीमन्तिनीशस्त्रजापमालावर्जितवर्ष्मणाम् ।
मुक्तिसौख्यकृदक्षोदात्, प्रमोदाद् गुणरागिता ॥ २६ ॥

क्व मातङ्गगृहे तुङ्गकुम्भैरावणवारणः ? ।
क्षुद्रस्य क्व दरिद्रस्य, गृहे माणिक्यवर्षणम् ? ॥ २७ ॥

अन्धातमसपूर्णायां, दुष्पापोद्योतसम्पदि ।
क्व तिमिस्रगुहायां भो, रत्नदीपः शुभप्रभः ? ॥ २८ ॥

मरुस्थल्यामकल्याणकण्टकिद्रुघटभृति ।
क्व कल्पद्रुर्लसच्छाखाप्रसूनफलसंकुलः ? ॥ २९ ॥

क्व वयं पापसंलग्ना, मग्नाः संसारसागरे ।
निस्त्राणाः पञ्चबाणारिबाणगोचरतां गताः ? ॥ ३० ॥

क्व पश्यामः स्तुवत्कामकल्पद्रूंस्त्रिजगत्प्रभून् ।
सहस्राक्षैरपि द्रष्टुं, दुर्लभान् विश्ववल्लभान् ? ॥ ३१ ॥

इत्थमानन्दसन्दोहरोहद्रोमांचधारिता ।
आनन्दाश्रुसमुल्लासो, विस्मयस्मेरचित्तता ॥ ३२ ॥

नानादुःखौघवाःपूर्णाद्विट्चरातुच्छकच्छपात् ।
आधिव्याधिप्रबन्धोद्यत्कल्लोलकुलसंकुलात् ॥ ३३ ॥

दुस्तीर्थिकस्तोमदुष्टपश्यतोहरदुस्तरात् ।
जन्ममृत्युमहावर्त्ताद्धीरुता भववारिधेः ॥ ३४ ॥

सा च काले विधातव्या, तिस्रः सन्ध्याः स्मृतः स च ।
व्यवहारक्रियाणां च, बाधा यत्राथवा नहि ॥ ३५ ॥

त्रिपञ्चकृत्वश्च सप्तकृत्वः स्याच्चैत्यवन्दनाः ।
जघन्या मध्यमोत्कृष्टा, प्रमोदभरनिर्भराः ॥ ३६ ॥

तत्र पूर्वाह्णमध्याह्णपराह्णेषु भवेत्त्रिधा ।
पञ्चकृत्वश्चैव भुक्तिप्राग्भुक्त्युत्तरयोरपि ॥ ३७ ॥

प्रतिक्रान्तौ चैत्यगृहे, भोजने तदनन्तरम् ।
आवश्यके स्वापकाले, प्रबोधे चेति सप्तधा ॥ ३८ ॥

नमस्कारेण जागर्या, चर्यानुस्मरणं तथा ।
योगोऽर्हतां वन्दनं च, प्रत्याख्यानं यथाविधि ॥ ३९ ॥

मनस्येव नमस्कारं, चिन्तयेच्छयने स्थितः ।
ततः पट्टादिसंस्थास्नुर्मुखेनोच्चारयेन्मुदा ॥ ४० ॥

यस्मान्नानाभवोपात्तमेष पापविषं नृणाम् ।
नाशयत्यखिलं सर्प्पविषं गारुडमंत्रवत् ॥ ४१ ॥

महामन्त्रो नमस्कारः, सर्वमन्त्रेषु निश्चितम् ।
सिध्यन्त्याशु नमस्कारपूर्वं ते साधिता यतः ॥ ४२ ॥

येनान्तसमये पुण्यान्नमस्कारः पराप्यते ।
स्वर्गश्रीर्लभ्यते तेन, निर्वाणकमलापि वा ॥ ४३ ॥

पार्श्वदापितपञ्चश्रीपरमेष्ठिश्रुतेः फणी ।
अप्लुष्टैधान्तरस्थः स, प्राप श्रीधरेणन्द्रताम् ॥ ४४ ॥

सुग्रामे सङ्गताभिख्यो, ग्रामवासी नमस्कृतेः ।
ध्यानाद्रत्न शिखो भूत्वा, खेचरेन्द्रः शिवं ययौ ॥ ४४ ॥

सुभगो महिषीपालः, सिद्धो भूत्वा सुदर्शनः ।
मेण्ठो यक्षोऽभूज्जिनादिस्मृत्या चक्रे प्रभावनाम् ॥ ४५ ॥

कल्पद्रुमाद्या दासानुदासाः खलु नमस्कृतेः ।
यदमी अनुगच्छन्ति, सदा तत्परिषेविणम् ॥ ४६ ॥

एनमेव नमस्कारं, कर्म्मभूष्वखिलास्वपि ।
अनुस्मरन्तो योगीन्द्रा, लभन्ते मुक्तिसम्पदम् ॥ ४७ ॥

परमेष्ठिनमस्कारं, लक्षेण गुणितेन यत् ।
अर्ज्यते तीर्थकृत्कर्म्म, तेन तत्रादरः शुभः ॥ ४८ ॥

महाश्रुतस्कन्धपञ्चमङ्गलाद्युपधानतः ।
महानिशीथसूत्रोक्तात्, श्राद्धः सिद्धिं समश्नुते ॥ ४९ ॥

कोऽहं क्व देशे वंशे क्व को देवः कश्च मे गुरुः ? ।
कानि वा मे व्रतानीत्यनुस्मरणं प्रकीर्त्तितम् ॥ ५० ॥

योगः शरीरचिन्तादिः, षड्विधावश्यकं ततः ।
पुष्पामिषस्तोत्रपूजाऽर्हतां बिम्बे गृहस्थिते ॥ ५१ ॥

ततो यानं विधिचैत्ये, ध्वजकुम्भादिमण्डिते ।
अनेकमण्डपाकीर्णे, तुलाकोटिविसङ्कटे ॥ ५२ ॥

विचित्रोल्लोचरोचिष्णे, प्रोच्चस्तम्भेऽथ बन्धुरे ।
स्फारस्फटिकनिर्माताङ्गणसङ्क्रान्तभानवे ॥ ५३ ॥

चन्द्रकान्तसूर्यकान्तमणितोरणसङ्कुले ।
अन्तःस्थस्वर्णरत्नादिजैनबिम्बविराजिते ॥ ५४ ॥

कुर्वन्नैषधिकीस्तिस्रस्तिस्रः शुद्धाः प्रदक्षिणाः ।
मुखकोशं दृढं बिभ्रत्, त्यजन्नाशातनाः समाः ॥ ५५ ॥

द्रव्यतो भावतः शुद्धो, बुद्धो जैनेन्द्रशासने ।
तत्काले वर्जयन्नुच्चैः, कायकण्डूयनादिकम् ॥ ५६ ॥

पञ्चप्रकाराभिगमविधिना प्रविशेद् बुधः ।
पर्युषितप्रसूनादिजिनार्चातोऽपसारयेत् ॥ ५७ ॥

ततश्च निर्मलीकृत्य, बिम्बानि श्रीमदर्हताम् ।
मसृणघुसृणैर्भव्यैर्भव्यैः कस्तूरिकद्रवैः ॥ ५८ ॥

भद्रश्रीसद्रसैः कुर्यात् सौरभाढ्यैर्विलेपनम् ।
ईक्षितुं प्राणिनिर्धूतपापपङ्कविलेपनम् ॥ ५९ ॥

उदारस्फारमन्दारैश्चम्पाकै राजचम्पकैः ।
मालिनीभिर्मल्लिकाभिः, कुन्दैः काञ्चनकेतकैः ॥ ६० ॥

बकुलैः सप्तलापुष्पैर्यूथिकाभिर्महर्द्धिभिः ।
पूजां प्रकुर्याद् वचनात्, विचित्रां प्रमदप्रदाम् ॥ ६१ ॥

खण्डखाद्यै रसास्वाद्यैर्मोदकैर्नेत्रमोदकैः ।
अशोकवर्तिप्रमुखैः, पक्वान्नै रचयेद् बलिम् ॥ ६२ ॥

दधिकुम्भैः पयस्कुम्भैरिक्षुद्रवभृतैर्घटैः ।
सिताभिः खण्डपिण्डैश्च, नागवल्लीदलैः कलैः ॥ ६३ ॥

नारंगैः प्रस्फुरद्रङ्गैस्तरुणैः करुणव्रजैः ।
सदलैः कदलैराम्रैः, पाकाताम्रैः सुदाडिमैः ॥ ६४ ॥

राजादनैर्मातुलिङ्गैः, क्रमुकैः कूर्चकेसरैः ।
द्राक्षाभिचारकुलिकाऽक्षौटजालीफलैरपि ॥ ६५ ॥

अक्षतैरक्षतैरष्टमाङ्गलिक्यानि चालिखेत् ।
दर्पणादीनि विन्यासबन्धुराणि महान्ति च ॥ ६६ ॥

रचयेच्च जानुदघ्नीं, प्रसूनानां विकाशिनाम् ।
मल्लिकापाटलाशोकमुख्यानां वृष्टिमग्रतः ॥ ६७ ॥

उद्दण्डकाकतुण्डोद्यत्कर्प्पूरादिसमुद्भवः ।
धूपमुद्ग्राहयेद् गन्धव्याप्तगर्भगृहं ततः ॥ ६८ ॥

चतुर्दश्यष्टमीजैनकल्याणिकमहेषु च ।
सांवत्सराष्टाह्निकादौ, स्नात्रं कृत्वाऽर्चयेज्जिनान् ॥ ६९ ॥

अर्हदष्टाह्निकाश्चैत्राश्विनयोर्वासवैः कृताः ।
नन्दीश्वरे शाश्वतिक्यः, क्रियन्ते तेन ता इह ॥ ७० ॥

जिनार्चागीतनृत्यादि, कुर्वती श्रीप्रभावती ।
जायोदायनराजस्य, लेभे गीर्वाणसम्पदम् ॥ ७१ ॥

महाराष्ट्रे महाराष्ट्रे, ग्रामे हल्लूकनामनि ।
अशोको मालिकोऽभ्यर्च्य, नवपुष्प्या जिनं ततः ॥ ७२ ॥

नवलक्ष्या नवकोट्या, द्रम्माणां स्वर्णरत्नयोः ।
प्रत्येकमीश्वरो ग्रामनवलक्षेश्वरस्ततः ॥ ७३ ॥

नृपो नवनिधिस्वामी, दीक्षित्वा पार्श्वसन्निधौ ।
अनुत्तरसुरो जज्ञे, राज्यं प्राप्य स सेत्स्यति ॥ ७४ ॥

जिनसाधारणज्ञानद्रव्यं रक्षंश्च वर्द्धयन् ।
भक्षणोपेक्षणादित्यग्, लभते श्रावकः श्रियम् ॥ ७५ ॥

समायाते सूरिवर्ये, चैत्यवन्दनहेतवे ।
प्रतिक्रम्येर्यापथिकीं, शक्रस्तोत्रादिदण्डकैः ॥ ७६ ॥

पञ्चभिः सूत्रयेच्चैत्यवन्दनां परिपूर्णिकाम् ।
पूर्वसूरिमते शक्रस्तवैः पंचभिरेव च ॥ ७७ ॥

संवेगजनकैः सालङ्कारैः सत्कविसूत्रितैः ।
गुम्फसारैर्गभीरार्थैः स्तोत्रैस्तीर्थकृतः स्तुयात् ॥ ७८ ॥

पञ्चाङ्गप्रणिपातेन, प्रणामः श्रीजिनेशिनाम् ।
शक्रस्तवे योगमुद्रां, वन्दने जिनमुद्रिकाम् ॥ ७९ ॥

सन्मुक्ताशुक्तिमुद्रां च, प्रणिधाने मुदा चरेत् ।
सौभाग्यं पूज्यता भाग्यं, लक्ष्मीः स्युस्तत्प्रभावतः ॥ ८० ॥

व्याख्याऽनेहसि सूरीणां, द्वादशावर्त्तवन्दनम् ।
द्वात्रिंशद्दोषनिर्मुक्तं, दत्त्वा संवरणं भजेत् ॥ ८१ ॥

प्राञ्जलिर्विकथानिद्रावर्जितः श्रुतमर्हताम् ।
आकर्णयेद्वर्णयेच्च, गुरूणां गुणगौरवम् ॥ ८२ ॥

गतेषु वसतौ तेषु, क्षमाश्रमणपूर्वकम् ।
भक्तपानकभैषज्यहेतोः साधून्निमन्त्रयेत् ॥ ८३ ॥

मध्याह्निकीं गेहजैनबिम्बाऽर्चां रचयेत्ततः ।
आगतानां च साधूनां, दद्याद्दानमनिन्दितम् ॥ ८४ ॥

वस्त्रकम्बलपात्रोर्णालोविकादण्डकादिकम् ।
ऋतुबद्धकाले देयं, गुरुभ्यो दूषणोज्झितम् ॥ ८५ ॥

आभिमुख्येन गमनं, प्रदानं विष्टरस्य च ।
प्रणिपातोऽशनादीनां, दानं चरणवन्दनम् ॥ ८६ ॥

यतीनां पृष्ठतो यानं, सत्कारः षड्विधोऽप्ययम् ।
शक्रचक्रधरादिश्रीबीजं श्रावकसन्ततेः ॥ ८७ ॥

सुसाधुधर्म्मोपष्टम्भदानतः श्रीनिदानतः ।
समप्राप धनसार्थेशः, श्रीतीर्थेशरमां क्रमात् ॥ ८८ ॥

मासक्षपणपर्यन्ते, मुनेर्दानप्रभावतः ।
प्राज्यं राज्यं मूलदेवः, प्रापेहापि सहास्तिकम् ॥ ८९ ॥

वन्द्या नन्द्यासुरानन्द्या, दातारः प्रथमेऽर्हताम् ।
श्रेयांसाद्या गृहे येषां, सार्द्धा द्वादश कोटयः ॥ ९० ॥

हैम्यः पेतुः सुरैर्मुक्ता, वादिता दुन्दुभिव्रजाः ।
रेजे गन्धोदकीवृष्टिः प्रोच्चैर्जयजयध्वनिः ॥ ९१ ॥

अहो दानमहोद्घोषश्चेलोत्क्षेपश्च येऽसिधन् ।
भवे तत्रैव केच्चिच्च तृतीये गमिनः शिवम् ॥ ९२ ॥

साधर्म्मिकाणां वात्सल्यं, यथा भरतचक्रिणा।
चक्रे प्रतिदिनं तच्च, कृत्वा विभवसम्भवे ॥ ९३ ॥

भोजनं कारयित्वा स्वजनित्रीजनकादिकान्।
चिन्तयित्वा प्रेष्यवर्गं, प्रतिजागर्य रोगिणः ॥ ९४ ॥

गवादीन् प्रीणयित्वा च, निश्चलासनसंस्थितः।
ध्यात्वा पञ्चनमस्कारं, प्रत्याख्यानं विमृश्य च ॥ ९५ ॥

शुभेषु धातुषु क्रोधाद्यभावे मानसे शुभे।
भोजनं रचयेच्छ्राद्धः, सद्धर्म्मस्फातिहेतवे ॥ ९६ ॥

ततोऽग्रे स्वकुटुम्बस्य, वाचयेद्वरपुस्तकम्।
द्रव्यार्थं सत्यवचसा, व्यवहारं च चिन्तयेत् ॥ ९७ ॥

परित्यजन् पञ्चदश, कर्मादानानि सर्वथा।
कूटतुलां कूटमानं, कूटविक्रयमेव च ॥ ९८ ॥

अह्नो मुखे द्वे घटिके, नित्यं भुक्तिं विवर्जयेत्।
सायमह्नोऽष्टमे भागे, भुक्त्वा मुक्तसचित्तकः ॥ ९९ ॥

देवार्चां रचयेत् सन्ध्याकाले सङ्गीतकोद्भटम्।
स्तुतिस्तोत्रपवित्रं च, देववन्दनमादरात् ॥ १०० ॥

आवश्यकं षड्विधं चादध्यादध्यामधर्म्मदम्।
तद् द्विधा द्रव्यभावाभ्यां, द्रव्यतोऽशुद्धमानसः ॥ १०१ ॥

उपयोगविनिर्म्मुक्तः, सम्यग्दृष्टिरपि श्रयेत्।
यथाछन्दादिसाधुर्वा, साधयेत् सादरोऽपि यत् ॥ १०२ ॥

भावतस्तूपयुक्तो यः, साधुः श्राद्धः करोत्यलम्।
अर्थाधिकारा एतस्य, षड् भवन्ति श्रुतोदिताः ॥ १०३ ॥

सावद्ययोगव्यावृत्तिर्नामोत्कीर्त्तनमर्हताम्।
प्रतिपत्तिर्गुणाढ्येषु, स्खलितस्य च निन्दनम् ॥ १०४ ॥

प्रायश्चित्तविधानं च , शुद्धिमद्गुणधारणा ।
षड्विधाऽऽवश्यकस्योक्तः, पिण्डितोऽर्थः स एषकः ॥ १०५ ॥

अधुनाऽध्ययनषट्कं, नामतः परिकीर्त्यते ।
सामायिकं चतुर्विंशत्यर्हत्स्तवनवन्दने ॥ १०६ ॥

प्रतिक्रमणं च तथा, कायोत्सर्गः समाधियुक् ।
प्रत्याख्यानं च तत्राद्यं, सर्वतस्तु यतेर्भवेत् ॥ १०७ ॥

सामायिकं देशतस्तु, श्राद्धानां पापवर्जिनाम् ।
सम्यक्त्वगुणयुक्तानां, समचित्तत्वशालिनाम् ॥ १०८ ॥

चैत्यालये स्वे निशान्ते, साधूनामन्तिकेऽपि वा ।
कार्यं पौषधशालायां, श्राद्धैस्तद्विधिना सदा ॥ १०९ ॥

चतुर्विधेन शुद्धेन, पौषधेन समन्वितम् ।
तत्पर्वदिवसे कृत्यमतिचारविवर्जितम् ॥ ११० ॥

त्रयोदशमहामेरुमानस्वर्णप्रदानतः ।
सामायिके पौषधे चाधिकं फलमुदीरितम् ॥ १११ ॥

यत्र यत्र क्षणे नास्ति, व्यवहारादि सर्वथा ।
सामायिकं तत्र तत्राधेयं श्रेयःफलप्रदम् ॥ ११२ ॥

सामायिके कृते श्राद्धो, भवे साधुवदुत्तमः ।
वन्दनीयः सुरैर्दैत्यैर्देवेन्द्रैरपि भावतः ॥ ११३ ॥

चन्द्रावतंसको राजा, स्थिरः सामायिकं व्रतम् ।
प्रपाल्य निर्मलध्यानः, सुरो वैमानिकोऽभवत् ॥ ११४ ॥

पौषधस्थं कृतरात्रिकायोत्सर्गं नरेश्वरम् ।
ईशानेन्द्रोऽस्तवीत् स्वर्गे, श्रीमन्मेघरथं मुदा ॥ ११५ ॥

द्वादशे देवलोकेऽगुरनन्ताः श्रावकोत्तमाः ।
सामायिकं पौषधं च , प्रतिपाल्य यथाविधि ॥ ११६ ॥

द्रव्यस्तवोऽर्हतां सोऽथ, बिम्बस्थापनपूजनैः ।
दशक्षेत्र्यां निजद्रव्यव्ययैर्धर्म्मार्थमीरितः ॥ ११७ ॥

या च यात्राऽष्टापदाद्रौ, पापाचम्पापुरादिषु ।
सम्मेताद्रावुज्जयन्ते, सोऽपि द्रव्यस्तवः शुभः ॥ ११८ ॥

द्रव्यस्तवः स एवोदघो, यो भावस्तवकारणम् ।
विधिं विनाऽनन्तशोऽसौ, भवेत् क्लृप्तोऽफलस्त्वभूत् ॥ ११९ ॥

चतुर्विंशतितीर्थेशां, गुणोत्कीर्त्तनमुत्तमम् ।
एष भावस्तवः सूत्रे, प्रोक्तः सिद्धिसुखप्रदः ॥ १२० ॥

कीर्त्तयामि कीर्त्तनीयान्, जिनेन्द्रान् सुरसंस्तुतान् ।
चतुर्विंशतिमस्ताघकर्म्माष्टकविजित्वरान् ॥ १२१ ॥

लोकोद्योतकरांतःस्थापिशब्दस्य प्रयोगतः ।
जम्बूद्वीपे पुष्करार्द्धे, धातकीखण्डनामनि ॥ १२२ ॥

द्वीपे भरतचतुष्के, चैरावतकपञ्चके ।
संस्थितान् समुपात्तांस्तानपि श्रीतीर्थपान् स्तुवे ॥ १२३ ॥

तीर्थनाथनामधेयकीर्त्तनै रचितैर्मुहुः ।
क्षीयन्ते दुष्टकर्म्माणि, प्राप्यते सिद्धिसुन्दरी ॥ १२४ ॥

द्व्यवनामं यथाजातं, चतुर्मूर्द्धनति स्फुटम् ।
त्रिगुप्तं द्विप्रवेशं चैकनिष्क्रमणभूषितम् ॥ १२५ ॥

वन्दनं द्वादशावर्त्तं, भवावर्त्तनिषेधनम् ।
देयं गुरोः पञ्चविंशत्यावश्यकसमुज्ज्वलम् ॥ १२६ ॥

द्वात्रिंशद्दोषनिर्मुक्तं, षड्विनयादिगुणोज्ज्वलम् ।
दत्ते वन्दनकं दानापवर्गं स्वर्गमेव च ॥ १२७ ॥

अष्टादशसहस्त्रीं भो, योगिनां नेमिनः प्रभोः ।
वन्दित्वा बहु कर्म्माणि, त्यक्चक्रे कृष्णमाधवः ॥ १२८ ॥

आद्यान्तजिनयोस्तीर्थे, सप्रतिक्रमणो वृषः ।
शेषाणां कारणे जाते, प्रतिक्रान्तिरिहार्हताम् ॥ १२९ ॥

जिनोक्तेषु पदार्थेषु, यदश्रद्धानमङ्गिनाम् ।
श्रद्धानमपि मिथ्या वा, विपरीतप्ररूपणा ॥ १३० ॥

सन्देहकरणं यच्च, यच्च तेषु त्वनादरः ।
तन्मिथ्यात्वं पञ्चधोक्तं, श्रुते करणमंहसाम् ॥ १३१ ॥

आभिग्रहिकमनभिग्रहिकाभिनिवेशिकैः ।
सन्देहिकमनाभोगमित्थं वा पंचभेदभृत् ॥ १३२ ॥

मिथ्यात्वात् स्यात् प्रतिक्रान्तिरसंयमसमुच्चयात् ।
कषायेभ्यः कुयोगेभ्यः, संसाराच्च चतुर्गतेः ॥ १३३ ॥

दैवसिकं रात्रिकं च, पाक्षिकं तद्विधीयते ।
चातुर्मासिकमेनोघ्नं, वार्षिकं मुक्तिहेतवे ॥ १३४ ॥

आनन्दकामदेवाद्या, धन्यास्ते श्रावकोत्तमाः ।
ये द्विसन्ध्यं विधायैतल्लेभिरे दिवमुत्तमम् ॥ १३५ ॥

कायानपेक्षं यत् स्थानमासितस्योर्ध्वगस्य वा ।
लम्बमानभुजादण्डः, कायोत्सर्ग स उच्यते ॥ १३६ ॥

चेष्टाभिभवरूपश्च, द्विधाऽसौ तत्र चादिमः ।
लोकोद्योतकरादीनां, चिन्तायां सङ्ख्ययान्वितः ॥ १३७ ॥

द्वितीयस्तु जघन्येनान्तर्मुहूर्त्तप्रमाणभृत् ।
उत्कर्षतो वार्षिकः स्याद्यथा बाहुबलेर्मुनेः ॥ १३८ ॥

भवान्तरकृतोद्दण्डपापखण्डनपण्डितः ।
वर्षं श्रीआर्षभे तीर्थेऽष्टमासीं मध्यमार्हताम् ॥ १३९ ॥

कायोत्सर्गोऽकारि धन्यैः, षण्मासीं वीरशासने ।
तपश्चाप्येवमुत्कृष्टं, क्रमेण जिनशासने ॥ १४० ॥

मनोरमासुभद्रे श्रीउदितोदयभूपतिः ।
ऐहिकं सत्फलं प्राप्ताः, कायोत्सर्गप्रभावतः ॥ १४१ ॥

प्रत्याख्यानं द्विधा पूर्वं, साङ्केतिकमुदाहृतम् ।
अङ्गुष्ठमुष्टिसग्रन्थिस्वेदोच्छ्वासनिकेतनैः ॥ १४२ ॥

स्तिबुकज्योतिराद्यैश्चाद्धारूपं तु द्वितीयकम् ।
मुहूर्तपौरुषीपूर्वार्धार्द्धमासगमासगम् ॥ १४३ ॥

एकासनं चैकस्थानमाचाम्लं चोपवस्त्रकम् ।
चरमं विकृतित्यागः, प्रत्याख्यानमभिग्रहे ॥ १४४ ॥

स्वस्वाकारैः समेतानि, प्रत्याख्यानानि भावतः ।
शुद्धिभिः षड्भी रम्याणि, कुर्यात् साध्वादिको जनः ॥ १४५ ॥

श्रद्धानं ज्ञानविनयावनुभाषणमुत्तमम् ।
अनुपालनं च भावप्रत्याख्यानस्य शुद्धयः ॥ १४६ ॥

स्पर्शितं पालितं चैव, शोभितं तीरितं तथा ।
कीर्त्तितमाराधितं च, कुर्यादेवंगुणं सुधीः ॥ १४७ ॥

अनागतातिक्रान्तादिभेदैर्दशभित्तपम् ।
मूलोत्तरगुणस्तोमसम्बद्धं तदुदाहृतम् ॥ १४८ ॥

प्रत्याख्याने कृते शुद्धे, त्वाश्रवाः स्युर्निवारिताः ।
तन्निवृत्तौ संवरोऽतः, केवलं शिवमेव च ॥ १४९ ॥

प्रत्याख्यानफलं प्रापुरैहिकं धर्म्मिलादयः ।
दामन्नकप्रभृतयः, परलोके श्रुतोदिताः ॥ १५० ॥

इत्थं षड्विधमप्युक्तं, भावावश्यकमुज्ज्वलम् ।
एतत्कर्ता श्रावकोऽपि, निर्जराभाजनं भवेत् ॥ १५१ ॥

देशसामायिकं कृत्वा, श्राद्धः स्वाध्यायमाचरेत् ।
यतस्तस्माच्छुभध्यानं, ज्ञानं सर्वपदार्थगम् ॥ १५२ ॥

आत्मनो हितविज्ञानभावतः स्याच्च संवरः ।
नव्यो नव्यश्च संवेगो, धर्म्मे निष्कम्पता सदा ॥ १५३ ॥

तपसां द्वादशानां च, स्वाध्यायः परमं तपः ।
कर्म्मणां निर्जरा तस्माद्, भवपाथोधितारिणी ॥ १५४ ॥

स्वाध्याये वक्रगे शुद्धे, नृणां धम्मोपदेशनात् ।
उपकारः परो येन, लभ्यते मुक्तिजं सुखम् ॥ १५५ ॥

दत्त्वा वक्त्रे च कार्योऽसौ, साधुना मुखवस्त्रिकाम् ।
श्राद्धेनापि मुखाम्भोजस्थगनादिविधिक्रमात् ॥ १५६ ॥

कर्म्मासङ्ख्यभवं तीव्रं, क्षिपत्यङ्गिगणः क्षणात् ।
येनान्यतरयोगेन, स्वाध्यायेन विशेषतः ॥ १५७ ॥

अजीवजीवस्थानानि, चतुर्दश विदन्त्यलम् ।
मार्गणास्थानकान्युच्चैर्जीवः स्वाध्यायनिर्मितेः ॥ १५८ ॥

सूत्रानुसारतो धर्म्मे, प्रवृत्तिर्या तदुच्यते ।
सम्यक्त्वं तेन तत्पाठाभ्यास उच्चैर्विधीयते ॥ १५९ ॥

यद्येति दिवसेनापि, पदं श्लोकार्द्धमेव च ।
तथापि नोज्झ्यते श्रौते, पाठेऽभ्यासः कदाचन ॥ १६० ॥

सदःस्थबहुलोकेषूपविष्टेषु जना अहो ।
मुखचन्द्रं प्रपश्यन्ति, बहुश्रुतशिरोमणेः ॥ १६१ ॥

नव्यं नव्यं गुणैर्भव्यं, पठनीयं दिने दिने ।
श्रौतं रहस्यं स्वं वश्यं, कृत्वा तत्त्वार्थवेदिभिः ॥ १६२ ॥

अपूर्वापूर्वसिद्धान्तपाठाद्, येनार्ज्यते नृभिः ।
तीर्थकृन्नामगोत्रं तद्, भव्याः पठत सुश्रुतम् ॥ १६३ ॥

अधीयते द्वादशाङ्गश्रुतं श्रमणशेखरैः ।
अनङ्गश्रुतमप्युच्चैरौपपातिकमुख्यकम् ॥ १६४ ॥

महोपदेशमालाश्रीपञ्चाशकमुखं श्रुतम् ।
गीतार्थैर्ग्रथितं पाठ्यं, श्राद्धैरुत्सूत्रवर्जितम् ॥ १६५ ॥

यथा यथा सुसिद्धान्तसुधाब्धिमवगाहते ।
प्रह्लादं लभते स्वान्ते, शुद्धबुद्धिस्तथा तथा ॥ १६६ ॥

श्रद्धेयं भृशमध्येयं, श्रोतव्यं सुगुरोर्मुखात् ।
लेखनीयं पुस्तकेषु, श्रुतज्ञानं सदा बुधैः ॥ १६७ ॥

लेखयित्वा तानि दत्वा, मुनीन्द्रेभ्यः प्रपूजयेत् ।
धूपदीपपुष्पवस्त्रबलिप्रेक्षणकादिभिः ॥ १६८ ॥

वाचयेच्छृणुयादर्थान्, समस्तानवधारयेत् ।
कुर्यात्तदुक्तानुष्ठानं, यथाशक्ति विचक्षणः ॥ १६९ ॥

सूरेः समवसरणे, श्रीपरमेष्ठ्यधिष्ठिते ।
युक्तं पुस्तकवत् पुष्पवस्त्रगन्धादिपूजनम् ॥ १७० ॥

कर्पूरक्षेपणं सूरेः, पादयोश्चन्दनार्चनम् ।
ज्ञानिज्ञानाभेदतस्तदुचितं गणधारिवत् ॥ १७१ ॥

मतिज्ञानं श्रुतज्ञानमवधिज्ञानमुज्ज्वलम् ।
मनःपर्यायविज्ञानं, केवलं स्तूयतां बुधाः ! ॥ १७२ ॥

मूलोत्तरगुणाः सर्वे, सम्यक्त्वसहिता हिताः ।
तज्जिनोक्तपदार्थानां, श्रद्धानं ज्ञानसंयुतम् ॥ १७३ ॥

तत् त्रिधा क्षायिकं क्षायोपशमिकं प्रकीर्त्तितम् ।
तथौपशमिकं शुद्धात्मपरिणामरूपकम् ॥ १७४ ॥

मिथ्यात्वोपशमः शुद्धः, संवेगो मुक्तिसौख्यकृत् ।
निर्वेदो भवदुःखेभ्योऽनुकम्पा सर्वजन्तुषु ॥ १७५ ॥

आस्तिक्यं निश्चलं सर्वजीवाजीवादिवस्तुषु ।
अव्यभिचारिलिङ्गानि, जगुस्तस्य गुरूत्तमाः ॥ १७६ ॥

दूषणैः पञ्चभिर्मुक्तं, भूषणैः पंचभिर्युतम् ।
बीजं तन्मोक्षकल्पद्रोर्मिथ्यात्वस्थानकोज्झितम् ॥ १७७ ॥

यथा सम्प्रतिराजेन, पालितं सप्रभावनम् ।
विधानै रथयात्राणां, पात्राणां स्पर्शनैः शुभैः ॥ १७८ ॥

सप्तषष्ट्या लक्षणानां, भेदैरपमलीकृतम् ।
प्रतिपाल्यं तथा श्राद्धैः, श्रायसं सुखमिच्छुभिः ॥ १७९ ॥

अप्रतिपातिसम्यक्त्वाः, संस्युर्वैमानिकाः सुराः ।
चेटकाद्या नृपा यद्वदपि सप्ताङ्गराज्यगाः ॥ १८० ॥

तिष्ठंस्तुर्ये गुणस्थाने, त्रिकालं पूजयन् जिनान् ।
कुर्वन् सङ्घे च वात्सल्यं, प्रशंसन्मुनिपुङ्गवान् ॥ १८१ ॥

शृण्वन् श्रीवीरनाथस्य, देशनां च दिने दिने ।
वन्दमानो गौतमादीन्, द्वादशावर्त्तवन्दनैः ॥ १८२ ॥

एकस्यापि क्षायिकस्य, सम्यक्त्वस्य प्रभावतः ।
श्रेणिको भूपतिर्भावी, पद्मनाभो जिनादिमः ॥ १८३ ॥

बिभ्रन्महाव्रतान् पंच, स्थितिकल्पान् दशादिशन् ।
कथयन् पंचचारित्रीं, तपः षाण्मासिकीं वदन् ॥ १८४ ॥

महावीर इवोत्तप्तजात्यजाम्बूनदप्रभः ।
पारीन्द्रलक्षणभ्राजी, सप्तहस्तसमुन्नतः ॥ १८५ ॥

इत्थं सम्यक्त्वमाहात्म्यं, तीर्थकृत्कर्म्मकारणम् ।
ज्ञात्वा श्राद्धो दर्शने स्यादक्षोभ्यः सासुरैः सुरैः ॥ १८६ ॥

ये द्वादशात्मसोदर्या, वर्यास्तामसमंथने ।
ते व्रता द्वादशाप्युच्चैर्धार्याः स्वाङ्गाम्बरे वरे ॥ १८७ ॥

सर्वातिचारनिर्मुक्ता, भावनाभिर्विकस्वराः ।
द्वादशभिर्महामोहजित्वरीभिर्निरन्तरम् ॥ १८८ ॥

पञ्चनिर्ग्रन्थिका वन्द्याः, पञ्चज्ञानीप्रदेशिकाः ।
पञ्चचारित्रिकाः स्तुत्याः, पूज्या पञ्चमहाव्रती ॥ १८९ ॥

पञ्चताया विजेतारः, पञ्च ध्येयाः समाधिना ।
विषयैः पञ्चभिर्मुक्ताः, श्रीमन्तः परमेष्ठिनः ॥ १९० ॥

षट्स्थानकप्रकरणे, प्रोक्तो यो विधिरुत्तमः ।
जिनेश्वरगुरुप्रष्ठैः स प्रपाल्यो बुधोत्तमैः ॥ १९१ ॥

दिनकृत्यमिदं सर्वं; श्राद्धः कृत्वा यथाविधि ।
प्रायेण ब्रह्मभृत् स्वापवेलायामिति चिन्तयेत् ॥ १९२ ॥

श्लाघ्यास्ते पुण्यवन्तस्ते, त एव पुरुषोत्तमाः ।
यैर्जिताशेषविश्वोऽसौ, पञ्चेषुसुभटो हतः ॥ १९३ ॥

आपातमात्रमधुराः, कामाः प्रान्तेऽतिदारुणाः ।
ज्ञात्वा येनोज्झिताः सोऽर्च्यः स्थूलभद्रो महामुनिः ॥ १९४ ॥

दशकालिकनिर्युक्तौ, भद्रबाहुगुरुत्तमैः ।
चतुर्विंशतिधा प्रोक्तास्ते कामाः पापतापदाः ॥ १९५ ॥

अप्राप्ता अभिलाषाद्या, दश प्राप्ताश्चतुर्दश ।
दृक्सम्पातादिकास्ते चान्वभूयन्त स्मरातुरैः ॥ १९६ ॥

सप्तधातुमयं मूत्रपुरीषश्लेष्मपूरितम् ।
निरन्तरं नवश्रोतःश्रवन्मलजुगुप्सितम् ॥ १९७ ॥

शरीरं सारसीमानं, यन्मन्यन्ते नराः स्त्रियाः ।
तद् ध्रुवं मोहराजस्य, दुरन्तस्य विजृम्भितम् ॥ १९८ ॥

मानुषं जन्म दृष्टान्तैर्दशभिश्चोल्लकादिभिः ।
दुष्प्रापं प्राणिनः प्राप्य, हारयन्ति मुधैव हि ॥ १९९ ॥

पुण्यानुबन्धि पुण्यं यैः, कृतं स्यात् पूर्वजन्मनि ।
भवपाथोधिपोतं ते, लभन्ते सद्गुरुं नराः ॥ २०० ॥

ततो देवगुरुस्मृत्या, गुणनैश्च नमस्कृते: ।
पूतात्मा कुरुते स्तोकां, निद्रामुद्रां विशुद्धधी: ॥ २०१ ॥

निद्राव्यपगमे चैवं, पुनरप्यनुचिन्तयेत् ।
धन्यास्ते प्राणिनो नित्यं, ये गुरुं पर्युपासते ॥ २०२ ॥

अष्टानां कर्म्मणां सम्यक्, स्वरूपं भेदसंयुतम् ।
बन्धादीनां विकल्पांश्च, पृथक् संवेधतोऽपि च ॥ २०३ ॥

आयु:प्रमाणं प्रत्येकं, कायानां च यथास्थितम् ।
द्वीपादीनां यथार्थत्वं, देवलोकाद्यवस्थिति: ॥ २०४ ॥

इत्यादिक:, सुदुर्ज्ञानो, विचार: प्राणिभि: क्षणात् ।
यथावद् बुध्यते यस्माद्, गुरुपादप्रसादत: ॥ २०५ ॥

स्वामी भृत्य: सुखी दु:खी, भूपो रङ्क: सुर: कृमि: ।
सुधीरधीरिति प्राणी, नटवच्चेष्टते भवे ॥ २०६ ॥

लोकाकाशे समग्रेऽपि, स प्रदेशो न विद्यते ।
नोत्पन्ना: प्राणिनो नानारूपैर्यत्र स्वकर्म्मभि: ॥ २०७ ॥

तनूमन्त: क्रोधमानमायालोभै: पराजिता: ।
अभ्यावृत्त्या पर्यटन्ति, संसारेऽत्र चतुर्गतौ ॥ २०८ ॥

तस्मात्ते क्षान्तिमृदुतार्जवानीहाभिरन्वहम् ।
यथाक्रमं पराजेया:, प्राणिभि: शिवमिच्छुभि: ॥ २०९ ॥

कषायविजये नेशस्तनूमानजितेन्द्रिय: ।
निर्मूलं ध्वस्यते ध्वान्तं, नान्तरेण दिवाकरम् ॥ २१० ॥

कुलोच्छेदं वपुर्भेदं, बन्धनं वधमेव च ।
ददाति करणग्राम:, प्राणिनामविनिर्जित: ॥ २११ ॥

विजय: करणानां च, मन:शुद्ध्यैव सत्फल: ।
यत्तां विना वृथा सर्वं, धर्म्मानुष्ठानमङ्गिनाम् ॥ २१२ ॥

प्रतिक्षणं गलत्यायुर्नीरक्षिप्तामकुम्भवत् ।
दुर्वाक्यं हास्यतोऽप्युक्तं, दुर्विपाकं प्रदर्शयेत् ॥ २१३ ॥

नृपस्यामरदत्तस्य, मित्राणन्दस्य मन्त्रिणः ।
राजतुक् रत्नमञ्जर्या, यथोक्तं पूर्वजन्मनि ॥ २१४ ॥

बन्धाद्यास्तीव्रविद्वेषाभावेऽपि विहिताः सकृत् ।
वधाद्यन्तकृतां पुंसां, ददतेऽनेकजन्मसु ॥ २१५ ॥

शुभस्थाने प्रयुञ्जानैर्मनोवाक्कायमङ्गिभिः ।
अर्ज्यतेऽनुक्षणं पुण्यमशुभं तु विपर्यये ॥ २१६ ॥

सागरोपममेकं यैरायुर्देवेषु बध्यते ।
पल्यकोटिसहस्राणि, ते बध्नन्ति दिने दिने ॥ २१७ ॥

पल्योपमस्य सङ्ख्यातं, भागं बध्नन्ति ये दिवि ।
वर्षकोटीरसङ्ख्यातास्तेऽर्जयन्त्यन्वहं नराः ॥ २१८ ॥

दुर्गतावप्ययं न्यायो, ज्ञात्वैतत् स्वहितैषिणा ।
धर्म्मकृत्येषु चित्रेषु, सर्वदोद्यम्यमादरात् ॥ २१९ ॥

धर्म्मबाधकदोषाणां, विपक्षेषु विचार्य्य ये ।
प्रवर्त्तन्तेऽन्वहं पुण्यं, तानलंकुरुते सदा ॥ २२० ॥

शुद्धधर्म्मोपदेष्टारः शुद्धभैक्षोपजीविनः ।
धनिनिःस्वसमस्वान्ता, महाव्रतपरिष्कृताः ॥ २२१ ॥

कालाद्यपेक्षानुष्ठानाः, संविग्नाः करुणापराः ।
समस्तश्रुततत्त्वज्ञाः, षट्त्रिंशद्गुणभूषिताः ॥ २२२ ॥

प्रभावयन्तस्तीर्थेशं, वज्रस्वामीव शासनम् ।
प्रबोधयंतो भव्यौघान्, सदोद्यतविहारिणः ॥ २२३ ॥

गुरवः स्वाङ्घ्रिपद्माभ्यां, यं देशं पावयन्त्यहो ।
धन्यास्तद्वासिनो लोका, गुरुवाक्यामृतोक्षिताः ॥ २२४ ॥

इत्थं चिन्तयतः सम्यक्, सम्यक्संवेगधारिणः ।
श्रावकस्य व्रतादानपरिणामो भवेदिति ॥ २२५ ॥

कदा मोक्षपुरव्रज्यां, प्रव्रज्यां गुणमन्दिरम् ।
गृहीत्वा सुगुरोः पादाम्भोजं सेवे सुहंसवत् ॥ २२६ ॥

अष्टादश सहस्राणि, शीलाङ्गानां तनौ दधत् ।
भजन् महाव्रतान् पञ्चाप्यङ्गानङ्गश्रुतं पठन् ॥ २२७ ॥

कुर्वाणो दशधा वैयावृत्यं बाहुमुनीन्द्रवत् ।
सहमानः क्षुधं ढण्ढकुमारयतिराजवत् ॥ २२८ ॥

दृढप्रहारिवत्तीव्रं, तप्यमानो महत्तपः ।
संवरं सप्तपञ्चाशद्भेदं मोदात् प्रपालयन् ॥ २२९ ॥

भेदैः सप्ततिसङ्ख्यातैर्विशिष्टं चरणं श्रयन् ।
तावद्भेदं करणं च, समभ्यस्यन्मुहुर्मुहुः ॥ २३० ॥

द्विचत्वारिंशतं मुञ्चन्नाश्रवान् भववर्द्धनान् ।
सामाचारीं त्रिप्रकारां, धृतिस्फारां समुद्वहन् ॥ २३१ ॥

द्विचत्वारिंशता दोषैरदुष्टां भुजिमाचरन् ।
अवन्नव ब्रह्मगुप्तीर्द्वात्रिंशच्चाङ्गिनोऽपि च ॥ २३२ ॥

अष्टधा पञ्चधा चोज्झन्, प्रमादांश्च मदाष्टकम् ।
अष्टप्रवचनप्रष्ठमातृः पात्रीर्मुनीन् दधिः ॥ २३३ ॥

धर्म्यं शुक्लं च सद्ध्यानं, ध्यायन् गायन् जिनस्तवान् ।
विहरिष्ये भव्यजीवान्, देशनाभिः प्रबोधयन् ॥ २३४ ॥

प्रवर्द्धमानभावद्धिरेवं देवं गुरुं स्मरन् ।
कृत्वा संलेखनां पञ्चातीचारपरिवर्जिताम् ॥ २३५ ॥

विधायानशनं लब्ध्वा, देवलोके महाश्रियम् ।
ततश्च्युत्वा ध्वस्तरोगान्, प्राप्य भोगान् नृजन्मनि ॥ २३६ ॥

तृणवत्तांश्च निर्मुच्य, दीक्षित्वा जिनशासने ।
उत्कृष्टाराधनो लब्ध्वा, केवलज्ञानसम्पदम् ॥ २३७ ॥

अयोगितां समासाद्य, सर्वकर्म्मसमुज्झितः ।
प्राप्नोति श्रायसं धाम, यत्र शाश्वतिकं सुखम् ॥ २३८ ॥

शाश्वतं यत्र च ज्ञानं, शाश्वतं यत्र दर्शनम् ।
शाश्वतं यत्र वीर्यं च, सम्यक्त्वं यत्र शाश्वतम् ॥ २३९ ॥

इत्थं सूरिजिनेश्वरैर्जिनपतिश्रीसूरिशिष्यैः कृतः,
शुद्धः श्रावकधर्म्म एव विधिना संसेव्यमानो बुधैः ।
श्रौतार्थच्छद ऋद्धिमान् सुसुमनोहृत्क्षेत्रमध्योद्गतः,
श्रेयःशर्म्मफलं फलिष्यति सतां श्रीकल्पवृक्षो यथा ॥ २४० ॥

विक्रमवर्षे शिखिशशिशिखिशशिसङ्ख्ये प्रभावतः शशिनोः ।
श्रीप्रल्हादनपुरमनुविजयदशम्यां धनिष्ठाभे ॥ २४१ ॥

श्रावकधर्म्मप्रकरणमुपकारकरं विशेषतो गृहिणाम् ।
परिपूर्णीकृतमनघं, भवतु मुदे सकलसङ्घस्य ॥ २४२ ॥

पठतां शठतां त्यजतां भजतां प्रशमं सदोपदिशतां च ।
आकर्णयतां च सतां ददातु निर्वृतिपुरे राज्यम् ॥ २४३ ॥

कृत्वेदं यन्मयोपार्जि, पुण्यं पुण्यानुबन्धदम् ।
तेन विश्वत्रयं भूयाद्, रत्नत्रयविभूषितम् ॥ २४४ ॥

यावन्नन्दीश्वरद्वीपे, निष्प्रतीपजिनव्रजः ।
तावत् प्रकरणं नन्द्यादानन्द्यात् सङ्घमानसम् ॥ २४५ ॥

# ॥ त्रिषष्ठीयदेशनासंग्रह ॥

## ॥ धर्मघोषसूरेर्देशना ॥

धर्मघोषसूरयोऽपि, मेघनिर्घोषया गिरा ।
श्रुतकेवलिदेशीयां, दिदिशुर्देशनामिमाम् ॥ १ ॥

धर्मो मङ्गलमुत्कृष्टं, धर्मः स्वर्गापवर्गदः ।
धर्मः संसारकान्तारोल्लङ्घने मार्गदेशकः ॥ २ ॥

धर्मो मातेव पुष्णाति, धर्मः पाति पितेव च ।
धर्मः सखेव प्रीणाति, धर्मः स्निह्यति बन्धुवत् ॥ ३ ॥

धर्मः सङ्क्रमयत्युच्चैर्गुणान् गुरुरिवोज्ज्वलान् ।
धर्मः प्रकृष्टां स्वामीव, प्रतिष्ठां च प्रयच्छति ॥ ४ ॥

धर्मः शर्ममहाहर्म्यं, धर्मो वर्माऽरिसङ्कटे ।
धर्मो जाड्यच्छिदाघर्मो, धर्मो मर्माविदंहसाम् ॥ ५ ॥

धर्माज्जन्तुर्भवेद् भूपो, धर्माद् रामोऽर्धचक्र्यपि ।
धर्माच्चक्रधरो धर्माद्, देवो धर्माच्च वासवः ॥ ६ ॥

ग्रैवेयकाऽनुत्तरेषु, धर्माद् यात्यहमिन्द्रताम् ।
धर्मादार्हन्त्यमाप्नोति, किं किं धर्मान्न सिध्यति ? ॥ ७ ॥

दुर्गतिप्रपतज्जन्तुधारणाद् धर्म उच्यते ।
दान-शील-तपो-भावभेदात् स तु चतुर्विधः ॥ ८ ॥

तत्र तावद् दानधर्मस्त्रिप्रकारः प्रकीर्त्तितः ।
ज्ञानदाना-ऽभयदान-धर्मोपग्रहदानतः ॥ ९ ॥

दानं धर्मानभिज्ञेभ्यो, वाचनादेशनादिना ।
ज्ञानसाधनदानं च, ज्ञानदानमितीरितम् ॥ १० ॥

*ज्ञानदानेन जानाति, जन्तुः स्वस्य हिताहितम् ।*
वेत्ति जीवादितत्त्वानि, विरतिं च समश्नुते ॥ ११ ॥

ज्ञानदानादवाप्नोति, केवलज्ञानमुज्ज्वलम् ।
अनुगृह्याऽखिलं लोकं, लोकाग्रमधिगच्छति ॥ १२ ॥

भवत्यभयदानं तु, जीवानां वधवर्जनम् ।
मनो-वाक्कायैः करण-कारणा-ऽनुमतैरपि ॥ १३ ॥

तत्र जीवा द्विधा ज्ञेयाः, स्थावर-त्रसभेदतः ।
द्वितयेऽपि द्विधा पर्याप्ताऽपर्याप्तविशेषतः ॥ १४ ॥

पर्याप्तयस्तु षडिमाः; पर्याप्तत्वनिबन्धनम् ।
आहारो वपुरक्षाणि, प्राणो भाषा मनोऽपि च ॥ १५ ॥

स्युरेकाक्ष-विकलाक्ष-पञ्चाक्षाणां शरीरिणाम् ।
चतस्रः पञ्च षड् वाऽपि, पर्याप्तयो यथाक्रमम् ॥ १६ ॥

एकाक्षाः स्थावरा भूम्यप्तेजोवायुमहीरुहः ।
तेषां तु पूर्वे चत्वारः, स्युः सूक्ष्मा बादरा अपि ॥ १७ ॥

प्रत्येकाः साधारणाश्च, द्विप्रकारा महीरुहः ।
साधारणा अपि द्वेधा, सूक्ष्म-बादरभेदतः ॥ १८ ॥

त्रसा द्वि-त्रि-चतुः पञ्चेन्द्रियत्वेन चतुर्विधाः ।
तत्र पञ्चेन्द्रिया द्वेधा, संज्ञिनोऽसंज्ञिनोऽपि च ॥ १९ ॥

शिक्षोपदेशाऽऽलापान् ये, जानते ते तु संज्ञिनः ।
सम्प्रवृत्तमनः प्राणास्तेभ्योऽन्ये स्युरसंज्ञिनः ॥ २० ॥

स्पर्शनं रसनं घ्राणं, चक्षुः श्रोत्रमितीन्द्रियम् ।
तस्य स्पर्शो रसो गन्धो, रूपं शब्दश्च गोचरः ॥ २१ ॥

द्वीन्द्रियाः कृमयः शङ्खा गण्डूपदा जलौकसः ।
कपर्दकाः शुक्तयश्च, विविधाकृतयो मताः ॥ २२ ॥

यूकामत्कुण-मर्कोट-लिक्षाद्यास्त्रीन्द्रिया मताः ।
पतङ्ग-मक्षिका-भृङ्ग-दंशाद्याश्चतुरिन्द्रियाः ॥ २३ ॥

तिर्यग्योनिभवाः शेषा जल-स्थल-खचारिणः ।
नारका मानवा देवाः, सर्वे पञ्चेन्द्रिया मताः ॥ २४ ॥

तत्पर्यायक्षयाद् दुःखोत्पादात् सङ्क्लेशतस्त्रिधा ।
वधस्य वर्जनं तेष्वभयदानं तदुच्यते ॥ २५ ॥

ददात्यभयदानं यो, दत्तेऽर्थान् सोऽखिलानपि ।
जीविते सति जायेत, यत् पुमर्थचतुष्टयी ॥ २६ ॥

जीवितादपरं प्रेयो, जन्तोर्जायेत जातुचित् ।
न राज्यं न च साम्राज्यं, देवराज्यं न चोच्चकैः ॥ २७ ॥

इतोऽशुचिस्थस्य कृमेरितः स्वर्गसदो हरेः ।
प्राणापहारप्रभवं, द्वयोरपि समं भयम् ॥ २८ ॥

समग्रजगदिष्टायाऽभयदानाय सर्वथा ।
सर्वदाऽप्यप्रमत्तः सन्, प्रवर्त्तेत ततः सुधीः ॥ २९ ॥

भवेदभयदानेन, जनो जन्मान्तरेषु हि ।
कान्तो दीर्घायुरारोग्य-रूप-लावण्यशक्तिमान् ॥ ३० ॥

धर्मोपग्रहदानं तु, जायते तत्र पञ्चधा ।
दायक-ग्राहक-देय-काल-भावविशुद्धितः ॥ ३१ ॥

तत्र दायकशुद्धं तन्न्याय्यांर्थो ज्ञानवान् सुधीः ।
निराशंसोऽननुतापी, दायकः प्रददाति यत् ॥ ३२ ॥

इदं चित्तमिदं वित्तमिदं पात्रं निरन्तरम् ।
सञ्जातं यस्य मे सोऽहं, कृतार्थोऽस्मीति दायकः ॥ ३३ ॥

सावद्ययोगविरतो, गौरवत्रयवर्जितः ।
त्रिगुप्तः पञ्चसमितो, रागद्वेषविनाकृतः ॥ ३४ ॥

निर्ममो नगरवसत्यङ्गोपकरणादिषु ।
तथाऽष्टादशशीलाङ्गसहस्रधरणोद्धुरः ॥ ३५ ॥

रत्नत्रयधरो धीरः, समकाञ्चनलेष्टुकः ।
शुभध्यानद्वयस्थास्नुर्जिताक्षः कुक्षिशम्बलः ॥ ३६ ॥

निरन्तरं यथाशक्ति, नानाविधतपःपरः ।
संयमं सप्तदशधा, धारयन्नविखण्डितम् ॥ ३७ ॥

अष्टादशप्रकारं च, ब्रह्मचर्यं समाचरन् ।
यत्रेदृग् ग्राहको दानं, तत् स्याद् ग्राहकशुद्धिमत् ॥ ३८ ॥

देयशुद्धं द्विचत्वारिंशद्दोषरहितं भवेत् ।
पाना-ऽशन-खाद्य-स्वाद्य-वस्त्र-संस्तारकादिकम् ॥ ३९ ॥

कालशुद्धं तु यत् किञ्चित्, काले पात्राय दीयते ।
भावशुद्धं त्वनाशंसं, श्रद्धया यत् प्रदीयते ॥ ४० ॥

न देहेन विना धर्मो, न देहोऽन्नादिकं विना ।
धर्मोपग्रहदानं तद्, विदधीत निरन्तरम् ॥ ४१ ॥

पात्रेभ्योऽशनपानादिधर्मोपग्रहदानतः ।
करोति तीर्थाव्युच्छित्तिं, प्राप्नोति च परं पदम् ॥ ४२ ॥

शीलं सावद्ययोगानां, प्रत्याख्यानं निगद्यते ।
द्विधा तद्देशविरति-सर्वविरतिभेदतः ॥ ४३ ॥

देशतो विरतिः पञ्चाणुव्रतानि गुणास्त्रयः ।
शिक्षाव्रतानि चत्वारि, चेति द्वादशधा मताः ॥ ४४ ॥

तत्र स्थूलाऽहिंसा-सत्या-ऽस्तेय-ब्रह्मा-ऽपरिग्रहाः ।
अणुव्रतानि पञ्चेति, कीर्त्तितानि जिनेश्वरैः ॥ ४५ ॥

अथ दिग्विरतिर्भोगोपभोगविरतिस्तथा ।
अनर्थदण्डविरतिश्चैवं गुणव्रतत्रयी ॥ ४६ ॥

सामायिकं च देशावकाशिकं पौषधस्तथा ।
अतिथीनां संविभागः, शिक्षाव्रतचतुष्टयम् ॥ ४७ ॥

तदेषा देशविरतिः, शुश्रूषादिगुणस्पृशाम् ।
यतिधर्मानुरक्तानां, धर्मपथ्यदनार्थिनाम् ॥ ४८ ॥

शम-संवेग-निर्वेदा-ऽनुकम्पा-ऽऽस्तिक्यलक्षणम् ।
सम्यक्त्वं प्रतिपन्नानां, मिथ्यात्वविनिवर्त्तिनाम् ॥ ४९ ॥

महात्मनां सानुबन्धक्रोधोदयविवर्जिनाम् ।
चारित्रमोहघातेन, जायते गृहमेधिनाम् ॥ ५० ॥

स्थूलानामितरेषां च, हिंसादीनां विवर्जनम् ।
सिद्धिसौधैकसरणिः, सा सर्वविरतिर्मता ॥ ५१ ॥

प्रकृत्याऽल्पकषायाणां, भवसौख्यविरागिणाम् ।
विनयादिगुणाऽऽक्तानां, सा मुनीनां महात्मनाम् ॥ ५२ ॥

यत् तापयति कर्माणि, तत् तपः परिकीर्त्तितम् ।
तद् बाह्यमनशनादि, प्रायश्चित्तादि चाऽऽन्तरम् ॥ ५३ ॥

अनशनमौनोदर्यं, वृत्तेः संक्षेपणं तथा ।
रसत्यागस्तनुक्लेशो, लीनतेति बहिस्तपः ॥ ५४ ॥

प्रायश्चित्तं वैयावृत्यं, स्वाध्यायो विनयोऽपि च ।
व्युत्सर्गोऽथ शुभध्यानं, षोढेत्याभ्यन्तरं तपः ॥ ५५ ॥

रत्नत्रयधरेष्वेका, भक्तिस्तत्कार्यकर्म च ।
शुभैकचिन्ता संसारजुगुप्सा भावना भवेत् ॥ ५६ ॥

चतुर्धा तदयं धर्मो, निःसीमफलसाधनम् ।
साधनीयः सावधानैर्भवभ्रमण भीरुभिः ॥ ५७ ॥

## ॥ शतबलनृपस्य भावना ॥

विधाय सहजाऽशौचमुपस्कारैर्नवं नवम् ।
गोपनीयमिदं हन्त !, कियत्कालं कलेवरम् ? ॥ १ ॥

सत्कृतोऽनेकशोऽप्येष, सत्क्रियेत यदापि न ।
तदापि विक्रियां याति, कायः खलु खलोपमः ॥ २ ॥

अहो ! बहिर्निपतितैर्विष्ठा-मूत्र-कफादिभिः ।
हृणीयन्ते प्राणिनोऽमी, कायस्याऽन्तःस्थितैर्न किम् ? ॥ ३ ॥

रोगाः समुद्भवन्त्यस्मिन्नत्यन्तातङ्कदायिनः ।
दन्दशूका इव क्रूरा, जरद्विटपिकोटरे ॥ ४ ॥

निसर्गाद् गत्वरश्चाऽयं, कायोऽब्द इव शारदः ।
दृष्टनष्टा च तत्रेयं, यौवनश्रीस्तडिन्निभा, ॥ ५ ॥

आयुः पताकाचपलं, तरङ्गतरलाः श्रियः ।
भोगिभोगनिभा भोगाः, सङ्गमाः स्वप्नसन्निभाः ॥ ६ ॥

काम-क्रोधादिभिस्तापैस्ताप्यमानो दिवानिशम् ।
आत्मा शरीरान्तःस्थोऽसौ, पच्यते पुटपाकवत् ॥ ७ ॥

विषयेष्वतिदुःखेषु, सुखमानी मनागपि ।
नाहो ! विरज्यति जनोऽशुचिकीट इवाऽशुचौ ॥ ८ ॥

दुरन्तविषयास्वादपराधीनमना जनः ।
अन्धोऽन्धुमिव पादाग्रस्थितं मृत्युं न पश्यति ॥ ९ ॥

आपातमात्रमधुरैर्विषयैर्विषसन्निभैः ।
आत्मा मूर्च्छित एवाऽऽस्ते, स्वहिताय न चेतति ॥ १० ॥

तुल्ये चतुर्णां पौमर्थ्ये, पापयोरर्थकामयोः ।
आत्मा प्रवर्त्तते हन्त !, न पुनर्धर्ममोक्षयोः ॥ ११ ॥

अस्मिन्नपारे संसारपारावारे शरीरिणाम् ।
महारत्नमिवाऽनर्घ्यं, मानुष्यमतिदुर्लभम् ॥ १२ ॥

मानुष्यकेऽपि सम्प्राप्ते, प्राप्यन्ते पुण्ययोगतः ।
देवता भगवानर्हन्, गुरवश्च सुसाधवः ॥ १३ ॥

मानुष्यकस्य यद्यस्य, वयं नादद्महे फलम् ।
मुषिताः स्म तदधुना, चौरैर्वसति पत्तने ॥ १४ ॥

## ॥ स्वयंबुद्धमन्त्रिणो नृपायोपदेशः ॥

आसंसारं सरिन्नाथः, किं तृप्यति सरिज्जलैः ? ।
सरित्पतिपयोभिर्वा, किमेष वडवानलः ? ॥ १ ॥

अन्तको जन्तुभिः किं वा ?, किमेधोभिर्हुताशनः ? ।
सुखैर्वैषयिकैरात्मा, किं तथैष कदाचन ? ॥ २ ॥

कूलच्छाया दुर्जनाश्च, विषं च विषयास्तथा ।
दन्दशूकाश्च जायन्ते, सेव्यमाना विपत्तये ॥ ३॥

आसेव्यमानस्तत्कालसुखोऽन्तविरसः स्मरः ।
कण्डूय्यमाना पामेव, निकामं च प्रवर्द्धते ॥ ४ ॥

कामोऽयं नरकदूतः, कामो व्यसनसागरः ।
कामो विपल्लताकन्दः, कामः पापद्रुसारणिः ॥ ५ ॥

मदनेन मदेनेव, जनः परवशीकृतः ।
सदाचारपथभ्रष्टः, पतत्येव भवावटे ॥ ६ ॥

अर्थं धर्मं च मोक्षं च, वेश्मेव गृहमेधिनः ।
आसादितप्रवेशोऽयं, खनत्याखुरिव स्मरः ॥ ७ ॥

दर्शनेन स्पर्शनेनोपभोगेन च निर्भरम् ।
व्यामोहायैव जायन्ते, विषवल्ल्य इव स्त्रियः ॥ ८ ॥

निकाममेव कामिन्यः, कामलुब्धकवागुराः ।
हरिणानामिव नृणां, जायन्तेऽनर्थहेतवे ॥ ९ ॥

ये नर्मसुहृदः स्वादाचामैकसुहृदो हि ते ।
स्वामिनश्चिन्तयन्त्येते, परलोकहितं न यत् ॥ १० ॥

स्त्रीकथाभिर्गीतनृत्तैर्नर्मोक्त्या मोहयन्त्यमी ।
षिड्गाः स्वस्वामिनमहो !, नीचाः स्वार्थैकतत्पराः ॥ ११ ॥

कुसंसर्गात् कुलीनानां, भवेदभ्युदयः कुतः ? ।
कदली नन्दति कियद् ?, बदरीतरुसन्निधौ ॥ १२ ॥

तत्प्रसीद कुलस्वामिन् !, स्वयं विज्ञोऽसि मा मुहः ।
विहाय व्यसनासक्तिं, मनो धर्मे निधीयताम् ॥ १३ ॥

निश्छायेन द्रुमेणेव, सरसेवाऽपवारिणा ।
निर्गन्धेनेव पुष्पेण, विदन्तेनेव दन्तिना ॥ १४ ॥

रूपेणेवाऽलवणिम्ना, राज्येनेवाऽपमन्त्रिणा ।
अदेवेनेव चैत्येन, रजन्येवेन्दुहीनया ॥ १५ ॥

यतिनेवाऽचरित्रेण, सैन्येनेवाऽपशस्त्रिणा ।
मुखेनेवाऽक्षिहीनेन, निर्धर्मेण नरेण किम् ? ॥ १६ ॥

चक्रवर्त्यप्यधर्मः सन्, जन्म तल्लभते पुनः ।
कदन्नमपि सम्प्राप्तं, साम्राज्यं यत्र मन्यते ॥ १७ ॥

महाकुलप्रसूतोऽपि, धर्मोपार्जनवर्जितः ।
भवेद् भवान्तरे श्वेव, परोच्छिष्टान्नभोजनः ॥ १८ ॥

धर्महीनो द्विजन्माऽपि, नित्यं पापानुबन्धकः ।
बिडाल इव दुर्वृत्तो, म्लेच्छयोनिषु जायते ॥ १९ ॥

बिडाल-व्याल-शार्दूल-श्येन-गृध्रादियोनिषु ।
भवन्ति भूयिष्ठभवा, भविनो धर्मवर्जिताः ॥ २० ॥

धर्महीनाः कृमयः स्युरसकृच्छकृदादिषु ।
कुक्कुट्यदेर्लभन्ते च, चञ्चूचरणताडनम् ॥ २१ ॥

जायन्ते धर्मरहिता, नरा नरकभूमिषु ।
वैरादिव कदर्थ्यन्ते, परमाधार्मिकैःकृधा ॥ २२ ॥

अनन्तव्यसनावेगज्वलनान्तरवर्त्तिनः ।
त्रपुःपिण्डानिव हहा !, धिगधर्मान् शरीरिणः ॥ २३ ॥

धर्मादाप्नोति शर्माणि, परमादिव बान्धवात् ।
तरण्डेनेव तरति, धर्मेण विपदापगाः ॥ २४ ॥

पुंसां शिरोमणीयन्ते, धर्मार्जनपरा नराः ।
आश्रीयन्ते च सम्पद्भिर्लताभिरिव पादपाः ॥ २५ ॥

आधि-व्याधि-विरोधादि, सर्वं बाधानिबन्धनम् ।
विध्यायत्याशु धर्मेण, जलेनेव हुताशनः ॥ २६ ॥

जन्मान्तरेऽप्यर्पणाय, सर्वकल्याणसम्पदाम् ।
प्रतिभूर्धर्म एवाऽयमलङ्कर्मीणविक्रमः ॥ २७ ॥

किमन्यदुच्यते स्वामिन् ! ?, धर्मेणैव बलीयसा ।
सौधाग्रमिव निश्रेण्या, लोकाग्रं यान्ति जन्तवः ॥ २८ ॥

विद्याधरनरेन्द्रत्वं, धर्मेणैव त्वमासदः ।
अतोऽप्युत्कृष्टलाभाय, धर्ममेव समाश्रय ॥ २९ ॥

दर्शरात्रिरिवाऽत्यन्तमिथ्यात्वतिमिराकरः ।
ततो विषोपममतिः, सम्भिन्नमतिरब्रवीत् ॥ ३० ॥

साधु साधु स्वयम्बुद्ध !, स्वामिनो हितकाम्यसि ।
यदाहार इवोद्गारैर्गिरा भावोऽनुमीयते ॥ ३१ ॥

ऋजोः सदा प्रसन्नस्य, स्वामिनः सुखहेतवे ।
वदन्त्येवं कुलामात्यास्त्वादृशा एव नाऽपरे ॥ ३२ ॥

निसर्गकठिनः कस्त्वामुपाध्यायोऽध्यजीगपत् ? ।
अकाण्डाशनिपाताभं, प्रभौ यदिदमब्रवीः ॥ ३३ ॥

स्वयं भोगार्थिभिः स्वामी, सेव्यते सेवकैरिह ।
मा भुङ्क्थास्त्वं तु भोगानित्युच्यते स कथं नु तैः ? ॥ ३४ ॥

त्यक्त्वा यदैहिकान् भोगान्, परलोकाय यत्यते ।
हित्वा हस्तगतं लेह्यं, कूर्परालेहनं हि तत् ॥ ३५ ॥

परलोकफलो धर्मः, कीर्त्यते तदसङ्गतम् ।
परलोकोऽपि नाऽस्त्येवाऽभावतः परलोकिनः ॥ ३६ ॥

पृथ्व्यप्तेजः समीरेभ्यः, समुद्भवति चेतना ।
गुडपिष्टोदकादिभ्यो, मदशक्तिरिव स्वयम् ॥ ३७ ॥

शरीरान्न पृथक् कोऽपि, शरीरी हन्त ! विद्यते ।
परित्यज्य शरीरं यः, परलोकं गमिष्यति ॥ ३८ ॥

निःशङ्कमुपभोक्तव्यं, ततो वैषयिकं सुखम् ।
स्वात्मा न वञ्चनीयोऽयं, स्वार्थभ्रंशो हि मूर्खता ॥ ३९ ॥

धर्माधर्मौ च नाशङ्क्यौ, विघ्नहेतू सुखेषु तत् ।
तावेव नैव विद्येते, यतः खरविषाणवत् ॥ ४० ॥

स्नपनेनाङ्गरागेण, माल्यवस्त्रविभूषणैः ।
यदेकः पूज्यते ग्रावा, पुण्यं तेन व्यधायि किम् ? ॥ ४१ ॥

अन्यस्य चोपरि ग्राव्ण, आसित्वा मूत्र्यते जनैः ।
क्रियते च पुरीषादि, पापं तेन व्यधायि किम् ? ॥ ४२ ॥

उत्पद्यन्ते विपद्यन्ते, कर्मणा यदि जन्तवः ।
उत्पद्यन्ते विपद्यन्ते, बुद्बुदाः केन कर्मणा ? ॥ ४३ ॥

तदस्ति चेतनो यावत्, चेष्ट्यते तावदिच्छया ।
चेतनस्य विनष्टस्य, विद्यते न पुनर्भवः ॥ ४४ ॥

य एव म्रियते जन्तुः, स एवोत्पद्यते पुनः ।
इत्येतदपि वाङ्मात्रं, सर्वथाऽनुपपत्तितः ॥ ४५ ॥

शिरीषकल्पे तत्तल्पे, रूपलावण्यचारुभिः ।
रमणीभिः समं स्वामी, रमतामविशङ्कितम् ॥ ४६ ॥

भोज्यान्यमृतरूपाणि, पेयानि च यथारुचि ।
स्वाद्यन्तां स्वामिना स्वैरं, स वैरी यो निषेधति ॥ ४७ ॥

कर्पूरागरुकस्तूरीचन्दनादिभिरर्चितः ।
एकसौरभ्यनिष्पन्न इव तिष्ठ दिवानिशम् ॥ ४८ ॥

उद्यानयानजगतीचित्रशालादिशालि यत् ।
तत्तत् क्षितीश ! प्रेक्षस्व, चक्षुःप्रीत्यै प्रतिक्षणम् ॥ ४९ ॥

वेणुवीणामृदङ्गानुनादिभिर्गीतनिस्वनैः ।
दिवानिशं तव स्वामिन्नस्तु कर्णरसायनम् ॥ ५० ॥

यावज्जीवेत् सुखं जीवेत्, तावद् वैषयिकैः सुखैः ।
न ताम्येद् धर्मकार्याय, धर्माधर्मफलं क्व तत् ? ॥ ५१ ॥

स्वयम्बुद्धस्ततोऽवादीन्नास्तिकैः स्वपरारिभिः ।
अन्धैरन्धा इवाकृष्य, पात्यन्ते धिगधो जनाः ॥ ५२ ॥

स्वसंवेदनवेद्योऽयमात्माऽस्ति सुखदुःखवित् ।
निषेधितुं बाधाभावाच्छक्यते न हि केनचित् ॥ ५३ ॥

सुखितोऽहं दुःखितोऽहमिति कस्याऽपि ज्ञातुचित् ।
जायते प्रत्ययो नैव, विनाऽऽत्मानमबाधितः ॥ ५४ ॥

स्वशरीरे स्वसंवित्तेरेवमात्मनि साधिते ।
अस्त्येव परकीयेऽपि, शरीरे सोऽनुमानतः ॥ ५५ ॥

निश्चीयते शरीरेऽस्ति, परकीयेऽपि चेतनः ।
सर्वत्र बुद्धिपूर्वायाः क्रियाया उपलम्भतः ॥ ५६ ॥

य एव म्रियते जन्तुः, स एवोत्पद्यते पुनः ।
अस्त्येवं परलोकोऽपि, चेतनस्य न संशयः ॥ ५७ ॥

यात्येकमेव चैतन्यं, जन्मतोऽन्यत्र जन्मनि ।
शैशवादिव तारुण्ये, तारुण्यादिव वार्द्धके ॥ ५८ ॥

विना हि पूर्वचैतन्यानुवृत्तिं जातमात्रकः ।
अशिक्षितः कथं बालो, मुखमर्पयति स्तने ? ॥ ५९ ॥

अचेतनेभ्यो भूतेभ्यश्चेतनो जायते कथम् ? ।
कारणस्याऽनुरूपं हि, कार्यं जगति दृश्यते ॥ ६० ॥

प्रत्येकं युगपद् वा स्याद्, भूतेभ्यश्चेतनो ननु ।
आद्यः पक्षो यदि तदा, तावन्तश्चेतना न किम् ? ॥ ६१ ॥

अथ द्वितीयः पक्षः स्यात्, तदा भिन्नस्वभावकैः ।
भूतैरेकस्वभावोऽयं जन्यते चेतनः कथम् ॥ ६२ ॥

रूपगन्धरसस्पर्शगुणा तावद् वसुन्धरा ।
प्रत्यक्षमेतदापोऽपि, रूपस्पर्शरसात्मिकाः ॥ ६३ ॥

रूपस्पर्शगुणं तेज, एकस्पर्शगुणो मरुत् ।
अमीषामेवमाबालं, व्यक्ता भिन्नस्वभावता ॥ ६४ ॥

तोयादिभ्यो विसदृशां, मुक्तानां जन्मदर्शनात् ।
भूतेभ्योऽचेतनेभ्योऽपि, चेतनः सम्भवीति चेत् ॥ ६५ ॥

तन्न युक्तं यतस्तोयं, मौक्तिकादिषु दृश्यते ।
एकं पौद्गलिकं रूपं, वैसदृश्यं ततः कथम् ? ॥ ६६ ॥

किञ्च पिष्टोदकादिभ्यो, मदशक्तिरचेतना ।
अचेतनेभ्यो जातेति, दृष्टान्तश्चेतने कथम् ? ॥ ६७ ॥

न च देहात्मनोरैक्यमिति वाच्यं कदाचन ।
यद्देहे तदवस्थेऽपि, चेतनो नोपलभ्यते ॥ ६८ ॥

यच्चैकः पूज्यते ग्रावा, मूत्राद्यैर्लिप्यतेऽपरः ।
तदसत् सुखदुःखादि, कुतस्त्यमपचेतने ? ॥ ६९ ॥

ततो देहाद् विभिन्नोऽयमात्माऽस्ति परलोकवान् ।
विद्यते परलोकोऽपि, धर्माधर्मनिबन्धनम् ॥ ७० ॥

अङ्गनालिङ्गनादग्नितापादिव समन्ततः ।
विलीयते मनुष्याणां, विवेको नवनीतवत् ॥ ७१ ॥

निरर्गलं बहुरसांस्तांस्तानाहारपुद्गलान् ।
भुञ्जानो नैव जानाति, मत्तः पशुरिवोचितम् ॥ ७२ ॥

चन्दनागरु-कस्तूरी-घनसारादिगन्धतः ।
आक्रामति नरं सद्यो, दन्दशूक इव स्मरः ॥ ७३ ॥

पुमान् रामादिरूपेषु, विलग्नेनेह चक्षुषा ।
वृतिलग्नोपसंव्यानाञ्चलेनेव स्खलत्यहो ! ॥ ७४ ॥

मुहूर्त्तसुखदानेन, मोहयन्ती मुहुर्मुहुः ।
धूर्त्तमैत्रीव सङ्गीतिः, कुशलाय न सर्वथा ॥ ७५ ॥

तत्पापस्यैकसुहृदो, धर्मस्यैकविरोधिनः ।
नरकस्याकृष्टिपाशान्, विषयान् मुञ्च दूरतः ॥ ७६ ॥

यत् प्रेष्य एको भवति, स्वामी भवति चाऽपरः ।
एकः प्रार्थयते भिक्षामपरश्च प्रयच्छति ॥ ७७ ॥

वाहनं च भवत्येकस्तमन्यश्चाधिरोहति ।
अभयं याचते चैको, द्वितीयस्तु ददाति तत् ॥ ७८ ॥

इत्यादि सम्यगेवेह, धर्माधर्मफलं महत् ।
पश्यन्नपि न मन्येत, यस्तस्मै स्वस्ति धीमते ! ॥ ७९ ॥

तदसद्वागिवाऽधर्मो, हेयो दुःखनिबन्धनम् ।
स्वामिन् ! सद्वागिवादेयो, धर्मः शर्मैककारणम् ॥ ८० ॥

ऊचे ततः शतमतिर्नात्मा कश्चिदिहाऽपरः ।
पदार्थविषयज्ञानात्, प्रतिक्षणविभङ्गुरात् ॥ ८१ ॥

यद्वस्तुषु स्थिरत्वे धीर्वासना तत्र कारणम् ।
पूर्वापरक्षणानां तदेकत्वं वास्तवं न तु ॥ ८२ ॥

अथोवाच स्वयम्बुद्धो, वस्तु नास्ति निरन्वयम् ।
अम्भस्तृणादि हि गवां, हन्त ! दुग्धाय कल्पते ॥ ८३ ॥

आकाशपुष्पवत् कूर्मरोमवच्च निरन्वयम् ।
नैव वस्तु भवत्यत्र, तद् वृथा क्षणभङ्गधीः ॥ ८४ ॥

वस्तु चेत् क्षणविध्वंसि, सन्तानः क्षणिको न किम् ? ।
सन्तानस्य च नित्यत्वे, समस्तं क्षणिकं कुतः ? ॥ ८५ ॥

सर्वभावेष्वनित्यत्वे, निहितप्रतिमार्गणम् ।
स्मरणं प्रत्यभिज्ञा च, कथं नामोपपद्यते ? ॥ ८६ ॥

जन्मानन्तरनाशित्वे, द्वितीयक्षणसम्भवी ।
पित्रोर्न पुत्रः पितरौ, न पुत्रस्येत्यसङ्गतिः ॥ ८७ ॥

विवाहसमयादूर्ध्वं, जम्पत्योः क्षणनाशिनोः ।
न जायायाः पतिः पत्युर्न जायेत्यसमञ्जसम् ॥ ८८ ॥

इह कृत्वाऽशुभं कर्म, स नाऽमुत्राऽश्नुते फलम् ।
भुङ्क्तेऽन्यः किन्तु तदिति, कृतनाशाऽकृतागमौ ॥ ८९ ॥

तुर्योऽप्युवाच मायाऽसौ, तत्त्वतो नाऽस्ति किञ्चन ।
दृश्यमानमपि स्वप्न–मृगतृष्णादिसन्निभम् ॥ ९० ॥

गुरुः शिष्यः पिता पुत्रो, धर्मोऽधर्मो निजः परः ।
इत्यादि दृश्यते यत् स, व्यवहारो न तात्त्विकम् ॥ ९१ ॥

विहाय जम्बुको मांसं, तीरे मीनाय धावितः ।
मीनोऽथ प्राविशत् तोये, मांसं गृध्रोऽहरद् यथा ॥ ९२ ॥

तथैहिकसुखं हित्वा, परलोकाय धाविताः ।
आत्मानमुभयभ्रष्टा, वञ्चयन्ते हिं ते नराः ॥ ९३ ॥

पाखण्डिनामलीकाज्ञां, श्रुत्वा नरकभीरवः ।
दण्डयन्ति निजं देहमहो ! मोहाद् व्रतादिना ॥ ९४ ॥

यथा क्ष्मापातशङ्क्येकाङ्घ्रिणा नृत्यति लावकः ।
तथाऽभिशङ्क्य नरकपातं जन्तुस्तपस्यति ॥ ९५ ॥

स्वयम्बुद्धोऽब्रवीद् वस्तु, न सच्चेदर्थकृत् कथम् ? ।
माया चेदीदृशी तर्हि, स्वप्नेभः किं न कार्यकृत् ? ॥ ९६ ॥

कार्यकारणभावं चेद्, वस्तुनां पारमार्थिकम् ।
न मन्यसे तदा किं त्वं, बिभेषि पततोऽशनेः ? ॥ ९७ ॥

एवं सति न त्वं नाऽहं, न वाच्यं न च वाचकः ।
तदेष्टप्रतिपत्तिः स्याद्, व्यवहारकरी कथम् ? ॥ ९८ ॥

वितण्डापण्डितैरेभिः, स्वयं विषयगृध्नुभिः ।
देव ! प्रतार्यसे नित्यं, शुभोदर्कपराङ्मुखैः ॥ ९९ ॥

ततो विवेकमालम्ब्य, विषयांस्त्यज दूरतः ।
धर्ममेवाश्रय स्वामिन्नत्राऽमुत्र च शर्मणे ॥ १०० ॥

## ॥ श्रीयुगन्धरमुनेर्देशना ॥

स्वकर्मपरिणामेनोत्पद्यन्ते नरकावनौ ।
भैदिकाश्छैदिकाः शीर्षच्छेद्याश्चाऽपि शरीरिणः ॥ १ ॥

तिलपीडं निपीड्यन्ते, यन्त्रैस्तत्र हि केचन ।
दारुदारं च दार्यन्ते, क्रकचैः केऽपि दारुणैः ॥ २ ॥

शूलतूलिकशय्यासु, शाय्यन्ते केऽपि सन्ततम् ।
असुरैर्वस्त्रवत् केचिदास्फाल्यन्ते शिलातले ॥ ३ ॥

कुट्यन्ते केऽप्ययस्पात्राणीव लोहघनैर्घनैः ।
खण्ड्यन्ते शाकपणिका, इव केचन खण्डशः ॥ ४ ॥

भूयोऽपि मिलिताङ्गास्ते, भूयो भूयस्तथैव हि ।
तद्दुःखमनुभाव्यन्ते, क्रन्दन्तः करुणस्वरम् ॥ ५ ॥

पिपासिताश्च पाय्यन्ते, तप्तत्रपुरसं मुहुः ।
छायार्थिनो निषाद्यन्ते, चाऽसिपत्रतरोस्तले ॥ ६ ॥

मुहूर्त्तमपि न स्थातुं, लभन्ते वेदनां विना ।
नरके नारकाः कर्म, स्मार्यमाणाः पुराकृतम् ॥ ७ ॥

वत्से ! नारकषण्ढानां, यद् दुःखं तदशेषतः ।
श्राव्यमाणमपि प्राणभाजां दुःखाय जायते ॥ ८ ॥

किञ्च प्रत्यक्षमीक्ष्यन्ते, जल-स्थल-खचारिणः ।
प्राणिनो विविधं दुःखमापेदानाः स्वकर्मजम् ॥ ९ ॥

तत्र वारिचराः स्वैरं, खादन्त्यन्योन्यमुत्सुकाः ।
धीवरैः परिगृह्यन्ते, गिल्यन्ते च बकादिभिः ॥ १० ॥

उत्कील्यन्ते त्वचयद्भिर्भुज्यन्ते च भटित्रवत् ।
भोक्तुकामैर्विपच्यन्ते, निगाल्यन्ते वसार्थिभिः ॥ ११ ॥

प्राणिनश्च स्थलचरा, अबला बलवत्तरैः ।
मृगाद्या सिंहप्रमुखैर्मार्यन्ते मांसकामिभिः ॥ १२ ॥

मृगयासक्तचित्तैश्च, क्रीडया मांसकाम्यया ।
नरैस्तत्तदुपायेन, हन्यन्तेऽनपराधिनः ॥ १३ ॥

क्षुधा-पिपासा-शीतोष्णा-ऽतिभारारोपणादिना ।
कशा-ऽङ्कुश-प्रतोदैश्च, सहन्ते वेदनाममी ॥ १४ ॥

खेचरास्तित्तिरि-शुक-कपोत-चटकादयः ।
श्येन-शिञ्चान-गृध्राद्यैर्गृह्यन्ते मांसगृध्नुभिः ॥ १५ ॥

मांसलुब्धैः शाकुनिकैर्नानोपायप्रपञ्चतः ।
सङ्गृह्य प्रतिहन्यन्ते, नानारूपैर्विडम्बनैः ॥ १६ ॥

जलादिशस्त्रादिभवं, तिरश्चां सर्वतो भयम् ।
अभग्नप्रसरं स्वस्वकर्मबन्धनिबन्धनम् ॥ १७ ॥

मानुष्यकेऽपि सम्प्राप्ते, जायन्ते केऽपि जन्मिनः ।
जन्मान्धबधिरा जन्मपङ्गवो जन्मकुष्ठिनः ॥ १८ ॥

चौरिकापारदारिक्यप्रसक्ताः केऽपि मानवाः ।
नवैर्नवैर्निगृह्यन्ते, निग्रहैर्नारका इव ॥ १९ ॥

विविधैर्व्याधिभिः केऽपि, बाध्यमाना निरन्तरम् ।
प्रेक्षमाणाः परमुखमुपेक्ष्यन्ते सुतैरपि ॥ २० ॥

मूल्यक्रीताश्च ताड्यन्ते, केचिदश्वतरा इव ।
अतिभारेण बाध्यन्तेऽनुभाव्यन्ते तृषादिकम् ॥ २१ ॥

परस्परपराभूतिक्लिष्टानां द्युसदामपि ।
स्वस्वामिभावबद्धानां, दुःखमेव निरन्तरम् ॥ २२ ॥

अस्मिन्नसारे संसारे, निसर्गेणाऽतिदारुणे ।
अवधिर्न हि दुःखानां, यादसामिव वारिधौ ॥ २३ ॥

संसारे दुःखनिलये, जैनो धर्मः प्रतिक्रिया ।
मन्त्राक्षरमिव स्थाने, भूतप्रेतादिसङ्कुले ॥ २४ ॥

जातु हिंसा न कर्त्तव्या, हिंसया हि शरीरिणः ।
पोता इवाऽतिभारेण, मज्जन्ति नरकार्णवे ॥ २५ ॥

असत्यं सर्वथा त्याज्यमसत्यवचनेन यत् ।
चिरं भ्रमति संसारे, जन्तुस्तृण्येव वात्यया ॥ २६ ॥

अदत्तं नाददीतार्थमदत्तादानतो यतः ।
कपिकच्छूफलस्पर्शादिव जातु सुखं न हि ॥ २७ ॥

अब्रह्म परिहर्त्तव्यमब्रह्मचरणेन हि ।
धृत्वा गले रङ्क इव, नीयते नरके जनः ॥ २८ ॥

परिग्रहो न कर्त्तव्यः, परिग्रहवशेन यत् ।
दुःखपङ्के जनो मज्जत्यतिभारेण गौरिव ॥ २९ ॥

पञ्चाऽप्यमूनि हिंसादीन्युत्सृजेद् देशतोपि यः ।
उत्तरोत्तरकल्याणसम्पदां सोऽपि भाजनम् ॥ ३० ॥

## ॥ लब्धीनां स्वरूपम् ॥

एकादशाङ्गयाः पारीणा, जाता बाह्वादयोऽपि ते ।
क्षयोपशमवैचित्र्याच्चित्रा हि श्रुतसम्पदः ॥ १ ॥

तीर्थकृत्पादसेवायास्तपसो दुश्चरस्य च ।
असन्तुष्टाः सदाऽभूवंस्ते सन्तोषधना अपि ॥ २ ॥

ते नित्यं तीर्थकृद्वाणीपीयूषरसपायिनः ।
अपि मासोपवासादितपसा नैव चकलमुः ॥३ ॥

भगवान् वज्रसेनोऽपि, शुक्लध्यानं श्रितोऽन्तिमम् ।
निर्वाणं प्राप गीर्वाणप्रपञ्चितमहोत्सवम् ॥ ४ ॥

सेनाभिरिव धर्मस्य, वृतो व्रतसनाभिभिः ।
मुनिभिर्वज्रनाभोऽपि, विजहार वसुन्धराम् ॥ ५ ॥

स्वामिना व्रजनाभेन, बाह्वाद्याः स च सारथिः ।
सनाथा जज्ञिरे पञ्चेन्द्रियाणीवाऽन्तरात्मना ॥ ६ ॥

तेषां योगप्रभावेण, सर्वाः खेलादिलब्धयः ।
औषध्य इव शैलानामा विरासन् शशित्विषा ॥ ७ ॥

तेषां श्लेष्मलवेनाऽपि, संश्लिष्टं कुष्ठिनो वपुः ।
कोटिवेधरसेनेव, ताम्रराशिः सुवर्ण्यभूत् ॥ ८ ॥

कर्णनेत्रादिभूरङ्गभूश्च तेषामभून्मलः ।
कस्तूरिकापरिमलो, रोगघ्नः सर्वरोगिणाम् ॥ ९ ॥

तेषां वपुःपरिस्पर्शमात्रादपि शरीरिणः ।
सरुजो नीरुजोऽभूवन्, सुधाम्भःस्नपनादिव ॥ १० ॥

तदङ्गसङ्गादम्भोदमुक्तं नद्यादिवाह्यपि ।
सर्वरोगान् पयोऽहार्षीत्, तमांसीवांऽशुमन्महः ॥ ११ ॥

विषादिदोषाः प्राणश्यंस्तदङ्गस्पर्शिवायुना ।
गन्धसिन्धुरदानाम्भोगन्धेनेवाऽन्यसिन्धुराः ॥ १२ ॥

विषसम्पृक्तमन्नादि; तेषां पात्रे मुखेऽपि वा ।
सम्प्रविष्टं सुधाकुण्ड, इव निर्विषतामगात् ॥ १३ ॥

वचनश्रवणात् तेषां, विषं मन्त्राक्षरादिव ।
बाधा महाविषव्याधिबाधितस्याऽप्यपासरत् ॥ १४ ॥

नखाः केशा रदाश्चान्यदपि तेषां शरीरजम् ।
भेजे भेषजतां सर्वं, मुक्तात्वं शुक्तिवारिवत् ॥ १५ ॥

आसन्नणीयसीं मूर्तिं, तथा ते कर्त्तुमीश्वराः ।
यथा सञ्चरितुमलं, सूचीरन्ध्रेऽपि तन्तुवत् ॥ १६ ॥

वपुर्महत्तरीकर्त्तुं, शक्तिस्तेषां बभूव सा ।
यया सुमेरुशैलोऽपि, जानुदघ्नो व्यधीयत ॥ १७ ॥

तेषां वपुर्लघीयस्त्वसामर्थ्यं तदजायत ।
समुल्लङ्घे तद् येन, मारुतस्याऽपि लाघवम् ॥ १८ ॥

वपुर्गरिमशक्तिश्च, वज्रादप्यतिशायिनी ।
साऽभूत् तेषां न या सह्या, शक्राद्यैस्त्रिदशैरपि ॥ १९ ॥

प्राप्तिशक्तिरभूत् तेषां, भूस्थानां स्पर्शनं यया ।
अङ्गुल्यग्रेण मेर्वग्रग्रहादेर्वृक्षपत्रवत् ॥ २० ॥

साऽभूत् प्राकाम्यशक्तिश्च, भुवीवाऽप्सु यया गतिः ।
निमज्जनोन्मज्जने च, पानीय इव भुव्यपि ॥ २१ ॥

आसीत् तेषां तदैश्वर्यं, प्रभवन्ति स्म येन ते ।
चक्रभृत्रिदशाधीशऋद्धिमाधातुमात्मनः ॥ २२ ॥

तेषां वशित्वसामर्थ्यं, तदपूर्वमजायत ।
भेजिरे वशितां येन, स्वतन्त्राः क्रूरजन्तवः ॥ २३ ॥

तेषामप्रतिघातित्वशक्तिः साऽभूद् यया खलु ।
अद्रिमध्येऽपि निःसङ्गं, गमनं रन्ध्रमध्यवत् ॥ २४ ॥

तदन्तर्द्धानसामर्थ्यमभूत् तेषामनाहतम् ।
नभस्वतामिवाऽदृश्यरूपता येन सर्वतः ॥ २५ ॥

प्रावीण्यं कामरूपित्वे, तत् तेषामुल्ललास च ।
अलं पूरयितुं लोकं, नानारूपैर्यथा निजैः ॥ २६ ॥

तेषामाविरभूद् बीजबुद्धिता सातिशायिनी ।
एकार्थबीजतोऽनेकार्थबीजानां प्ररोहिणी ॥ २७ ॥

ते कोष्ठबुद्धयोऽभूवन्, कोष्ठप्रक्षिप्तधान्यवत् ।
विना स्मरणमर्थानां, प्राक् श्रुतानां तथास्थितेः ॥ २८ ॥

आद्यादन्त्यान्मध्यमाद् वा, श्रुतादेकपदादपि ।
सर्वार्थग्रन्थबोधात् तेऽभूवन् पदानुसारिणः ॥ २९ ॥

एकं वस्तु समुद्धृत्याऽन्तर्मुहूर्त्ताच्छ्रुतोदधेः ।
अवगाहनसामर्थ्यात्, ते मनोबलिनोऽभवन् ॥ ३० ॥

अन्तर्मुहूर्त्तमात्रेण, मातृकामात्रलीलया ।
गुणयन्तः श्रुतं सर्वमासन् वाग्बलिनश्च ते ॥ ३१ ॥

प्रपद्यमानाः प्रतिमां, चिरकालमपि स्थिराम् ।
श्रमक्लमाभ्यां रहितास्ते कायबलिनोऽभवन् ॥ ३२ ॥

अभूवन्नमृतक्षीरमध्वाज्यास्रविणश्च ते ।
पात्रस्थस्य कदन्नस्याऽप्यमृतादिरसागमात् ॥ ३३ ॥

दुःखार्दितेष्वमृतादिपरिणामाद् गिरां च ते ।
अमृतक्षीरमध्वाज्यास्रविणः साधु जज्ञिरे ॥ ३४ ॥

अन्नस्य पात्रपतितस्याऽल्पस्याऽप्यतिदानतः ।
अक्षयेणाऽक्षीणमहानसर्द्धयश्च तेऽभवन् ॥ ३५ ॥

तीर्थकृत्पर्षदीवाऽल्पदेशेऽपि प्राणिनां सुखम् ।
असङ्ख्यानां स्थितेरासंस्ते चाऽक्षीणमहालयाः ॥ ३६ ॥

एकेनाऽपीन्द्रियेणाऽन्येन्द्रियार्थस्योपलम्भनात् ।
ते बभूवुश्च सम्भिन्नस्रोतोलब्धिमहर्द्धयः ॥ ३७ ॥

जङ्घाचारणलब्धिश्च, तेषामजनि सा यया ।
रुचकद्वीपमेकेनोत्पातेन प्राप्तुमीश्वराः ॥ ३८ ॥

वलन्तो रुचकद्वीपादेकेनोत्पतनेन ते ।
नन्दीश्वरेऽलमायातुं, द्वितीयेन यतो गताः ॥ ३९ ॥

ते चोर्ध्वगत्यामेकेन, समुत्पतनकर्मणा ।
उद्यानं पाण्डकं गन्तुमलं मेरुशिरःस्थितम् ॥ ४० ॥

ततस्ते वलिता एकेनोत्पातेन तु नन्दनम् ।
अलं गन्तुं द्वितीयेन, प्रथमोत्पातभूमिकाम् ॥ ४१ ॥

ते विद्याचारणर्द्ध्याऽऽप्तुमेकेनोत्पातकर्मणा ।
मानुषोत्तरमन्येन, द्वीपं नन्दीश्वरं क्षमाः ॥ ४२ ॥

एकोत्पातात् ततश्चाप्तुं, पूर्वोत्पातमहीतलम् ।
तिर्यग्यानक्रमेणोर्ध्वमप्यलं ते गतागते ॥ ४३ ॥

आसीदाशीविषर्द्धिश्च, निग्रहाऽनुग्रहक्षमा ।
तेषामन्या अप्यभूवन्, बहुलं बहुलब्धयः ॥ ४४ ॥

लब्धीनामुपयोगं ते, जगृहुर्न कदाचन ।
मुमुक्षवो निराकाङ्क्षा, वस्तुषूपस्थितेष्वपि ॥ ४५ ॥

## ॥ विंशतिस्थानकस्वरूपम् ॥

इतश्च तीर्थकृन्नामगोत्रकर्मार्जितं दृढम् ।
स्वामिना वज्रनाभेन, विंशत्या स्थानकैरिति ॥ १ ॥

तत्रैकमर्हतामर्हत्प्रतिमानां च पूजया ।
अवर्णवादनिषेधैः, सद्भूतार्थस्तवैरपि ॥ २ ॥

सिद्धानां सिद्धिस्थानेषु, प्रतिजागरणोत्सवैः ।
यथावस्थितसिद्धत्वकीर्त्तनाच्च द्वितीयकम् ॥ ३ ॥

बालक-ग्लान-शैक्षादियतीनां यस्त्वनुग्रहः ।
प्रवचनस्य वात्सल्यं, स्थानकं तत् तृतीयकम् ॥ ४ ॥

आहारौषधवस्त्रादिदानादञ्जलियोजनात् ।
गुरूणामतिवात्सल्यकरणं तु तुरीयकम् ॥ ५ ॥

विंशत्यब्दपर्यायाणां, षष्टिवर्षायुषां तथा ।
समवायभृतां भक्तिः, स्थविराणां तु पञ्चमम् ॥ ६ ॥

अर्थव्यपेक्षया स्वस्माद्, बहुश्रुतभृतां सदा ।
अन्नवस्त्रादिदानेन, षष्ठं वात्सल्यनिर्मितिः ॥ ७ ॥

सुविकृष्टतपःकर्मनिर्माणानां तपस्विनाम् ।
भक्तिर्विश्रामणादानैर्वात्सल्यमिति सप्तमम् ॥ ८ ॥

द्वादशाङ्गे श्रुते प्रश्नवाचनादिभिरन्वहम् ।
सूत्राऽर्थोभयगो ज्ञानोपयोगो यस्तदष्टमम् ॥ ९ ॥

शङ्कादिदोषरहितं, स्थैर्यादिगुणभूषितम् ।
शमादिलक्षणं सम्यग्दर्शनं नवमं पुनः ॥ १० ॥

ज्ञानदर्शनचारित्रोपचारैश्च चतुर्विधः ।
कर्मणां विनयनतो, विनयो दशमं पुनः ॥ ११ ॥

इच्छामिथ्याकरणादियोगेष्वावश्यकेष्वलम् ।
अतीचारपरीहारो, यत्नादेकादशं तु तत् ॥ १२ ॥

अहिंसादिसमित्यादिमूलोत्तरगुणेषु या ।
प्रवृत्तिर्निरतीचारा, स्थानकं द्वादशं तु तत् ॥ १३ ॥

शुभध्यानस्य करणं, क्षणे क्षणे लवे लवे ।
प्रमादपरिहारेण, स्थानमेतत् त्रयोदशम् ॥ १४ ॥

अनाबाधेन मनसो, वपुषश्च निरन्तरम् ।
यथाशक्ति तपःकर्म, स्थानमेतच्चतुर्दशम् ॥ १५ ॥

अन्नादीनां संविभागो, यथाशक्ति तपस्विषु ।
मनोवाक्कायशुद्ध्या यः, स्थानं पञ्चदशं हि तत् ॥ १६ ॥

आचार्यादीनां दशानां, भक्तपानाऽऽसनादिभिः ।
वैयावृत्यस्य करणं, स्थानकं षोडशं तु तत् ॥ १७ ॥

चतुर्विधस्य सङ्घस्य, सर्वापायनिषेधनात् ।
मनःसमाधिजननं, स्थानं सप्तदशं हि तत् ॥ १८ ॥

सूत्रस्याऽर्थस्योभयस्याऽप्यपूर्वस्य प्रयत्नतः ।
अन्वहं यदुपादानं स्थानमष्टादशं तु तत् ॥ १९ ॥

श्रद्धानेनोद्भासनेनाऽवर्णवादच्छिदादिना ।
श्रुतज्ञानस्य भक्तिस्तत्, स्थानमेकोनविंशकम् ॥ २० ॥

विद्यानिमित्तकवितावादधर्मकथादिभिः ।
प्रभावना शासनस्य, तद् विंशतितमं पुनः ॥ २१ ॥

## ॥ द्वादशारककालचक्रस्य स्वरूपम् ॥

भारतेषु च वर्षेषु, पञ्चस्वैरवतेष्विव ।
द्वादशारं कालचक्रं, हेतुः कालव्यवस्थितेः ॥ १ ॥

कालो द्विविधोऽवसर्पिण्युत्सर्पिणीविभेदतः ।
अराः षडवसर्पिण्यां, एकान्तसुषमादयः ॥ २ ॥

तत्रैकान्तः सुषमारश्चतस्त्रः कोटिकोटयः ।
सागराणां सुषमा तु, तिस्रस्तत्कोटिकोटयः ॥ ३ ॥

सुषमदुःषमा ते द्वे, दुःषमसुषमा पुनः ।
सैका सहस्त्रैर्वर्षाणां, द्विचत्वारिंशतोनिता ॥ ४ ॥

एकविंशतिरब्दानां, सहस्राणि तु दुःषमा ।
एकान्तदुःषमाऽपि स्यात्, तावद्वर्षप्रमाणिका ॥ ५ ॥

अरका अवसर्पिण्यां, य एते समुदीरिताः ।
उत्सर्पिण्यां त एव स्युः, प्रतिलोमक्रमेण तु ॥ ६ ॥

तदेवमवसर्पिण्यामुत्सर्पिण्यां च मीलिताः ।
सागरोपमकोटीनां, कोटयः खलु विंशतिः ॥ ७ ॥

तत्राऽरे प्रथमे मर्त्याः, पल्यत्रितयजीविनः ।
गव्यूतत्रितयोच्छ्रायाश्चतुर्थदिनभोजिनः ॥ ८ ॥

चतुरस्रसुसंस्थानाः, सर्वलक्षणलक्षिताः ।
वज्रऋषभनाराचसंहननाः सदासुखाः ॥ ९ ॥

अपक्रोधा गतमाना, निर्माया लोभवर्जिताः ।
सर्ववारं स्वभावेनाऽप्यधर्मपरिहारिणः ॥ १० ॥

प्रायच्छंस्तत्र तेषां तु, वाञ्छितानि दिवानिशम् ।
मद्याङ्गाद्याः कल्पवृक्षा, दशोत्तरकुरुष्विव ॥ ११ ॥

स्वादुमद्यानि मद्याङ्गा, ददुः सद्योऽपि याचिताः ।
भाजनादीनि भृङ्गाश्च, तद्भाण्डागारिका इव ॥ १२ ॥

तेनुस्तूर्याङ्गास्तूर्याणि, तूर्यत्रयकराणि तु ।
उद्द्योतमसमं दीपशिखा ज्योतिषिका अपि ॥ १३ ॥

विचित्रार्णि तु चित्राङ्गा, माल्यानि समढौकयन् ।
सूदा इव चित्ररसा, भोज्यानि विविधानि तु ॥ १४ ॥

यथेच्छमर्पयामासुर्मण्यङ्गा भूषणानि तु ।
गेहाकाराः सुगेहानि, गन्धर्वपुरवत् क्षणात् ॥ १५ ॥

अभग्नेच्छमनग्नास्तु, वासांसि समपादयन् ।
एते प्रत्येकमन्यानप्यर्थान् ददुरनेकशः ॥ १६ ॥

तदा च भूमयस्तत्र, स्वादवः शर्करा इव ।
सदा माधुर्यधुर्याणि, धुन्यादिषु पयांस्यपि ॥ १७ ॥

अतिक्रामत्यरे तत्र, त्वायुःसंहननादिकम् ।
कल्पद्रुमप्रभावाश्च, न्यूनं न्यूनं शनैः शनैः ॥ १८ ॥

द्वितीये त्वरके मर्त्याः, पल्यद्वितयजीविनः ।
गव्यूतद्वितयोच्छ्रयास्तृतीयदिनभोजिनः ॥ १९ ॥

किञ्चिन्न्यूनप्रभावाश्च, तत्र कल्पमहीरुहः ।
किञ्चिन्माधुर्यतो हीना, आपो भूशर्करा अपि ॥ २० ॥

अस्मिन्नप्यरके कालात्, पूर्वारक इवाऽखिलम् ।
न्यूनन्यूनतरं स्थौल्यं, स्तम्बेरमकरे यथा ॥ २१ ॥

अरके तु तृतीयस्मिन्नेकपल्यायुषो नराः ।
एकगव्यूतकोच्छ्राया, द्वितीयदिनभोजिनः ॥ २२ ॥

अस्मिन्नप्यरके प्राग्वत्, क्रामति न्यूनमेव हि ।
वपुरायुर्भूमाधुर्यं, कल्पद्रुमहिमाऽपि च ॥ २३ ॥

पूर्वप्रभावरहिते, चतुर्थे त्वरके नराः ।
पूर्वकोट्यायुषः पञ्चधनुःशतसमुच्छ्रयाः ॥ २४ ॥

पञ्चमे तु वर्षशतायुषः सप्तकरोच्छ्रयाः ।
षष्ठे पुनः षोडशाब्दायुषो हस्तसमुच्छ्रयाः ॥ २५ ॥

एकान्तदुःखप्रचिता, उत्सर्पिण्यामपीदृशाः ।
पश्चानुपूर्व्या विज्ञेया, अरेषु किल षट्स्वपि ॥ २६ ॥

## ॥ संसारस्वरूपम् ॥

भूयोऽप्यचिन्तयदिदं, विगलन्मोहबन्धनः ।
धिगेष विषयाक्रान्तो, वेत्ति नाऽऽत्महितं जनः ॥ १ ॥

अहो ! संसारकूपेऽस्मिन्, जीवाः कुर्वन्ति कर्मभिः ।
अरघट्टघटीन्यायेनैहिरेयाहिरक्रियाम् ॥ २ ॥

धिग् धिग् मोहान्धमनसां, जन्मिनां जन्म गच्छति ।
सर्वथाऽपि मुधैवेदं, सुप्तानामिव शर्वरी ॥ ३ ॥

एते रागद्वेषमोहा, उद्यन्तमपि देहिनाम् ।
मूलाद् धर्मं निकृन्तन्ति, मूषिका इव पादपम् ॥ ४ ॥

अहो ! विवर्ध्यते मुग्धैः, क्रोधो न्यग्रोधवृक्षवत् ।
अपि वर्द्धयितारं स्वं, यो भक्षयति मूलतः ॥ ५ ॥

न किञ्चिन्मानवा मानाधिरूढा गणयन्त्यमी ।
मर्यादालङ्घिनो हस्त्यारूढा हस्तिपका इव ॥ ६ ॥

कपिकच्छूबीजकोशीमिव मायां दुराशयाः ।
उपतापकरीं नित्यं, न त्यजन्ति शरीरिणः ॥ ७ ॥

दुग्धं तुषोदकेनेवाऽञ्जनेनेव सितांशुकम् ।
निर्मलोऽपि गुणग्रामो, लोभेनैकेन दूष्यते ॥ ८ ॥

कषाया भवकारायां, चत्वारो यामिका इव ।
यावज्जाग्रति पार्श्वस्थास्तावन्मोक्षः कुतो नृणाम् ? ॥ ९ ॥

अङ्गनालिङ्गनव्यग्रा, भूताता इव देहिनः ।
समन्ततः क्षीयमाणमप्यात्मानं न जानते ॥ १० ॥

तत्तत्प्रकारैराहारैरात्मनोन्माद आत्मनः ।
उत्पाद्यतेऽनर्थकृते, सिंहारोग्यमिवौषधैः ॥ ११ ॥

सुगन्धीदं सुगन्धीदं किं श्रयामीति लम्पटः ? ।
मूढो भ्रमरवद् भ्राम्यन्न जातु लभते रतिम् ॥ १२ ॥

आपातरमणीयैर्धिग्, रमणीप्रायवस्तुभिः ।
प्रतारयति लोकः स्वं, बालं क्रीडनकैरिव ॥ १३ ॥

वेणुवीणादिनादेषु, दत्तकर्णो निरन्तरम् ।
स्वार्थाद् भ्रश्यति निद्रालुरिव शास्त्रानुचिन्तनात् ॥ १४ ॥

युगपद् विषयैरेभिर्वातपित्तकफैरिव ।
लुप्यते प्रबलीभूतैश्चैतन्यं धिक् शरीरिणाम् ॥ १५ ॥

एवं संसारवैराग्यचिन्तासन्ततितन्तुभिः ।
निःस्यूतमानसो यावद्, बभूव परमेश्वरः ॥ १६ ॥

## ॥ प्रथमजिनदेशना ॥

आधिव्याधिजरामृत्युज्वालाशतसमाकुलः ।
प्रदीप्तागारकल्पोऽयं, संसारः सर्वदेहिनाम् ॥ १ ॥

न युज्यते तद् विदुषः, प्रमादोऽत्र मनागपि ।
कः प्रमाद्यति बालोऽपि, निशोल्लङ्घ्ये मरुस्थले ? ॥ २ ॥

संसाराब्धाविहाऽनेकयोन्यावर्त्ताकुले जनैः ।
दुर्लभं मानुषं जन्म, महारत्नमिवोत्तमम् ॥ ३ ॥

परलोकसाधनेन, मानुष्यमपि देहिनाम् ।
पादपो दोहदेनेव, सफलीभवति ध्रुवम् ॥ ४॥

आपातमात्रमधुराः, परिणामेऽतिदारुणाः ।
शठवाच इवाऽत्यन्तं, विषया विश्ववञ्चकाः ॥ ५॥

पदार्थानामशेषाणां, संसारोदरवर्तिनाम् ।
संयोगा विप्रयोगान्ताः, पतनान्ता इवोच्छ्रयाः ॥ ६॥

आयुर्धनं यौवनं च, स्पर्द्धयेव परस्परम् ।
सत्वरं गत्वराण्येव, संसारेऽस्मिन् शरीरिणाम् ॥ ७॥

संसारस्याऽस्य गतिषु, चतसृष्वपि जातुचित् ।
नाऽस्त्येव सुखलेशोऽपि, स्वादु नीरं मराविव ॥ ८॥

तथाहि क्षेत्रदोषेण, परमाधार्मिकैरपि ।
मिथश्चाऽऽ क्लिश्यमानानां, नारकाणां कुतः सुखम् ? ॥ ९॥

शीतवातातपाम्भोभिर्वधबन्धक्षुदादिभिः ।
विविधं बाध्यमानानां, तिरश्चामपि किं सुखम् ? ॥ १०॥

गर्भवासजनिव्याधिजरादारिद्र्यमृत्युजैः ।
क्रोडीकृतानामसुखैर्मनुष्याणां कुतः सुखम् ? ॥ ११॥

अन्योऽन्यमत्सरामर्षकलहच्यवनाऽसुखैः ।
सुखलेशोऽपि नैवाऽस्ति, कदाचिद् द्युसदामपि ॥ १२॥

अज्ञानाज्जन्मिनो भूयो, भूयः संसारसम्मुखम् ।
तथापि परिसर्पन्ति, नीचाभिमुखमम्बुवत् ॥ १३॥

तद् भव्याश्चेतनावन्तो, निजेनाऽनेन जन्मना ।
मा पोषयत संसारं, दुग्धेनेव भुजङ्गमम् ॥ १४॥

संसारवासजं दुःखं, विचार्य तदनेकधा ।
सर्वात्मनाऽपि मोक्षाय, यतध्वं हे विवेकिनः ! ॥ १५॥

गर्भवासभवं दुःखं, नरकाऽसुखसन्निभम् ।
संसारवन्न मोक्षेऽस्ति, जीवानां हन्त ! जातुचित् ॥ १६ ॥

घटीमध्याकृष्यमाणनारकार्तिसहोदरा ।
नेह प्रसवजन्माऽपि, जायते जातु वेदना ॥ १७ ॥

बहिरन्तः परिक्षिप्तशल्यतुल्या भवन्ति च ।
नाऽऽधयो व्याधयो नाऽपि, तत्र बाधानिबन्धनम् ॥ १८ ॥

अग्रदूती कृतान्तस्य, तेजःसर्वस्वतस्करी ।
पराधीनत्वजननी, न जरा तत्र सर्वथा ॥ १९ ॥

सञ्जायते नारकिकतिर्यग्नृद्युसदामिव ।
न तत्र मरणं भूयो, भवभ्रमणकारणम् ॥ २० ॥

किन्तु तत्र महानन्दं, सुखमद्वैतमव्ययम् ।
रूपं च शाश्वतं ज्योतिः, केवलालोकभास्करम् ॥ २१ ॥

स च सम्प्राप्यते मोक्षः, शीलयद्भिर्निरन्तरम् ।
ज्ञानदर्शनचारित्ररत्नत्रितयमुज्ज्वलम् ॥ २२ ॥

तत्र जीवादितत्त्वानां, सङ्क्षेपाद् विस्तरादपि ।
यथावदवबोधो यः, सम्यग्ज्ञानं तदुच्यते ॥ २३ ॥

मतिश्रुताऽवधिमनःपर्यायैः केवलेन च ।
अमीभिः सान्वयैर्भेदैस्तत् तु पञ्चविधं मतम् ॥ २४ ॥

अवग्रहादिभिर्भिन्नं, बह्वाद्यैरितरैरपि ।
इन्द्रियाऽनिन्द्रियभवं, मतिज्ञानमुदीरितम् ॥ २५ ॥

विस्तृतं बहुधा पूर्वैरङ्गोपाङ्गैः प्रकीर्णकैः ।
स्याच्छब्दलाञ्छितं ज्ञेयं, श्रुतज्ञानमनेकधा ॥ २६ ॥

देवनैरयिकाणां, स्यादवधिर्भवसम्भवः ।
षड्विकल्पस्तु शेषाणां, क्षयोपशमलक्षणः ॥ २७ ॥

ऋजुर्विपुल इत्येवं, स्यान्मनःपर्ययो द्विधा ।
विशुद्ध्यप्रतिपाताभ्यां, तद्विशेषोऽवगम्यताम् ॥ २८ ॥

अशेषद्रव्यपर्यायविषयं विश्वलोचनम् ।
अनन्तमेकमत्यक्षं, केवलज्ञानमुच्यते ॥ २९ ॥

रुचिः श्रुतोक्ततत्त्वेषु, सम्यक्श्रद्धानमुच्यते ।
जायते तन्निसर्गेण, गुरोरधिगमेन वा ॥ ३० ॥

तथाह्यनाद्यन्तभवावर्त्तवर्तिषु देहिषु ।
ज्ञानदृष्ट्यावृतिवेद्यान्तरायाभिधकर्मणाम् ॥ ३१ ॥

सागरोपमकोटीनां, कोट्यस्त्रिंशत् परा स्थितिः ।
विंशतिर्गोत्रनाम्नोश्च, मोहनीयस्य सप्ततिः ॥ ३२ ॥

ततो गिरिसरिद्ग्रावघोलनान्यायतः स्वयम् ।
क्षीयन्ते सर्वकर्माणि, फलानुभवतः क्रमात् ॥ ३३ ॥

एकोनत्रिंशदेकोनविंशत्येकोनसप्ततीः ।
सागराणां कोटिकोटीः, स्थितिमुन्मूल्य कर्मणाम् ॥ ३४ ॥

देशोनैकावशिष्टाब्धिकोटिकोटौ तु जन्मिनः ।
यथाप्रवृत्तिकरणाद्, ग्रन्थिदेशं समिप्रति ॥ ३५ ॥

रागद्वेषपरीणामो, दुर्भेदो ग्रन्थिरुच्यते ।
दुरुच्छेदो दृढतरः, काष्ठादेरिव सर्वदा ॥ ३६ ॥

तीराभ्यर्णान्महापोता, इव वातसमाहताः ।
रागादिप्रेरिताः केऽपि, व्यावर्त्तन्ते ततः पुनः ॥ ३७ ॥

तत्रैव तत्परीणामविशेषादासतेऽपरे ।
स्थलस्खलितगमनान्यम्भांसि सरितामिव ॥ ३८ ॥

अपरे ये पुनर्भव्या, भाविभद्राः शरीरिणः ।
आविष्कृत्य परं वीर्यमपूर्वकरणेन ते ॥ ३९ ॥

अतिक्रामन्ति सहसा, तं ग्रन्थिं दुरतिक्रमम् ।
अतिक्रान्तमहाध्वानो, घट्टभूमिमिवाऽध्वगाः ॥ ४० ॥

अथाऽनिवृत्तिकरणादन्तरकरणे कृते ।
मिथ्यात्वं विरलीकृत्य, चतुर्गतिकजन्तवः ॥ ४१ ॥

आन्तर्मुहूर्त्तिकं सम्यग्दर्शनं प्राप्नुवन्ति यत् ।
निसर्गहेतुकमिदं, सम्यक् श्रद्धानमुच्यते ॥ ४२ ॥

गुरूपदेशमालम्ब्य, भव्यानामिह देहिनाम् ।
सम्यक्श्रद्धानं तु यत् तद्, भवेदधिगमोद्भवम् ॥ ४३ ॥

तच्च स्यादौपशमिकं, सास्वादनमथाऽपरम् ।
क्षायोपशमिकं वेद्यं, क्षायिकं चेति पञ्चधा ॥ ४४ ॥

तत्रौपशमिकं भिन्नकर्मग्रन्थेः शरीरिणः ।
सम्यक्त्वलाभे प्रथमेऽन्तर्मुहूर्त्तं प्रजायते ॥ ४५ ॥

तथोपशान्तमोहस्योपशमश्रेणियोगतः ।
मोहोपशमजमौपशमिकं तु द्वितीयकम् ॥ ४६ ॥

त्यक्तसम्यक्त्वभावस्य, मिथ्यात्वाभिमुखस्य च ।
तथाऽभ्युदीर्णानन्तानुबन्धिकस्य शरीरिणः ॥ ४७ ॥

यः सम्यक्त्वपरीणाम उत्कर्षेण षडावलिः ।
जघन्येनैकसमयस्तत् सास्वादनमीरितम् ॥ ४८ ॥

अथ तृतीयं मिथ्यात्वमोहक्षयशमोद्भवम् ।
सम्यक्त्वपुद्गलोदयपरिणामवतो भवेत् ॥ ४९ ॥

वेदकं नाम सम्यक्त्वं, क्षपकश्रेणिमीयुषः ।
अनन्तानुबन्धिनां तु, क्षये जाते शरीरिणः ॥ ५० ॥

मिथ्यात्वस्याऽथ मिश्रस्य, सम्यग्जाते परिक्षये ।
क्षायिकसम्मुखीनस्य, सम्यक्त्वाऽन्त्यांशभोगिनः ॥ ५१ ॥

शुभभावस्य प्रक्षीणसप्तकस्य शरीरिणः ।
सम्यक्त्वं क्षायिकं नाम, पञ्चमं जायते पुनः ॥ ५२ ॥

सम्यग्दर्शनमेतच्च, गुणतस्त्रिविधं भवेत् ।
रोचकं दीपकं चैव, कारकं चेति नामतः ॥ ५३ ॥

तत्र श्रुतोक्ततत्त्वेषु, हेतूदाहरणैर्विना ।
दृढा या प्रत्ययोत्पत्तिस्तद् रोचकमुदीरितम् ॥ ५४ ॥

दीपकं तद् यदन्येषामपि सम्यक्त्वदीपकम् ।
कारकं संयमतपःप्रभृतीनां तु कारकम् ॥ ५५ ॥

शम-संवेग-निर्वेदा-ऽनुकम्पा-ऽऽस्तिक्यलक्षणैः ।
लक्षणैः पञ्चभिः सम्यक्, सम्यक्त्वं तत् तु लक्ष्यते ॥ ५६ ॥

अनन्तानुबन्धिकषायाणामनुदयः शमः ।
स प्रकृत्या कषायाणां, विपाकेक्षणतोऽपि वा ॥ ५७ ॥

ध्यायतः कर्मविपाकं, संसारासारतामपि ।
यत् स्याद् विषयवैराग्यं, स संवेग इतीरितः ॥ ५८ ॥

संसारवासः कारैव, बन्धनान्येव बन्धवः ।
ससंवेगस्य चिन्तेयं, या निर्वेदः स उच्यते ॥ ५९ ॥

एकेन्द्रियप्रभृतीनां, सर्वेषामपि देहिनाम् ।
भवाब्धौ मज्जतां क्लेशं, पश्यतो हृदयार्द्रता ॥ ६० ॥

तद्दुःखैर्दुःखितत्वं च, तत्प्रतीकारहेतुषु ।
यथाशक्ति प्रवृत्तिश्चेत्यनुकम्पाऽभिधीयते ॥ ६१ ॥

तत्त्वान्तराकर्णनेऽपि, या तत्त्वेष्वार्हतेषु तु ।
प्रतिपत्तिर्निराकाङ्क्षा, तदास्तिक्यमुदीरितम् ॥ ६२ ॥

सम्यग्दर्शनमित्युक्तं, प्रासावस्य क्षणादपि ।
मत्यज्ञानं पुराऽभूद् यत्, तन्मतिज्ञानतां व्रजेत् ॥ ६३ ॥

जन्मिनो यच्छ्रुताऽज्ञानं, तच्छ्रुतज्ञानतां भजेत् ।
विभङ्गज्ञानमवधिज्ञानभावं च गच्छति ॥ ६४ ॥

सर्वसावद्ययोगानां, त्यागश्चारित्रमिष्यते ।
कीर्त्तितं तदहिंसादिव्रतभेदेन पञ्चधा ॥ ६५ ॥

अहिंसा-सूनृता-ऽस्तेय-ब्रह्मचर्या-ऽपरिग्रहाः ।
पञ्चभिः पञ्चभिर्युक्ता भावनाभिर्विमुक्तये ॥ ६६ ॥

न यत् प्रमादयोगेन, जीवितव्यपरोपणम् ।
त्रसानां स्थावराणां च, तदहिंसाव्रतं मतम् ॥ ६७ ॥

प्रियं पथ्यं वचस्तथ्यं, सूनृतव्रतमुच्यते ।
तत् तथ्यमपि नो तथ्यमप्रियं चाऽहितं च यत् ॥ ६८ ॥

अनादानमदत्तस्याऽस्तेयव्रतमुदीरितम् ।
बाह्याः प्राणा नृणामर्थो, हरता तं हता हि ते ॥ ६९ ॥

दिव्यौदारिककामानां, कृताऽनुमतकारितैः ।
मनोवाक्कायतस्त्यागो, ब्रह्माऽष्टादशधोदितम् ॥ ७० ॥

सर्वभावेषु मूर्च्छायास्त्यागः स्यादपरिग्रहः ।
यदसत्स्वपि जायेत, मूर्च्छया चित्तविप्लवः ॥ ७१ ॥

सर्वात्मना यतीन्द्राणामेतच्चारित्रमीरितम् ।
यतिधर्मानुरक्तानां, देशतः स्यादगारिणाम् ॥ ७२ ॥

सम्यक्त्वमूलानि पञ्चाऽणुव्रतानि गुणास्त्रयः ।
शिक्षापदानि चत्वारि, व्रतानि गृहमेधिनाम् ॥ ७३ ॥

पङ्गुकुष्ठिकुणित्वादि, दृष्ट्वा हिंसाफलं सुधीः ।
निरागस्त्रसजन्तूनां, हिंसां सङ्कल्पतस्त्यजेत् ॥ ७४ ॥

मन्मनत्वं काहलत्वं, मूकत्वं मुखरोगिताम् ।
वीक्ष्याऽसत्यफलं कन्यालीकाद्यसत्यमुत्सृजेत् ॥ ७५ ॥

कन्यागोभूम्यलीकानि, न्यासापहरणं तथा ।
कूटसाक्ष्यं च पञ्चेति, स्थूलासत्यानि सन्त्यजेत् ॥ ७६ ॥

दौर्भाग्यं प्रेष्यतां दास्यमङ्गच्छेदं दरिद्रताम् ।
अदत्तात्तफलं ज्ञात्वा, स्थूलस्तेयं विवर्जयेत् ॥ ७७ ॥

षण्ढत्वमिन्द्रियच्छेदं, वीक्ष्याऽब्रह्मफलं सुधीः ।
भवेत् स्वदारसन्तुष्टोऽन्यदारान् वा विवर्जयेत् ॥ ७८ ॥

असन्तोषमविश्वासमारम्भं दुःखकारणम् ।
मत्वा मूर्च्छाफलं कुर्यात्, परिग्रहनियन्त्रणम् ॥ ७९ ॥

दशस्वपि कृता दिक्षु, यत्र सीमा न लङ्घ्यते ।
ख्यातं दिग्विरतिरिति, प्रथमं तद् गुणव्रतम् ॥ ८० ॥

भोगोपभोगयोः सङ्ख्या, शक्त्या यत्र विधीयते ।
भोगोपभोगमानं तद्, द्वैतीयीकं गुणव्रतम् ॥ ८१ ॥

आर्त्तं रौद्रमपध्यानं, पापकर्मोपदेशिता ।
हिंसोपकारिदानं च, प्रमादाचरणं तथा ॥ ८२ ॥

शरीराद्यर्थदण्डस्य, प्रतिपक्षतया स्थितः ।
योऽनर्थदण्डस्तत्त्यागस्तृतीयं तु गुणव्रतम् ॥ ८३ ॥

त्यक्तार्त्तरौद्रध्यानस्य, त्यक्तसावद्यकर्मणः ।
मुहूर्त्तं समता या तां, विदुः सामायिकव्रतम् ॥ ८४ ॥

दिग्व्रते परिमाणं यत्, तस्य सङ्क्षेपणं पुनः ।
दिने रात्रौ च देशावकाशिकव्रतमुच्यते ॥ ८५ ॥

चतुष्पर्व्यां चतुर्थादि, कुव्यापारनिषेधनम् ।
ब्रह्मचर्यक्रिया स्नानादित्यागः पौषधव्रतम् ॥ ८६ ॥

दानं चतुर्विधाहारपात्राच्छादनसद्मनाम् ।
अतिथिभ्योऽतिथिसंविभागव्रतमुदीरितम् ॥ ८७ ॥

रत्नत्रयमिदं सम्यग्, यतिभिः श्रावकैरपि ।
उपासनीयं सततं, निर्वाणप्राप्तिहेतवे ॥ ८८ ॥

## ॥ विमलवाहननृपस्य भावना ॥

कृत्याकृत्यविदस्तस्य, सारासारं विविञ्चतः ।
अन्येद्युरेवमुत्पेदे, भववैराग्यवासना ॥ १ ॥

योनिलक्षमहावर्त्तनिपातक्लेशभीषणः ।
पारावार इवाऽपारः, संसारो धिगसावहो ! ॥ २ ॥

इहेन्द्रजालवत् स्वप्नजालवच्च भवे हहा ! ।
क्षणाद् दृष्टैः क्षणान्नष्टैरर्थैर्मुह्यन्ति जन्तवः ॥ ३ ॥

यौवनं पवनोद्धूतपताकाञ्चलचञ्चलम् ।
आयुः कुशाग्रविश्रान्तजलबिन्दुचलाचलम् ॥ ४ ॥

अमुष्याऽप्यायुषो गर्भवासे नरकवासवत् ।
अत्यन्तदुःखाद् गच्छन्ति, मासाः पल्योपमोपमाः ॥ ५ ॥

अथ जातस्य बालत्वेऽप्यायुर्भागः कियानपि ।
परप्रणेयस्य सतो, मुधाऽन्धस्येव गच्छति ॥ ६ ॥

इन्द्रियार्थरसस्वादुरसास्वादेन यौवने ।
मत्तस्येव वृथा गच्छत्यायुरंशः कियानपि ॥ ७ ॥

त्रिवर्गसाधनाशक्तवपुषश्च वपुष्मतः ।
आयुः शेषं वृथा याति, प्रसुप्तस्येव वार्द्धके ॥ ८ ॥

इत्थं विदन्नपि भवी, भवायैव विचेष्टते ।
कामं रोगीव रोगाय, विषयास्वादलम्पटः ॥ ९ ॥

यौवने विषयेभ्योऽसौ, यथा ह्युत्तिष्ठते भवी ।
तथोत्तिष्ठेत चेन्मुक्त्यै, किं हि न्यूनं तदा भवेत् ? ॥ १० ॥

स्वयङ्कृतैः कर्मपाशैः, स्वं भवी वेष्टयत्यहो ! ।
स्वलालातन्तुसन्तत्या, जालकार इव कृमिः ॥ ११ ॥

अम्भोधौ युगशमिलाप्रवेशन्यायतो भवे ।
कथञ्चिन्मानुषं जन्म, लभ्यते पुण्ययोगतः ॥ १२ ॥

तत्राऽपि चाऽऽर्यदेशेषु, जन्मिनो जन्म जायते ।
महतश्च कुलस्याऽऽप्तिः, सेवा गुरुकुलस्य च ॥ १३ ॥

इति प्राप्याऽपि सामग्रीं, शिवाय यतते न यः ।
सम्पन्नायां रसवत्यां, स तिष्ठति बुभुक्षितः ॥ १४ ॥

उभयोरपि चोर्ध्वाऽधोगत्योः स्वायत्तयोरिह ।
धावत्यधोमुखं प्रायो, जडधीर्जलवज्जनः ॥ १५ ॥

समये साधयिष्यामि, स्वार्थमित्याशयं वहन् ।
प्राप्यतेऽर्वाग् यमदूतैररण्ये तस्करैरिव ॥ १६ ॥

कृत्वाऽघमपि यान् पुष्येत्, तेषामुत्पश्यतामपि ।
अत्राणो रङ्कवज्जन्तुः, कृष्ट्वा कालेन नीयते ॥ १७ ॥

ततश्च नीतो नरके, लभतेऽनन्तवेदनाः ।
जन्मान्तरानुधावीनि, कर्माणि ऋणवन्नृणाम् ॥ १८ ॥

माताऽसौ मे पिता चाऽसौ, भ्राताऽसावङ्गभूरसौ ।
इति स्वबुद्धिर्मिथ्यैव, शरीरमपि न स्वकम् ॥ १९ ॥

एषां पृथक् पृथक् स्थानादेयुषामिह केवलम् ।
एकत्राऽवस्थितिः स्थाने, पक्षिणामिव पादपे ॥ २० ॥

ततोऽप्यन्यत्र गच्छन्ति, पृथक् स्थानेषु देहिनः ।
नक्तमेकत्र शयिताः, पान्था इव निशात्यये ॥ २१ ॥

अरघट्टघटीन्यायेनैहिरेयाहिरामिह ।
कुर्वतां देहिनां हन्त !, कः स्वकः ? कः परोऽथवा ? ॥ २२ ॥

तत् त्यक्तव्यं कुटुम्बादि, त्यक्तव्यं पुरतोऽप्यदः ।
स्वार्थायैव यतितव्यं, स्वार्थभ्रंशो हि मूर्खता ॥ २३ ॥

एकान्तानन्तसुखदः, स्वार्थो निर्वाणलक्षणः ।
मूलोत्तरगुणैः स स्यात्, प्रकाशोऽर्ककरैरिव ॥ २४ ॥

इति चिन्तयतो राज्ञश्चिन्तामणिरिव स्वयम् ।
श्रीमानरिन्दमो नामोद्याने सूरिः समाययौ ॥ २५ ॥

तदागमनवार्तां च, समाकर्ण्य महीपतिः ।
पीतपीयूषगण्डूष इव हर्षं समासदत् ॥ २६ ॥

तं वन्दितुमथाऽऽनन्दादचालीदचलापतिः ।
मायूरपत्रातपत्रैः, कुर्वन् साब्दमिवाऽम्बरम् ॥ २७ ॥

लक्ष्मीदेव्या निपतद्भ्यां, कटाक्षाभ्यामिवोच्चकैः ।
स्पृश्यमानश्चामराभ्यामुभयोरपि पार्श्वयोः ॥ २८ ॥

तुरङ्गैः स्वर्णसन्नाहैः, स्वर्णपक्षैः खगैरिव ।
वेगिभिर्विजितश्वासै, रुन्धानः ककुभोऽखिलाः ॥ २९ ॥

अञ्जनाचलचूलाभिर्जङ्गमाभिरिवाऽभितः ।
महास्तम्बेरमैर्भारान्न्यञ्चयन्नवनीतलम् ॥ ३० ॥

स्वयं समन्तात् सामन्तैर्भक्तितः परिवारितः ।
निजस्वामिमनोज्ञानान्मनःपर्ययिकैरिव ॥ ३१ ॥

बन्दिकोलाहलस्पर्द्धादिव प्रसृमरैर्दिवि ।
नादैर्मङ्गलतूर्याणां, दूरात् पिशुनितागमः ॥ ३२ ॥

करेणुकाधिरूढाभिर्वारस्त्रीभिः सहस्रशः ।
शृङ्गाररसवापीभिः, परितः परिवारितः ॥ ३३ ॥

सिन्धुरस्कन्धमारूढश्छायाकुलनिकेतनम् ।
उद्यानं नन्दनप्रायं, प्राप तद् भूमिवासवः ॥ ३४ ॥

उत्तीर्य कुञ्जरस्कन्धादवनीपतिकुञ्जरः ।
प्रविवेश तदुद्यानं, सिंहो गिरिगुहामिव ॥ ३५ ॥

वज्रसंवर्मितमिवाऽभेद्यं मन्मथपत्रिणाम् ।
रागरोगागदङ्कारं, द्वेषद्वेषिद्विषन्तपम् ॥ ३६ ॥

क्रोधानलनवाम्भोदं, मानद्रुममहागजम् ।
मायोरगीगरुत्मन्तं, लोभशैलमहाशनिम् ॥ ३७ ॥

मोहान्धकारतरणिं, तपस्तेजोऽनलारणिम् ।
क्षमासर्वस्वधरणिं, बोधिबीजाम्बुसारणिम् ॥ ३८ ॥

आराममिव धर्मद्रोरात्मारामं महामुनिम् ।
आरादरिन्दमाचार्यमद्राक्षीत् तत्र पार्थिवः ॥ ३९ ॥

कांश्चिदुत्कटिकासीनान्, कांश्चित् पद्मासनस्थितान् ।
गोदोहिकासनान् कांश्चित्, कांश्चिद् वीरासनासितान् ॥ ४० ॥

वज्रासनजुषः कांश्चित्, कांश्चिद् भद्रासनस्थितान् ।
कांश्चिद् दण्डासनासीनान्, कांश्चिद् वल्गुलिकासनान् ॥ ४१ ॥

कांश्चित् क्रौञ्चनिषदनान् कांश्चिद्धंसासनस्थितान् ।
पर्यङ्कासनिनः कांश्चित्, काश्चिदुष्ट्रासनस्थितान् ॥ ४२ ॥

कांश्चित् तार्क्ष्यासनान् कांश्चित्, कपालीकरणस्थितान् ।
आम्रकुब्जासनान् कांश्चित्, कांश्चन स्वस्तिकासनान् ॥ ४३ ॥

दण्डपद्मासनान् कांश्चित्, कांश्चित् सोपाश्रयासनान् ।
कायोत्सर्गस्थितान् कांश्चित्, कांश्चिदुक्षासनस्थितान् ॥ ४४ ॥

निरपेक्षान् शरीरेऽपि, निर्व्यूढस्वप्रतिश्रवान् ।
विविधेषूपसर्गेषु, समरेषु भटानिव ॥ ४५ ॥

अन्तरङ्गानरीन् जिष्णून्, सहिष्णूंश्च परीषहान् ।
तपोध्यानैरलम्भूष्णून्, साधूनपि ददर्श सः ॥ ४६ ॥

उपेत्याऽरिन्दमाचार्यान्, ववन्दे मेदिनीपतिः ।
बिभ्राणः पुलकव्याजाद्, भक्तिमङ्कुरितामिव ॥ ४७ ॥

सूरिवर्योऽप्युपमुखं, विन्यस्तमुखवस्त्रिकः ।
धर्मलाभाशिषमदात्, सर्वकल्याणमातरम् ॥ ४८ ॥

नरेश्वरोऽपि विनयात्, तनुं सङ्कोच्य कूर्मवत् ।
अवग्रहभुवं मुक्त्वा, निषसाद कृताञ्जलिः ॥ ४९ ॥

शुश्राव देशनां तस्मादाचार्यादवनीपतिः ।
एकतानमनास्तीर्थकराद्दिव पुरन्दरः ॥ ५० ॥

राज्ञस्तद्भववैराग्यं, धर्मदेशनया तया ।
व्यशिष्यताऽवदातत्वं, शरदेव हिमद्युतेः ॥ ५१ ॥

## ॥ सूरेर्वैराग्यकारणम् ॥

अहं हि गृहवासस्थः, पुरा दिग्जयहेतवे ।
हस्त्यश्व-रथ-पादातिचमूभिः सहितोऽचलम् ॥ १ ॥

मार्गान्तराले सततस्निग्धच्छायामनोरमम् ।
जगद्भ्रमणखिन्नाय, विश्रामौक इव श्रियः ॥ २ ॥

नृत्यन्तमिव कङ्केल्लिलोलपल्लवपाणिभिः ।
हसन्तमिव विहसन्मल्लिकास्तबकोत्करैः ॥ ३ ॥

रोमाञ्चितमिवोदञ्चत्कदम्बकुसुमोच्चयैः ।
वीक्ष्यमाणमिव स्मेरकेतकीकुसुमेक्षणैः ॥ ४ ॥

सन्तापिनस्तपनांशून्, दूरादापततोऽपि हि ।
साल-तालद्रुमभुजैर्निषेधन्तमिवोच्छ्रितैः ॥ ५ ॥

दत्तगुप्यद्गृहमिवाऽध्वगार्थं वटपादपैः ।
सज्जीकृतपाद्यमिव, सारणीभिः पदे पदे ॥ ६ ॥

शृङ्खलिताम्भोदमिव, महद्भिररघट्टकैः ।
गुञ्जन्मधुकरारावैराह्वयन्तमिवाऽध्वगान् ॥ ७ ॥

तमाल-ताल-हिन्ताल-चन्दनैर्मध्यवर्त्तिभिः ।
दिवाकरकरत्रासात्, तिमिरैरिव सेवितम् ॥ ८ ॥

चूत-चम्पक-पुन्नाग-नाग-केसरकेसरैः ।
जगत्येकातपत्रत्वं, तन्वानं सौरभश्रियः ॥ ९ ॥

ताम्बूली-लवली-द्राक्षावितानैरतिसन्ततैः ।
पान्थयूनां विना यत्नं , तन्वन्तं रतिमण्डपान् ॥ १० ॥

भद्रशालमिवाऽऽयातं, मेरुशैलतलावनेः ।
भृशाभिराममारामं, तदाऽद्राक्षमहं व्रजन् ॥ ११ ॥

चिरेण दिग्जयं कृत्वा, निवृत्तः पुनरप्यहम् ।
आरामस्याऽन्तिके तस्य, सह चम्वा समागमम् ॥ १२ ॥

उत्तीर्य वाहनेभ्योऽहं, कौतुकात् सपरिच्छदः ।
तदन्तः प्रविशन्नन्यादृक्षमद्राक्षमग्रतः ॥ १३ ॥

इति चाऽचिन्तयमहं, भ्रान्तोऽन्यत्र किमागमम् ? ।
इदं किं वा परावृत्तमिन्द्रजालमथेदृशम् ? ॥ १४ ॥

यत् क्व पत्रलता साऽर्ककरप्रसरवारणी ? ।
क्व वाऽसावातपस्यैकातपत्रत्वमपत्रता ॥ १५ ॥

क्व सा कुञ्जेषु विश्रान्तरमणीरमणीयता ? ।
निद्रायमाणाजगरदारुणत्वमिदं क्व च ? ॥ १६ ॥

कलापिकलकण्ठादिमधुरालापिता क्व सा ? ।
विलोलकाकोलकुलरोलव्याकुलता क्व च ? ॥ १७ ॥

प्रलम्बलम्बमानार्द्रशिम्बीबहलता क्व सा ? ।
क्व चैषा शुष्कशाखाग्रदोलायितभुजङ्गता ॥ १८ ॥

क्व च सा कुसुमामोदसुरभीकृतदिक्कता ? ।
चिल्ली-कपोत-ध्वाङ्क्षादिविष्ठादुर्गन्धता क्व च ? ॥ १९ ॥

प्रसूनरसनिस्यन्दस्तिमितावनिता क्व सा ? ।
क्व ज्वलद्भ्राष्ट्रसिकतातुल्यसन्तापपांसुता ? ॥ २० ॥

फलप्राग्भारभारावनम्रपादपता क्व सा ? ।
मूलोपदेहिकाग्रस्तपतितद्रुमता क्व च ? ॥ २१ ॥

अनेकवल्लीवलयलटभा वृतयः क्व ताः ? ।
क्व चैताः सर्पनिर्मुक्तास्तोकनिर्मोकदारुणाः ? ॥ २२ ॥

तले तरूणां प्रचुरः, प्रसूनप्रकरः क्व सः ? ।
उद्भूतस्थलशृङ्गाटकण्टका उत्कटाः क्व च ? ॥ २३ ॥

मन्ये यथाऽयमारामो जज्ञे सम्प्रत्यतादृशः ।
तथा संसारिणः सर्वे, संसारस्थितिरीदृशी ॥ २४ ॥

सौन्दर्येण स्वकीयेन, य एव मदनायते ।
ग्रस्तो रोगेण घोरेण, कङ्कालति स एव हि ॥ २५ ॥

य एव छेकताभाजा, वाचा वाचस्पतीयते ।
कालान्मुहुःस्खलज्जिह्वः, सोऽपि मूकायतेतराम् ॥ २६ ॥

चारुचङ्क्रमणशक्त्या, यो जात्यतुरगायते ।
वातादिभग्नगमनः, पङ्गूयते स एव हि ॥ २७ ॥

हस्तेनौजायमानेन, हस्तिमल्लायते च यः ।
रोगाद्यक्षमहस्तत्वात्, स एव हि कुणीयते ॥ २८ ॥

दूरदर्शनशक्त्या च, गृध्रायेत य एव हि ।
पुरोऽपि दर्शनाशक्तेरन्धायेत स एव हि ॥ २९ ॥

क्षणाद् रम्यमरम्यं च, क्षणाच्च क्षममक्षमम् ।
क्षणाद् दृष्टमदृष्टं च, प्राणिनां वपुरप्यहो ! ॥ ३० ॥

इति चिन्तयतो धाराधिरूढमभवत् तदा ।
मम संसारवैराग्यं, जपतो मन्त्रशक्तिवत् ॥ ३१ ॥

महामुनीनामभ्यर्णे, कर्मकक्षहुताशनम् ।
निर्वाणचिन्तामाणिक्यं, ततोऽहं व्रतमात्तवान् ॥ ३२ ॥

## ॥ अरिन्दमसूरेर्देशना ॥

मानुष्यकेऽपि सम्प्राप्ते, बोधिबीजं सुदुर्लभम् ।
तत्रापि पुण्ययोगेन, परिव्रज्योपलभ्यते ॥ १ ॥

तावद् भुवोऽर्कसन्तापो, न यावत् प्रावृडम्बुदः ।
भङ्गो वनस्य हस्तिभ्यस्तावद् यावन्न केसरी ॥ २ ॥

तमोभिरान्ध्यं जगतस्तावद् यावन्न भास्करः ।
देहिनां पन्नगभयं, तावद् यावन्न पक्षिराट् ॥ ३ ॥

दारिद्र्यं प्राणिनां तावन्न यावत् कल्पपादपः ।
भविनां भवभीस्तावद्, यावन्नैवाऽऽप्यते व्रतम् ॥ ४ ॥

आरोग्यं रूपलावण्ये, दीर्घायुष्यं महर्द्धिता ।
आज्ञैश्वर्यं प्रतापित्वं, साम्राज्यं चक्रवर्तिता ॥ ५ ॥

सुरत्वं सामानिकत्वमिन्द्रत्वमहमिन्द्रता ।
सिद्धत्वं तीर्थनाथत्वं, सर्वं व्रतफलं ह्यदः ॥ ६ ॥

एकाहमपि निर्मोहः, प्रव्रज्यापरिपालकः ।
न चेन्मोक्षमवाप्नोति, तथापि स्वर्गभाग् भवेत् ॥ ७ ॥

किं पुनः स महाभागस्त्यक्त्वा तृणमिव श्रियम् ।
यो गृह्णाति परिव्रज्यां, सुचिरं पालयत्यपि ॥ ८ ॥

विधाय देशनामेवमरिन्दममहामुनिः ।
विहर्तुमन्यतोऽचालीत्, तिष्ठन्त्येकत्र नर्षयः ॥ ९ ॥

ततो ग्राम-पुरारण्याकर-द्रोणमुखादिषु ।
स व्यहार्षीदविच्छिन्नं, छायेव गुरुणा सह ॥ १० ॥

लोकाक्रान्तेऽर्कभास्पृष्टे, जन्तुरक्षाकृते पथि ।
युगमात्रदत्तदृष्टिः, सोऽगादीर्याविचक्षणः ॥ ११ ॥

निरवद्यां मितां सर्वजनीनां भारतीं च सः ।
महामुनिरभाषिष्ट, भाषासमितिकोविदः ॥ १२ ॥

द्विचत्वारिंशता भिक्षादोषैरपरिदूषितम् ।
पारणेष्वाददे पिण्डमेषणानिपुणो हि सः ॥ १३ ॥

आसनादीनि संवीक्ष्य, यत्नतः प्रतिलिख्य च ।
अग्रहीन्न्यक्षिपच्चाऽपि, स आदानविशारदः ॥ १४ ॥

कफ-मूत्र-मलप्रायं, निर्जन्तुजगतीतले ।
उत्ससर्ज महासाधुः, स प्राणिकरुणापरः ॥ १५ ॥

विमुक्तकल्पनाजालं, समत्वे सुप्रतिष्ठितम् ।
स गुणक्ष्मारुहारामम, आत्मारामं मनो व्यधात् ॥ १६ ॥

मौनेन तस्थौ स प्रायः, संज्ञादिपरिहारतः ।
अनुग्राह्योपरोधेन, यद्यवोचत् तदा मितम् ॥ १७ ॥

स्तम्भबुद्ध्या महिषाद्यैः, स्कन्धकण्डूयनेच्छुभिः ।
बाढमुद्घृष्यमाणोऽपि, कायोत्सर्गं जहौ न सः ॥ १८ ॥

शयनासननिक्षेपादानचङ्क्रमणादिषु ।
स्थाने च चेष्टानियमं, स चकार महामनाः ॥ १९ ॥

इत्थं चारित्रगात्रस्य, जननत्राणशोधनैः ।
मातृभूताः स समितिगुप्तीरष्टाऽप्यधारयत् ॥ २० ॥

क्षुधार्त्तः शक्तिसम्पन्न एषणामविलङ्घयन् ।
सोऽदीनोऽविह्वलो विद्वान्, यात्रामात्रोद्यतोऽचरते ॥ २१ ॥

पिपासितः पथिस्थोऽपि, तत्त्वविद् दैन्यवर्जितः ।
नैच्छच्छीतोदकं किन्तु, जग्राह प्रासुकोदकम् ॥ २२ ॥

बाध्यमानोऽपि शीतेन, त्वग्वस्त्रत्राणवर्जितः ।
वासोऽकल्प्यं नाऽऽददे सोऽज्वालयज्ज्वलनं न च ॥ २३ ॥

उष्णेन तप्तो नाऽनिन्ददुष्णं छायां च नाऽस्मरत् ।
वीजनं मज्जनं गात्राभिषेकादि च नाऽकरोत् ॥ २४ ॥

दष्टोऽपि दंशैर्मशकैः, सर्वेषां भोज्यलौल्यवित् ।
त्रासं द्वेषं निरासं स, न चक्रेऽस्थादुपेक्षया ॥ २५ ॥

नाऽस्ति वासोऽशुभं चैतन्नेयेषोभयथाऽपि तत् ।
समाध्यबाधितो जानन्, लाभालाभविचित्रताम् ॥ २६ ॥

न कदाप्यरतिं चक्रे, धर्मारामरतिर्यतिः ।
गच्छंस्तिष्ठन्नथाऽऽसीनः, स्वास्थ्यमेव स शिश्रिये ॥ २७ ॥

दुर्धावसङ्गपङ्काश्च, मोक्षद्वारार्गलाः स्त्रियः ।
नाऽचिन्तयदसौ ता हि, धर्मनाशाय चिन्तिताः ॥ २८ ॥

ग्रामाद्यनियतस्थायी, स्थानाबन्धविवर्जितः ।
चर्यामेकोऽपि चक्रे स, विविधाभिग्रहैर्युतः ॥ २९ ॥

आसनादौ निषद्यायां, स्त्र्यादिकण्टकवर्जिते ।
इष्टानिष्टानुपसर्गान्, स सेहे निःस्पृहोऽभयः ॥ ३० ॥

शुभाशुभायां शय्यायां, स विषेहे सुखासुखे ।
रागद्वेषावकुर्वाणः, प्रातस्त्याज्येति चिन्तयन् ॥ ३१ ॥

आक्रुष्टोऽपि स नाऽक्रोशत्, क्षमाश्रमणतां विदन् ।
किन्तु प्रत्युत मेनेऽसावाक्रोष्टर्युपकारिताम् ॥ ३२ ॥

विषेहे हन्यमानोऽपि, न तु प्रतिजघान सः ।
जीवानाशात् क्रुधो दौष्ट्यात्, क्षमया च गुणार्जनात् ॥ ३३ ॥

नाऽयाचितं यतीनां यत्, परदत्तोपजीविनाम् ।
याच्त्रादुःखं न चक्रे तन्नेयेष गृहितां च सः ॥ ३४ ॥

परात् परार्थं स्वार्थं वा, स लेभेऽन्नादिकं न वा ।
लाभेऽमाद्यन्न नाऽलाभेऽनिन्दत् स्वमथवा परम् ॥ ३५ ॥

स रोगेभ्यो नोद्विविजे, न च काङ्क्ष चिकित्सितम् ।
शरीरादात्मभेदज्ञोऽसहताऽदीनमानसः ॥ ३६ ॥

अभूताल्पाणुचेलत्वे, संस्तृतेषु तृणादिषु ।
सेहे तत्स्पर्शजं दुःखमियेष न च तान् मृदून् ॥ ३७ ॥

ग्रीष्मातपपरिक्लिन्नात्, सर्वाङ्गीणमलादपि ।
न स उद्विविजे स्नातुं, नैच्छन्नाऽप्युदवर्त्तयत् ॥ ३८ ॥

अभ्युत्थानेऽर्चने दाने, न सोऽभूदभिलाषुकः ।
न व्यषीददसत्कारे, सत्कारेऽपि जहर्ष न ॥ ३९ ॥

प्रज्ञां प्रज्ञावतां पश्यन्नात्मन्यप्रज्ञतां विदन् ।
न व्यषीदन्न चाऽमाद्यत्, प्रज्ञोत्कर्षमुपागतः ॥ ४० ॥

ज्ञान-चारित्रयुक्तोऽस्मि, च्छद्मस्थोऽहं तथाऽपि हि ।
इत्यज्ञानं विषेहे स, ज्ञानस्य क्रमलाभवित् ॥ ४१ ॥

जिनास्तदुक्तं जीवो वा, धर्माधर्मौ भवान्तरम् ।
परोक्षत्वान्मृषा नैव, स मेने शुद्धदर्शनः ॥ ४२ ॥

शारीरान् मानसानेवं, स्वपरप्रेरितान् मुनिः ।
परीषहान् विषेहे स, वाक्कायमनसां वशी ॥ ४३ ॥

ध्यानैकतानः सततं, स्वामिनां श्रीमदर्हताम् ।
चक्रे चैत्यायमानं स, चेतः स्थिरतरं निजम् ॥ ४४ ॥

सिद्धेषु गुरुषु बहुश्रुतेषु स्थविरेषु च ।
तपस्विषु श्रुतज्ञाने, सङ्घे चाऽभूत् स भक्तिमान् ॥ ४५ ॥

एवं च तीर्थकृत्कर्मोपार्जनान्यपराण्यपि ।
स्थानकानि सिषेवेऽसौ, दुर्लभान्यमहात्मनाम् ॥ ४६ ॥

तप एकावलिं रत्नावलिं च कनकावलिम् ।
सिंहनिष्क्रीडितं ज्येष्ठं, कनिष्ठं च चकार सः ॥ ४७ ॥

मासोपवासादारभ्य, स कर्तुं कर्मनिर्जराम् ।
अष्टमासोपवासान्तमुपवासतपो व्यधात् ॥ ४८ ॥

एवं तीव्रं तपस्तप्त्वा, कृत्वा संलेखनाद्वयम् ।
चकाराऽनशनं प्रान्ते, समतैकपरायणः ॥ ४९ ॥

स्मरन् पञ्चपरमेष्ठिनमस्कारं समाहितः ।
स देहत्यागमकरोन्निलयत्यागलीलया ॥ ५० ॥

## ॥ द्वितीयजिनदेशना ॥

असावसारः संसारः, सारबुद्ध्याऽवबुध्यते ।
काचो वैडूर्यबुद्ध्येव, धिगहो ! मुग्धबुद्धिभिः ॥ १ ॥

प्रतिक्षणभवैर्देहभाजां विविधकर्मभिः ।
संवर्ध्यते च संसारः, पादपो दोहदैरिव ॥ २ ॥

कर्माभावेन संसाराभावो न्यायभवः खलु ।
कर्मध्वंसाय सुधिया, यतितव्यं ततः सदा ॥ ३ ॥

कर्मध्वंसः शुभध्यानात्, तच्च ध्यानं चतुर्विधम् ।
आज्ञा-ऽपाय-विपाकानां, संस्थानस्य चिन्तनात् ॥ ४ ॥

आज्ञा स्यादाप्तवचनं, सा द्विधैव व्यवस्थिता ।
आगमः प्रथमा तावद्धेतुवादोऽपरा पुनः ॥ ५ ॥

शब्दादेव पदार्थानां, प्रतिपत्तिकृदागमः ।
प्रमाणान्तरसंवादाद्धेतुवादो निगद्यते ॥ ६ ॥

द्वयोरप्यनयोस्तुल्यं, प्रामाण्यमविगानतः ।
अदुष्टकारणारब्धं, प्रमाणमिति लक्षणात् ॥ ७ ॥

दोषा राग-द्वेष-मोहाः, सम्भवन्ति न तेऽर्हति ।
अदुष्टहेतुसम्भूतं, तत् प्रमाणं वचोऽर्हताम् ॥ ८ ॥

नय-प्रमाणसंसिद्धं, पौर्वापर्याविरोधि च ।
अप्रतिक्षेप्यमपरैर्बलिष्ठैरपि शासनैः ॥ ९ ॥

अङ्गोपाङ्ग-प्रकीर्णादिबहुभेदापगाम्बुधि ।
अनेकातिशयप्राज्यसाम्राज्यश्रीविभूषितम् ॥ १० ॥

सुदुर्लभं दूरभव्यैर्भव्यैस्तु सुलभं भृशम् ।
गणिपिटकतयोच्चैर्नित्यं स्तुत्यं नरा-ऽमरैः ॥ ११ ॥

इमामाज्ञां समालम्ब्य, स्याद्वादन्याययोगतः ।
द्रव्य-पर्यायरूपेण, नित्या-ऽनित्येषु वस्तुषु ॥ १२ ॥

स्वरूप-पररूपाभ्यां, सदसद्रूपशालिषु ।
यः स्थिरप्रत्ययो ध्यानं, तदाज्ञाविचयाह्वयम् ॥ १३ ॥

अस्पृष्टजिनमार्गाणामविज्ञातपरात्मनाम् ।
अपरामृष्टायतीनामपायाः स्युः सहस्रशः ॥ १४ ॥

माया-मोहा-ऽन्धतमसविवशीकृतचेतसा ।
किं किं नाऽकारि कलुषं ?, कस्कोऽपायोऽप्यवापि न ? ॥ १५ ॥

यद् यद् दुःखं नारकेषु, तिर्यक्षु मनुजेषु च ।
मयाऽप्रापि प्रमादोऽयं, ममैव हि विचेतसः ॥ १६ ॥

प्राप्योऽपि परमां बोधिं, मनो-वाक्कायकर्मजैः ।
दुश्चेष्टितैर्मयैवाऽऽत्मशिरसि ज्वालितोऽनलः ॥ १७ ॥

स्वाधीने मुक्तिमार्गेऽपि, कुमार्गपरिमार्गणैः ।
अहो ! आत्मंस्त्वयैवैष, स्वात्माऽपायेषु पातितः ॥ १८ ॥

यथा प्राप्तेऽपि सौराज्ये, भिक्षां भ्राम्यति बालिशः ।
आत्मायत्ते तथा मोक्षे, भवाय भ्रान्तवानसि ॥ १९ ॥

एवं राग-द्वेष-मोहैर्जायमानान् विचिन्तयेत् ।
यत्राऽपायांस्तदपायविचयध्यानमिष्यते ॥ २० ॥

विपाकः फलमाम्नातः, कर्मणां स शुभा-ऽशुभः ।
द्रव्य-क्षेत्रादिसामग्र्या, चित्ररूपोऽनुभूयते ॥ २१ ॥

शुभस्तत्राङ्गना-माल्य-खाद्यादिद्रव्यभोगतः ।
अशुभस्त्वहि-शस्त्रा-ऽग्नि-विषादिभ्योऽनुभूयते ॥ २२ ॥

क्षेत्रे सौध-विमानोपवनादौ वसनाच्छुभः ।
श्मशान-जाङ्गला-ऽरण्यप्रभृतावशुभः पुनः ॥ २३ ॥

काले त्वशीतला-ऽनुष्णे, वसन्तादौ रतेः शुभः ।
उष्णे शीते ग्रीष्म-हेमन्तादौ भ्रमणतोऽशुभः ॥ २४ ॥

मनःप्रसाद-सन्तोषादिभावेषु शुभो भवेत् ।
क्रोधा-ऽहङ्कार-रौद्रत्वादिभावेष्वशुभः पुनः ॥ २५ ॥

सुदेवत्व-भोगभूमिमनुष्यादिभवे शुभः ।
कुमर्त्य-तिर्यग्नरकादिभवेष्वशुभः पुनः ॥ २६ ॥

अपि च-उदयक्षयक्षयोपशमोपशमाः कर्मणां भवन्त्यत्र ।
द्रव्यं क्षेत्रं कालं, भावं च भवं च सम्प्राप्य ॥ २७ ॥

इति द्रव्यादिसामग्रीयोगात् कर्माणि देहिनाम् ।
स्वं स्वं फलं प्रयच्छन्ति, तानि त्वष्टैव तद्यथा ॥ २८ ॥

जन्तोः सर्वज्ञरूपस्य, ज्ञानमाव्रियते सदा ।
येन चक्षुः पटेनेव, ज्ञानावरणकर्म तत् ॥ २९ ॥

मति-श्रुता-ऽवधि-मनःपर्याया: केवलं तथा ।
पञ्चाऽऽव्रियन्ते ज्ञानानीत्येता ज्ञानावृतेर्भिदः ॥ ३० ॥

पञ्च निद्रा दर्शनानां, चतुष्कस्याऽऽवृतिश्च या ।
दर्शनावरणीयस्य, विपाकः कर्मणः स तु ॥ ३१ ॥

यथा दिदृक्षुः स्वामी स्वं, प्रतीहारनिरोधतः ।
न पश्यति तथाऽऽत्माऽपि, येन दृष्ट्यावृतिस्तु तत् ॥ ३२ ॥

मधुलिप्तासिधाराग्रास्वादाभं वेद्यकर्म यत् ।
सुख-दुःखानुभवनस्वभावं तत् प्रकीर्तितम् ॥ ३३ ॥

सुरापाणसमं प्राज्ञा, मोहनीयं प्रचक्षते ।
यदनेन विमूढात्मा, कृत्या-ऽकृत्येषु मुह्यति ॥ ३४ ॥

तत्राऽपि दृष्टिमोहाख्यं, मिथ्यादृष्टिविपाककृत् ।
चारित्रमोहनीयं तु, विरतिप्रतिषेधकम् ॥ ३५ ॥

नृ-तिर्यग्नरका-ऽमर्त्यभेदादायुश्चतुर्विधम् ।
स्वस्वजन्मनि जन्तूनां, धारकं गुप्तिसन्निभम् ॥ ३६ ॥

गति-जात्यादिवैचित्र्यकारि चित्रकरोपमम् ।
नामकर्म विपाकोऽस्य, शरीरेषु शरीरिणाम् ॥ ३७ ॥

उच्चैर्नीचैर्भवेद् गोत्रं, कर्मोच्चैर्नीचगोत्रकृत् ।
क्षीरभाण्ड-सुराभाण्डभेदकारि कुलालवत् ॥ ३८ ॥

दानादिलब्धयो येन, न फलन्ति विबाधिताः ।
तदन्तरायं कर्म स्याद्, भाण्डागारिकसन्निभम् ॥ ३९ ॥

इति मूलप्रकृतीनां, विपाकांस्तान् विचिन्वतः ।
विपाकविचयं नाम, धर्मध्यानं प्रवर्तते ॥ ४० ॥

अनाद्यन्तस्य लोकस्य, स्थित्युत्पत्ति-व्ययात्मनः ।
आकृतिं चिन्तयेद् यत्र, संस्थानविचयः स तु ॥ ४१ ॥

कटिस्थकरवैशाखस्थानकस्थनराकृतिः ।
द्रव्यैः पूर्णः स तु लोकः, स्थित्युत्पत्ति-व्ययात्मकैः ॥ ४२ ॥

वेत्रासनसमोऽधस्तान्मध्यतो झल्लरीनिभः ।
अग्रे मुरजसङ्काशो, लोकः स्यादेवमाकृतिः ॥ ४३ ॥

स च त्रिजगदाकीर्णो, भुवः सप्ताऽत्र वेष्टिताः ।
घनाम्भोधि-घनवात-तनुवातैर्महाबलैः ॥ ४४ ॥

जगत्त्रयं त्वधस्तिर्यगूर्ध्वलोकविभेदतः ।
अधस्तिर्यगूर्ध्वभावो, रुचकापेक्षया पुनः ॥ ४५ ॥

मेर्वन्तर्गोस्तनाकारचतुर्व्योमप्रदेशकः ।
रुचकाऽधस्तादृगूर्ध्वमेवमष्टप्रदेशकः ॥ ४६ ॥

तिर्यग्लोकस्तु रुचकस्योपरिष्टादधोऽपि च ।
योजनानां नव नव, शतानि भवति स्फुटम् ॥ ४७ ॥

तिर्यग्लोकस्य त्वधस्तादधोलोकः प्रतिष्ठितः ।
नवयोजनशत्यूनसप्तरज्जुप्रमाणकः ॥ ४८ ॥

तत्राऽधोभागमासाद्याधोऽधःस्थाः सप्त भूमयः ।
यासु नारकषण्ढानां, निवासाः सन्ति भीषणाः ॥ ४९ ॥

रत्नशर्करावालुकापङ्कधूमतमःप्रभाः ।
महातमःप्रभा चाऽऽसां, बाहल्ये लक्षयोजनी ॥ ५० ॥

अशीतिर्द्वात्रिंशदष्टाविंशतिर्विंशतिस्तथा ।
अष्टादश षोडशाऽष्टौ, सहस्राश्च क्रमेण तु ॥ ५१ ॥

रत्नप्रभाभुवोऽधोऽधः, क्रमात् पृथुतराश्च ताः ।
त्रिंशल्लक्षाणि नरकावासानां प्रथमावनौ ॥ ५२ ॥

पञ्चविंशतिलक्षाणि, द्वितीयनरकावनौ ।
तृतीयायां पञ्चदश, तुरीयायां पुनर्दश ॥ ५३ ॥

पञ्चम्यां त्रीणि पञ्चोनं, लक्षं षष्ठ्यां पुनर्भुवि ।
पञ्चैव नरकावासाः, सप्तम्यां नरकावनौ ॥ ५४ ॥

भुवां रत्नप्रभादीनामधस्ताञ्च घनाब्धयः ।
मध्योत्सेधे योजनानां, सहस्राणि तु विंशतिः ॥ ५५ ॥

तदधस्ताद् घनवाता, मध्योत्सेधे भवन्ति तु ।
योजनानामसङ्ख्यानि, सहस्राणि घनाब्धितः ॥ ५६ ॥

तनुवातास्त्वसङ्ख्यानि, तानि स्युर्घनवाततः ।
आकाशं तनुवातेभ्योऽप्यसङ्ख्येयानि तानि च ॥ ५७ ॥

मध्योत्सेधादमुष्मात् तु, हीयमानाः क्रमेण च ।
घनाम्भोध्यादयः प्रान्ते, वलयाकारधारिणः ॥ ५८ ॥

रत्नप्रभाया मेदिन्याः, परिधिस्थितिशालिनः ।
घनाम्भोधिवलयस्य, विष्कम्भो योजनानि षट् ॥ ५९ ॥

महावातस्य वलयविष्कम्भे योजनानि तु ।
सार्धानि चत्वारि तनुवायोः सार्धं तु योजनम् ॥ ६० ॥

रत्नप्रभाया वलयमानस्योपरि जायते ।
शर्कराया घनाम्भोधौ, त्रिभागो योजनस्य तु ॥ ६१ ॥

महावाते च गव्यूतमेकं भवति निश्चितम् ।
गव्यूतस्य तृतीयांशस्तनुवातेऽपि वर्धते ॥ ६२ ॥

शर्करावलयमानस्योपरि क्षेप एष च ।
तृतीयपृथ्वीवलयविष्कम्भेष्वपि जायते ॥ ६३ ॥

एवं च प्राक्प्राग्वलयमानोद्ध्र्वं क्षेप एष च ।
सप्तमीं पृथिवीं यावद्, वलयेषु विधीयते ॥ ६४ ॥

घनाम्भोधि-महावाता-ऽल्पवातवलयानि तु ।
स्वस्वपृथ्वीगतोत्सेधसमोत्सेधानि सर्वतः ॥ ६५ ॥

इत्थं च भूमयः सप्त, घनाम्भोध्यादिधारिताः ।
तास्वेव नरकावासा, भोगस्थानं कुकर्मणाम् ॥ ६६ ॥

यातना-रुक्शरीरा-ऽऽयुर्लेश्या-दुःख-भयादिकम् ।
वर्धमानं विनिश्चेयमधोऽधःश्वभ्रभूमिषु ॥ ६७ ॥

अथ रत्नप्रभाभूमेर्बाहल्ये जायते खलु ।
योजनानां लक्षमेकं, सहस्राशीतिसंयुतम् ॥ ६८ ॥

त्यक्त्वा योजनसहस्रमेकमूद्ध्वर्मधोऽपि च ।
तदन्तः सन्ति भवनपतीनां भवनानि तु ॥ ६९ ॥

ते च भवनपतयो, दक्षिणोत्तरयोर्दिशोः ।
श्रेणीद्वयेन तिष्ठन्ति, राजमार्गेऽट्टपङ्क्तिवत् ॥ ७० ॥

तत्र चूडामणिचिह्ना, असुरा भवनाधिपाः ।
नागाः पुनः फणाचिह्ना, विद्युतो वज्रलाञ्छनाः ॥ ७१ ॥

सुपर्णा गरुडचिह्ना घटचिह्नाश्च वह्नयः ।
अश्वाङ्का वायवो वर्धमानाङ्काः स्तनिताः पुनः ॥ ७२ ॥

मकराङ्का उदधयो, द्वीपाः केसरिलाञ्छनाः ।
भवन्ति दिक्कुमारास्तु, सर्वे कुञ्जरलाञ्छनाः ॥ ७३ ॥

तत्राऽसुराणां द्वाविन्द्रौ, चमरो बलिरित्यपि ।
धरणो भूतानन्दश्च, नागानां तु पुरन्दरौ ॥ ७४ ॥

इन्द्रौ विद्युत्कुमाराणां, हरिर्हरिसहस्तथा ।
वेणुदेवो वेणुदारी, सुपर्णानां तु वासवौ ॥ ७५ ॥

ईशावग्निकुमाराणामग्निशिखा-ऽग्निमाणवौ ।
इन्द्रौ वायुकुमाराणां, वेलम्बोऽथ प्रभञ्जनः ॥ ७६ ॥

सुघोषोऽथ महाघोषः, स्तनितानां तु वासवौ ।
इन्द्रावब्धिकुमाराणां, जलकान्त-जलप्रभौ ॥ ७७ ॥

पूर्णो वशिष्ठश्च द्वीपकुमाराणामधीश्वरौ ।
अधिपौ दिक्कुमाराणाममिता-ऽमिततवाहनौ ॥ ७८ ॥

रत्नप्रभाया उपरि, योजनानां सहस्रतः ।
उपरिष्टादधस्ताच्च, त्यक्त्वैकां शतयोजनीम् ॥ ७९ ॥

वसन्ति योजनशतेष्वष्टस्वष्टविधाः खलु ।
दक्षिणोत्तरयोः श्रेण्योर्व्यन्तराणां निकायकाः ॥ ८० ॥

पिशाचव्यन्तरास्तत्र, कदम्बतरुलाञ्छनाः ।
भूताः सुलसवृक्षाङ्का, यक्षास्तु वटलाञ्छनाः ॥ ८१ ॥

राक्षसास्तु खट्वाङ्गाङ्का अशोकाङ्कास्तु किन्नराः ।
चम्पकाङ्काः किम्पुरुषा, नागद्र्वङ्का महोरगाः ॥ ८२ ॥

गन्धर्वव्यन्तराश्चारुतुम्बुरुद्रुमलाञ्छनाः ।
तत्र काल-महाकालौ, पिशाचानामधीश्वरौ ॥ ८३ ॥

सुरूपोऽप्रतिरूपश्च, भूतानामधिपौ पुनः ।
यक्षाणां पूर्णभद्रश्च, माणिभद्रश्च वासवः ॥ ८४ ॥

राक्षसानां पुनर्भीमो, महाभीमश्च नायकः ।
किन्नराणामधीशौ किन्नर-किम्पुरुषौ पुनः ॥ ८५ ॥

तथा सत्पुरुष-महापुरुषौ किम्पुरुषपौ ।
अतिकाय-महाकायौ, महोरगपुरन्दरौ ॥ ८६ ॥

गन्धर्वाणां प्रभुर्गीतरतिर्गीतयशा अपि ।
इत्थङ्कारं व्यन्तराणां, तत्रेन्द्राः सन्ति षोडश ॥ ८७ ॥

रत्नप्रभायाः प्रथमे, योजनानां शते तथा ।
योजनानि परित्यज्य, दशाऽधो दश चोपरि ॥ ८८ ॥

सन्त्यशीतौ योजनेषु, व्यन्तराष्टनिकायकाः ।
तत्राऽप्रज्ञप्तिकः पञ्चप्रज्ञप्तिर्ऋषिवादितः ॥ ८९ ॥

भूतवादितः क्रन्दितो, महाक्रन्दित एव च ।
कूष्माण्डः पवकश्चेति, तेषु द्वौ द्वौ पुरन्दरौ ॥ ९० ॥

सन्निहितः  समानश्च, तथा धातृ-विधातृकौ ।
ऋषिश्च ऋषिपालश्च, तथेश्वर-महेश्वरौ ॥ ९१ ॥

सुवत्सक-विशालौ च, हास-हासरती तथा ।
तथा श्वेत-महाश्वेतौ, पवकः पवकाधिपः ॥ ९२ ॥

रत्नप्रभातलादूर्ध्वं योजनानां शतेषु च ।
अष्टासु दशहीनेषु, ज्योतिष्काणामधस्तलम् ॥ ९३ ॥

तदूर्ध्वं दशयोजन्यां, सूर्यः सूर्यस्य चोपरि ।
भवत्यशीतियोजन्याः, प्रान्ते तुहिनदीधितिः ॥ ९४ ॥

ततो विंशतियोजन्याः, प्रान्ते तारा ग्रहा इति ।
बाहल्ये योजनशतं, ज्योतिर्लोको दशोत्तरम् ॥ ९५ ॥

एकविंशैर्योजनानामत्रैकादशभिः शतैः ।
द्वीपस्य जम्बूद्वीपस्य, मेरुशैलमसंस्पृशत् ॥ ९६ ॥

आस्थितं मण्डलिकया, दिक्षु सर्वासु सन्ततम् ।
ज्योतिश्चक्रं बम्भ्रमीति, ध्रुव एकस्तु निश्चलः ॥ ९७ ॥

योजनानामेकादशशतैरेकादशोत्तरैः ।
लोकान्तमस्पृशत् तद्धि, मण्डलेनाऽवतिष्ठते ॥ ९८ ॥

अत्र सर्वोपरि स्वातिः, सर्वेषां भरणी त्वधः ।
सर्वेभ्यो दक्षिणो मूलोऽभीचिः सर्वोत्तरः पुनः ॥ ९९ ॥

तत्र जम्बूद्वीपेऽमुष्मिन् द्वौ चन्द्रौ द्वौ च भास्करौ ।
लवणोदे च चत्वारश्चन्द्रा दिनकरास्तथा ॥ १०० ॥

द्वादश धातकीखण्डे, चन्द्रा द्वादश भानवः ।
कालोदे द्विचत्वारिंशच्चन्द्रा दिनकरास्तथा ॥ १०१ ॥

द्वासप्ततिः पुष्करार्धे, चन्द्राश्च रवयोऽपि च ।
एवं द्वात्रिंशमिन्दूनां शतं दिनकृतां तथा ॥ १०२ ॥

एकस्यैकस्य चन्द्रस्य, जायते च परिग्रहः ।
अष्टाशीतिर्ग्रहाश्चैव, भान्यष्टाविंशतिस्तथा ॥ १०३ ॥

षट्षष्टिश्च सहस्राणि, तथा नव शतानि च ।
तारकाकोटिकोटीनां, पञ्चसप्ततिरेव च ॥ १०४ ॥

इन्दोर्विमानं विष्कम्भा-ऽऽयामयोर्योजनस्य तु ।
एकषष्ट्यंशीकृतस्य, स्युः षट्पञ्चाशदंशकाः ॥ १०५ ॥

अष्टचत्वारिंशदंशा, विमाने तु विवस्वतः ।
योजनार्धं ग्रहाणां तु, भानां गव्यूतमेककम् ॥ १०६ ॥

सर्वोत्कृष्टायुषस्तारकायाः क्रोशार्धमेव तु ।
सर्वजघन्यायुष्कायाः, पञ्च धन्वशतानि तु ॥ १०७ ॥

पिण्डः सर्वत्र दैर्घ्यार्धं, मर्त्यक्षेत्रे भवन्ति ते ।
पञ्चचत्वारिंशल्लक्षयोजनप्रमिते खलु ॥ १०८ ॥

पुरः सिंहा दक्षिणतो, गजा अपरतो वृषाः ।
उत्तरतोऽश्वाश्चन्द्रादिविमानवाहनान्यमी ॥ १०९ ॥

ते चाऽऽभियोगिकाश्चन्द्रांश्वोः सहस्राणि षोडश ।
ग्रह-नक्षत्र-ताराणामष्टौ चत्वार्युभे क्रमात् ॥ ११० ॥

चन्द्रादीनां गतिजुषां, स्वरसेनैव सन्ततम् ।
वाहनत्वेनाऽवतिष्ठन्त्याभियोग्येन कर्मणा ॥ १११ ॥

मानुषोत्तरपरतो, योजनानां सहस्रकैः ।
पञ्चाशतेन्दवोऽर्काश्च, तिष्ठन्त्यन्तरिता मिथः ॥ ११२ ॥

मनुष्यक्षेत्रचन्द्रा-ऽर्कमानादर्धप्रमाणकाः ।
क्रमशः क्षेत्रपरिधिवृद्ध्या वर्धिष्णुसङ्ख्यकाः ॥ ११३ ॥

सुलेश्या ग्रह-नक्षत्र-तारकापरिवारिताः ।
सङ्ख्याविवर्जिता एवं, घण्टाकारमनोहराः ॥ ११४ ॥

स्वयम्भूरमणाम्भोधिमवधीकृत्य ते सदा ।
तिष्ठन्ति योजनलक्षान्तरिताभिश्च पाङ्क्तिभिः ॥ ११५ ॥

मध्यलोके जम्बूद्वीप-लवणाद्याः शुभाभिधाः ।
द्विगुणद्विगुणाभोगा, असङ्ख्या द्वीप-सागराः ॥ ११६ ॥

पूर्वपूर्वपरिक्षेपकृतो वलयसन्निभाः ।
अन्त्यः स्वयम्भूरमणो, नाम तेषां महोदधिः ॥ ११७ ॥

जम्बूद्वीपान्तरे मेरुः, काञ्चनस्थालवर्तुलः ।
अधो योजनसहस्रमवगाढो महीतले ॥ ११८ ॥

नवनवतिं योजनसहस्राणि समुच्छ्रितः ।
योजनानां सहस्राणि, भूतले दश विस्तृतः ॥ ११९ ॥

एकं योजनसहस्रमुपरिष्टाच्च विस्तृतः ।
त्रिकाण्डश्च त्रिभिर्लोकैः, प्रविभक्तवपुश्च सः ॥ १२० ॥

शुद्धपृथ्वी-ग्राव-वज्र-शर्कराबहुलं खलु ।
एकं योजनसहस्रं, सुमेरोः काण्डमादिमम् ॥ १२१ ॥

जातरूप-स्फटिका-ऽङ्क-रजतैर्बहुलावनि ।
योजनानां सहस्राणि, त्रिषष्टिस्तु द्वितीयकम् ॥ १२२ ॥

षट्त्रिंशच्च तृतीयं तु, जाम्बूनदशिलामयम् ।
वैडूर्यरत्नबहुला, चूलिका तस्य शोभना ॥ १२३ ॥

चत्वारिंशद्योजनानि, पुनस्तस्याः समुच्छ्रये ।
मूलविष्कम्भमाने तु, तस्या द्वादशयोजनी ॥ १२४ ॥

अष्टौ तन्मध्यविष्कम्भे, चत्वार्युपरि विस्तृतौ ।
मेरोर्मूले भद्रशालं, वनं वलयसन्निभम् ॥ १२५ ॥

भद्रशालात् पञ्चशतयोजन्यामधिमेखलम् ।
नन्दनं विस्तृतं पञ्च, योजनानां शतानि तु ॥ १२६ ॥

सार्धद्विषष्टिसहस्रयोजनेष्वथ तादृशम् ।
मेखलायां द्वितीयस्यां, तावत् सौमनसं वनम् ॥ १२७ ॥

वनात् सौमनसात् षट्त्रिंशद्योजनसहस्रतः ।
भवेदूर्ध्वं तृतीयस्यां, मेखलाभुवि सुन्दरम् ॥ १२८ ॥

चतुर्नवत्यग्रचतुःशतयोजनविस्तृतम् ।
वलयाकारमुद्यानं, मेरोः शिरसि पाण्डुकम् ॥ १२९ ॥

जम्बूद्वीपे त्विह द्वीपे, सप्त वर्षाणि भारतम् ।
हैमवतं हरिवर्षं, विदेहं रम्यकं तथा ॥ १३० ॥

हैरण्यवतैरवते, अमून्या दक्षिणोत्तरम् ।
विभागकारिणोऽमीषाममी वर्षधराद्रयः ॥ १३१ ॥

हिमवन्महाहिमवन्निषधा नील–रुक्मिणौ ।
शिखरी चेति मूलोद्ध्र्वतुल्यविस्तारशालिनः ॥ १३२ ॥

तत्राऽवगाढो मेदिन्यां, पञ्चविंशतियोजनीम् ।
हेममयोऽद्रिर्हिमवानुच्छ्रितः शतयोजनीम् ॥ १३३ ॥

महाहिमवदद्रिस्तद्द्विगुणोऽर्जुननिर्मितः ।
ततोऽपि द्विगुणस्तापनीयो निषधपर्वतः ॥ १३४ ॥

नीलस्तु निषधतुल्यो, गिरिर्वैडूर्यनिर्मितः ।
महाहिमवता तुल्यो, रुक्मी रजतनिर्मितः ॥ १३५ ॥

तापनीयस्तु शिखरी, समो हिमवदद्रिणा ।
सर्वेऽपि पार्श्वभागेषु, विचित्रमणिशालिनः ॥ १३६ ॥

सहस्रयोजनायामस्तदर्धेन तु विस्तृतः ।
अद्रौ क्षुद्रहिमवति, पद्मनामा महाहृदः ॥ १३७ ॥

महाहिमवदद्रौ तु, महापद्माभिधो हृदः ।
विद्यते पद्महृदतो, द्विगुणायाम–विस्तृतिः ॥ १३८ ॥

महापद्मात् तु द्विगुणस्तिङ्गिच्छिर्निषधे ह्रदः ।
तिङ्गिच्छितुल्यो नीलाद्रौ, ह्रदः केसरिसंज्ञकः ॥ १३९ ॥

महापुण्डरीको महापद्मतुल्यस्तु रुक्मिणि ।
पद्मतुल्यः पुण्डरीकह्रदः शिखरिपर्वते ॥ १४० ॥

विकस्वराणि तिष्ठन्ति, पद्मादिषु ह्रदेषु तु ।
कमलान्यवगाढानि, जलान्तर्दशयोजनीम् ॥ १४१ ॥

श्रीह्रीधृतिकीर्तिबुद्धिलक्ष्म्यः पल्यायुषोऽत्र तु ।
सामानिकपार्षद्याऽऽत्मरक्षानीकयुताः क्रमात् ॥ १४२ ॥

तत्र च भरतक्षेत्रे, गङ्गा-सिन्धू महापगे ।
रोहिता-रोहितांशे तु, क्षेत्रे हैमवताभिधे ॥ १४३ ॥

हरिद्धरिकान्ता नद्यौ, वर्षे तु हरिवर्षके ।
महाविदेहेषु शीता-शीतोदे सरिदुत्तमे ॥ १४४ ॥

नरकान्ता-नारीकान्ते, क्षेत्रे रम्यकनामनि ।
स्वर्णकूला-रूप्यकूले, हैरण्यवतवर्षके ॥ १४५ ॥

नद्यौ तु रक्ता-रक्तोदे, क्षेत्र ऐरवताभिधे ।
आद्याः पूर्वाब्धिगामिन्यो, द्वितीयाः पश्चिमाब्धिगाः ॥ १४६ ॥

आपगानां सहस्रैस्तु, चतुर्दशभिरुत्तमैः ।
गङ्गा-सिन्धू महानद्यौ, प्रत्येकं परिवारिते ॥ १४७ ॥

द्विगुणद्विगुणनदीवृते द्वे द्वे परे अपि ।
यावच्च शीता-शीतोदे, उत्तरा दक्षिणोपमाः ॥ १४८ ॥

प्रत्येकं ते पुनः शीता-शीतोदे परिवारिते ।
द्वात्रिंशत्सहस्राधिकैर्नदीलक्षैस्तु पञ्चभिः ॥ १४९ ॥

भरतोरुत्वे षड्विंशा, पञ्चयोजनशत्यथ ।
एकोनविंशत्यंशस्य, योजनस्य षडंशकाः ॥ १५० ॥

ततो द्विगुणद्विगुणविष्कम्भाश्च यथोत्तरम् ।
विदेहान्ता वर्षधराचल-वर्षा भवन्ति तु ॥ १५१ ॥

उत्तरे वर्षधराद्रि-वर्षास्तुल्यास्तु दक्षिणैः ।
वर्षधराद्रि-वर्षाणां, प्रमाणमिदमेव हि ॥ १५२ ॥

निषधाद्रेरुत्तरतो, मेरोर्दक्षिणतोऽपि च ।
विद्युत्प्रभ-सौमनसौ, गिरी पश्चिम-पूर्वकौ ॥ १५३ ॥

गजदन्ताकृती मूर्ध्ना, स्तोकादस्पृष्टमेरुकौ ।
अनयोरन्तरे देवकुरवो भोगभूमयः ॥ १५४ ॥

तद्विष्कम्भो योजनानामेकादश सहस्रकाः ।
द्विचत्वारिंशदधिका, योजनाष्टशती तथा ॥ १५५ ॥

तत्र च शीतोदाभिन्नह्रदपञ्चकपार्श्वतः ।
स्वर्णशैला दश दश, ते मिथो मीलनाच्छतम् ॥ १५६ ॥

तत्र नद्याः शीतोदायाः, पूर्वापरतटस्थितौ ।
शैलौ विचित्रकूटश्च, चित्रकूटश्च नामतः ॥ १५७ ॥

तयोः सहस्रमुत्सेधे, योजनानामधोऽपि च ।
तावानेव हि विस्तारस्तदर्धं चोद्र्ध्वविस्तृतौ ॥ १५८ ॥

मेरोरुत्तरतो नीलगिरेर्दक्षिणतो गिरी ।
गजदन्ताकृती गन्धमादनो माल्यवानपि ॥ १५९ ॥

तयोरन्तः शीताभिन्नह्रदपञ्चकपार्श्वगैः ।
स्वर्णशैलैः शतेनाऽतिरम्याः कुरव उत्तराः ॥ १६० ॥

तेषु नद्याश्च शीतायास्तटयोर्यमकाभिधौ ।
सौवर्णौ विचित्रकूट-चित्रकूटसमौ गिरी ॥ १६१ ॥

देवोत्तरकुरुभ्यः प्राक्, प्राग्विदेहाः स्मृताश्च ते ।
पश्चिमेऽपरविदेहा, मिथः क्षेत्रान्तरोपमाः ॥ १६२ ॥

परस्परमसञ्चारा, विभक्ताः सरिदद्रिभिः ।
चक्रिविजेया विजयास्तेषु षोडश षोडश ॥ १६३ ॥

तत्र कच्छो महाकच्छः, सुकच्छः कच्छवानपि ।
आवर्तो मङ्गलावर्तः, पुष्कलः पुष्कलावती ॥ १६४ ॥

प्राग्विदेहोत्तरा ह्येते, दक्षिणास्त्वथ वत्सकः ।
सुवत्सोऽथ महावत्सो, रम्यवान् रम्य-रम्यकौ ॥ १६५ ॥

रमणीयो मङ्गलवानथाऽपरविदेहगाः ।
पद्मः सुपद्मोऽथ महापद्मः पद्मावती तथा ॥ १६६ ॥

शङ्खः कुमुद-नलिने, नलिनवांश्च दक्षिणाः ।
वप्रः सुवप्रोऽथ महावप्रो वप्रावती तथा ॥ १६७ ॥

अथ वल्गुः सुवल्गुश्च, गन्धिला गन्धिलावती ।
अपरेषु विदेहेषूत्तरस्था विजया अमी ॥ १६८ ॥

मध्ये च भरतस्याऽप्युत्तरार्धविभागकृत् ।
वैताढ्याद्रिः प्रागपरपयोधी यावदायतः ॥ १६९ ॥

षड् योजनानि सक्रोशान्युर्व्यां मग्नः स विस्तृतः ।
पञ्चाशतं योजनानि, तदर्धं पुनरुच्छ्रितः ॥ १७० ॥

भूमितो दशयोजन्यां दक्षिणोत्तरपार्श्वयोः ।
तत्र विद्याधरश्रेण्यौ, दशयोजनविस्तृते ॥ १७१ ॥

तत्राऽपाच्यां सराष्ट्राणि, पञ्चाशन्नगराणि तु ।
उत्तरस्यां पुनः षष्टिर्विद्याधरमहीभुजाम् ॥ १७२ ॥

ऊर्ध्वं विद्याभृच्छ्रेणिभ्यां, दशयोजन्यनन्तरम् ।
उभे च व्यन्तरश्रेण्यौ, व्यन्तरावासशोभिते ॥ १७३ ॥

उपरि व्यन्तरश्रेण्योर्योजनेषु तु पञ्चसु ।
कूटानि नव वैताढ्य, ईदृगैरवतेऽपि हि ॥ १७४ ॥

प्राकारभूता द्वीपस्य, जम्बूद्वीपस्य तिष्ठति ।
जगती वज्रमय्यष्टौ, योजनानि समुच्छ्रिता ॥ १७५ ॥

तस्याश्च मूले विष्कम्भमाने द्वादशयोजनी ।
मध्यभागे योजनानि, चाऽष्टौ चत्वारि मूर्धनि ॥ १७६ ॥

तदूर्ध्वं जालकटको, गव्यूतद्वितयोच्छ्रयः ।
विद्याधराणामाक्रीडस्थानमेकं मनोहरम् ॥ १७७ ॥

ततोऽपि जालकटकादूर्ध्वं पद्मवराभिधा ।
विद्यते वेदिका रम्या, भोगभूमिर्दिवौकसाम् ॥ १७८ ॥

तस्या जगत्याः पूर्वादिदिक्षु द्वाराणि च क्रमात् ।
विजयं वैजयन्तं च, जयन्तमपराजितम् ॥ १७९ ॥

अस्ति च क्षुद्रहिमवन्महाहिमवदन्तरे ।
शब्दापातीनामधेयाद्, वृत्तवैताढ्यपर्वतः ॥ १८० ॥

शैलस्तु विकटापाती, मध्ये शिखरि-रुक्मिणोः ।
गन्धापाती पुनर्महाहिमवन्निषधान्तरे ॥ १८१ ॥

माल्यवानन्तराले च, शैलयोर्नील-रुक्मिणोः ।
सर्वेऽपि पल्याकृतयः, सहस्रयोजनोच्छ्रयाः ॥ १८२ ॥

जम्बूद्वीपपरिक्षेपी, विस्तारे द्विगुणस्ततः ।
अवगाढो योजनानां, सहस्रमवनीतले ॥ १८३ ॥

पञ्चनवतियोजनसहस्रीं च क्रमात् क्रमात् ।
उभयतोऽप्युच्छ्रयेण, वर्धमानजलस्तथा ॥ १८४ ॥

मध्ये च योजनदशसहस्रीप्रमविस्तृतौ ।
योजनानां सहस्राणि, षोडशोच्छ्रयवच्छिखः ॥ १८५ ॥

कालद्वये तदुपरि, गव्यूतद्वितयावधि ।
ह्रास-वृद्धिधरो नाम्ना, लवणोदः पयोनिधिः ॥ १८६ ॥

पूर्वादिदिक्षु तत्रान्तः, प्रमाणे लक्षयोजनाः ।
वडवामुख-केयूप-यूपकेश्वरसंज्ञकाः ॥ १८७ ॥

सहस्रयोजनीमानवज्रनिर्मितकुड्यकाः ।
योजनानां सहस्राणि, दशाऽधोऽन्ते च विस्तृताः ॥ १८८ ॥

वायुधृतत्र्यंशजला, महालिञ्जरसन्निभाः ।
पातालकलसाः सन्ति, चत्वारः प्राक् क्रमादमी ॥ १८९ ॥

तेषु कालो महाकालो, वेलम्बोऽथ प्रभञ्जनः ।
वसन्ति क्रीडावासेषु, क्रमेणैव दिवौकसः ॥ १९० ॥

सहस्रयोजनाश्चाऽन्ये, दशयोजनकुड्यकाः ।
अधस्ताच्च वदने च, शतयोजनसम्मिताः ॥ १९१ ॥

वायूत्क्षिप्तमध्यमिश्रापाः शतान्यष्टसप्ततिः ।
चतुरशीतिश्च क्षुद्रपातालकलसा इह ॥ १९२ ॥

द्विचत्वारिंशत्सहस्रसङ्ख्या नागकुमारकाः ।
अन्तर्वेलाधारिणोऽस्मिन्नायुक्ता इव सर्वदा ॥ १९३ ॥

बाह्यवेलाधारिणां तु, सहस्राणि द्विसप्ततिः ।
तथा षष्टिः सहस्राणि, शिखावेलाप्रधारिणाम् ॥ १९४ ॥

गोस्तूप उदकाभासः, शङ्खोऽप्युदकसीमकः ।
हैमा-ऽङ्क-रौप्य-स्फाटिका, वेलाधारीन्द्रपर्वताः ॥ १९५ ॥

गोस्तूप-शिवक-शङ्ख-मनोह्रदसुराश्रयाः ।
द्विचत्वारिंशत्सहस्रयोजन्यां दिग्भवाश्च ते ॥ १९६ ॥

एकविंशसप्तदशशतयोजनिकोच्छ्रयाः ।
ते द्वाविंशयोजनानां, सहस्रं विस्तृतास्त्वधः ॥ १९७ ॥

उपरिष्टाच्चतुर्विंशां, योजनानां चतुःशतीम् ।
तेषामुपरि सर्वेषां, प्रासादाः सन्ति शोभनाः ॥ १९८ ॥

कर्कोटकः कार्दमकः, कैलाशश्चाऽरुणप्रभः ।
सर्वरत्नमयाश्चाणुवेलाधारीन्द्रपर्वताः ॥ १९९ ॥

कर्कोटको विद्युज्जिह्वः, कैलाशोथाऽरुणप्रभः ।
वसन्ति देवतास्तेषु, सर्वदैव यथाक्रमम् ॥ २०० ॥

सहस्रेषु द्वादशसु, योजनानां विदिक्षु च ।
प्राच्यामिन्दुद्वीपौ तावद्विस्तारा-ऽऽयामशोभितौ ॥ २०१ ॥

विद्येते सवितृद्वीपावपरेण च तावति ।
तथाऽस्ति गौतमद्वीपस्तावति सुस्थिताश्रयः ॥ २०२ ॥

अन्तर्बाह्यलावणकचन्द्रा-ऽर्काणां तथाऽऽश्रयाः ।
प्रासादास्तेषु लवणरसस्तु लवणोदधिः ॥ २०३ ॥

लवणोदपरिक्षेपी, ततो द्विगुणविस्तृतिः ।
धातकीखण्ड इत्यस्ति, नाम्ना द्वीपो द्वितीयकः ॥ २०४ ॥

जम्बूद्वीपे च ये मेरु-वर्ष-वर्षधरादयः ।
धातक्यां द्विगुणास्ते तु, ख्यातास्तैरेव नामभिः ॥ २०५ ॥

इष्वाकारपर्वताभ्यां, दीर्घाभ्यामुदग्याम्ययोः ।
विभक्ता जम्बूद्वीपस्थसङ्ख्याः पूर्वापरार्धयोः ॥ २०६ ॥

चक्रारा‌भा निषधोच्चाः, कालोद-लवणस्पृशः ।
वर्षधराः सेष्वाकारा, वर्षास्त्वरान्तरस्थिताः ॥ २०७ ॥

धातकीखण्डद्वीपस्य, परिक्षेपी पयोनिधिः ।
कालोदाख्यो योजनानामष्टौ लक्षाणि विस्तृतः ॥ २०८ ॥

धातक्यां सेष्वाकाराणां, मेर्वादीनामभाषि यः ।
सङ्ख्याविषयनियमः, पुष्करार्धे स एव हि ॥ २०९ ॥

धातकीखण्डक्षेत्रादिविभागाद् द्विगुणः पुनः ।
क्षेत्रादिकविभागोऽत्र, पुष्करार्धे प्रकीर्तितः ॥ २१० ॥

चत्वारो मेरवः क्षुद्रा, धातकी-पुष्करार्धयोः ।
योजनानां पञ्चदशसहस्त्र्या मेरुतोऽणवः ॥ २११ ॥

मेरोर्योजनषट्शत्या, हीनविष्कम्भकाः क्षितौ ।
तेषां च प्रथमं काण्डं, महामेरोरनूनकम् ॥ २१२ ॥

द्वितीयं सप्तभिर्न्यूनं, योजनानां सहस्रकैः ।
तृतीयमष्टभिर्मेरुवद् भद्रशाल-नन्दने ॥ २१३ ॥

सहार्धपञ्चपञ्चाशसहस्रयोजनोपरि ।
पञ्चयोजनशत्या च, पृथु सौमनसं वनम् ॥ २१४ ॥

अष्टाविंशतिसहस्त्र्या, योजनानामथोपरि ।
षडूनयोजनपञ्चशतविस्तारि पाण्डुकम् ॥ २१५ ॥

उपरिष्टादधस्ताच्च, विष्कम्भोऽथाऽवगाहनम् ।
महामेरुगिरेस्तुल्यं, तत्तुल्या चूलिकाऽपि च ॥ २१६ ॥

तदेवं मानुषं क्षेत्रं, द्वीपावर्धतृतीयकौ ।
द्वावब्धी पञ्चत्रिंशच्च, वर्षाः पञ्च च मेरवः ॥ २१७ ॥

त्रिंशद् वर्षधरा देवकुरवः पञ्च पञ्च च ।
उत्तराः कुरवः षष्ट्युत्तरं च विजयाः शतम् ॥ २१८ ॥

ततः परं पर्वतोऽस्ति, नामतो मानुषोत्तरः ।
मर्त्यलोकपरिक्षेपी, पुरप्राकारवर्तुलः ॥ २१९ ॥

निविष्टः पुष्करस्याऽर्धे सौवर्णः सैकविंशतिम् ।
योजनानां सप्तदशशतीं यावत् समुच्छ्रितः ॥ २२० ॥

चतुःशतीं योजनानां, त्रिंशां क्रोशं च भूमिगः ।
योजनानां सहस्रं द्वाविंशं विस्तीर्णवानधः ॥ २२१ ॥

योजनानां सप्तशतीं, त्रयोविंशां च मध्यतः ।
उपरिष्टाच्चतुर्विंशां, योजनानां चतुःशतीम् ॥ २२२ ॥

नोत्पद्यन्ते न म्रियन्ते, मर्त्यास्तत्परतः क्वचित् ।
न म्रियन्ते चारणाद्या, अपि तत्परतो गताः ॥ २२३ ॥

मानुषोत्तरनामा च, तेनाऽयं परतोऽस्य च ।
बादराग्नि-मेघ-विद्युन्नदी-कालादयो न हि ॥ २२४ ॥

पञ्चत्रिंशति वर्षेषु, चैष्ववर्वाग् मानुषोत्तरात् ।
मनुष्याः सान्तरद्वीपेषूत्पद्यन्ते हि जन्मतः ॥ २२५ ॥

संहार-विद्य-र्द्धियोगान्मेर्वादिशिखरेषु च ।
द्वीपेष्वर्धतृतीयेषु, समुद्रद्वितये च ते ॥ २२६ ॥

ते च भारतका जम्बूद्वीप्या लावणका अपि ।
इत्येवमादयः क्षेत्र-द्वीपा-ऽम्भोधिविभागतः ॥ २२७ ॥

द्विधाऽऽर्य-म्लेच्छभेदात् ते, तत्राऽऽर्याः षड्विधा इह ।
क्षेत्र-जाति-कुल-कर्म-शिल्प-भाषाविभेदतः ॥ २२८ ॥

क्षेत्रार्याः पञ्चदशसु, जायन्ते कर्मभूमिषु ।
तत्रेह भारते सार्धपञ्चविंशतिदेशजाः ॥ २२९ ॥

ते चाऽऽर्यदेशा नगरैरुपलक्ष्या इमे यथा ।
राजगृहेण मगधा, अङ्गदेशस्तु चम्पया ॥ २३० ॥

वङ्गाः पुनस्ताम्रलिप्त्या, वाराणस्या च काशयः ।
काञ्चनपुर्या कलिङ्गाः, साकेतेन च कोसलाः ॥ २३१ ॥

कुरवो गजपुरेण, शौर्येण च कुशार्तकाः ।
काम्पील्येन च पञ्चाला, अहिच्छत्रेण जाङ्गलाः ॥ २३२ ॥

विदेहास्तु मिथिलया, द्वारवत्या सुराष्ट्रकाः ।
वत्साश्च कौशाम्बीपुर्या, मलया भद्रिलेन तु ॥ २३३ ॥

नान्दीपुरेण सन्दर्भा, वरुणाः पुनरच्छ्या ।
वैराटेन पुनर्मत्स्याः, शुक्तिमत्या च चेदयः ॥ २३४ ॥

दशार्णा मृत्तिकावत्या वीतभयेन सिन्धवः ।
सौवीरास्तु मथुरया, सूरसेनास्तु पापया ॥ २३५ ॥

भङ्ग्या मासपुरीवर्ताः, श्रावस्त्या च कुणालकाः ।
कोटीवर्षेण लाटाश्च, श्वेतव्या केतकार्धकम् ॥ २३६ ॥

आर्यदेशा अमी एभिर्नगरैरुपलक्षिताः ।
तीर्थकृच्चक्रभृत्कृष्ण-बलानां जन्म येषु हि ॥ २३७ ॥

इक्ष्वाकवो ज्ञात-हरि-विदेहाः कुरवोऽपि च ।
उग्रा भोजा राजन्याश्च, जात्यार्या एवमादयः ॥ २३८ ॥

कुलार्यास्तु कुलकराश्चक्रिणो विष्णवो बलाः ।
तृतीयात् पञ्चमात् सप्तमाद् वा ये शुद्धवंशजाः ॥ २३९ ॥

यजनैर्याजनैः शास्त्राध्ययना-ऽध्यापनैरपि ।
प्रयोगैर्वार्त्तया वृत्तिमन्तः कर्मार्यकाः स्मृताः ॥ २४० ॥

शिल्पार्याः स्वल्पसावद्यवृत्तयस्तन्तुवायकाः ।
तुन्नवायाः कुलालाश्च, नापिता देवलादयः ॥ २४१ ॥

भाषार्या नाम ते शिष्टभाषानियतवर्णकम् ।
पञ्चानामपि चाऽऽर्याणां, व्यवहारं वदन्ति ये ॥ २४२ ॥

म्लेच्छास्तु शाका यवनाः, शबरा बर्बरा अपि ।
काया मुरुण्डा उड्राश्च, गोड्राः पक्कणका अपि ॥ २४३ ॥

अरपाकाश्च हूणाश्च, रोमकाः पारसा अपि ।
खसाश्च खासिका डौम्बिलिकाश्च लकुसा अपि ॥ २४४ ॥

भिल्ला अन्ध्रा बुक्कसाश्च, पुलिन्दाः क्रौञ्चका अपि ।
भ्रमररुताः कुञ्चाश्च, चीन-चञ्चुक-मालवाः ॥ २४५ ॥

द्रविडाश्च कुलशाश्च, किराताः कैकया अपि ।
हयमुखा गजमुखास्तुरगा-ऽजमुखा अपि ॥ २४६ ॥

हयकर्णा गजकर्णा, अनार्या अपरेऽपि हि ।
मर्त्या येषु न जानन्ति, धर्म इत्यक्षराण्यपि ॥ २४७ ॥

धर्मा-ऽधर्मोज्झिता म्लेच्छा, अन्तर्द्वीपजा अपि ।
भवन्ति चाऽन्तर्द्वीपाः, षट्पञ्चाशदमी यथा ॥ २४८ ॥

तेऽर्धे क्षुद्रहिमवतः, पूर्वा-ऽपरविभागयोः ।
पूर्वोत्तराप्रभृतिषु, विदिक्षु चतसृष्वपि ॥ २४९ ॥

पूर्वोदीच्यां दिशि तत्राऽवगाढो लवणोदधिः ।
त्रियोजनशतीं तावानायामे विस्तृतावपि ॥ २५० ॥

प्रथमोऽस्त्यन्तर्द्वीप, एकोरुरिति नामतः ।
पुरुषा द्वीपनाम्नेह, सर्वाङ्गोपाङ्गसुन्दराः ॥ २५१ ॥

न खल्वेकोरुका एव, द्वीपेष्वित्यपरेष्वपि ।
ज्ञातव्या वक्ष्यमाणेषु, द्वीपनाम्नैव पूरुषाः ॥ २५२ ॥

आग्नेय्यादिषु तन्मात्रावगाहा-ऽऽयाम-विस्तृताः ।
द्वीपा आभाषिको लाङ्गूलिको वैषाणिकः क्रमात् ॥ २५३ ॥

ततः परं योजनानामवगाह्य चतुःशतीम् ।
तावदायामसहितास्तावद्विष्कम्भशोभिनः ॥ २५४ ॥

ऐशान्यादिविदिक्ष्वन्तर्द्वीपाश्च हयकर्णकः ।
गजकर्णश्च गोकर्णः, शष्कुलीकर्णकः क्रमात् ॥ २५५ ॥

ततः परं योजनानां, पञ्चशत्यवगाहिनः ।
तावदायाम-विष्कम्भा, अन्तर्द्वीपका इमे ॥ २५६ ॥

तत्राऽऽदर्शमुखो मेषमुखो हयमुखस्तथा ।
गजमुखश्च चत्वार, ऐशान्यादिषु पूर्ववत् ॥ २५७ ॥

ततः षड्योजनशतावगाहा-ऽऽयाम-विस्तृताः ।
अश्वमुखो हस्तिमुखः, सिंह-व्याघ्रमुखावपि ॥ २५८ ॥

योजनानां सप्तशतावगाहा-ऽऽयाम-विस्तृताः ।
अश्व-सिंह-हस्तिकर्णाः, कर्णप्रावरणः क्रमात् ॥ २५९ ॥

ततोऽष्टयोजनशतीं, लवणोदेऽवगाहिनः ।
तावदायामसहितास्तावद्विष्कम्भशालिनः ॥ २६० ॥

द्वीपा उल्कामुखो विद्युज्जिह्वो मेषमुखोऽपि च ।
विद्युद्दन्तश्च चत्वार, ऐशान्यादिविदिक्क्रमात् ॥ २६१ ॥

योजनानां नवशतीं, ततोऽपि लवणोदधेः ।
अवगाह्य स्थितास्तावद्विष्कम्भा-ऽऽयामशालिनः ॥ २६२ ॥

नाम्ना गूढदन्तो घनदन्तकः श्रेष्ठदन्तकः ।
शुद्धदन्तश्च चत्वारोऽन्तरद्वीपा विदिक्क्रमात् ॥ २६३ ॥

अष्टाविंशतिरेवं च, शिखरिण्यपि पर्वते ।
एकत्र मेलिताः सर्वे, षट्पञ्चाशद् भवन्ति ते ॥ २६४ ॥

मानुषोत्तरपरतः, पुष्करार्धं द्वितीयकम् ।
पुष्करस्य परिक्षेपी, द्विगुणः पुष्करोदकः ॥ २६५ ॥

ततोऽपि वारुणिवरौ, नाम्ना द्वीप-पयोनिधी ।
ततः परं क्षीरवरौ, नामतो द्वीप-सागरौ ॥ २६६ ॥

ततो घृतवरौ द्वीपा-ऽम्बुधी इक्षुवरौ ततः ।
ततो नन्दीश्वरो नाम्नाऽष्टमो द्वीपो द्युसन्निभः ॥ २६७ ॥

एतद्वलयविष्कम्भे, लक्षाशीतिश्चतुर्युता ।
योजनानां त्रिषष्टिश्च, कोट्यः कोटिशतं तथा ॥ २६८ ॥

असौ विविधविन्यासोद्यानवान् देवभोगभूः ।
जिनेन्द्रपूजासंसक्तसुरसम्पातसुन्दरः ॥ २६९ ॥

अस्य मध्यप्रदेशे तु, क्रमात् पूर्वादिदिक्षु च ।
अञ्जनवर्णाश्चत्वारस्तिष्ठन्त्यञ्जनपर्वताः ॥ २७० ॥

दशयोजनसहस्रातिरिक्तविस्तृतास्तले ।
सहस्रयोजनाश्चोद्‌र्ध्वं, क्षुद्रा मेरूच्छ्रयाश्च ते ॥ २७१ ॥

तत्र प्राग् देवरमणो, नित्योद्योतश्च दक्षिणः ।
स्वयम्प्रभः प्रतीच्यस्तु, रमणीय उदक्स्थितः ॥ २७२ ॥

शतयोजन्यायतानि, तदर्धं विस्तृतानि च ।
द्विसप्ततियोजनोच्चान्यर्हच्चैत्यानि तेषु च ॥ २७३ ॥

पृथग्द्वाराणि चत्वार्युच्चानि षोडशयोजनीम् ।
प्रवेशे योजनान्यष्ट, विस्तारेऽप्यष्ट तेषु तु ॥ २७४ ॥

तानि देवाऽसुर-नाग-सुपर्णानां दिवौकसाम् ।
समाश्रयास्तेषामेव, नामभिर्विश्रुतानि च ॥ २७५ ॥

षोडशयोजनायामास्तावन्मात्र्यश्च विस्तृतौ ।
अष्टयोजनिकोत्सेधास्तन्मध्ये मणिपीठिकाः ॥ २७६ ॥

सर्वरत्नमया देवच्छन्दकाः पीठिकोपरि ।
पीठिकाभ्योऽधिकायामोच्छ्रयभाजश्च तेषु तु ॥ २७७ ॥

ऋषभा वर्धमाना च, तथा चन्द्राननाऽपि च ।
वारिषेणा चेति नाम्ना, पर्यङ्कासनसंस्थिताः ॥ २७८ ॥

रत्नमय्यो युताः स्वस्वपरिवारेण हारिणा ।
शाश्वतार्हत्प्रतिमाः प्रत्येकमष्टोत्तरं शतम् ॥ २७९ ॥

द्वे द्वे नाग-यक्ष-भूत-कुण्डभृत्प्रतिमे पृथक् ।
प्रतिमानां पृष्ठतस्तु, च्छत्रभृत्प्रतिमैकिका ॥ २८० ॥

तेषु धूपघटी-दाम-घण्टा-ऽष्टमङ्गली-ध्वजाः ।
छत्र-तोरण-चङ्गेर्यः, पटलान्यासनानि च ॥ २८१ ॥

षोडश पूर्णकलसादीन्यलङ्करणानि च ।
सुवर्णरुचिररजोवालुकास्तलभूमयः ॥ २८२ ॥

आयतनप्रमाणेन, रुचिरा मुखमण्डपाः ।
प्रेक्षार्थमण्डपा अक्षवाटिका मणिपीठिकाः ॥ २८३ ॥

रम्याश्च स्तूप-प्रतिमाश्चैत्यवृक्षाश्च सुन्दराः ।
इन्द्रध्वजाः पुष्करिण्यो, दिव्याः सन्ति यथाक्रमम् ॥ २८४ ॥

प्रत्येकमञ्जनाद्रीणां, ककुप्सु चतसृष्वपि ।
क्रमादमूः पुष्करिण्यो, मानतो लक्षयोजनाः ॥ २८५ ॥

नन्दिषेणा चाऽमोघा च, गोस्तूपाऽथ सुदर्शना ।
तथा नन्दोत्तरा नन्दा, सुनन्दा नन्दिवर्धना ॥ २८६ ॥

भद्रा विशाला कुमुदा, पुण्डरीकिणिका तथा ।
विजया वैजयन्ता च, जयन्ता चाऽपराजिता ॥ २८७ ॥

प्रत्येकमासां योजनपञ्चशत्याः परत्र च ।
योजनानां पञ्चशतीं यावद् विस्तारभाञ्जि तु ॥ २८८ ॥

लक्षयोजनदीर्घाणि, महोद्यानानि तानि तु ।
अशोक-सप्तच्छदक-चम्पक-चूतसंज्ञया ॥ २८९ ॥

मध्ये पुष्करिणीनां च, स्फाटिकाः पल्यमूर्त्तयः ।
ललाम-वेद्युद्यानादिचिह्ना दधिमुखाद्रयः ॥ २९० ॥

चतुःषष्टिसहस्रोच्चाः, सहस्रं चाऽवगाहिनः ।
विस्तृता दशसहस्रीं, योजनानामुपर्यधः ॥ २९१ ॥

अन्तरे पुष्करिणीनां, द्वौ द्वौ रतिकराचलौ ।
ततो भवन्ति द्वात्रिंशदेते रतिकराचलाः ॥ २९२ ॥

शैलेषु दधिमुखेषु, तथा रतिकराद्रिषु ।
शाश्वतान्यर्हच्चैत्यानि, सन्त्यञ्जनगिरिष्विव ॥ २९३ ॥

चत्वारो द्वीपविदिक्षु, तथा रतिकराचलाः ।
दशयोजनसहस्रायाम-विष्कम्भशालिनः ॥ २९४ ॥

योजनानां सहस्त्रं तु, यावदुच्छ्रयशोभिताः ।
सर्वरत्नमया दिव्या, झल्लर्याकारधारिणः ॥ २९५ ॥

तत्र द्वयो रतिकराचलयोर्दक्षिणस्थयोः ।
शक्रस्यैशानस्य पुनरुत्तरस्थितयोः पृथक् ॥ २९६ ॥

अष्टानां महादेवीनां, राजधान्योऽष्टदिक्षु ताः ।
लक्षाबाधा लक्षमाना, जिनायतनभूषिताः ॥ २९७ ॥

सुजाता सौमनसा चाऽर्चिमाली च प्रभाकरा ।
पद्मा शिवा शुच्यञ्जने, भूता भूतावतंसिका ॥ २९८ ॥

गोस्तूपा-सुदर्शने अप्यमला-ऽप्सरसौ तथा ।
रोहिणी नवमी चाऽथ, रत्ना रत्नोच्चयाऽपि च ॥ २९९ ॥

सर्वरत्ना रत्नसञ्चया वसुर्वसुमित्रिका ।
वसुभागाऽपि च वसुन्धरानन्दोत्तरे अपि ॥ ३०० ॥

नन्दोत्तरकुरुर्देवकुरुः कृष्णा ततोऽपि च ।
कृष्णराजीरामारामरक्षिताः प्राक्क्रमादमूः ॥ ३०१ ॥

सर्वर्द्धयस्तासु देवाः, कुर्वते सपरिच्छदाः ।
चैत्येष्वष्टाह्निकाः पुण्यतिथिषु श्रीमदर्हताम् ॥ ३०२ ॥

नन्दीश्वरपरिक्षेपी, ततो नन्दीश्वरोऽर्णवः ।
ततः परोऽरुणद्वीपोऽस्त्यरुणोदश्च सागरः ॥ ३०३ ॥

ततोऽरुणवरो द्वीपस्तन्नामा च पयोनिधिः ।
ततः परोऽरुणाभासोऽरुणाभासश्च सागरः ॥ ३०४ ॥

ततश्च कुण्डलद्वीपः, कुण्डलोदश्च वारिधिः ।
ततश्च रुचकद्वीपो, रुचकश्च पयोनिधिः ॥ ३०५ ॥

एवं प्रशस्तनामानो, द्विगुणद्विगुणाः क्रमात् ।
द्वीपाः समुद्रास्तेष्वन्त्यः, स्वयम्भूरमणोऽम्बुधिः ॥ ३०६ ॥

द्वीपेष्वर्धतृतीयेषु, देवोत्तरकुरून् विना ।
भरतैरावत-महाविदेहाः कर्मभूमयः ॥ ३०७ ॥

कालोदः पुष्करोदश्च, स्वयम्भूरमणस्तथा ।
पानीयरसा लवणरसस्तु लवणोदधिः ॥ ३०८ ॥

वारुणोदश्चित्रपानहृद्यः क्षीरोदधिः पुनः ।
खण्डमिश्र-घृतचतुर्भागगोक्षीररससन्निभः ॥ ३०९ ॥

घृतोदः सद्यःक्वथितगोघृताभोऽपरे पुनः ।
चतुर्जातकवत्पर्वान्तच्छिन्नेक्षुरसोपमाः ॥ ३१० ॥

लवणोदोऽथ कालोदः, स्वयम्भूरमणोऽपि च ।
मत्स्य-कूर्मादिसङ्कीर्णाः, सागरा नाऽपरे पुनः ॥ ३११ ॥

चत्वारस्तत्र तीर्थेशाश्चक्रिणो विष्णवो बलाः ।
सदा भवन्ति द्वीपेऽस्मिन्, जम्बूद्वीपे जघन्यतः ॥ ३१२ ॥

उत्कर्षेण चतुस्त्रिंशज्जिनास्त्रिंशच्च पार्थिवाः ।
भवन्ति द्विगुणाश्चैते, धातकी-पुष्करार्धयोः ॥ ३१३ ॥

तिर्यग्लोकादितश्चोद्ध्र्वमूद्ध्र्वलोको महर्द्धिकः ।
नवयोजनशत्यूनसप्तरज्जुप्रमाणकः ॥ ३१४ ॥

तत्र सौधर्म ईशानः, सनत्कुमार इत्यपि ।
माहेन्द्रो ब्रह्मलोकश्च, लान्तकः शुक्रसंज्ञकः ॥ ३१५ ॥

सहस्रारा-ऽऽनत-प्राणता-ऽऽरणा अच्युतोऽपि च ।
कल्पा इति द्वादशाऽमी, नवग्रैवेयका इमे ॥ ३१६ ॥

आदौ सुदर्शनं नाम, सुप्रबुद्धं मनोरमम् ।
सर्वभद्रं सुविशालं, सुमनश्च ततः परम् ॥ ३१७ ॥

सौमनसं प्रीतिकरमादित्यमथ तत्परम् ।
अनुत्तराभिधानानि, पञ्च सन्ति ततः परम् ॥ ३१८ ॥

विजयं वैजयन्तं च, जयन्तं चाऽपराजितम् ।
प्राक्क्रमेण विमानानि, मध्ये सर्वार्थसिद्धकम् ॥ ३१९ ॥

ततो द्वादशयोजन्या, ऊर्द्ध्वं सिद्धिशिलाऽस्ति तु ।
पञ्चचत्वारिंशल्लक्षयोजनायामविस्तृता ॥ ३२० ॥

ततोऽप्युपरि गव्यूतत्रितयात् समनन्तरम् ।
तुर्यगव्यूतषष्ठांशे, सिद्धा लोकाग्रतावधि ॥ ३२१ ॥

आ सौधर्मेशानकल्पं, सार्धा रज्जुः समावनेः ।
सनत्कुमार-माहेन्द्रौ, सार्धं रज्जुद्वयं पुनः ॥ ३२२ ॥

रज्जवश्चाऽऽसहस्रारं, पञ्च षट् चाऽच्युतावधि ।
लोकान्तमवधीकृत्य, जायन्ते सप्त रज्जवः ॥ ३२३ ॥

सौधर्मेशानकल्पौ तु, चन्द्रमण्डलवर्तुलौ ।
दक्षिणार्धे तत्र शक्र, ऐशानश्चोत्तरार्धके ॥ ३२४ ॥

सनत्कुमार-माहेन्द्रावप्येवं तत्समाकृती ।
सनत्कुमारोऽपाच्यार्धे, माहेन्द्रस्तूत्तरार्धके ॥ ३२५ ॥

लोकपुंस्कूर्परसमप्रदेशेऽतः परं पुनः ।
लोकमध्यभागे ब्रह्मलोको ब्रह्मा च तत्प्रभुः ॥ ३२६ ॥

प्रान्ते सारस्वता-ऽऽदित्या-ऽग्न्यरुण-गर्दतोयकाः ।
तुषिता-ऽव्याबाध-मरुद्रिष्टा लोकान्तिकामराः ॥ ३२७ ॥

तदूर्द्ध्वं लान्तकः कल्पस्तन्नामा तत्र वासवः ।
तस्योपरि महाशुक्र, इन्द्रस्तन्नामकोऽत्र च ॥ ३२८ ॥

तदूर्द्ध्वं च सहस्रारस्तन्नामा तत्र वासवः ।
सौधर्मेशानसंस्थानावानत-प्राणतौ ततः ॥ ३२९ ॥

तयोः प्राणतकल्पस्थः, प्राणताख्यः पुरन्दरः ।
तदूर्द्ध्वं च तदाकारौ, द्वौ कल्पावारणा-ऽच्युतौ ॥ ३३० ॥

तयोरच्युतवास्तव्य, एक इन्द्रोऽच्युताभिधः ।
ग्रैवेयकाऽनुत्तरेषु, त्वहमिन्द्रा दिवौकसः ॥ ३३१ ॥

घनोदधिप्रतिष्ठानौ, कल्पौ तु प्रथमाविह ।
वायुकृतप्रतिष्ठानास्त्रयः कल्पास्ततः परम् ॥ ३३२ ॥

घनोदधि-घनवातप्रतिष्ठानास्ततस्त्रयः ।
ततस्तदूर्ध्वमाकाशप्रतिष्ठानाः सुरालयाः ॥ ३३३ ॥

इन्द्राः सामानिकास्त्रायस्त्रिंशाः पार्षद्य-रक्षकाः ।
लोकपाला अनीकानि, प्रकीर्णा आभियोगिकाः ॥ ३३४ ॥

किल्बिषिकाश्चेति तेषु, दशभेदा दिवौकसः ।
इन्द्राः सामानिकादीनामधिपाः सर्वनाकिनाम् ॥ ३३५ ॥

सामानिकाश्चेन्द्रसमाः, परमिन्द्रत्ववर्जिताः ।
त्रायस्त्रिंशा मन्त्रि-पुरोहितप्राया हरेः पुनः ॥ ३३६ ॥

वयस्यप्रायाः पार्षद्या, आत्मरक्षास्तु रक्षकाः ।
आरक्षकार्थनृचरस्थानीया लोकपालकाः ॥ ३३७ ॥

तन्त्रप्रायाण्यनीकानि, प्रकीर्णा ग्राम्य-पौरवत् ।
दासप्राया आभियोग्याः, किल्बिषाश्चान्त्यजोपमाः ॥ ३३८ ॥

ज्योतिष्क-व्यन्तरास्त्रायस्त्रिंश-लोकपवर्जिताः ।
विमानलक्षाः सौधर्मे, द्वात्रिंशत् त्रिदिवौकसाम् ॥ ३३९ ॥

ऐशान-सनत्कुमार-माहेन्द्र-ब्रह्मणामपि ।
अष्टाविंशतिर्द्वादशाऽष्टौ चत्वारः क्रमेण तु ॥ ३४० ॥

लक्षार्धं लान्तके शुक्रे, चत्वारिंशत् सहस्रकाः ।
षट् सहस्राः सहस्रारे, युगले तु चतुःशती ॥ ३४१ ॥

त्रिशत्यारणा-ऽच्युतयोराद्ये ग्रैवेयकत्रिके ।
शतमेकादशाग्रं तु, मध्ये सप्तोत्तरं पुनः ॥ ३४२ ॥

विमानानां शतं त्वेकमन्त्यग्रैवेयकत्रिके ।
अनुत्तरविमानानि, पञ्चैव हि भवन्ति तु ॥ ३४३ ॥

एवं देवविमानानां, लक्षाशीतिश्चतुर्युता ।
सप्तनवतिः सहस्रास्त्रयोविंशतिरेव च ॥ ३४४ ॥

अनुत्तरविमानेषु, चतुर्षु विजयादिषु ।
देवा द्विचरमा एकचरमाः पञ्चमे पुनः ॥ ३४५ ॥

सौधर्मकल्पादारभ्य, सर्वार्थं यावदेषु च ।
स्थित्या दीप्त्या प्रभावेण, विशुद्ध्या लेश्यया सुखैः ॥ ३४६ ॥

इन्द्रियाणां विषयेणाऽवधिज्ञानेन चाऽमराः ।
भवन्ति पूर्वपूर्वेभ्योऽभ्यधिका उत्तरोत्तराः ॥ ३४७ ॥

परिग्रहा-ऽभिमानाभ्यां, वपुषा गमनेन च ।
हीनहीनतरा एते, भवन्ति तु यथाक्रमम् ॥ ३४८ ॥

जायते सर्वजघन्यस्थितीनां त्रिदिवौकसाम् ।
सप्तस्तोकान्त उच्छ्वास, आहारस्तु चतुर्थतः ॥ ३४९ ॥

पल्योपमस्थितीनां तु, भवति त्रिदिवौकसाम् ।
दिवसस्यान्तरुच्छ्वास, आहारोऽहःपृथक्त्वतः ॥ ३५० ॥

यावन्तः सागरा यस्य, तावन्मासार्धकैः पुनः ।
उच्छ्वासस्तस्य तावद्भिराहारोऽब्दसहस्रकैः ॥ ३५१ ॥

देवाः सद्वेदनाः प्रायो, यद्यसद्वेदनाः पुनः ।
अन्तर्मुहूर्त्तकालं स्युर्मुहूर्त्तात् परतो न हि ॥ ३५२ ॥

आ ऐशानात् समुत्पत्तिर्देवीनां गतिराऽच्युतात् ।
उत्पद्यन्ते तापसास्तु, ज्योतिष्कत्रिदशावधि ॥ ३५३ ॥

आ ब्रह्मलोकाच्चरक-परिव्राजां तु सम्भवः ।
पञ्चेन्द्रियतिरश्चामा सहस्रारं पुनर्जनिः ॥ ३५४ ॥

श्राद्धानामच्युतं मिथ्यादृशां तु जिनलिङ्गिनाम् ।
सामाचारीपालकानामन्त्यग्रैवेयकावधि ॥ ३५५ ॥

ब्रह्मलोकादिसर्वार्थसिद्धान्तं पूर्णपूर्विणाम् ।
साधु-श्राद्धानां सौधर्मे, सद्व्रतानां जघन्यतः ॥ ३५६ ॥

आ ऐशानाच्च भवनवास्याद्यास्त्रिदिवौकसः ।
भवन्त्यङ्गप्रवीचारास्ते हि सङ्क्लिष्टकर्मकाः ॥ ३५७ ॥

तीव्रानुरागाः सुरते, लीयमाना मनुष्यवत् ।
सर्वाङ्गीणस्पर्शसुखात्, प्रीतिमासादयन्ति तु ॥ ३५८ ॥

शेषाः स्पर्श-रूप-शब्दप्रवीचारा द्वयोर्द्वयोः ।
मनःप्रवीचारभृतश्चतुर्षु चाऽऽनतादिषु ॥ ३५९ ॥

अमरेभ्यः प्रवीचारवद्भ्योऽनन्तसुखात्मकाः ।
अपरेष्वप्रवीचारा, देवा ग्रैवेयकादिषु ॥ ३६० ॥

इत्यधस्तात् तिर्यगूर्ध्वभेदो लोकोऽस्य मध्यतः ।
त्रसनाड्यस्ति च चतुर्दशरज्जुप्रमाणिका ॥ ३६१ ॥

ऊर्ध्वा-ऽधोभागयो रज्जुप्रमाणायाम-विस्तृतिः ।
अन्तस्त्रसाः स्थावराश्च, स्थावरा एव तद्बहिः ॥ ३६२ ॥

विस्तारेऽधः सप्तरज्जुरेकरज्जुश्च मध्यतः ।
ब्रह्मलोके पञ्चरज्जुः, पर्यन्ते चैकरज्जुकः ॥ ३६३ ॥

सुप्रतिष्ठाकृतिर्लोको, न केनाऽपि कृतो धृतः ।
स्वयंसिद्धो निराधारो, व्योम्नि तिष्ठति किन्त्वसौ ? ॥ ३६४ ॥

अमुं लोकं समस्तं वा, व्यस्तं वाऽपि हि चिन्तयेत् ।
धीमान् शुभेतरध्यानप्रतिषेधनिबन्धनम् ॥ ३६५ ॥

धर्मध्याने भवेद् भावः, क्षायोपशमिकादिकः ।
लेश्याः क्रमविशुद्धाः स्युः, पीत-पद्म-सिताः पुनः ॥ ३६६ ॥

अस्मिन् नितान्तवैराग्यव्यतिषङ्गतरङ्गिते ।
जायते देहिनां सौख्यं, स्वसंवेद्यमतीन्द्रियम् ॥ ३६७ ॥

त्यक्तसङ्गास्तनुं त्यक्त्वा, धर्मध्यानेन योगिनः ।
ग्रैवेयकादिस्वर्गेषु, भवन्ति त्रिदशोत्तमाः ॥ ३६८ ॥

महामहिमसौभाग्यं, शरच्चन्द्रनिभप्रभम् ।
प्राप्नुवन्ति वपुस्तत्र, स्रग्भूषा-ऽम्बरभूषितम् ॥ ३६९ ॥

विशिष्टवीर्यबोधाढ्यं, कामार्तिज्वरवर्जितम् ।
निरन्तरायं सेवन्ते, सुखं चाऽनुपमं चिरम् ॥ ३७० ॥

इच्छासम्पन्नसर्वार्थमनोहारिसुखामृतम् ।
निर्विघ्नमुपभुञ्जाना, गतं जन्म न जानते ॥ ३७१ ॥

दिव्यभोगावसाने च, च्युत्वा त्रिदिवतस्ततः ।
उत्तमेन शरीरेणाऽवतरन्ति महीतले ॥ ३७२ ॥

दिव्यवंशे समुत्पन्ना, नित्योत्सवमनोरमान् ।
भुञ्जते विविधान् भोगानखण्डितमनोरथाः ॥ ३७३ ॥

ततो विवेकमाश्रित्य, विरज्याऽशेषभोगतः ।
ध्यानेन ध्वस्तकर्माणः, प्रयान्ति पदमव्ययम् ॥ ३७४ ॥

एवं विश्वजनीनेनं, तीर्थनाथेन निर्ममे ।
त्रिजगत्कुमुदानन्दकौमुदी धर्मदेशना ॥ ३७५ ॥

## ॥ तृतीयश्रीसंभवजिनदेशना-अनित्यतादर्शिका ॥

अनित्यं सर्वमप्यस्मिन् संसारे वस्तु वस्तुतः ।
मुधा सुखलवेनाऽपि तत्र मूर्च्छा शरीरिणाम् ॥ १ ॥

स्वतोऽन्यतश्च सर्वाभ्यो दिग्भ्यश्चाऽऽगच्छदापदः ।
कृतान्तदन्तयन्त्रस्थाः कष्टं जीवन्ति जन्तवः ॥ २ ॥

वज्रसारेषु देहेषु यद्यास्कन्दत्यनित्यता ।
रम्भागर्भसगर्भेषु का कथा तर्हि देहिनाम् ? ॥ ३ ॥

असारेषु शरीरेषु स्थेमानं यश्चिकीर्षति ।
जीर्ण-शीर्णपलालोत्थे चञ्चापुंसि करोतु सः ॥ ४ ॥

न मन्त्र-तन्त्र-भैषज्यकरणानि शरीरिणाम् ।
त्राणाय मरणव्याघ्रमुखकोटरवासिनाम् ॥ ५ ॥

प्रवर्द्धमानं पुरुषं प्रथमं ग्रसते जरा ।
ततः कृतान्तस्त्वरते धिगहो ! जन्म देहिनाम् ॥ ६ ॥

यद्यात्मानं विजानीयात् कृतान्ते वशवर्तिनम् ।
को ग्रासमपि गृह्णीयात् ? पापकर्मसु का कथा ? ॥ ७ ॥

समुत्पद्य समुत्पद्य विपद्यन्तेऽप्सु बुद्बुदाः ।
यथा तथा क्षणेनैव शरीराणि शरीरिणाम् ॥ ८ ॥

आढ्यं निःस्वं नृपं रङ्कं ज्ञं मूर्खं सज्जनं खलम् ।
अविशेषेण संहर्तुं समवर्ती प्रवर्तते ॥ ९ ॥

न गुणेष्वस्य दाक्षिण्यं द्वेषो दोषेषु वाऽस्ति न ।
दावाग्निवदरण्यानीं विलुम्पत्यन्तको जनम् ॥ १० ॥

इदं तु मा स्म शङ्कध्वं कुशास्त्रैरपि मोहिताः ।
कुतोऽप्युपायतः कायो निरपायो भवेदिति ॥ ११ ॥

ये मेरुं दण्डसात् कर्तुं पृथ्वीं वा छत्रसात् क्षमाः ।
तेऽपि त्रातुं स्वमन्यं वा न मृत्योः प्रभविष्णवः ॥ १२ ॥

आ कीटादा च देवेन्द्रात् प्रभावन्तकशासने ।
अनुन्मत्तो न भाषेत कथञ्चित् कालवञ्चनाम् ॥ १३ ॥

पूर्वेषां चेत् क्वचित् कश्चिज्जीवन् दृश्येत कैश्चन ।
न्यायपथातीतमपि स्यात् तदा कालवञ्चनम् ॥ १४ ॥

अनित्यं यौवनमपि प्रतियन्तु मनीषिणः ।
बल-रूपापहारिण्या जरसा जर्जरीभवत् ॥ १५ ॥

यौवने कामिनीभिर्ये काम्यन्ते कामलीलया ।
निकामकृतथूत्कारं त्यज्यन्ते तेऽपि वार्द्धके ॥ १६ ॥

यदर्जितं बहुक्लेशैरभुक्त्वा यच्च पालितम् ।
तद् याति क्षणमात्रेण निधनं धनिनां धनम् ॥ १७ ॥

उपमानपदं किं स्यात् फेन-बुदबुद-विद्युता ? ।
धनस्य नश्यतोऽवश्यं पश्यतामपि तद्वताम् ॥ १८ ॥

समागमाः सापगमाः सुहृद्भिर्बन्धुभिर्जनैः ।
स्वस्य वाऽन्यस्य वा नाशे विकृतेऽपकृतेऽपि वा ॥ १९ ॥

ध्यायन्ननित्यतां नित्यं मृतं पुत्रं न शोचति ।
नित्यताग्रहमूढस्तु कुड्यभङ्गेऽपि रोदिति ॥ २० ॥

शरीर-यौवन-धन-बान्धवादि न केवलम् ।
अनित्यं किन्तु भुवनमप्येतत् सचराचरम् ॥ २१ ॥

इत्यनित्यं विदन् सर्वं शरीरी निष्परिग्रहः ।
नित्याय नित्यसौख्याय पदाय प्रयतेत तत् ॥ २२ ॥

## चतुर्थश्रीमदभिनन्दनजिनदेशना-अशरणतादर्शिनी

संसारोऽयं विपत्खानिरस्मिन् निपततः सतः ।
पिता माता सुहृद् बन्धुरन्योऽपि शरणं न हि ॥ १ ॥

इन्द्रोपेन्द्रादयोऽप्यत्र यन्मृत्योर्यान्ति गोचरम् ।
अहो ! तदन्तकातङ्के कः शरण्यः शरीरिणाम् ? ॥ २ ॥

पितुर्मातुः स्वसुर्भ्रातुस्तनयानां च पश्यताम् ।
अत्राणो नीयते जन्तुः कर्मभिर्यमसद्मनि ॥ ३ ॥

शोचन्ति स्वजनानन्तं नीयमानान् स्वकर्मभिः ।
नेष्यमाणं तु शोचन्ति नाऽऽत्मानं मूढबुद्धयः ॥ ४ ॥

संसारे दुःखदावाग्निज्वलज्ज्वालाकरालिते ।
वने मृगार्भकस्येव शरणं नास्ति देहिनः ॥ ५ ॥

अष्टाङ्गेनाऽऽयुर्वेदेन जीवातुभिरथाऽगदैः ।
मृत्युञ्जयादिभिर्मन्त्रैस्त्राणं नैवाऽस्ति मृत्युतः ॥ ६ ॥

खड्गपञ्जरमध्यस्थश्चतुरङ्गचमूवृतः ।
रङ्कवत् कृष्यते राजा हठेन यमकिङ्करैः ॥ ७ ॥

यथा मृत्युप्रतीकारं पशवो नैव जानते ।
विपश्चितोऽपि हि तथा धिक् प्रतीकारमूढताम् ॥ ८ ॥

येऽसिमात्रोपकरणाः कुर्वते क्ष्मामकण्टकाम् ।
यमभ्रूभङ्गभीतास्तेऽप्यास्ये निदधतेऽङ्गुलीः ॥ ९ ॥

मुनीनामप्यपापानामसिधारोपमैर्व्रतैः ।
न शक्यते कृतान्तस्य प्रतिकर्तुं कदाचन ॥ १० ॥

अशरण्यमहो ! विश्वमराजकमनायकम् ।
यदेतदप्रतीकारं ग्रस्यते यमरक्षसा ॥ ११ ॥

योऽपि धर्मप्रतीकारो न सोऽपि मरणं प्रति ।
शुभां गतिं ददानस्तु प्रतिकर्तेति कीर्त्यते ॥ १२ ॥

प्रव्रज्यालक्षणोपायमादायाक्षय्यशर्मणे ।
चतुर्थपुरुषार्थाय यतितव्यमहो ! ततः ॥ १३ ॥

## पञ्चमश्रीसुमतिजिनदेशना - एकत्वनिरूपिका

कृत्याकृत्यपरिज्ञानयोग्यतामभ्युपेयुषा ।
इह स्वकार्यमूढेन न स्थातव्यं शरीरिणा ॥ १ ॥

पुत्र-मित्र-कलत्रादेः शरीरस्यापि सत्क्रिया ।
परकार्यमिदं सर्वं न स्वकार्यं मनागपि ॥ २ ॥

एक उत्पद्यते जन्तुरेक एव विपद्यते ।
कर्माण्यनुभवत्येकः प्रचितानि भवान्तरे ॥ ३ ॥

अन्यैस्तेनार्जितं वित्तं भूयः सम्भूय भुज्यते ।
स त्वेको नरकक्रोडे क्लिश्यते निजकर्मभिः ॥ ४ ॥

दुःखदावाग्निभीष्मेऽस्मिन् वितते भवकानने ।
बम्भ्रमीत्येक एवासौ जन्तुः कर्मवशीकृतः ॥ ५ ॥

इह जीवस्य मा भूवन् सहाया बान्धवादयः ।
शरीरं तु सहायश्चेत् सुख-दुःखानुभूतिदम् ॥ ६ ॥

नाऽऽयाति पूर्वभवतो न याति च भवान्तरम् ।
ततः कायः सहायः स्यात् सम्फेटमिलितः कथम् ? ॥ ७ ॥

धर्मा-ऽधर्मौ समासन्नौ सहायाविति चेन्मतिः ।
नैषा सत्या न मोक्षेऽस्ति धर्मा-ऽधर्मसहायता ॥ ८ ॥

तस्मादेको बम्भ्रमीति भवे कुर्वन् शुभा-ऽशुभे ।
जन्तुर्वेदयते चैतदनुरूपे शुभा-ऽशुभे ॥ ९ ॥

एक एव समादत्ते मोक्षश्रियमनुत्तराम् ।
सर्वसम्बन्धिविरहाद् द्वितीयस्य न सम्भवः ॥ १० ॥

यद् दुःखं भवसम्बन्धि यत् सुखं मोक्षसम्भवम् ।
एक एवोपभुङ्क्ते तत्र सहायोऽस्ति कश्चन ॥ ११ ॥

यथा चैकस्तरन् सिन्धुं पारं व्रजति तत्क्षणात् ।
न तु हृत्पाणि-पादादिसंयोजितपरिग्रहः ॥ १२ ॥

तथैव धन-देहादिपरिग्रहपराङ्मुखः ।
स्वस्थ एको भवाम्भोधेः पारमासादयत्यसौ ॥ १३ ॥

तत् सांसारिकसम्बन्धं विहायैकाकिना सता ।
यतितव्यं हि मोक्षाय शाश्वतानन्दशर्मणे ॥ १४ ॥

## ॥ षष्ठश्रीपद्मप्रभजिनदेशना - चतुर्गतिस्वरूपम् ॥

पारावार इवापारः संसारो घोर एष भोः ! ।
प्राणिनश्चतुरशीतियोनिलक्षेषु पातयन् ॥ १ ॥

श्रोत्रियः श्वपचः स्वामी पत्तिर्ब्रह्मा कृमिश्च सः ।
संसारनाट्ये नटवत् संसारी हन्त ! चेष्टते ॥ २ ॥

न याति कतमां योनिं ? कतमां वा न मुञ्चति ? ।
संसारी कर्मसम्बन्धादवक्रयकुटीमिव ॥ ३ ॥

समस्तलोकाकाशेऽपि नानारूपैः स्वकर्मतः ।
वालाग्रमपि तन्नास्ति यन्न स्पृष्टं शरीरिभिः ॥ ४ ॥

संसारिणश्चतुर्भेदाः श्वभ्रि-तिर्यङ्-नरा-ऽमराः ।
प्रायेण दुःखबहुलाः कर्मसम्बन्धबाधिताः ॥ ५ ॥

आद्येषु त्रिषु नरकेषूष्णं शीतं परेषु च ।
चतुर्थे शीतमुष्णं च दुःखं क्षेत्रोद्भवं त्विदम् ॥ ६ ॥

नरकेषूष्णशीतेषु चेत् पतेल्लोहपर्वतः ।
विलीयेत विशीर्येत तदा भुवमनाप्नुवन् ॥ ७ ॥

उदीरितमहादुःखा अन्योऽन्येनासुरैश्च ते ।
इति त्रिविधदुःखार्ता वसन्ति नरकावनौ ॥ ८ ॥

समुत्पन्ना घटीयन्त्रेष्वधार्मिकसुरैर्बलात् ।
आकृष्यन्ते लघुद्वारा यथा सीसशलाकिका ॥ ९ ॥

गृहीत्वा पाणि-पादादौ वज्रकण्टकसङ्कटे ।
आस्फाल्यन्ते शिलापृष्ठे वासांसि रजकैरिव ॥ १० ॥

दारुदारं विदार्यन्ते दारुणैः क्रकचैः क्वचित् ।
तिलपेषं च पिष्यन्ते चित्रयन्त्रैः क्वचित् पुनः ॥ ११ ॥

पिपासार्त्ताः पुनस्तप्तत्रपु-सीसकवाहिनीम् ।
नदीं वैतरणीं नामावतार्यन्ते वराककाः ॥ १२ ॥

छायाभिकाङ्क्षिणः क्षिप्रमसिपत्रवनं गताः ।
पत्रशस्त्रैः पतद्भिस्ते छिद्यन्ते तिलशोऽसकृत् ॥ १३ ॥

संश्लेष्यन्ते च शाल्मल्यो वज्रकण्टकसङ्कुलः ।
तप्तायःपुत्रिकाः क्वापि स्मारितान्यवधूरतम् ॥ १४ ॥

संस्मार्य मांसलोलत्वमाश्यन्ते मांसमङ्गजम् ।
प्रख्याप्य मधुलौल्यं च पाय्यन्ते तापितं त्रपु ॥ १५ ॥

भ्राष्ट्र-कण्डू-महाशूल-कुम्भीपाकादिवेदनाः ।
अश्रान्तमनुभाव्यन्ते भृज्ज्यन्ते च भटित्रवत् ॥ १६ ॥

छिन्न-भिन्नशरीराणां भूयो मिलितवर्ष्मणाम् ।
नेत्राद्यङ्गानि कृष्यन्ते बक-कङ्कादिपक्षिभिः ॥ १७ ॥

एवं महादुःखहताः सुखांशेनापि वर्जिताः ।
गमयन्ति बहुं कालम् आ त्रयस्त्रिंशसागरम् ॥ १८ ॥

तिर्यग्गतिमपि प्राप्ताः सम्प्राप्यैकेन्द्रियादिताम् ।
तत्रापि पृथिवीकायरूपतां समुपागताः ॥ १९ ॥

हलादिशस्त्रैः पाट्यन्ते मृद्यन्तेऽश्व-गजादिभिः ।
वारिप्रवाहैः प्लाव्यन्ते दह्यन्ते च दवाग्निना ॥ २० ॥

व्यथ्यन्ते लवणा-ऽचाम्ल-मूत्रादिसलिलैरपि ।
लवणक्षारतां प्राप्ताः क्वथ्यन्ते चोष्णवारिणा ॥ २१ ॥

पच्यन्ते कुम्भकाराद्यैः कृत्वा कुम्भेष्टकादिसात् ।
चीयन्ते भित्तिमध्ये च नीत्वा कर्दमरूपताम् ॥ २२ ॥

केचिच्छाणैर्निघृष्यन्ते विपच्य क्षारमृत्पुटैः ।
टङ्काण्डकैर्विदार्यन्ते पाट्यन्तेऽद्रिसरित्प्लवैः ॥ २३ ॥

अप्कायतां पुनः प्राप्तास्ताप्यन्ते तपनांशुभिः ।
घनीक्रियन्ते तुहिनैः संशोष्यन्ते च पांसुभिः ॥ २४ ॥

क्षारेतररसाश्लेषाद् विपद्यन्ते परस्परम् ।
स्थाल्यन्तस्था विपच्यन्ते पीयन्ते च पिपासितैः ॥ २५ ॥

तेजस्कायत्वमाप्ताश्च विध्याप्यन्ते जलादिभिः ।
घनादिभिः प्रकुट्यन्ते ज्वाल्यन्ते चेन्धनादिभिः ॥ २६ ॥

वायुकायत्वमप्याप्ता हन्यन्ते व्यजनादिभिः ।
शीतोष्णादिद्रव्ययोगाद् विपद्यन्ते क्षणे क्षणे ॥ २७ ॥

प्राचीनाद्यास्तु सर्वेऽपि विराध्यन्ते परस्परम् ।
मुखादिवातैर्बाध्यन्ते पीयन्ते चोरगादिभिः ॥ २८ ॥

वनस्पतित्वं दशधा प्राप्ताः कन्दादिभेदतः ।
छिद्यन्ते वाऽथ भिद्यन्ते पच्यन्ते वाऽग्नियोगतः ॥ २९ ॥

संशोष्यन्ते निपिष्यन्ते प्लुष्यन्तेऽन्योन्यघर्षणैः ।
क्षारादिभिश्च दह्यन्ते सन्धीयन्ते च भोक्तृभिः ॥ ३० ॥

सर्वावस्थासु खाद्यन्ते भज्यन्ते च प्रभञ्जनैः ।
क्रियन्ते भस्मसाद् दावैरुन्मूल्यन्ते सरित्प्लवैः ॥ ३१ ॥

सर्वेऽपि वनस्पतयः सर्वेषां भोज्यतां गताः ।
सर्वैः शस्त्रैः सर्वदाऽनुभवन्ति क्लेशसन्ततिम् ॥ ३२ ॥

द्वीन्द्रियत्वे च ताप्यन्ते पीयन्ते पूतरादयः ।
चूर्ण्यन्ते कृमयः पादैर्भक्ष्यन्ते चटकादिभिः ॥ ३३ ॥

शङ्खादयो निखन्यन्ते निष्कृष्यन्ते जलौकसः ।
गण्डूपदाद्याः पात्यन्ते जठरादौषधादिभिः ॥ ३४ ॥

त्रीन्द्रियत्वेऽपि सम्प्राप्ते षट्पदी-मत्कुणादयः ।
विमृद्यन्ते शरीरेण ताप्यन्ते चोष्णवारिणा ॥ ३५ ॥

पिपीलिकास्तु तुद्यन्ते पादैः सम्मार्जनेन च ।
अदृश्यमानाः कुन्थ्वाद्या मथ्यन्ते चाऽऽसनादिभिः ॥ ३६ ॥

चतुरिन्द्रियताभाजः सरघा-भ्रमरादयः ।
मधुभक्षैर्विराध्यन्ते यष्टि-लोष्टादिताडनैः ॥ ३७ ॥

ताड्यन्ते तालवृन्ताद्यैर्द्राग् दंश-मशकादयः ।
ग्रस्यन्ते गृहगोधाद्यैर्मक्षिका-मर्कटादयः ॥ ३८ ॥

पञ्चेन्द्रिया जलचराः खाद्यन्तेऽन्योन्यमुत्सुकाः ।
धीवरैः परिगृह्यन्ते गिल्यन्ते च बकादिभिः ॥ ३९ ॥

उत्कील्यन्ते त्वचयद्भिः प्राप्यन्ते च भटित्रताम् ।
भोक्तुकामैर्विपच्यन्ते निगाल्यन्ते वसार्थिभिः ॥ ४० ॥

स्थलचारिषु चोत्पन्ना अबला बलवत्तरैः ।
मृगाद्याः सिंहप्रमुखैर्मार्यन्ते मांसकाङ्क्षिभिः ॥ ४१ ॥

मृगयासक्तचित्तैस्तु क्रीडया मांसकाम्यया ।
नरैस्तत्तदुपायेन हन्यन्तेऽनपराधिनः ॥ ४२ ॥

क्षुधा-पिपासा-शीतोष्णा-ऽतिभारारोपणादिना ।
कशा-ऽङ्कुश-प्रतोदैश्च वेदनां प्रसहन्त्यमी ॥ ४३ ॥

खेचरास्तित्तिर-शुक-कपोत-चटकादयः ।
श्येन-सिञ्चान-गृध्राद्यैर्ग्रस्यन्ते मांसगृध्नुभिः ॥ ४४ ॥

मांसलुब्धैः शाकुनिकैर्नानोपायप्रपञ्चतः ।
सङ्गृह्य प्रतिहन्यन्ते नानारूपैर्विडम्बनैः ॥ ४५ ॥

जला-ग्नि-शस्त्रादिभवं तिरश्चां सर्वतोभयम् ।
कियद् वा वर्ण्यते स्वस्वकर्मबन्धनिबन्धनम् ? ॥ ४६ ॥

मनुष्यत्वेऽनार्यदेशे समुत्पन्नाः शरीरिणः ।
तत् तत् पापं प्रकुर्वन्ति यद् वक्तुमपि न क्षमम् ॥ ४७ ॥

उत्पन्ना आर्यदेशेऽपि चाण्डाल-श्वपचादयः ।
तत् तत् पापं प्रकुर्वन्ति दुःखान्यनुभवन्ति च ॥ ४८ ॥

आर्यदेशे समुद्भूता अप्यनार्यविचेष्टिताः ।
दुःख-दारिद्र्य-दौर्भाग्यनिर्दग्धा दुःखमासते ॥ ४९ ॥

परसम्पत्प्रकर्षेणापकर्षेण स्वसम्पदाम् ।
परप्रेष्यतया दग्धा दुःखं जीवन्ति मानवाः ॥ ५० ॥

रुग्-जरा-मरणैर्ग्रस्ता नीचकर्मकदर्थिताः ।
तां तां दुःखदशां दीनाः प्रपद्यन्ते दयास्पदम् ॥ ५१ ॥

जरा रुजा मृतिर्दास्यं न तथा दुःखकारणम् ।
गर्भे वासो यथा घोरनरकावाससन्निभः ॥ ५२ ॥

सूचीभिरग्निवर्णाभिर्भिन्नस्य प्रतिरोम यत् ।
दुःखं नरस्याष्टगुणं तद् भवेद् गर्भवासिनः ॥ ५३ ॥

योनियन्त्राद् विनिष्क्रामन् यद् दुःखं लभते भवी ।
गर्भवासभवाद् दुःखात् तदनन्तगुणं खलु ॥ ५४ ॥

बाल्ये मूत्र-पुरीषेण यौवने रतचेष्टितैः ।
वार्धके श्वास-कासाद्यैर्जनो जातु न लज्जते ॥ ५५ ॥

पुरीषसूकरः पूर्वं ततो मदनगर्दभः ।
जराजरद्गवः पश्चात् कदाऽपि न पुमान् पुमान् ॥ ५६ ॥

स्याच्छैशवे मातृमुखस्तारुण्ये तरुणीमुखः ।
वृद्धभावे सुतमुखो मूर्खो नान्तर्मुखः क्वचित् ॥ ५७ ॥

सेवा-कर्षण-वाणिज्य-पाशुपाल्यादिकर्मभिः ।
क्षपयत्यफलं जन्म धनाशाविह्वलो जनः ॥ ५८ ॥

क्वचिच्चौर्यं क्वचिद् द्यूतं क्वचिन्नीचैर्भुजङ्गता ।
मनुष्याणामहो ! भूयो भवभ्रमनिबन्धनम् ॥ ५९ ॥

सुखित्वे कामललितैर्दुःखित्वे दैन्य-रोदनैः ।
नयन्ति जन्म मोहान्धा न पुनर्धर्मकर्मभिः ॥ ६० ॥

अनन्तकर्मप्रचयक्षयक्षममिदं क्षणात् ।
मानुषत्वमपि प्राप्ताः पापाः पापानि कुर्वते ॥ ६१ ॥

ज्ञान-दर्शन-चारित्ररत्नत्रितयभाजने ।
मनुजत्वे पापकर्म स्वर्णभाण्डे सुरोपमम् ॥ ६२ ॥

संसारसागरगतैः शमिलायुगयोगवत् ।
लब्धं कथञ्चिन्मानुष्यं हा ! रत्नमिव हार्यते ॥ ६३ ॥

लब्धे मानुष्यके स्वर्ग-मोक्षप्राप्तिनिबन्धने ।
हा ! नरकाप्त्युपायेषु कर्मसूत्तिष्ठते जनः ॥ ६४ ॥

आशास्यते यत् प्रयत्नादनुत्तरसुरैरपि ।
तत् सम्प्राप्तं मनुष्यत्वं पापैः पापेषु योज्यते ॥ ६५ ॥

परोक्षं नरके दुःखं प्रत्यक्षं नरजन्मनि ।
तत्प्रपञ्चः प्रपञ्चेन किमर्थमुपवर्ण्यते ? ॥ ६६ ॥

शोका-ऽमर्ष-विषादेर्ष्या-दैन्यादिहतबुद्धिषु ।
अमरेष्वपि दुःखस्य साम्राज्यमनुवर्तते ॥ ६७ ॥

दृष्ट्वा परस्य महतीं श्रियं प्राग्जन्मजीवितम् ।
अर्जितस्वल्पसुकृतं शोचन्ति सुचिरं सुराः ॥ ६८ ॥

विराद्धा बलिनाऽन्येन प्रतिकर्तुं तमक्षमाः ।
तीक्ष्णेनामर्षशल्येन दोदूयन्ते निरन्तरम् ॥ ६९ ॥

न कृतं सुकृतं किञ्चिदाभियोग्यं ततो हि नः ।
दृष्टोत्तरोत्तरश्रीका विषीदन्तीति नाकिनः ॥ ७० ॥

दृष्ट्वाऽन्येषां विमान-स्त्री-रत्नोपवनसम्पदम् ।
यावज्जीवं विपच्यन्ते ज्वलदीर्ष्यानलोर्मिभिः ॥ ७१ ॥

हा प्राणेश ! प्रभो ! देव ! प्रसीदेति सगद्गदम् ।
परैर्मूषितसर्वस्वा भाषन्ते दीनवृत्तयः ॥ ७२ ॥

प्राप्तेऽपि पुण्यतः स्वर्गे काम-क्रोध-भयातुराः ।
न स्वस्थतामश्नुवते सुराः कान्दर्पिकादयः ॥ ७३ ॥

अथ च्यवनचिह्नानि दृष्ट्वा दृष्ट्वा विमृश्य च ।
विलीयन्तेऽथ जल्पन्ति क्व निलीयामहे वयम् ? ॥ ७४ ॥

तथाहि-अम्लाना अपि हि मालाः सुरद्रुमसमुद्भवाः ।
म्लानीभवन्ति देवानां वदनाम्भोरुहैः समम् ॥ ७५ ॥

हृदयेन समं विश्वग्विश्लिष्यत्सन्धिबन्धनाः ।
महाबलैरप्यकम्प्याः कम्पन्ते कल्पपादपाः ॥ ७६ ॥

आकालप्रतिपन्नाभ्यां प्रियाभ्यां च सहैव हि ।
श्री-ह्रीभ्यां परिमुच्यन्ते कृतागस इवामराः ॥ ७७ ॥

अम्बरश्रीरपमला मलिनीभवति क्षणात् ।
अप्यकस्माद् विसृमरैरघौघैर्मलिनैर्घनैः ॥ ७८ ॥

अदीना अपि दैन्येन विनिद्रा अपि निद्रया ।
आश्रीयन्ते मृत्युकाले पक्षाभ्यामिव कीटिकाः ॥ ७९ ॥

विषयेष्वतिरज्यन्ते न्यायधर्मविबाधया ।
अपथ्यान्यपि यत्नेन स्पृहयन्ति मुमूर्षवः ॥ ८० ॥

नीरुजामपि भज्यन्ते सर्वाङ्गोपाङ्गसन्धयः ।
भाविदुर्गतिपातोत्थवेदनाविवशा इव ॥ ८१ ॥

पदार्थग्रहणेऽकस्माद् भवन्त्यपटुदृष्टयः ।
परेषां सम्पदुत्कर्षमिव प्रेक्षितुमक्षमाः ॥ ८२ ॥

गर्भावासनिवासोत्थदुःखागमभयादिव ।
प्रकम्पतरलैरङ्गैर्भाययन्ति परानपि ॥ ८३ ॥

निश्चितच्यवनाश्चिह्नैर्लभन्ते न रतिं क्वचित् ।
विमाने नन्दने वाप्यामङ्गारालिङ्गिता इव ॥ ८४ ॥

हा प्रियाः ! हा विमानानि ! हा वाप्यो ! हा सुरद्रुमाः ! ।
क्व द्रष्टव्याः पुनर्यूयं हतदैववियोजिताः ? ॥ ८५ ॥

अहो ! स्मितं सुधावृष्टिरहो ! बिम्बाधरः सुधा ।
अहो ! वाणी सुधावर्षिण्यहो ! कान्ता सुधामयी ॥ ८६ ॥

हा रत्नघटिता स्तम्भाः ! हा श्रीमन्मणिकुट्टिमाः ! ।
हा वेदिका रत्नमय्यः ! कस्य यास्यथ संश्रयम् ? ॥ ८७ ॥

हा ! रत्नसोपानचिताः कमलोत्पलमालिनः ।
भविष्यन्त्युपभोगाय कस्येमाः पूर्णवापयः ? ॥ ८८ ॥

हे पारिजात ! मन्दार ! सन्तान ! हरिचन्दन ! ।
कल्पद्रुम ! विमोक्तव्यः किं भवद्भिरयं जनः ? ॥ ८९ ॥

हहा ! स्त्रीगर्भनरके वस्तव्यमवशस्य मे ।
हहाऽशुचिरसास्वादः कर्तव्यो मयका मुहुः ? ॥ ९० ॥

हहा हा ! जठराङ्गारशकटीपाकसम्भवम् ।
मया दुःखं विषोढव्यं बद्धेन निजकर्मणा ? ॥ ९१ ॥

रतेरिव निधानानि क्व तास्ताः सुरयोषितः ?
क्वाऽशुचिस्यन्दबीभत्सा भोक्तव्या नरयोषितः ? ॥ ९२ ॥

एवं स्वर्लोकवस्तूनि स्मारं स्मारं दिवौकसः ।
विलपन्तः क्षणस्यान्तर्विध्यायन्ति प्रदीपवत् ॥ ९३ ॥

असारमित्थं संसारं चिन्तयित्वा विमुक्तये ।
प्रयतेत परिव्रज्योपायेन शुभधीर्जनः ॥ ९४ ॥

## ॥ सप्तमश्रीसुपार्श्वजिनदेशना - अन्यत्वनिरूपिका ॥

आत्मनः सर्वमप्येतदन्यत् तदिह तत्कृते ।
कृत्वा कर्म भवाब्धौ स्वं पातयत्यबुधो जनः ॥ १ ॥

यत्रान्यत्वं शरीरस्य वैसदृश्याच्छरीरिणः ।
धन-बन्धु-सहायानां तत्रान्यत्वं न दुर्वचम् ॥ २ ॥

यो देह-धन-बन्धुभ्यो भिन्नमात्मानमीक्षते ।
क्व शोकशङ्कुना तस्य हन्ताऽऽतङ्कः प्रतन्यते ? ॥ ३ ॥

इहान्यत्वं भवेद् भेदः स वैलक्षण्यलक्षणः ।
आत्म-देहादिभावानां साक्षादेव प्रतीयते ॥ ४ ॥

देहाद्या इन्द्रियग्राह्या आत्माऽनुभवगोचरः ।
तदेतेषामनन्यत्वं कथं नामोपपद्यते ? ॥ ५ ॥

आत्मदेहादिभावानां यद्यन्यत्वं स्फुटं ननु ।
ततो देहप्रहारादौ कथमात्मा प्रपीड्यते ? ॥ ६ ॥

सत्यं येषां शरीरादौ भेदबुद्धिर्न विद्यते ।
तेषां देहप्रहारादावात्मपीडोपजायते ॥ ७ ॥

ये तु देहा-ऽऽत्मनोर्भेदं सम्यगेव प्रपेदिरे ।
तेषां देहप्रहारादावपि नाऽऽत्मा प्रपीड्यते ॥ ८ ॥

भेदं विद्वान् न पीड्येत पितृदुःखेऽप्युपस्थिते ।
आत्मीयत्वाभिमानेन भृत्यदुःखेऽपि मुह्यति ॥ ९ ॥

अस्वत्वेन गृहीतः सन् पुत्रोऽपि पर एव हि ।
स्वकीयत्वेन भृत्योऽपि स्वपुत्रादतिरिच्यते ॥ १० ॥

सम्बन्धानात्मनो जन्तुर्यावतः कुरुते प्रियान् ।
तावन्तो हृदये तस्य जायन्ते शोकशङ्कवः ॥ ११ ॥

सर्वमन्यदिदं तस्माज्जानीयात् पटुधीर्जनः ।
कस्यापि हि विनाशात् तत्र मुह्येत् तत्त्ववर्त्मनि ॥ १२ ॥

अस्यन् ममत्वमृल्लेपं तुम्बीफलमिवाचिरात् ।
भवं तरति शुद्धात्मा परिव्रज्याधरो नरः ॥ १३ ॥

## ॥ अष्टमश्रीचन्द्रप्रभजिनदेशना - अशुचित्वदर्शिनी ॥

अनन्तक्लेशकल्लोलनिलयो भवसागरः ।
तिर्यगूर्ध्वमधो जन्तून् क्षिपत्येष प्रतिक्षणम् ॥ १ ॥

एकं निबन्धनं तस्य क्रियते प्राणिभी रतिः ।
अशुचौ कृमिभिरिव यदत्रापि शरीरके ॥ २ ॥

रसा-ऽसृग्-मांस-मेदो-ऽस्थि-मज्जा-शुक्रा-ऽन्त्र-वर्चसाम् ।
अशुचीनां पदं कायः शुचित्वं तस्य तत् कुतः ? ॥ ३ ॥

नवस्रोतःस्रवद्विस्त्ररसनिःस्यन्दपिच्छिले ।
देहेऽपि शौचसङ्कल्पो महामोहविजृम्भितम् ॥ ४ ॥

शुक्र-शोणितसम्भूतो मलनिःस्यन्दवर्धितः ।
गर्भे जरायुसञ्छन्नः शुचिः कायः कथं भवेत् ? ॥ ५ ॥

मातृजग्धान्न-पानोत्थरसं नाडीक्रमागतम् ।
पायं पायं विवृद्धः सन् शौचं मन्येत कस्तनोः ? ॥ ६ ॥

दोषधातुमलाकीर्णं कृमि-गण्डूपदास्पदम् ।
रोगभोगिगणैर्जग्धं शरीरं को वदेच्छुचि ? ॥ ७ ॥

सुस्वादून्यन्न-पानानि क्षीरेक्षुविकृतीरपि ।
भुक्तानि यत्र विष्ठायै तच्छरीरं कथं शुचि ? ॥ ८ ॥

विलेपनार्थमासक्तः सुगन्धिर्यक्षकर्दमः ।
मलीभवति यत्राऽऽशु क्व शौचं तत्र वर्ष्मणि ? ॥ ९ ॥

जग्ध्वा सुगन्धि ताम्बूलं सुप्तो निश्युत्थितः प्रगे ।
जुगुप्सते वक्त्रगन्धं यत्र तत् किं वपुः शुचि ? ॥ १० ॥

स्वतःसुगन्धयो गन्ध-धूप-पुष्प-स्रगादयः ।
यत्सङ्गाद् यान्ति दौर्गन्ध्यं सोऽपि कायः शुचीयते ? ॥ ११ ॥

अभ्यक्तोऽपि विलिप्तोऽपि धौतोऽपि घटकोटिभिः ।
न याति शुचितां कायः शुण्डाघट इवाऽशुचिः ॥ १२ ॥

मृज्जला-ऽनल-वातांशुस्नानैः शौचं वदन्ति ये ।
गतानुगतिकैस्तैस्तु विहितं तुषखण्डनम् ॥ १३ ॥

तदनेन शरीरेण कार्यं मोक्षफलं तपः ।
क्षाराब्धे रत्नवद् धीमानसारात् सारमुद्धरेत् ॥ १४ ॥

## ॥ नवमश्रीसुविधिजिनदेशना - आश्रवभावनामयी ॥

अनन्तदुःखसम्भारनिधानं खल्वयं भवः ।
प्रभवश्चाऽऽस्रवस्तस्य विषस्येव महोरगः ॥ १ ॥

मनो-वाक्कायकर्माणि योगाः कर्म शुभा-ऽशुभम् ।
यदाश्रवन्ति जन्तूनामाश्रवास्तेन कीर्तिताः ॥ २ ॥

मैत्र्यादिवासितं चेतः कर्म सूते शुभात्मकम् ।
कषाय-विषयाक्रान्तं वितनोत्यशुभं पुनः ॥ ३ ॥

शुभार्जनाय निर्मिथ्यं श्रुतज्ञानाश्रितं वचः ।
विपरीतं पुनर्ज्ञेयमशुभार्जनहेतवे ॥ ४ ॥

शरीरेण सुगुप्तेन शरीरी चिनुते शुभम् ।
सततारम्भिणा जन्तुघातकेनाशुभं पुनः ॥ ५ ॥

कषाया विषया योगाः प्रमादा-ऽविरती तथा ।
मिथ्यात्वमार्त्त-रौद्रे चेत्यशुभं प्रति हेतवः ॥ ६ ॥

यः कर्मपुद्गलादानहेतुः प्रोक्तः स आश्रवः ।
कर्माणि चाष्टधा ज्ञानावरणीयादिभेदतः ॥ ७ ॥

ज्ञान-दर्शनयोस्तद्वत् तद्धेतूनां च ये किल ।
विघ्न-निह्नव-पैशुन्या-ऽऽशातना-घात-मत्सराः ॥ ८ ॥

ते ज्ञान-दर्शनावारकर्महेतव आस्रवाः ।
देवपूजा गुरूपास्तिः पात्रदानं दया क्षमा ॥ ९ ॥

सरागसंयमो देशसंयमोऽकामनिर्जरा ।
शौचं बालतपश्चेति सद्वेद्यस्य स्युराश्रवाः ॥ १० ॥

दुःख-शोक-वधास्तापा-ऽऽक्रन्दने परिदेवनम् ।
स्वान्योभयस्थाः स्युरसद्वेद्यस्यामी इहाऽऽश्रवाः ॥ ११ ॥

वीतरागे श्रुते सङ्घे धर्मे सर्वसुरेषु च ।
अवर्णवादिता तीव्रमिथ्यात्वपरिणामिता ॥ १२ ॥

सर्वज्ञ-सिद्धि-देवापह्नवो धार्मिकदूषणम् ।
उन्मार्गदेशना-ऽनर्थाग्रहोऽसंयतपूजनम् ॥ १३ ॥

असमीक्षितकारित्वं गुर्वादिष्ववमानना ।
इत्यादयो दृष्टिमोहस्याऽऽश्रवाः परिकीर्तिताः ॥ १४ ॥

कषायोदयतस्तीव्रपरिणामो य आत्मनः ।
चारित्रमोहनीयस्य स आश्रव उदीरितः ॥ १५ ॥

उत्प्रासनं सकन्दर्पोपहासो हास्यशीलता ।
बहुप्रलापो दैन्योक्तिर्हासस्यामी स्युराश्रवाः ॥ १६ ॥

देशादिदर्शनौत्सुक्यं चित्रे रमण-खेलने ।
परचित्तावर्जनं चेत्याश्रवाः कीर्त्तिता रतेः ॥ १७ ॥

असूया पापशीलत्वं परेषां रतिनाशनम् ।
अकुशलप्रोत्साहनं चाऽरतेराश्रवा अमी ॥ १८ ॥

स्वयं भयपरीणामः परेषामथ भापनम् ।
त्रासनं निर्दयत्वं च भयं प्रत्याश्रवा अमी ॥ १९ ॥

परशोकाविष्करणं स्वशोकोत्पाद-शोचने ।
रोदनादिप्रसक्तिश्च शोकस्यैते स्युराश्रवाः ॥ २० ॥

चतुर्वर्णस्य सङ्घस्य परिवाद-जुगुप्सने ।
सदाचारजुगुप्सा च जुगुप्सायाः स्युराश्रवाः ॥ २१ ॥

ईर्ष्या-विषयगार्द्ध्ये च मृषावादोऽतिवक्रता ।
परदाररतासक्तिः स्त्रीवेदस्याऽऽश्रवा इमे ॥ २२ ॥

स्वदारमात्रसन्तोषोऽनीर्ष्या मन्दकषायता ।
अवक्राचारशीलत्वं पुंवेदस्याऽऽश्रवा इति ॥ २३ ॥

स्त्री-पुंसानङ्गसेवोग्राः कषायास्तीव्रकामता ।
पाखण्डस्त्रीव्रतभ्रंशः षण्ढवेदाश्रवा अमी ॥ २४ ॥

साधूनां गर्हणा धर्मोन्मुखानां विघ्नकारिता ।
मधु-मांसाविरतानामविरत्यभिवर्णनम् ॥ २५ ॥

विरताविरतानां चान्तरायकरणं मुहुः ।
अचारित्रगुणाख्यानं तथा चारित्रदूषणम् ॥ २६ ॥

कषाय-नोकषायाणामन्यस्थानामुदीरणम् ।
चारित्रमोहनीयस्य सामान्येनाऽऽश्रवा अमी ॥ २७ ॥

पञ्चेन्द्रियप्राणिवधो बह्वारम्भ-परिग्रहौ ।
निरनुग्रहता मांसभोजनं स्थिरवैरता ॥ २८ ॥

रौद्रध्यानं मिथ्यात्वा-ऽनन्तानुबन्धिकषायते ।
कृष्ण-नील-कपोताश्च लेश्या अनृतभाषणम् ॥ २९ ॥

परद्रव्यापहरणं मुहुर्मैथुनसेवनम् ।
*अवशेन्द्रियता चेति नरकायुष आश्रवाः* ॥ ३० ॥

उन्मार्गदेशना मार्गप्रणाशो गूढचित्तता ।
आर्त्तध्यानं सशल्यत्वं मायाऽऽरम्भ-परिग्रहौ ॥ ३१ ॥

शीलव्रते सातिचारे नील-कापोतलेश्यता ।
अप्रत्याख्यानकषायास्तिर्यगायुष आश्रवाः ॥ ३२ ॥

अल्पौ परिग्रहा-ऽऽरम्भौ सहजे मार्दवा-ऽऽर्जवे ।
कापोत-पीतलेश्यत्वं धर्मध्यानानुरागिता ॥ ३३ ॥

प्रत्याख्यानकषायत्वं परिणामश्च मध्यमः ।
संविभागविधायित्वं देवता-गुरुपूजनम् ॥ ३४ ॥

पूर्वालाप-प्रियालापौ सुखप्रज्ञापनीयता ।
लोकयात्रासु माध्यस्थ्यं मानुषायुष आश्रवाः ॥ ३५ ॥

सरागसंयमो देशसंयमोऽकामनिर्जरा ।
कल्याणमित्रसम्पर्को धर्मश्रवणशीलता ॥ ३६ ॥

पात्रे दानं तपः श्रद्धा रत्नत्रयाविराधना ।
मृत्युकाले परीणामो लेश्ययोः पद्म-पीतयोः ॥ ३७ ॥

बालतपो-ऽग्नि-तोयादिसाधनोल्लम्बनानि च ।
अव्यक्तसामायिकता दैवस्याऽऽयुष आश्रवाः ॥ ३८ ॥

मनो-वाक्कायवक्रत्वं परेषां विप्रतारणम् ।
मायाप्रयोगो मिथ्यात्वं पैशुन्यं चलचित्तता ॥ ३९ ॥

सुवर्णादिप्रतिच्छन्दकरणं कूटसाक्षिता ।
वर्ण-गन्ध-रस-स्पर्शाद्यन्यथापादनानि च ॥ ४० ॥

अङ्गोपाङ्गच्यावनानि यन्त्र-पञ्जरकर्म च ।
कूटमान-तुला-कर्मा-ऽन्यनिन्दा-ऽऽत्मप्रशंसनम् ॥ ४१ ॥

हिंसा-ऽनृत-स्तेया-ऽब्रह्म-महारम्भ-परिग्रहाः ।
परुषा-ऽसभ्यवचनं शुचिवेषादिना मदः ॥ ४२ ॥

मौखर्या-ऽऽक्रोशौ सौभाग्योपघातः कार्मणक्रिया ।
परकुतूहलोत्पादः परिहास-विडम्बने || ४३ ||

वेश्यादीनामलङ्कारदानं दावाग्निदीपनम् ।
देवादिव्याजाद् गन्धादिचौर्यं तीव्रकषायता || ४४ ||

चैत्य-प्रतिश्रया-ऽऽराम-प्रतिमानां विनाशनम् ।
अङ्गारादिक्रिया चैवाशुभस्य नाम्न आश्रवाः || ४५ ||

एत एवान्यथारूपास्तथा संसारभीरुता ।
प्रमादहानं सद्भावार्पणं क्षान्त्यादयोऽपि च || ४६ ||

दर्शने धार्मिकाणां च सम्भ्रमः स्वागतक्रिया ।
आश्रवाः शुभनाम्नोऽथ तीर्थकृन्नाम्न आश्रवाः || ४७ ||

भक्तिरर्हत्सु सिद्धेषु गुरुषु स्थविरेषु च ।
बहुश्रुतेषु गच्छे च श्रुतज्ञाने तपस्विषु || ४८ ||

आवश्यके व्रत-शीलेष्वप्रमादो विनीतता ।
ज्ञानाभ्यासस्तपस्त्यागौ मुहुर्ध्यानं प्रभावना || ४९ ||

सङ्घे समाधिजननं वैयावृत्यं च साधुषु ।
अपूर्वज्ञानग्रहणं विशुद्धिर्दर्शनस्य च || ५० ||

आद्यन्ततीर्थनाथाभ्यामेते विंशतिराश्रवाः ।
एको द्वौ वा त्रयः सर्वे वाऽन्यैः स्पृष्टा जिनेश्वरैः || ५१ ||

परस्य निन्दा-ऽवज्ञोपहासाः सद्गुणलोपनम् ।
सदसद्दोषकथनमात्मनस्तु प्रशंसनम् || ५२ ||

सदसद्गुणशंसा च सद्दोषाच्छादनं तथा ।
जात्यादिभिर्मदश्चेति नीचैर्गोत्राश्रवा अमी || ५३ ||

नीचैर्गोत्राश्रवविपर्यासो विगतगर्वता ।
वाक्काय-चित्तैर्विनय उच्चैर्गोत्राश्रवा अमी || ५४ ||

दाने लाभे च वीर्ये च तथा भोगोपभोगयोः ।
सव्याजा-ऽव्याजविघ्नोऽन्तरायकर्मण आश्रवाः ॥ ५५ ॥

तदित्याश्रवजन्माऽयमपारो भवसागरः ।
प्रव्रज्यायानपात्रेण तरणीयो मनीषिणा ॥ ५६ ॥

## ॥ दशमश्रीशीतलजिनदेशना - संवर भावनामयी ॥

संसारे क्षणिकं सर्वं नानादुःखनिबन्धनम् ।
मोक्षाय यतितव्यं तद् भवेन्मोक्षस्तु संवरात् ॥ १ ॥

सर्वेषामाश्रवाणां तु निरोधः संवरः स्मृतः ।
स पुनर्भिद्यते द्वेधा द्रव्य-भावविभेदतः ॥ २ ॥

यः कर्मपुद्गलाऽऽदानच्छेदः स द्रव्यसंवरः ।
भवहेतुक्रियात्यागः स पुनर्भावसंवरः ॥ ३ ॥

येन येन ह्युपायेन रुध्यते यो य आश्रवः ।
तस्य तस्य निरोधाय स स योज्यो मनीषिभिः ॥ ४ ॥

क्षमया मृदुभावेन ऋजुत्वेनाप्यनीहया ।
क्रोधं मानं तथा मायां लोभं रुन्ध्याद् यथाक्रमम् ॥ ५ ॥

असंयमकृतोत्सेकान् विषयान् विषसन्निभान् ।
निराकुर्यादखण्डेन संयमेन महामतिः ॥ ६ ॥

तिसृभिर्गुप्तिभिर्योगान् प्रमादं चाप्रमादतः ।
सावद्ययोगहानेन विरतिं चापि साधयेत् ॥ ७ ॥

सद्दर्शनेन मिथ्यात्वं शुभस्थैर्येण चेतसः ।
विजयेताऽऽर्त्त-रौद्रे च संवरार्थं कृतोद्यमः ॥ ८ ॥

यथा चतुष्पथस्थस्य बहुद्वारस्य वेश्मनः ।
अनावृतेषु द्वारेषु रजः प्रविशति ध्रुवम् ॥ ९ ॥

प्रविष्टं स्नेहयोगाच्च तन्मयत्वेन बध्यते ।
न विशेन्न च बध्येत द्वारेषु स्थगितेषु तु ॥ १० ॥

यथा वा सरसि क्वापि सर्वैर्द्वारैर्विशेज्जलम् ।
तेषु तु प्रतिरुद्धेषु प्रविशेन्न मनागपि ॥ ११ ॥

यथा वा यानपात्रस्य मध्ये रन्ध्रैर्विशेज्जलम् ।
कृते रन्ध्रपिधाने तु न स्तोकमपि तद् विशेत् ॥ १२ ॥

योगादिष्वाश्रवद्वारेष्वेवं रुद्धेषु सर्वतः ।
कर्मद्रव्यप्रवेशो न जीवे संवरशालिनि ॥ १३ ॥

संवरादाश्रवद्वारनिरोधः संवरः पुनः ।
क्षान्त्यादिभेदाद् बहुधा तथैव प्रतिपादितः ॥ १४ ॥

गुणस्थानेषु यो यः स्यात् संवरः स स उच्यते ।
मिथ्यात्वानुदयात् परस्थेषु मिथ्यात्वसंवरः ॥ १५ ॥

तथा देशविरत्यादौ स्यादविरतिसंवरः ।
अप्रमत्तसंयतादौ प्रमादसंवरो मतः ॥ १६ ॥

प्रशान्त-क्षीणमोहादौ भवेत् कषायसंवरः ।
अयोग्याख्यकेवलिनि सम्पूर्णो योगसंवरः ॥ १७ ॥

संवृतः संवरेणैवं भवस्यान्तं व्रजेत् सुधीः ।
निश्छिद्रयानपात्रेण सांयात्रिक इवाम्बुधेः ॥ १८ ॥

### ॥ एकादशश्रीश्रेयांसजिनदेशना - निर्जरा भावनामयी ॥

असावपारः संसारः स्वयम्भूरमणाब्धिवत् ।
कर्मोर्मिभिर्भ्राम्यतेऽस्मिंस्तिर्यगूर्ध्वमधो जनः ॥ १ ॥

घर्माम्भांस्यनिलेनेव भेषजेन रसा इव ।
कर्माण्यष्टापि जीर्यन्ति ध्रुवं निर्जरयैव हि ॥ २ ॥

संसारबीजभूतानां कर्मणां जरणादिह ।
निर्जरा सा स्मृता द्वेधा सकामा कामवर्जिता ॥ ३ ॥

ज्ञेया सकामा यमिनामकामा त्वन्यदेहिनाम् ।
कर्मणां फलवत् पाको यदुपायात् स्वतोऽपि च ॥ ४ ॥

सदोषमपि दीप्तेन सुवर्णं वह्निना यथा ।
तपोऽग्निना तप्यमानस्तथा जीवो विशुध्यति ॥ ५ ॥

अनशनमौनोदर्यं वृत्तेः संक्षेपणं तथा ।
रसत्यागस्तनुक्लेशो लीनतेति बहिस्तपः ॥ ६ ॥

प्रायश्चित्तं वैयावृत्यं स्वाध्यायो विनयोऽपि च ।
व्युत्सर्गोऽथ शुभध्यानं षोढेत्याभ्यन्तरं तपः ॥ ७ ॥

दीप्यमाने तपोवह्नौ बाह्ये चाभ्यन्तरेऽपि च ।
यमी जरति कर्माणि दुर्जराण्यपि तत्क्षणात् ॥ ८ ॥

यथा हि पिहितद्वारमुपायैः सर्वतः सरः ।
नवैर्नवैर्जलापूरैः पूर्यते नैव सर्वथा ॥ ९ ॥

तथैवाश्रवरोधेन कर्मद्रव्यैर्नवैर्नवैः ।
अयं न पूर्यते जीवः संवरेण समावृतः ॥ १० ॥

यथैव सरसस्तोयं संशुष्यति पुराचितम् ।
दिवाकरकरालांशुपातसंतापितं मुहुः ॥ ११ ॥

तथैव पूर्वसंबद्धं सर्वं कर्म शरीरिणाम् ।
तपसा ताप्यमानं सत् क्षयमायाति तत्क्षणात् ॥ १२ ॥

निर्जराकरणे बाह्याच्छ्रेष्ठमाभ्यन्तरं तपः ।
तत्राप्येकातपत्रत्वं ध्यानस्य मुनयो जगुः ॥ १३ ॥

चिरार्जितानि भूयांसि प्रबलान्यपि तत्क्षणात् ।
कर्माणि निर्जरन्त्येव योगिनो ध्यानशालिनः ॥ १४ ॥

यथैवोपचितो दोषः शोषमायाति लङ्घनात् ।
तथैव तपसा कर्म क्षीयते पूर्वसंचितम् ॥ १५ ॥

यथा वा मेघसंघाताः प्रचण्डपवनैर्हताः ।
इतस्ततो विशीर्यन्ते कर्माणि तपसा तथा ॥ १६ ॥

प्रतिक्षणं प्रभवन्त्यावपि संवरनिर्जरे ।
प्रकृष्येते यदा मोक्षं प्रसुवाते तदा ध्रुवम् ॥ १७ ॥

निर्भरां निर्जरां कुर्वंस्तपोभिर्द्विविधैरपि ।
सर्वकर्मविनिर्मोक्षं मोक्षमाप्नोति शुद्धधीः ॥ १८ ॥

## ॥ द्वादशश्रीवासुपूज्यजिनदेशना - धर्मस्वाख्याततत्वभावनामयी ॥

संसारसागरेऽमुष्मिन् शमिलायुगयोगवत् ।
कथञ्चित् प्राप्य मानुष्यं भाव्यं धर्मपरैर्नरैः ॥ १ ॥

स्वाख्यातः खलु धर्मोऽयं सर्वैरपि जिनोत्तमैः ।
यं समालम्बमानो हि न मज्जेद् भवसागरे ॥ २ ॥

संयमः सूनृतं शौचं ब्रह्माकिञ्चनता तपः ।
क्षान्तिर्मार्दवमृजुता मुक्तिश्च दशधा स तु ॥ ३ ॥

धर्मप्रभावतः कल्पद्रुमाद्या ददतीप्सितम् ।
गोचरेऽपि न ते यत् स्युरधर्माधिष्ठितात्मनाम् ॥ ४ ॥

अपारे व्यसनाम्भोधौ पतन्तं पाति देहिनम् ।
सदा सविधवर्त्येकबन्धुर्धर्मोऽतिवत्सलः ॥ ५ ॥

आप्लावयति नाम्भोधिराश्वासयति चाम्बुदः ।
यन्महीं स प्रभावोऽयं ध्रुवं धर्मस्य केवलः ॥ ६ ॥

न ज्वलत्यनलस्तिर्यग् यदूर्ध्वं वाति नानिलः ।
अचिन्त्यमहिमा तत्र धर्म एव निबन्धनम् ॥ ७ ॥

निरालम्बा निराधारा विश्वाधारा वसुन्धरा ।
यच्चावतिष्ठते तत्र धर्मादन्यत्र कारणम् ॥ ८ ॥

सूर्या-चन्द्रमसावेतौ विश्वोपकृतिहेतवे ।
उदयेते जगत्यस्मिन् नूनं धर्मस्य शासनात् ॥ ९ ॥

अबन्धूनामसौ बन्धुरसखीनामसौ सखा ।
अनाथानामसौ नाथो धर्मो विश्वैकवत्सलः ॥ १० ॥

धर्मो नरक-पातालपातादवति देहिनः ।
धर्मो निरुपमं यच्छत्यपि सर्वज्ञवैभवम् ॥ ११ ॥

अयं दशविधो धर्मो मिथ्यादृग्भिर्न वीक्षितः ।
योऽपि कश्चित् क्वचित् प्रोचे सोऽपि वाङ्मात्रनर्तनम् ॥ १२ ॥

तत्त्वार्थो वाचि सर्वेषां केषाञ्चन मनस्यपि ।
क्रियायामपि नर्नर्ति नित्यं जिनमतस्पृशाम् ॥ १३ ॥

वेदशास्त्रपराधीनबुद्धयः सूत्रकण्ठकाः ।
न लेशमपि जानन्ति धर्मरत्नस्य तत्त्वतः ॥ १४ ॥

गोमेध-नरमेधा-ऽश्वमेधाद्यध्वरकारिणाम् ।
याज्ञिकानां कुतो धर्मः प्राणिघातविधायिनाम् ? ॥ १५ ॥

अश्रद्धेयमसद्भूतं परस्परविरोधि च ।
वस्तु प्रलपतां धर्मः कः पुराणविधायिनाम् ? ॥ १६ ॥

असद्भूतव्यवस्थाभिः परद्रव्यं जिघृक्षताम् ।
मृत्-पानीयादिभिः शौचं स्मार्तादीनां कुतो ननु ? ॥ १७ ॥

ऋतुकालव्यतिक्रान्तौ भ्रूणहत्याविधायिनाम् ।
ब्राह्मणानां कुतो धर्मो ब्रह्मचर्यापलापिनाम् ? ॥ १८ ॥

अदित्सतोऽपि सर्वस्वं यजमानाज्जिघृक्षताम् ।
अर्थार्थे त्यजतां प्राणान् क्वाऽकिञ्चन्यं द्विजन्मनाम् ? ॥ १९ ॥

स्वल्पेष्वप्यपराधेषु क्षणाच्छापं प्रयच्छताम् ।
लौकिकानामृषीणां न क्षमालेशोऽपि दृश्यते ॥ २० ॥

जात्यादिमददुर्वृत्तपरिनर्तितचेतसाम् ।
क्व मार्दवं द्विजातीनां चतुराश्रमवर्तिनाम् ? ॥ २१ ॥

दम्भसंरम्भगर्भाणां बकवृत्तिजुषां बहिः ।
भवेदार्जवलेशोऽपि पाखण्डव्रतिनां कथम् ? ॥ २२ ॥

गृहिणी-गृह-पुत्रादिपरिग्रहवतां सदा ।
द्विजन्मनां कथं मुक्तिर्लोभैककुलवेश्मनाम् ? ॥ २३ ॥

अरक्त-द्विष्ट-मूढानां केवलज्ञानशालिनाम् ।
अनवद्या तत इयं धर्मस्वाख्याततोऽर्हताम् ॥ २४ ॥

रागाद् द्वेषात् तथा मोहाद् भवेद् वितथवादिता ।
तदभावे कथं नामार्हतां वितथवादिता ? ॥ २५ ॥

ये तु रागादिभिर्दोषैः कलुषीकृतचेतसः ।
न तेषां सूनृता वाचः प्रसरन्ति कदाचन ॥ २६ ॥

तथा हि याग-होमादिकर्माणीष्टानि कुर्वताम् ।
वापी-कूप-तडागादीन्यपि पूर्तान्यनेकशः ॥ २७ ॥

पशूपघाततः स्वर्गिलोकसौख्यं विमार्गताम् ।
द्विजेभ्यो भोजनैर्दत्तैः पितृतृप्तिं चिकीर्षताम् ॥ २८ ॥

घृतयोन्यादिकरणैः प्रायश्चित्तविधायिनाम् ।
पञ्चस्वापत्सु नारीणां पुनरुद्वाहकारिणाम् ॥ २९ ॥

अपत्यासंभवे स्त्रीषु क्षेत्रजापत्यवादिनाम् ।
सदोषाणामपि स्त्रीणां रजसा शुद्धिवादिनाम् ॥ ३० ॥

श्रेयोबुद्ध्याध्वरहतच्छागशिश्नोपजीविनाम् ।
सौत्रामण्यां सप्ततन्तौ सीधुपानविधायिनाम् ॥ ३१ ॥

गूथाशिनीनां च गवां स्पर्शतः पूतमानिनाम् ।
जलादिस्नानमात्रेण पापशुद्ध्यभिधायिनाम् ॥ ३२ ॥

वट-ऽश्वत्था-ऽऽमलक्यादिद्रुमपूजाविधायिनाम् ।
वह्नौ हुतेन हव्येन देवप्रीणनमानिनाम् ॥ ३३ ॥

भुवि गोदोहकरणाद् रिष्टशान्तिकमानिनाम् ।
योषिद्विडम्बनाप्रायव्रतधर्मोपदेशिनाम् ॥ ३४ ॥

जटापटल-भस्माङ्गराग-कौपीनधारिणाम् ।
अर्क-धत्तूर-मालूरैर्देवपूजाविधायिनाम् ॥ ३५ ॥

कुर्वतां गीतनृत्यादि पुतौ वादयतां मुहुः ।
मुहुर्वदननादेनाऽऽतोद्यनादविनोदिनाम् ॥ ३६ ॥

असभ्यभाषापूर्वं च मुनीन् देवान् जनान् घ्नताम् ।
विधाय व्रतभङ्गं च दासीदासत्वमिच्छताम् ॥ ३७ ॥

अनन्तकायकन्दादि-फल-मूल-दलाशिनाम् ।
कलत्र-पुत्रयुक्तानां वनवासजुषामपि ॥ ३८ ॥

भक्ष्याभक्ष्ये पेयापेये गम्यागम्ये समात्मनाम् ।
योगिनाम्ना प्रसिद्धानां कौलाचार्यान्तवासिनाम् ॥ ३९ ॥

अन्येषामपि जैनेन्द्रशासनास्पृष्टचेतसाम् ।
क्व धर्मः क्व फलं तस्य तस्य स्वाख्यातता कथम् ? ॥ ४० ॥

जैनेन्द्रस्यापि धर्मस्य यदत्रामुत्र वा फलम् ।
आनुषङ्गिकमेवेदं मुख्यं मोक्षं प्रचक्ष्यते ॥ ४१ ॥

सस्यहेतौ कृषौ यद्वत् पलालाद्यानुषङ्गिकम् ।
अपवर्गफले धर्मे तद्वत् सांसारिकं फलम् ॥ ४२ ॥

## ॥ त्रयोदशश्रीविमलजिनदेशना - बोधिदुर्लभताभावनामयी ॥

अकामनिर्जरारूपात् पुण्याज्जन्तोः प्रजायते ।
स्थावरत्वात् त्रसत्वं वा तिर्यक्त्वं वा कथञ्चन ॥ १ ॥

मानुष्यमार्यदेशश्च जातिः सर्वाक्षपाटवम् ।
आयुश्च प्राप्यते तत्र कथञ्चित् कर्मलाघवात् ॥ २ ॥

प्राप्तेषु पुण्यतः श्रद्धा-कथक-श्रवणेष्वपि ।
तत्त्वनिश्चयरूपं तद् बोधिरत्नं सुदुर्लभम् ॥ ३ ॥

राज्यं वा चक्रभृत्त्वं वा शक्रत्वं वा न दुर्लभम् ।
यथा जिनप्रवचने बोधिरत्यन्तदुर्लभा ॥ ४ ॥

सर्वे भावाः सर्वजीवैः प्राप्तपूर्वा अनन्तशः ।
बोधिर्न जातुचित् प्राप्ता भवभ्रमणदर्शनात् ॥ ५ ॥

पुद्गलानां परावर्तेष्वनन्तेषु गतेष्विह ।
अपार्धे पुद्गलावर्ते शेषे सर्वशरीरिणाम् ॥ ६ ॥

सर्वेषां कर्मणां शेषेऽन्तःकोटीकोट्यवस्थितौ ।
ग्रन्थिभेदात् कश्चिदेव लभते बोधिमुत्तमाम् ॥ ७ ॥

यथाप्रवृत्तिकरणादन्ये तु ग्रन्थिसीमनि ।
प्राप्ता अप्यवसीदन्ति भ्रमन्ति च पुनर्भवम् ॥ ८ ॥

कुशास्त्रश्रवणं सङ्गो मिथ्यादृग्भिः कुवासना ।
प्रमादशीलता चेति स्युर्बोधिपरिपन्थिनः ॥ ९ ॥

चारित्रस्यापि संप्राप्तिर्दुर्लभा यद्यपीरिता ।
तथापि बोधिप्राप्तौ सा सफला निष्फलाऽन्यथा ॥ १० ॥

अभव्या अपि चारित्रं प्राप्य ग्रैवेयकावधि ।
उत्पद्यन्ते विना बोधिं प्राप्नुवन्ति न निर्वृतिम् ॥ ११ ॥

असंप्राप्ते बोधिरत्ने चक्रवर्त्यपि रङ्कवत् ।
संप्राप्तबोधिरत्नस्तु रङ्कोऽपि स्यात् ततोऽधिकः ॥ १२ ॥

संप्राप्तबोधयो जीवा न रज्यन्ते भवे क्वचित् ।
निर्ममत्वा भजन्त्येकं मुक्तिमार्गमनर्गलाः ॥ १३ ॥

## ॥ चतुर्दशश्रीमदनन्तजिनदेशना - सप्ततत्त्वमयी ॥

अतत्त्वविदुरो जन्तुरमार्गज्ञ इवाध्वगः ।
अस्मिन् संसारकान्तारे बम्भ्रमीति दुरुत्तरे ॥ १ ॥

जीवाजीवावाश्रवश्च संवरो निर्जरा तथा ।
बन्धो मोक्षश्चेति सप्त तत्त्वान्याहुर्मनीषिणः ॥ २ ॥

तत्र जीवा द्विधा ज्ञेया मुक्तसंसारिभेदतः ।
अनादिनिधनाः सर्वे ज्ञान-दर्शनलक्षणाः ॥ ३ ॥

मुक्ता एकस्वभावाः स्युर्जन्मादिक्लेशवर्जिताः ।
अनन्तदर्शनज्ञानवीर्यानन्दमयाश्च ते ॥ ४ ॥

संसारिणो द्विधा जीवाः स्थावर-त्रसभेदतः ।
द्वितयेऽपि द्विधा पर्याप्ताऽपर्याप्तविशेषतः ॥ ५ ॥

पर्याप्तयस्तु षडिमाः पर्याप्तत्वनिबन्धनम् ।
आहारो वपुरक्षाणि प्राणो भाषा मनोऽपि च ॥ ६ ॥

स्युरेकाक्ष-विकलाक्ष-पञ्चाक्षाणां शरीरिणाम् ।
चतस्रः पञ्च षट् चापि पर्याप्तयो यथाक्रमम् ॥ ७ ॥

एकाक्षाः स्थावरा भूम्यप्तेजोवायुमहीरुहः ।
तेषां तु पूर्वे चत्वारः स्युः सूक्ष्मा बादरा अपि ॥ ८ ॥

प्रत्येकाः साधारणाश्च द्विप्रकारा महीरुहः ।
तेऽत्र पूर्वे बादराः स्युरुत्तरे सूक्ष्म-बादराः ॥ ९ ॥

त्रसा द्वित्रिचतु:पञ्चेन्द्रियत्वेन चतुर्विधाः ।
तत्र पञ्चेन्द्रिया द्वेधा संज्ञिनोऽसंज्ञिनोऽपि च ॥ १० ॥

शिक्षोपदेशालापान् ये जानते तेऽत्र संज्ञिनः ।
संप्रवृत्तमनःप्राणास्तेभ्योऽन्ये स्युरसंज्ञिनः ॥ ११ ॥

स्पर्शनं रसनं घ्राणं चक्षुः श्रोत्रमितीन्द्रियम् ।
तस्य स्पर्शो रसो गन्धो रूपं शब्दश्च गोचरः ॥ १२ ॥

द्वीन्द्रियाः कृमयः शङ्खा गण्डूपदा जलौकसः ।
कपर्दाः शुक्तिकाद्याश्च विविधाः कृमयो मताः ॥ १३ ॥

यूका-मत्कुण-मत्कोट-लिक्षाद्यास्त्रीन्द्रिया मताः ।
पतङ्ग-मक्षिका-भृङ्ग-दंशाद्याश्चतुरिन्द्रियाः ॥ १४ ॥

तिर्यग्योनिभवाः शेषा जल-स्थल-खचारिणः ।
नारका मानवा देवाः सर्वे पञ्चेन्द्रिया मताः ॥ १५ ॥

मनो-भाषा-कायबलत्रयमिन्द्रियपञ्चकम् ।
आयुरुच्छ्वासनिःश्वासमिति प्राणा दश स्मृताः ॥ १६ ॥

सर्वजीवेषु देहायुरुच्छ्वासा इन्द्रियाणि च ।
विकलासंज्ञिनां भाषा पूर्णानां संज्ञिनां मनः ॥ १७ ॥

उपपादभवा देव-नारका गर्भजाः पुनः ।
जरायुःपोताण्डभवाः शेषाः संमूर्च्छनोद्भवाः ॥ १८ ॥

संमूर्छिनो नारकाश्च जीवाः पापा नपुंसकाः ।
देवाः स्त्री-पुंसवेदाः स्युर्वेदत्रयजुषः परे ॥ १९ ॥

सर्वे जीवा व्यवहार्यव्यवहारितया द्विधा ।
सूक्ष्मनिगोदा एवान्त्यास्तेभ्योऽन्ये व्यवहारिणः ॥ २० ॥

सचित्ता संवृता शीता तदन्या मिश्रितोऽपि वा ।
विभेदैरान्तरैर्भिन्नो नवधा योनिरङ्गिनाम् ॥ २१ ॥

प्रत्येकं सप्त लक्षाश्च पृथ्वी-वार्यग्नि-वायुषु ।
प्रत्येकानन्तकायेषु क्रमाद् दश चतुर्दश ॥ २२ ॥

षट् पुनर्विकलाक्षेषु मनुष्येषु चतुर्दश ।
स्युश्चतस्रश्चतस्रश्च श्वभ्रि-तिर्यक्-सुरेषु तु ॥ २३ ॥

एवं लक्षाणि योनीनामशीतिश्चतुरुत्तरा ।
केवलज्ञानदृष्टानि सर्वेषामपि जन्मिनाम् ॥ २४ ॥

एकाक्षा बादराः सूक्ष्माः पञ्चाक्षाः संज्ञ्यसंज्ञिनः ।
स्युर्द्वि-त्रि-चतुरक्षाश्च पर्याप्ता इतरेऽपि च ॥ २५ ॥

एतानि जीवस्थानानि मयोक्तानि चतुर्दश ।
मार्गणा अपि तावन्त्यो ज्ञेयास्ता नामतो यथा ॥ २६ ॥

गतीन्द्रिय-काय-योग-वेद-ज्ञान-क्रुधादयः ।
संयमा-ऽऽहार-दृग्-लेश्या-भव्य-सम्यक्त्व-संज्ञिनः ॥ २७ ॥

मिथ्यादृष्टिः सास्वादन-सम्यग्मिथ्यादृशावपि ।
अविरतसम्यग्दृष्टिर्विरताविरतोऽपि च ॥ २८ ॥

प्रमत्तश्चाप्रमत्तश्च निवृत्तिबादरस्ततः ।
अनिवृत्तिबादरश्चाथ सूक्ष्मसंपरायकः ॥ २९ ॥

ततः प्रशान्तमोहश्च क्षीणमोहश्च योगवान् ।
अयोगवानिति गुणस्थानानि स्युश्चतुर्दश ॥ ३० ॥

मिथ्यादृष्टिर्भवेन्मिथ्यादर्शनस्योदये सति ।
गुणस्थानत्वमेतस्य भद्रकत्वाद्यपेक्षया ॥ ३१ ॥

मिथ्यात्वस्यानुदयेऽनन्तानुबन्ध्युदये सति ।
सास्वादनसम्यग्दृष्टिः स्यादुत्कर्षात् षडावलिः ॥ ३२ ॥

सम्यक्त्वमिथ्यात्वयोगान्मुहूर्तं मिश्रदर्शनः ।
अविरतसम्यग्दृष्टिरप्रत्याख्यानकोदये ॥ ३३ ॥

विरताविरतस्तु स्यात् प्रत्याख्यानोदये सति ।
प्रमत्तसंयतः प्राप्तसंयमो यः प्रमाद्यति ॥ ३४ ॥

सोऽप्रमत्तसंयतो यः संयमी न प्रमाद्यति ।
उभावपि परावृत्त्या स्यातामान्तर्मुहूर्तिकौ ॥ ३५ ॥

कर्मणां स्थितिघातादीनपूर्वान् कुरुते यतः ।
तस्मादपूर्वकरणः क्षपकः शमकश्च सः ॥ ३६ ॥

यद्बादरकषायाणां प्रविष्टानामिमं मिथः ।
परिणामा निवर्तन्ते निवृत्तिबादरोऽपि सः ॥ ३७ ॥

परिणामा निवर्तन्ते मिथो यत्र न यत्नतः ।
अनिवृत्तिबादरः स्यात् क्षपकः शमकश्च सः ॥ ३८ ॥

लोभाभिधः संपरायः सूक्ष्मकिट्टीकृतो यतः ।
स सूक्ष्मसंपरायः स्यात् क्षपकः शमकोऽपि च ॥ ३९ ॥

अथोपशान्तमोहः स्यान्मोहस्योपशमे सति ।
मोहस्य तु क्षये जाते क्षीणमोहं प्रचक्षते ॥ ४० ॥

सयोगिकेवली घातिक्षयादुत्पन्नकेवलः ।
योगानां च क्षये जाते स एवायोगिकेवली ॥ ४१ ॥

अजीवाः स्युर्धर्माधर्मविहायःकालपुद्गलाः ।
जीवेन सह पञ्चापि द्रव्याण्येते निवेदिताः ॥ ४२ ॥

तत्र कालं विना सर्वे प्रदेशप्रचयात्मकाः ।
विना जीवमचिद्रूपा अकर्तारश्च ते मताः ॥ ४३ ॥

कालं विनाऽस्तिकायाः स्युरमूर्ताः पुद्गलं विना ।
उत्पाद-विगम-ध्रौव्यात्मानः सर्वेऽपि ते पुनः ॥ ४४ ॥

पुद्गलाः स्युः स्पर्श-रस-गन्ध-वर्णस्वरूपिणः ।
तेऽणुस्कन्धतया द्वेधा तत्राबद्धाः किलाणवः ॥ ४५ ॥

बद्धाः स्कन्धा गन्ध-शब्द-सौक्ष्म्य-स्थौल्याकृतिस्पृशः ।
अन्धकारा-ऽऽतपोद्योतभेदच्छायात्मका अपि ॥ ४६ ॥

कर्म-काय-मनो-भाषा-चेष्टितोच्छ्वासदायिनः ।
सुखदुःख-जीवितव्य-मृत्यूपग्रहकारिणः ॥ ४७ ॥

प्रत्येकमेकद्रव्याणि धर्माधर्मौ नभोऽपि च ।
अमूर्तानि निष्क्रियाणि स्थिराण्यपि च सर्वदा ॥ ४८ ॥

एकजीवपरिमाणसंख्यातीतप्रदेशकौ ।
लोकाकाशमभिव्याप्य धर्माधर्मौ व्यवस्थितौ ॥ ४९ ॥

स्वयं गन्तुं प्रवृत्तेषु जीवाजीवेषु सर्वतः ।
सहकारी भवेद् धर्मः पानीयमिव यादसाम् ॥ ५० ॥

जीवानां पुद्गलानां च प्रपन्नानां स्वयं स्थितिम् ।
अधर्मः सहकार्येष यथा छायाऽध्वयायिनाम् ॥ ५१ ॥

सर्वगं स्वप्रतिष्ठं स्यादाकाशमवकाशदम् ।
लोकालोकौ स्थितं व्याप्य तदनन्तप्रदेशभाक् ॥ ५२ ॥

लोकाकाशप्रदेशस्था भिन्नाः कालाणवस्तु ये ।
भावानां परिवर्ताय मुख्यकालः स उच्यते ॥ ५३ ॥

ज्योतिःशास्त्रे यस्य मानमुच्यते समयादिकम् ।
स व्यावहारिकः कालः कालवेदिभिरामतः ॥ ५४ ॥

नवजीर्णादिरूपेण यदमी भुवनोदरे ।
पदार्थाः परिवर्तन्ते तत् कालस्यैव चेष्टितम् ॥ ५५ ॥

वर्तमाना अतीतत्वं भाविनो वर्तमानताम् ।
पदार्थाः प्रतिपद्यन्ते कालक्रीडाविडम्बिताः ॥ ५६ ॥

मनो-वचन-कायानां यत् स्यात् कर्म स आश्रवः ।
शुभः शुभस्य हेतुः स्यादशुभस्त्वशुभस्य सः ॥ ५७ ॥

सर्वेषामाश्रवाणां यो रोधहेतुः स संवरः ।
कर्मणां भवहेतूनां जरणादिह निर्जरा ॥ ५८ ॥

सकषायतया जीवः कर्मयोग्यांस्तु पुद्गलान् ।
यदादत्ते स बन्धः स्याज्जीवास्वातन्त्र्यकारणम् ॥ ५९ ॥

प्रकृति-स्थित्यनुभाव-प्रदेशा विधयोऽस्य तु ।
प्रकृतिस्तु स्वभावः स्याज्ज्ञानावृत्त्यादिरष्टधा ॥ ६० ॥

ज्ञान-दृष्ट्यावृती वेद्यं मोहनीयायुषी अपि ।
नाम-गोत्रान्तरायाश्च मूलप्रकृतयो मताः ॥ ६१ ॥

निष्कर्षोत्कर्षतः कालनियमः कर्मणां स्थितिः ।
अनुभावो विपाकः स्यात् प्रदेशोंऽशप्रकल्पनम् ॥ ६२ ॥

मिथ्यादृष्टिरविरतिप्रमादौ च क्रुधादयः ।
योगेन सह पञ्चैते विज्ञेया बन्धहेतवः ॥ ६३ ॥

अभावे बन्धहेतूनां घातिकर्मक्षयोद्भवे ।
केवले सति मोक्षः स्याच्छेषाणां कर्मणां क्षये ॥ ६४ ॥

सुरा-ऽसुर-नरेन्द्राणां यत् सुखं भुवनत्रये ।
स स्यादनन्तभागोऽपि न मोक्षसुखसंपदः ॥ ६५ ॥

एवं तत्त्वानि जानानो जनो जगति जातुचित् ।
न निमज्जति संसारे वारिधाविव तारकः ॥ ६६ ॥

## ॥ पञ्चदशश्रीधर्मनाथजिन देशना - कषायदममयी ॥

चतुर्वर्गेऽग्रणीर्मोक्षो योगस्तस्य च कारणम् ।
ज्ञान-श्रद्धान-चारित्ररूपं रत्नत्रयं च सः ॥ १ ॥

तत्त्वानुगा मतिर्ज्ञानं सम्यक्श्रद्धा तु दर्शनम् ।
सर्वसावद्ययोगानां त्यागश्चारित्रमिष्यते ॥ २ ॥

आत्मैव दर्शन-ज्ञान-चारित्राण्यथवा यतेः ।
यत् तदात्मक एवैष शरीरमधितिष्ठति ॥ ३ ॥

आत्मानमात्मना वेत्ति मोहत्यागाद् य आत्मनि ।
तदेव तस्य चारित्रं तज्ज्ञानं तच्च दर्शनम् ॥ ४ ॥

आत्माऽज्ञानभवं दुःखमात्मज्ञानेन हन्यते ।
तपसाऽप्यात्मविज्ञानहीनैश्छेत्तुं न शक्यते ॥ ५ ॥

अयमात्मैव चिद्रूपः शरीरी कर्मयोगतः ।
ध्यानाग्निदग्धकर्मा तु सिद्धात्मा स्यान्निरञ्जनः ॥ ६ ॥

अयमात्मैव संसारः कषायेन्द्रियनिर्जितः ।
तमेव तद्विजेतारं मोक्षमाहुर्मनीषिणः ॥ ७ ॥

स्युः कषायाः क्रोध-मान-माया-लोभाः शरीरिणाम् ।
चतुर्विधास्ते प्रत्येकं भेदैः संज्वलनादिभिः ॥ ८ ॥

पक्षं संज्वलनः प्रत्याख्यानो मासचतुष्टयम् ।
अप्रत्याख्यानको वर्षं जन्मानन्तानुबन्धकः ॥ ९ ॥

वीतराग-यति-श्राद्ध-सम्यग्दृष्टित्वघातकाः ।
ते देवत्व-मनुष्यत्व-तिर्यक्त्व-नरकप्रदाः ॥ १० ॥

तत्रोपतापकः क्रोधः क्रोधो वैरस्य कारणम् ।
दुर्गतेर्वर्तनी क्रोधः क्रोधः शमसुखार्गला ॥ ११ ॥

उत्पद्यमानः प्रथमं दहत्येव स्वमाश्रयम् ।
क्रोधः कृशानुवत् पश्चादन्यं दहति वा न वा ॥ १२ ॥

अर्जितं पूर्वकोट्या यद्वर्षैरष्टभिरूनया ।
तपस्तत्तत्क्षणादेव दहति क्रोधपावकः ॥ १३ ॥

शमरूपं पयः प्राज्यपुण्यसंभारसंचितम् ।
अमर्षविषसंपर्कादसेव्यं तत्क्षणाद् भवेत् ॥ १४ ॥

चारित्रचित्ररचनां विचित्रगुणधारिणीम् ।
समुत्सर्पन् क्रोधधूमो श्यामलीकुरुतेतमाम् ॥ १५ ॥

यो वैराग्यशमीपत्रपुटैः शमरसोऽर्जितः ।
शाकपत्रपुटाभेन क्रोधेनोत्सृज्यते स किम् ॥ १६ ॥

प्रवर्धमानः क्रोधोऽयं किमकार्यं करोति न ।
भाविनी द्वारका द्वैपायनक्रोधानले समित् ॥ १७ ॥

कुध्यतः कार्यसिद्धिर्या न सा क्रोधनिबन्धना ।
जन्मान्तरार्जितोर्जस्विकर्मणः खलु तत् फलम् ॥ १८ ॥

स्वस्य लोकद्वयोच्छित्त्यै नाशाय स्व-परार्थयोः ।
धिगहो ! दधति क्रोधं शरीरेषु शरीरिणः ॥ १९ ॥

क्रोधान्धाः पश्य निघ्नन्ति पितरं मातरं गुरुम् ।
सुहृदं सोदरं दारानात्मानमपि निर्घृणाः ॥ २० ॥

*क्रोधवह्नेस्तदह्नाय शमनाय शुभात्मभिः ।*
श्रयणीया क्षमैकैव संयमारामसारणिः ॥ २१ ॥

अपकारिजने कोपो निरोद्धुं शक्यते कथम् ।
शक्यते सत्त्वमाहात्म्याद् यद्वा भावनयाऽनया ॥ २२ ॥

अङ्गीकृत्यात्मनः पापं यो मां बाधितुमिच्छति ।
स्वकर्मनिहतायास्मै कः कुप्येद् बालिशोऽपि सन् ? ॥ २३ ॥

प्रकुप्याम्यपकारिभ्य इति चेदाशयस्तव ।
तत् किं न कुप्यसि स्वस्य कर्मणे दुःखहेतवे ? ॥ २४ ॥

उपेक्ष्य लोष्टक्षेप्तारं लोष्टं दशति मण्डलः ।
मृगारिः शरमुत्प्रेक्ष्य शरक्षेप्तारमृच्छति ॥ २५ ॥

यैः परः प्रेरितः क्रूरैर्मह्यं कुप्यति कर्मभिः ।
तान्युपेक्ष्य परे कुध्यन् किं श्रये भषणश्रियम् ? ॥ २६ ॥

भावी ह्यर्हन्महावीरः क्षान्त्यै म्लेच्छेषु यास्यति ।
अयत्नेनागतां क्षान्तिं वोढुं किमिव नेच्छसि ? ॥ २७ ॥

त्रैलोक्यप्रलयत्राणक्षमाश्चेदाश्रिताः क्षमाम् ।
कदलीतुल्यसत्त्वस्य क्षमा तव न किं क्षमा ? ॥ २८ ॥

तथा किं नाकृथाः पुण्यं यथा कोऽपि न बाधते ।
स्वप्रमादमिदानीं तु शोचन्नङ्गीकुरु क्षमाम् ॥ २९ ॥

क्रोधान्धस्य मुनेश्चण्डचण्डालस्य च नान्तरम् ।
तस्मात् क्रोधं परित्यज्य भजोज्ज्वलधियां पदम् ॥ ३० ॥

महर्षिः क्रोधसंयुक्तो निष्क्रोधः कूरगड्डुकः ।
ऋषिं मुक्त्वा देवताभिः स्तोष्यते कूरगड्डुकः ॥ ३१ ॥

अरुन्तुदैर्वचःशस्त्रैस्तुद्यमानो विचिन्तयेत् ।
चेत् तथ्यमेतत् कः कोपोऽथ मिथ्योन्मत्तभाषितम् ॥ ३२ ॥

वधायोपस्थितेऽन्यस्मिन् हसेद् विस्मितमानसः ।
वधे मत्कर्मसंसाध्ये वृथा नृत्यत्ति बालिशः ॥ ३३ ॥

निहन्तुमुद्यते ध्यायेदायुषः क्षय एष नः ।
तदसौ निर्भयः पापात् करोति मृतमारणम् ॥ ३४ ॥

सर्वपुरुषार्थचौरे कोपः कोपे न चेत् तव ।
धिक् त्वां स्वल्पापराधेऽपि परे कोपपरायणम् ॥ ३५ ॥

सर्वेन्द्रियग्लानिकरं प्रसर्पन्तं ततः सुधीः ।
क्षमया जाङ्गुलिकया जयेत् कोपमहोरगम् ॥ ३६ ॥

विनयश्रुतशीलानां त्रिवर्गस्य च घातकः ।
विवेकलोचनं लुम्पन्मानोऽन्धंकरणो नृणाम् ॥ ३७ ॥

जाति-लाभ-कुलैश्वर्य-बल-रूप-तप-श्रुतैः ।
कुर्वन् मदं पुनस्तानि हीनानि लभते जनः ॥ ३८ ॥

जातिभेदान्नैकविधानुत्तमाधममध्यमान् ।
दृष्ट्वा को नाम कुर्वीत जातु जातिमदं सुधीः ? ॥ ३९ ॥

उत्तमां जातिमाप्नोति हीनामाप्नोति कर्मतः ।
तत्राशाश्वतिकीं जातिं को नामासाद्य माद्यतु ? ॥ ४० ॥

अन्तरायक्षयादेव लाभो भवति नान्यथा ।
ततश्च वस्तुतत्त्वज्ञो नो लाभमदमुद्वहेत् ॥ ४१ ॥

परप्रसादशक्त्यादिभवे लाभे महत्यपि ।
न लाभमदमृच्छन्ति महात्मानः कथञ्चन ॥ ४२ ॥

अकुलीनानपि प्रेक्ष्य प्रज्ञाश्रीशीलशालिनः ।
न कर्तव्यः कुलमदो महाकुलभवैरपि ॥ ४३ ॥

किं कुलेन कुशीलस्य ? सुशीलस्यापि तेन किम् ? ।
एवं विदन् कुलमदं विदध्यान्न विचक्षणः ॥ ४४ ॥

श्रुत्वा त्रिभुवनैश्वर्यसंपदं वज्रधारिणः ।
पुर-ग्राम-धनादीनामैश्वर्ये कीदृशो मदः ? ॥ ४५ ॥

गुणोज्ज्वलादपि भ्रश्येद् दोषवन्तमपि श्रयेत् ।
कुशीलस्त्रीवदैश्वर्यं न मदाय विवेकिनाम् ॥ ४६ ॥

महाबलोऽपि रोगाद्यैरबलः क्रियते क्षणात् ।
इत्यनित्यबले पुंसां युक्तो बलमदो न हि ॥ ४७ ॥

बलवन्तोऽपि जरसि मृत्यौ कर्मफलान्तरे ।
अबलाश्चेत् ततो हन्त ! तेषां बलमदो मुधा ॥ ४८ ॥

सप्तधातुमये देहे चयापचयधर्मणः ।
जरा-रुजादिभावस्य को रूपस्य मदं वहेत् ? ॥ ४९ ॥

सनत्कुमारस्य रूपं भावि श्रुत्वा च तत्क्षयम् ।
को वा सकर्णः स्वप्नेऽपि कुर्याद् रूपमदं किल ! ॥ ५० ॥

नाभेयस्य तपोनिष्ठां श्रुत्वा वीरजिनस्य च ।
को नाम स्वल्पतपसि स्वकीये मदमाश्रयेत् ? ॥ ५१ ॥

येनैव तपसा त्रुट्येत् तरसा कर्मसंचयः ।
तेनैव मददिग्धेन वर्धते कर्मसंचयः ॥ ५२ ॥

स्वबुद्ध्या रचितान्यन्यैः शास्त्राण्याघ्राय लीलया ।
सर्वज्ञोऽस्मीति मदवान् स्वकीयाङ्गानि खादति ॥ ५३ ॥

श्रीमद्गणधरेन्द्राणां श्रुत्वा निर्माणधारणम् ।
कः श्रयेत श्रुतमदं सकर्णहृदयो जनः ? ॥ ५४ ॥

उत्सर्पयन् दोषशाखां गुणमूलान्यधो नयन् ।
उन्मूलनीयो मानद्रुस्तन्मार्दवसरित्प्लवैः ॥ ५५ ॥

मार्दवं नाम मृदुता तच्चौद्धत्यनिषेधनम् ।
मानस्य पुनरौद्धत्यं स्वरूपमनुपाधिकम् ॥ ५६ ॥

अन्तः स्पृशेद् यत्र यत्रौद्धत्यं जात्यादिगोचरम् ।
तत्र तस्य प्रतीकारहेतोर्मार्दवमाश्रयेत् ॥ ५७ ॥

सर्वत्र मार्दवं कुर्यात् पूज्येषु तु विशेषतः ।
येन पापाद् विमुच्येत पूज्यपूजाव्यतिक्रमात् ॥ ५८ ॥

मानाद् बाहुबलिर्बद्धो लताभिरिव पाप्मभिः ।
मार्दवात् तत्क्षणं मुक्तः सद्यः संप्राप केवलम् ॥ ५९ ॥

चक्रवर्ती त्यक्तसङ्गो वैरिणामपि वेश्मसु ।
भिक्षायै यात्यहो ! मानच्छेदायामृदुमार्दवम् ॥ ६० ॥

चक्रवर्त्यपि तत्कालदीक्षितो रङ्कसाधवे ।
नमस्यति त्यक्तमानश्चिरं च वरिवस्यति ॥ ६१ ॥

एवं च मानविषयं ज्ञात्वा दोषमशेषतः ।
अश्रान्तमाश्रयेद् धीमांस्तन्निरासाय मार्दवम् ॥ ६२ ॥

असूनृतस्य जननी परशुः शीलशाखिनः ।
जन्मभूमिरविद्यानां माया दुर्गतिकारणम् ॥ ६३ ॥

कौटिल्यपटवः पापा मायया बकवृत्तयः ।
भुवनं वञ्चयमाना वञ्चयन्ते स्वमेव हि ॥ ६४ ॥

कूटषाड्गुण्ययोगेन च्छलाद् विश्वस्तघातनात् ।
अर्थलोभाच्च राजानो वञ्चयन्तेऽखिलं जगत् ॥ ६५ ॥

तिलकैर्मुद्रया मन्त्रैः क्षामतादर्शनेन च ।
अन्तःशून्या बहिःसारा वञ्चयन्ति द्विजा जनम् ॥ ६६ ॥

कूटाः कूटतुलामानाऽऽशुक्रियासातियोगतः ।
वञ्चयन्ते जनं मुग्धं मायाभाजो वणिग्जनाः ॥ ६७ ॥

जटा-मौञ्जी-शिखा-भस्म-वल्कलाग्न्यादिधारणैः ।
मुग्धं श्राद्धं गर्धयन्ते पाखण्डा हृदि नास्तिकाः ॥ ६८ ॥

अरक्ताभिर्भाव-हाव-लीला-गतिविलोकनैः ।
कामिनो रञ्जयन्तीभिर्वेश्याभिर्वञ्च्यते जगत् ॥ ६९ ॥

प्रतार्य कूटैः शपथैः कृत्वा कूटकपर्दिकाम् ।
धनवन्तः प्रतार्यन्ते दुरोदरपरायणैः ॥ ७० ॥

दम्पती पितरः पुत्राः सोदर्याः सुहृदो निजाः ।
ईशा भृत्यास्तथाऽन्येऽपि माययाऽन्योऽन्यवञ्चकाः ॥ ७१ ॥

अर्थलुब्धा गतघृणा बन्दिकारमलिम्लुचाः ।
अहर्निशं जागरूकाश्छलयन्ति प्रमादिनम् ॥ ७२ ॥

कारवश्चान्त्यजाश्चैव स्वकर्मफलजीविनः ।
माययाऽलीकशपथैः कुर्वते साधुवञ्चनम् ॥ ७३ ॥

व्यन्तरादिकुयोनिस्था दृष्ट्वा प्रायः प्रमादिनः ।
क्रूराश्छलैर्बहुविधैर्बाधन्ते मानवान् पशून् ॥ ७४ ॥

मत्स्यादयो जलचराश्छलात् स्वापत्यभक्षका: ।
बध्यन्ते धीवरैस्तेऽपि माययाऽऽनायपाणिभि: ॥ ७५ ॥

नानोपायैर्मृगयुभिर्वञ्चनप्रवणैर्जडा: ।
निबध्यन्ते विनाश्यन्ते प्राणिन: स्थलचारिण: ॥ ७६ ॥

नभश्चरा भूरिभेदा वराका लावकादय: ।
बध्यन्ते माययाऽत्युग्रै: स्वल्पकग्रासगृध्नुभि: ॥ ७७ ॥

तदेवं सर्वलोकेऽपि परवञ्चकतापरा: ।
स्वस्वधर्मं सद्गतिं च नाशयन्ति स्ववञ्चका: ॥ ७८ ॥

तिर्यग्जाते: परं बीजमपवर्गपुरार्गला ।
विश्वासद्रुमदावाग्निर्माया हेया मनीषिभि: ॥ ७९ ॥

मल्लिनाथ: पूर्वभवे कृत्वा मायां तनीयसीम् ।
मायाशल्यमनुत्खाय स्त्रीभावमुपयास्यति ॥ ८० ॥

तदार्जवमहौषध्या जगदानन्दहेतुना ।
जयेज्जगद्द्रोहकरीं मायां विषधरीमिव ॥ ८१ ॥

आर्जवं सरल: पन्था मुक्तिपुर्या: प्रकीर्तित: ।
आचार्यविस्तर: शेषस्तपस्त्यागादिलक्षण: ॥ ८२ ॥

भवेयुरार्जवजुषो लोकेऽपि प्रीतिकारणम् ।
कुटिलादुद्विजन्ते हि जन्तव: पन्नगादिव ॥ ८३ ॥

अजिह्मचित्तवृत्तीनां भववासस्पृशामपि ।
अकृत्रिमं मुक्तिसुखं स्वसंवेद्यं महात्मनाम् ॥ ८४ ॥

कौटिल्यशङ्कुना क्लिष्टमनसां वञ्चकात्मनाम् ।
परव्यापादनिष्ठानां स्वप्नेऽपि स्यात् कथं सुखम् ॥ ८५ ॥

समग्रविद्यावैदुष्येऽधिगतासु कलासु च ।
धन्यानामुपजायेत बालकानामिवार्जवम् ॥ ८६ ॥

अज्ञानामपि बालानामार्जवं प्रीतिहेतवे ।
किं पुनः सर्वशास्त्रार्थपरिनिष्ठितचेतसाम् ॥ ८७ ॥

स्वाभाविकी हि ऋजुता कृत्रिमा कुटिलात्मता ।
ततः स्वाभाविकं धर्मं हित्वा कः कृत्रिमं श्रयेत् ? ॥ ८८ ॥

छल-पैशून्य-वक्रोक्ति-वञ्चनाप्रवणे जने ।
धन्याः केचिन्निर्विकाराः सुवर्णप्रतिमा इव ॥ ८९ ॥

अपि श्रुताब्धिपारीणाः सर्वे गणभृदुत्तमाः ।
अहो ! शैक्षाइवाश्रौषुरार्जवादर्हतां गिरः ॥ ९० ॥

अशेषमपि दुष्कर्म ऋज्वालोचनया क्षिपेत् ।
कुटिलालोचनां कुर्वन्नल्पीयोऽपि विवर्धते ॥ ९१ ॥

काये वचसि चित्ते च समन्तात् कुटिलात्मनाम् ।
न मोक्षः किन्तु मोक्षः स्यात् सर्वत्राकुंटिलात्मनाम् ॥ ९२ ॥

इत्युग्रं कर्म कौटिल्यं कुटिलानां विभावयन् ।
आश्रयेदृजुतामेकां सुधीर्निर्वृतिकाम्यया ॥ ९३ ॥

आकरः सर्वदोषाणां गुणग्रसनराक्षसः ।
कन्दो व्यसनवल्लीनां लोभः सर्वार्थबाधकः ॥ ९४ ॥

धनहीनः शतमेकं सहस्रं शतवानपि ।
सहस्राधिपतिर्लक्षं कोटिं लक्षेश्वरोऽपि च ॥ ९५ ॥

कोटीश्वरो नरेन्द्रत्वं नरेन्द्रश्चक्रवर्तिताम् ।
चक्रवर्ती च देवत्वं देवोऽपीन्द्रत्वमिच्छति ॥ ९६ ॥

इन्द्रत्वेऽपि हि संप्राप्ते यदिच्छा न निवर्तते ।
मूले लघीयांस्तल्लोभः सराव इव वर्धते ॥ ९७ ॥

हिंसेव सर्वपापानां मिथ्यात्वमिव कर्मणाम् ।
राजयक्ष्मेव रोगाणां भः सर्वागसां गुरुः ॥ ९८ ॥

अहो ! लोभस्य साम्राज्यमेकच्छत्रं महीतले ।
तरवोऽपि निधिं प्राप्य पादैः प्रच्छादयन्ति यत् ॥ ९९ ॥

अपि द्रविणलोभेन ते द्वित्रिचतुरिन्द्रियाः ।
स्वकीयान्यधितिष्ठन्ति प्राग्निधानानि मूर्च्छया ॥ १०० ॥

भुजङ्गगृहगोधाऽऽखुर्मुख्याः पञ्चेन्द्रिया अपि ।
धनलोभेन लीयन्ते निधानस्थानभूमिषु ॥ १०१ ॥

पिशाच-मुद्गल-प्रेत-भूत-यक्षादयो धनम् ।
स्वकीयं परकीयं वाऽप्यधितिष्ठन्ति लोभतः ॥ १०२ ॥

भूषणोद्यानवाप्यादौ मूर्च्छितास्त्रिदशा अपि ।
च्युत्वा तत्रैव जायन्ते पृथ्वीकायादियोनिषु ॥ १०३ ॥

प्राप्योपशान्तमोहत्वं क्रोधादिविजये सति ।
लोभांशमात्रदोषेण पतन्ति यतयोऽपि हि ॥ १०४ ॥

एकामिषाभिलाषेण सारमेया इव द्रुतम् ।
सोदर्या अपि युध्यन्ते धनलेशजिघृक्षया ॥ १०५ ॥

लोभाद् ग्रामादिसीमानमुद्दिश्य गतसौहृदाः ।
ग्राम्या नियुक्ता राजानो वैरायन्ते परस्परम् ॥ १०६ ॥

हास-शोक-द्वेष-हर्षानसतोऽप्यात्मनि स्फुटम् ।
स्वामिनोऽग्रे लोभवन्तो नाटयन्ति नटा इव ॥ १०७ ॥

आरभ्यते पूरयितुं लोभगर्तो यथा यथा ।
तथा तथा महच्चित्रं मुहुरेष विवर्धते ॥ १०८ ॥

अपि नामैष पूर्येत पयोभिः पयसां पतिः ।
न तु त्रैलोक्यराज्येऽपि प्राप्ते लोभः प्रपूर्यते ॥ १०९ ॥

अनन्ता भोजनाच्छादविषयद्रव्यसंचयाः ।
भुक्तास्तथापि लोभस्य नांशोऽपि परिपूर्यते ॥ ११० ॥

लोभस्त्यक्तो यदि तदा तपोभिरफलैरलम् ।
लोभस्त्यक्तो न चेत् तर्हि तपोभिरफलैरलम् ॥ १११ ॥

मृदित्वा शास्त्रसर्वस्वं तदेतदवधार्यताम् ।
लोभस्यैकस्य हानाय प्रयतेत महामतिः ॥ ११२ ॥

लोभसागरमुद्वेलमतिवेलं महामतिः ।
संतोषसेतुबन्धेन प्रसरन्तं निवारयेत् ॥ ११३ ॥

यथा नृणां चक्रवर्ती सुराणां पाकशासनः ।
तथा गुणानां सर्वेषां संतोषः प्रवरो गुणः ॥ ११४ ॥

संतोषयुक्तस्य यतेरसंतुष्टस्य चक्रिणः ।
तुलया संमितो मन्ये प्रकर्षः सुख-दुःखयोः ॥ ११५ ॥

स्वाधीनं राज्यमुत्सृज्य संतोषामृततृष्णया ।
निःसङ्गत्वं प्रपद्यन्ते तत्क्षणाच्चक्रवर्तिनः ॥ ११६ ॥

निवृत्तायां धनेच्छायां पार्श्वस्था एव संपदः ।
अङ्गुल्या पिहिते कर्णे शब्दाद्वैतं हि जृम्भते ॥ ११७ ॥

संतोषसिद्धौ संसिद्धाः प्रतिवस्तुविरक्तयः ।
अक्ष्णोः पिधाने पिहितं ननु विश्वं चराचरम् ॥ ११८ ॥

किमिन्द्रियाणां दमनैः ? किं कायपरिपीडनैः ?
ननु संतोषमात्रेण मुक्तिश्रीर्मुखमीक्षते ॥ ११९ ॥

जीवन्तोऽपि विमुक्तास्ते ये मुक्तिसुखशालिनः ।
किं वा विमुक्तेः शिरसि श्रृङ्गं किमपि वर्तते ? ॥ १२० ॥

किं रागद्वेषसंकीर्णं ? किं वा विषयसंभवम् ?
येन संतोषजं सौख्यं हीयेत शिवशर्मणः ॥ १२१ ॥

परप्रत्यायनासारैः किं वा शास्त्रसुभाषितैः ?
मीलिताक्षा विमृशन्तु संतोषास्वादजं सुखम् ॥ १२२ ॥

चेत् कारणानुकारीणि कार्याणि प्रतिपद्यसे ।
संतोषानन्दजन्मा तन्मोक्षानन्दः प्रतीयताम् ॥ १२३ ॥

यच्च तीव्रं तपःकर्म कर्मनिर्मूलनं जगुः ।
सर्वं तदपि संतोषरहितं विफलं विदुः ॥ १२४ ॥

कृषि-सेवा-पाशुपाल्य-वाणिज्यैः किं सुखार्थिनाम् ?
ननु संतोषपानात् किं नात्मा निर्वृतिमाप्यते ! ॥ १२५ ॥

यत् संतोषवतां सौख्यं तृणसंस्तरशायिनाम् ।
न तत् संतोषवन्ध्यानां तूलिकाशायिनामपि ॥ १२६ ॥

असंतुष्टास्तृणायन्ते धनिनोऽपीशिनां पुरः ।
ईशिनोऽपि तृणायन्ते संतुष्टानां पुरः स्थिताः ॥ १२७ ॥

आयासमात्रं नश्वरयश्चक्रिशक्रादिसंपदः ।
अनायासं च नित्यं च सुखं संतोषसंभवम् ॥ १२८ ॥

इति लोभं निराकर्तुं सर्वदोषनिकेतनम् ।
अद्वैतसौख्यसदनं सुधीः संतोषमाश्रयेत् ॥ १२९ ॥

एवं जितकषायः सन्नत्रापि शिवसौख्यभाक् ।
परत्रावश्यमाप्नोति शिवं पुनरनश्वरम् ॥ १३० ॥

## ॥ षोडशश्रीशान्तिजिनदेशना - इन्द्रिय स्वरूपमयी ॥

अनेकदुःखसंताननिदानं दववह्निवत् ।
अहो खल्वेष संसारश्चतुर्गत्यात्मकः सदा ॥ १ ॥

क्रोधमानमायालोभाः कषायास्तस्य चोच्चकैः ।
आधारभूताश्चत्वारः स्तम्भा इव महौकसः ॥ २ ॥

तत्क्षीणेषु कषायेषु संसारः क्षीयते स्वयम् ।
मूलेषु हि विशुष्केषु शुष्क एव महीरुहः ॥ ३ ॥

विनेन्द्रियजयं नैव कषायान् जेतुमीश्वरः ।
हन्यते हैमनं जाड्यं न विना ज्वलितानलम् ॥ ४ ॥

अदान्तैरिन्द्रियहयैश्चलैरपथगामिभिः ।
आकृष्य नरकारण्ये जन्तुः सपदि नीयते ॥ ५ ॥

इन्द्रियैर्विजितो जन्तुः कषायैरभिभूयते ।
वीरैः कृष्टेष्टकः पूर्वं वप्रः कैः कैर्न खण्ड्यते ॥ ६ ॥

कुलघाताय पाताय बन्धाय च वधाय च ।
अनिर्जितानि जायन्ते करणानि शरीरिणाम् ॥ ७ ॥

इन्द्रियैः स्वार्थविवशैः कस्को नैव विडम्ब्यते ।
अपि विज्ञातशास्त्रार्थाश्चेष्टन्ते बालका इव ॥ ८ ॥

किमतोऽपि घृणास्थानमिन्द्रियाणां प्रकाश्यते ।
यद् बन्धौ बाहुबलिनि भरतोऽप्यस्त्रमक्षिपत् ॥ ९ ॥

जयो यद्बाहुबलिनि भरते च पराजयः ।
जिताजितानां तत्सर्वमिन्द्रियाणां विजृम्भितम् ॥ १० ॥

यच्छस्त्राशस्त्रि युध्यन्ते चरमेऽपि भवे स्थिताः ।
दुरन्तानामिन्द्रियाणां महिमानेन लभ्यते ॥ ११ ॥

दण्ड्यन्तां चण्डचरितैरिन्द्रियैः पशवो नराः ।
शान्तमोहाः पूर्वविदो दण्ड्यन्ते यत्तदद्भुतम् ॥ १२ ॥

जिता हृषीकैरत्यन्तं देवदानवमानवाः ।
जुगुप्सितानि कर्माणि ही तन्वन्ति तपस्विनः ॥ १३ ॥

अखाद्यमपि खादन्ति चाप्यपेयं पिबन्ति च ।
अगम्यं चापि गच्छन्ति हृषीकवशगा नराः ॥ १४ ॥

वेश्यानां नीचकर्माणि दास्यान्यपि च कुर्वते ।
कुलशीलोज्झितास्त्यक्तकरुणैः करणैर्हताः ॥ १५ ॥

परद्रव्ये परस्त्रीषु मोहान्धमनसां नृणाम् ।
या प्रवृत्तिः सेन्द्रियाणामतन्द्राणां विजृम्भितम् ॥ १६ ॥

पाणिपादेन्द्रियच्छेदमरणानि शरीरिभिः ।
प्राप्यन्ते यद्वशात्तेषां करणानां किमुच्यते ॥ १७ ॥

विनयं ग्राहयन्त्यन्यैर्ये स्वयं करणैर्जिताः ।
पिधाय पाणिना वक्त्रं तान् हसन्ति विवेकिनः ॥ १८ ॥

आ देवेन्द्रादा च कीटाद्ये केचिदिह जन्तवः ।
विमुच्यैकं वीतरागं ते सर्वेऽपीन्द्रियैर्जिताः ॥ १९ ॥

वशास्पर्शसुखास्वादप्रसारितकरः करी ।
आलानबन्धनक्लेशमासादयति तत्क्षणात् ॥ २० ॥

पयस्यगाधे विचरन् गिलन् गलगतामिषम् ।
मैनिकस्य करे दीनो मीनः पतति निश्चितम् ॥ २१ ॥

निपतन्मत्तमातङ्गकपोले गन्धलोलुपः ।
कर्णतालतलाघातान्मृत्युमाप्नोति षट्पदः ॥ २२ ॥

कनकच्छेदसङ्काशशिखालोकविमोहितः ।
रभसेन पतन् दीपे शलभो लभते मृतिम् ॥ २३ ॥

हरिणो हारिणीं गीतिमाकर्णयितुमुद्धुरः ।
आकर्णाकृष्टचापस्य याति व्याधस्य वेध्यताम् ॥ २४ ॥

एवं विषय एकैकः पञ्चत्वाय निषेवितः ।
कथं हि युगपत् पञ्च पञ्चत्वायं भवन्ति न ? ॥ २५ ॥

तदिन्द्रियजयं कुर्यान्मनःशुद्ध्या महामतिः ।
यां विना यमनियमैः कायक्लेशो वृथा नृणाम् ॥ २६ ॥

अनिर्जितेन्द्रियग्रामो यतो दुःखैः प्रबाध्यते ।
तस्माज्जयेदिन्द्रियाणि सर्वदुःखविमुक्तये ॥ २७ ॥

न चेन्द्रियाणां विजयः सर्वथैवाप्रवर्तनम् ।
रागद्वेषविमुक्तानां प्रवृत्तिरपि तज्जयः ॥ २८ ॥

अशक्यो विषयो स्प्रष्टुमिन्द्रियैः स्वसमीपगः ।
रागद्वेषौ पुनस्तत्र मतिमान् परिवर्जयेत् ॥ २९ ॥

हताहतानीन्द्रियाणि सदासंयमयोगिनाम् ।
अहतानि हितार्थेषु हतान्यहितवस्तुषु ॥ ३० ॥

जितान्यक्षाणि मोक्षाय संसारायाजितानि तु ।
तदेतदन्तरं ज्ञात्वा यद्युक्तं तत्समाचरेत् ॥ ३१ ॥

स्पर्शे मृदौ च तूलादेरुपलादेश्च कर्कशे ।
भवेद्रत्यरती हित्वा जेता स्पर्शनमिन्द्रियम् ॥ ३२ ॥

रसे स्वादे च भक्ष्यादेरितरस्मिन्नथापि वा ।
प्रीत्यप्रीती विमुच्योच्चैर्जिह्वेन्द्रियजयी भवेत् ॥ ३३ ॥

घ्राणदेशमनुप्राप्ते शुभे गन्धे परत्र वा ।
ज्ञात्वा वस्तुपरीणामं जेतव्यं घ्राणमिन्द्रियम् ॥ ३४ ॥

मनोज्ञं रूपमालोक्य यदि वा तद्विलक्षणम् ।
त्यजन् हर्षं जुगुप्सां च निर्जयेच्चक्षुरिन्द्रियम् ॥ ३५ ॥

स्वरे श्रव्ये च वीणादेः खरोष्ट्रादेश्च दुःश्रवे ।
रतिं जुगुप्सां च जयन् श्रोत्रेन्द्रियजयी भवेत् ॥ ३६ ॥

कोऽपि नास्तीह विषयो मनोज्ञ इतरोऽपि वा ।
य इन्द्रियैर्नोपभुक्तस्तत्स्वास्थ्यं किं न सेव्यते ? ॥ ३७ ॥

शुभा अप्यशुभायन्ते शुभायन्तेऽशुभा अपि ।
विषयास्तत्क्व रज्येत ? विरज्येत क्व चेन्द्रियैः ? ॥ ३८ ॥

स एव रुच्यो द्वेष्यो वा विषयो यदि हेतुतः ।
शुभाशुभत्वं भावानां तन्न तत्त्वेन जातुचित् ॥ ३९ ॥

जितेन्द्रियो मनःशुद्ध्या ततः क्षीणकषायकः ।
अचिरान्मोक्षमाप्नोति जन्तुरक्षीणशर्मकम् ॥ ४० ॥

## ॥ सप्तदशश्रीकुन्थुजिनदेशना - मनःशुद्धिफलमयी ॥

योनिलक्षचतुरशीत्यावर्तापातभीषणः ।
अयं खलु भवाम्भोधिर्महादुःखनिबन्धनम् ॥ १ ॥

तरणे च भवाम्भोधेरलंभूष्णुर्विवेकिनाम् ।
यानपात्रं मनःशुद्धिरिन्द्रियोर्मिजयोर्जिता ॥ २ ॥

दीपिका खल्वनिर्वाणा निर्वाणपथदर्शिनी ।
एकैव मनसः शुद्धिः समाम्नाता मनीषिभिः ॥ ३ ॥

सत्यां हि मनसः शुद्धौ सन्त्यसन्तोऽपि यद्गुणाः ।
सन्तोऽप्यसत्यां नो सन्ति सैव कार्या बुधैस्ततः ॥ ४ ॥

मनःशुद्धिमबिभ्राणा ये तपस्यन्ति मुक्तये ।
त्यक्त्वा नावं भुजाभ्यां ते तितीर्षन्ति महार्णवम् ॥ ५ ॥

तपस्विनो मनःशुद्धिविनाभूतस्य सर्वथा ।
ध्यानं खलु मुधा चक्षुर्विकलस्येव दर्पणः ॥ ६ ॥

तप्यमानांस्तपो मुक्तौ गन्तुकामान् शरीरिणः ।
वात्येव तरलं चेतः क्षिपत्यन्यत्र कुत्रचित् ॥ ७ ॥

मनःक्षपाचरो भ्राम्यन्नपशङ्कं निरङ्कुशः ।
प्रपातयति संसारावर्तगर्ते जगत्त्रयीम् ॥ ८ ॥

अनिरुद्धमनस्कः सन् योगश्रद्धां दधाति यः ।
पद्भ्यां जिगमिषुर्ग्रामं स पङ्गुरिव हस्यते ॥ ९ ॥

मनोरोधे निरुध्यन्ते कर्माण्यपि समन्ततः ।
अनिरुद्धमनस्कस्य प्रसरन्ति हि तान्यपि ॥ १० ॥

मनःकपिरयं विश्वपरिभ्रमणलम्पटः ।
नियन्त्रणीयो यत्नेन मुक्तिमिच्छुभिरात्मनः ॥ ११ ॥

तदवश्यं मनःशुद्धिः कर्तव्या सिद्धिमिच्छता ।
तपःश्रुतयमप्रायैः किमन्यैः कायदण्डनैः ॥ १२ ॥

मनःशुद्ध्यैव कर्तव्यो रागद्वेषविनिर्जयः ।
कालुष्यं येन हित्वात्मा स्वस्वरूपेऽवतिष्ठते ॥ १३ ॥

**॥ अष्टादशश्रीमदरजिनदेशना -- रागद्वेषस्वरूपमयी ॥**

चतुर्वर्गेऽग्रणीर्मोक्ष एकान्तसुखसागरः ।
तत्साधकतमं ध्यानमधीनं मनसश्च तत् ॥ १ ॥

आत्मायत्तमपि स्वान्तं कुर्वतामत्र योगिनाम् ।
रागादिभिः समाक्रम्य परायत्तं विधीयते ॥ २ ॥

रक्ष्यमाणमपि स्वान्तं समादाय मनाग्मिषम् ।
पिशाचा इव रागाद्याश्छलयन्ति मुहुर्मुहुः ॥ ३ ॥

रागादितिमिरध्वस्तज्ञानेन मनसा जनः ।
अन्धेनान्ध इवाकृष्टः पात्यते नरकावटे ॥ ४ ॥

द्रव्यादिषु रतिप्रीती राग इत्यभिधीयते ।
तेष्वेवारतिमप्रीतिं चाहुर्द्वेषं मनीषिणः ॥ ५ ॥

उभावेतौ दृढतरौ बन्धनं सर्वजन्मिनाम् ।
सर्वदुःखानोकहानां मूलकन्दौ प्रकीर्तितौ ॥ ६ ॥

कः सुखे विस्मयस्मेरो दुःखे कः कृपणो भवेत् ।
मोक्षं को नाप्नुयाद्रागद्वेषौ स्यातां न चेदिह ॥ ७ ॥

रागेण ह्यविनाभावी द्वेषो द्वेषेण चेतरः ।
तयोरेकतरत्यागे परित्यक्तावुभावपि ॥ ८ ॥

दोषाः स्मरप्रभृतयो रागस्य परिचारिकाः ।
मिथ्याभिमानप्रमुखा द्वेषस्य तु परिच्छदः ॥ ९ ॥

तयोर्मोहः पिता बीजं नायकः परमेश्वरः ।
ताभ्यामभिन्नस्तद्रक्ष्यः सर्वदोषपितामहः ॥ १० ॥

एवमेते त्रयो दोषा नातो दोषान्तरं क्वचित् ।
तैरमी जन्तवः सर्वे भ्राम्यन्ते भववारिधौ ॥ ११ ॥

स्वभावेन हि जीवोऽयं स्फटिकोपलनिर्मलः ।
उपाधिभूतैरेतैस्तु तादात्म्येनावभासते ॥ १२ ॥

अराजकमहो विश्वं यदेभिः पश्यतोहरैः ।
ह्रियते ज्ञानसर्वस्वं स्वरूपमपि जन्मिनाम् ॥ १३ ॥

ये जन्तवो निगोदेषु येऽपि चासन्नमुक्तयः ।
सर्वत्रास्पृष्टकरुणा पतत्येषां पताकिनी ॥ १४ ॥

मुक्त्या वैरं किमेतेषां ? मुक्तिकामैः सहाथवा ?
येनोभयसमायोगस्तैर्भवन् प्रतिषिध्यते ॥ १५ ॥

व्याघ्रव्यालजलाग्निभ्यो न बिभेति तथा मुनिः ।
लोकद्वयापकारिभ्यो रागादिभ्यो भृशं यथा ॥ १६ ॥

वर्त्मातिसंकटमहो योगिभिः समुपाश्रितम् ।
रागद्वेषौ व्याघ्रसिंहौ पार्श्वतो यस्य तिष्ठतः ॥ १७ ॥

अस्ततन्द्रैरतः पुंभिर्निर्वाणपदकाङ्क्षिभिः ।
विधातव्यः समत्वेन रागद्वेषद्विषज्जयः ॥ १८ ॥

## ॥ एकोनविंशतितमश्रीमल्लिजिनदेशना-समतास्वरूपमयी ॥

स्वतोऽप्यपारः संसारो वर्धते च विशेषतः ।
रागादिना पूर्णमासीदिनेनेव सरित्पतिः ॥ १ ॥

अमन्दानन्दजनके साम्यवारिणि मज्जताम् ।
जायते सहसा पुंसां रागद्वेषमलक्षयः ॥ २ ॥

प्रणिहन्ति क्षणार्धेन साम्यमालम्ब्य कर्म तत् ।
यन्न हन्यान्नरस्तीव्रतपसा जन्मकोटिभिः ॥ ३ ॥

कर्म जीवं च संश्लिष्टं परिज्ञातात्मनिश्चयः ।
विभिन्नीकुरुते साधुः सामायिकशलाकया ॥ ४ ॥

रागादिध्वान्तविध्वंसे कृते सामायिकांशुना ।
स्वस्मिन् स्वरूपं पश्यन्ति योगिनः परमात्मनः ॥ ५ ॥

स्निह्यन्ति जन्तवो नित्यवैरिणोऽपि परस्परम् ।
अपि स्वार्थकृते साम्यभाजः साधोः प्रभावतः ॥ ६ ॥

चेतनाचेतनैर्भावैरिष्टानिष्टतया स्थितैः ।
न मुह्यति मनो यस्य तस्य साम्यं प्रचक्ष्यते ॥ ७ ॥

गोशीर्षचन्दनालेपे वासिच्छेदे च बाहयोः ।
अभिन्ना चित्तवृत्तिश्चेत्तदा साम्यमनुत्तमम् ॥ ८ ॥

अभिष्टोतरि च प्रीते रोषान्धे चाभिशप्तरि ।
यस्याविशेषणं चेतः स साम्यमवगाहते ॥ ९ ॥

हूयते न जप्यते न दीयते वा न किंचन ।
अहो अमूल्यक्रीतीयं साम्यमात्रेण निर्वृतिः ॥ १० ॥

प्रयत्नकृष्टैः क्लिष्टैश्च रागाद्यैः किमुपासितैः ?
अयत्नलभ्यं हृद्यं च धार्यं साम्यं सुखावहम् ॥ ११ ॥

परोक्षार्थप्रतिक्षेपात् स्वर्गमोक्षावपह्नुताम् ।
साम्यशर्म स्वसंवेद्यं नास्तिकोऽपि न निह्नुते ॥ १२ ॥

कविप्रलापरूढेऽस्मिन्नमृते किं विमुह्यते ?
स्वसंवेद्यरसं हन्त पेयं साम्यरसायनम् ॥ १३ ॥

खाद्यलेह्यचूष्यपेयरसेभ्यो विमुखा अपि ।
पिबन्ति यतयः स्वैरं साम्यामृतरसं मुहुः ॥ १४ ॥

कण्ठपीठे लुठन् भोगिभोगो मन्दारदाम च ।
यस्याप्रीत्यै न वा नो वा प्रीत्यै स समतापतिः ॥ १५ ॥

न गूढं किंचनाचार्यमुष्टिः काचिन्न चापरा ।
बालानां सुधियां चैकं साम्यं भवरुजौषधम् ॥ १६ ॥

अतिक्रूरतरं कर्म शान्तानामपि योगिनाम् ।
यद्घ्नन्ति साम्यशस्त्रेण रागादीनां कुलानि ते ॥ १७ ॥

अयं प्रभावः परमः समत्वस्य प्रतीयताम् ।
यत्पापिनः क्षणार्धेन पदमृच्छन्ति शाश्वतम् ॥ १८ ॥

यस्मिन् सति सफलतामसत्यफलतां व्रजेत् ।
रत्नत्रयं स्वस्ति तस्मै समत्वाय महौजसे ॥ १९ ॥

संसर्गेऽप्युपसर्गाणामपि मृत्यावुपस्थिते ।
न तत्कालोचितं किंचित् साम्यादौपयिकं वरम् ॥ २० ॥

एकं मोक्षतरोर्बीजमिहात्यद्भुतशर्मदम् ।
तस्मात्साम्यं विधातव्यं रागद्वेषजयैषिणा ॥ २१ ॥

## ॥ विंशतितमश्रीमुनिसुव्रतजिनदेशना-मार्गानुसारिगुणमयी ॥

क्षारोदादिव संसारादसारात् सारमुत्तमम् ।
उपाददीत सद्रत्नमिव धर्मं महामतिः ॥ १ ॥

संयमः सूनृतं शौचं ब्रह्माकिंचनता तपः ।
क्षान्तिर्मार्दवमृजुता मुक्तिश्च दशधा स तु ॥ २ ॥

निरीहो निजदेहेऽपि स्वस्मिन्नपि हि निर्ममः ।
समाशयो नमस्कुर्वत्यपकुर्वति चानिशम् ॥ ३ ॥

नितान्तमीश्वरः सोढुमुपसर्गपरीषहान् ।
मैत्र्यादिभिर्भावनाभिर्नित्यं भावितमानसः ॥ ४ ॥

क्षमावान् विनयी दान्तः श्रद्धालुर्गुरुशासने ।
जात्यादिगुणसंपन्नो यतिधर्माय कल्पते ॥ ५ ॥

सम्यक्त्वमूलानि पञ्चाणुव्रतानि गुणास्त्रयः ।
शिक्षापदानि चत्वारि धर्मोऽयं गृहमेधिनाम् ॥ ६ ॥

न्यायसम्पन्नविभवः शिष्टाचारप्रशंसकः ।
कुलशीलसमैः सार्धं कृतोद्वाहोऽन्यगोत्रजैः ॥ ७ ॥

पापभीरुः प्रसिद्धं च देशाचारं समाचरन् ।
अवर्णवादी न क्वापि राजादिषु विशेषतः ॥ ८ ॥

अनतिव्यक्तगुप्ते च स्थाने सुप्रातिवेश्मिके ।
अनेकनिर्गमद्वारविवर्जितनिकेतनः ॥ ९ ॥

कृतसङ्गः सदाचारैर्मातापित्रोश्च पूजकः ।
त्यजन्नुपप्लुतं स्थानमप्रवृत्तश्च गर्हिते ॥ १० ॥

व्ययमायोचितं कुर्वन् वेषं वित्तानुसारतः ।
अष्टभिर्धीगुणैर्युक्तः शृण्वानो धर्ममन्वहम् ॥ ११ ॥

अजीर्णे भोजनत्यागी काले भोक्ता च सात्म्यतः ।
अन्योऽन्याप्रतिबन्धेन त्रिवर्गमपि साधयन् ॥ १२ ॥

यथावदतिथौ साधौ दीने च प्रतिपत्तिकृत् ।
सदानभिनिविष्टश्च पक्षपाती गुणेषु च ॥ १३ ॥

अदेशाकालयोश्चर्यां त्यजञ्ञानन् बलाबलम् ।
वृत्तस्थज्ञानवृद्धानां पूजकः पोष्यपोषकः ॥ १४ ॥

दीर्घदर्शी विशेषज्ञः कृतज्ञो लोकवल्लभः ।
सलज्जः सदयः सौम्यः परोपकृतिकर्मठः ॥ १५ ॥

अन्तरङ्गारिषड्वर्गपरिहारपरायणः ।
वशीकृतेन्द्रियग्रामो गृहिधर्माय कल्पते ॥ १६ ॥

संसारेऽस्मिन्मनुष्येण चैतन्यफलमिच्छता ।
सेव्यः श्रावकधर्मोऽपि यतिधर्माक्षमेण तु ॥ १७ ॥

## ॥ एकविंशतितमश्रीनमिजिनदेशना–श्रावकाहोरात्रचर्या ॥

असारः खलु संसारः चलदूर्मिचलं धनम् ।
विद्युद्विलाससदृशं शरीरमपि नश्वरम् ॥ १ ॥

अनास्थां सर्वथा तेषु तद्विधाय विचक्षणः ।
यतेत यतिधर्माय मुमुक्षुर्मोक्षवर्त्मने ॥ २ ॥

अशक्तस्तद्विधाने चेत्तदाकाङ्क्षी तथापि हि ।
सम्यक्छ्रावकधर्मायोत्तिष्ठेत द्वादशात्मने ॥ ३ ॥

नयेन्नित्यमहोरात्रं श्रावकस्त्वप्रमद्वरः ।
धर्म्याभिरिति चेष्टाभिर्मनोवाक्कायजन्मभिः ॥ ४ ॥

ब्राह्मे मुहूर्त उत्तिष्ठेत् परमेष्ठिस्तुतिं पठन् ।
किंधर्मा किङ्कुलश्चास्मि किंव्रतोऽस्मीति च स्मरन् ॥ ५ ॥

शुचिः पुष्पामिषस्तोत्रैर्देवमभ्यर्च्य वेश्मनि ।
प्रत्याख्यानं यथाशक्ति कृत्वा देवगृहं व्रजेत् ॥ ६ ॥

प्रविश्य विधिना तत्र त्रिः प्रदक्षिणयेज्जिनम् ।
पुष्पादिभिस्तमभ्यर्च्य स्तवनैरुत्तमैः स्तुयात् ॥ ७ ॥

ततो गुरूणामभ्यर्णे प्रतिपत्तिपुरःसरम् ।
विदधीत विशुद्धात्मा प्रत्याख्यानप्रकाशनम् ॥ ८ ॥

अभ्युत्थानं तदालोकेऽभियानं च तदागमे ।
शिरस्यञ्जलिसंश्लेषः स्वयमासनढौकनम् ॥ ९ ॥

आसनाभिग्रहो भक्त्या वन्दना पर्युपासनम् ।
तद्यानेऽनुगमश्चेति प्रतिपत्तिरियं गुरोः ॥ १० ॥

ततः प्रतिनिवृत्तः सन् स्थानं गत्वा यथोचितम् ।
सुधीर्धर्माविरोधेन विदधीतार्थचिन्तनम् ॥ ११ ॥

ततो मध्याह्निकीं पूजां कुर्यात् कृत्वाथ भोजनम् ।
तद्विद्भिः सह शास्त्रार्थरहस्यानि विचारयेत् ॥ १२ ॥

ततश्च सन्ध्यासमये कृत्वा देवार्चनं पुनः ।
कृतावश्यककर्मा च कुर्यात् स्वाध्यायमुत्तमम् ॥ १३ ॥

न्याय्ये काले ततो देवगुरुस्मृतिपवित्रितः ।
निद्रामल्पामुपासीत प्रायेणाब्रह्मवर्जकः ॥ १४ ॥

निद्राच्छेदे योषिदङ्गसतत्त्वं परिचिन्तयेत् ।
महात्मनां मुनीनां हि तन्निवृत्तिं परामृशन् ॥ १५॥

यकृच्छकृन्मलश्लेष्ममज्जास्थिपरिपूरिताः ।
स्नायुस्यूता बही रम्याः स्त्रियश्चर्मप्रसेविकाः ॥ १६ ॥

बहिरन्तर्विपर्यासः स्त्रीशरीरस्य चेद्भवेत् ।
तस्यैव कामुकः कुर्याद्गृध्रगोमायुगोपनम् ॥ १७ ॥

स्त्रीशस्त्रेणापि चेत्कामो जगदेतज्जिगीषति ।
तुच्छपिच्छमयं शस्त्रं किं नादत्ते स मूढधीः ॥ १८ ॥

सङ्कल्पयोनिनानेन हहा विश्वं विडम्बितम् ।
तदुत्खनामि सङ्कल्पं मूलमस्येति चिन्तयेत् ॥ १९ ॥

यो यः स्याद् बाधको दोषस्तस्य तस्य प्रतिक्रियाम् ।
चिन्तयेद् दोषमुक्तेषु प्रमोदं यतिषु व्रजन् ॥ २० ॥

दुःस्थां भवस्थितिं स्थेम्ना सर्वजीवेषु चिन्तयन् ।
निसर्गसुखसर्गं तेष्वपवर्गं विमार्गयेत् ॥ २१ ॥

जिनो देवः कृपा धर्मो गुरवो यत्र साधवः ।
श्रावकत्वाय कस्तस्मै न श्लाघेताविमूढधीः ॥ २२ ॥

जिनधर्मविनिर्मुक्तो मा भूवं चक्रवर्त्यपि ।
स्यां चेटोऽपि दरिद्रोऽपि जिनधर्माधिवासितः ॥ २३ ॥

त्यक्तसङ्गो जीर्णवासा मलक्लिन्नकलेवरः ।
भजन्माधुकरीं वृत्तिं मुनिचर्यां कदाश्रये ॥ २४ ॥

त्यजन् दुःशीलसंसर्गं गुरुपादरजः स्पृशन् ।
कदाहं योगमभ्यस्यन् प्रभवेयं भवच्छिदे ॥ २५ ॥

महानिशायां प्रकृते कायोत्सर्गे पुराद्बहिः ।
स्तम्भवत् स्कन्धकर्षणं वृषाः कुर्युः कदा मयि ॥ २६ ॥

वने पद्मासनासीनं क्रोडस्थितमृगार्भकम् ।
कदा घ्रास्यन्ति वक्त्रे मां जरन्तो मृगयूथपाः ॥ २७ ॥

शत्रौ मित्रे तृणे स्त्रैणे स्वर्णेऽश्मनि मणौ मृदि ।
मोक्षे भवे भविष्यामि निर्विशेषमतिः कदा ॥ २८ ॥

अधिरोढुं गुणश्रेणीं निःश्रेणीं मुक्तिवेश्मनः ।
परानन्दलताकन्दान् कुर्यादिति मनोरथान् ॥ २९ ॥

इत्याहोरात्रिकीं चर्यामप्रमत्तः समाचरन् ।
यथावदुक्तवृत्तस्थो गृहस्थोऽपि विशुध्यति ॥ ३० ॥

## ॥ द्वाविंशतितमश्रीनेमिनाथजिनदेशना-मद्यादिदोषदर्शिका ॥

विद्युद्विलासचपलाः श्रियः सर्वशरीरिणाम् ।
संयोगा विप्रयोगान्ताः स्वप्नप्राप्तार्थसन्निभाः ॥ १ ॥

गत्वरं यौवनमपि मेघच्छायासहोदरम् ।
अम्बुबुद्बुदकल्पानि वपूंष्यपि वपुष्मताम् ॥ २ ॥

तस्मादसारे संसारे सारमत्र न किंचन ।
सारं तु दर्शनज्ञानचारित्रपरिपालनम् ॥ ३ ॥

तत्त्वानां श्रद्दधानत्वं सम्यग्दर्शनमुच्यते ।
यथावस्थिततत्त्वानां बोधो ज्ञानं प्रकीर्तितम् ॥ ४ ॥

सावद्ययोगविरतिश्चारित्रं मुक्तिकारणम् ।
सर्वात्मना यतीन्द्राणां देशतः स्यादगारिणाम् ॥ ५ ॥

देशचारित्रविरतो विरतानामुपासकः ।
भवस्वरूपं जानानः श्रावको जीवितावधि ॥ ६ ॥

मद्यं मांसं नवनीतं मधूदुम्बरपञ्चकम् ।
अनन्तकायमज्ञातफलं रात्रौ च भोजनम् ॥ ७ ॥

आमगोरससंपृक्तद्विदलं पुष्पितौदनम् ।
दध्यहर्द्वितयातीतं कुथितान्नं च वर्जयेत् ॥ ८ ॥

मदिरापानमात्रेण बुद्धिर्नश्यति दूरतः ।
वैदग्धी बन्धुरस्यापि दौर्भाग्येणेव कामिनी ॥ ९ ॥

पापाः कादम्बरीपानविवशीकृतचेतसः ।
जननीं हा प्रियीयन्ति जननीयन्ति च प्रियाम् ॥ १० ॥

न जानाति परं स्वं वा मद्याच्चलितचेतनः ।
स्वामीयति वराकः स्वं स्वामिनं किंकरीयति ॥ ११ ॥

मद्यपस्य शबस्येव लुंठितस्य चतुष्पथे ।
मूत्रयन्ति मुखे श्वानो व्यात्ते विवरशङ्कया ॥ १२ ॥

मद्यपानरसे मग्नो नग्नः स्वपिति चत्वरे ।
गूढं च स्वमभिप्रायं प्रकाशयति लीलया ॥ १३ ॥

वारुणीपानतो यान्ति कान्तिकीर्तिमतिश्रियः ।
विचित्राश्चित्ररचना विलुठत्कज्जलादिव ॥ १४ ॥

भूतात्तवन्नरीनर्ति रारटीति सशोकवत् ।
दाहज्वरार्तवद्भूमौ सुरापो लोलुठीति च ॥ १५ ॥

विदधत्यङ्गशैथिल्यं ग्लपयन्तीन्द्रियाणि च ।
मूर्छामतुच्छां यच्छन्ती हाला हालाहलोपमा ॥ १६ ॥

विवेकः संयमो ज्ञानं सत्यं शौचं दया क्षमा ।
मद्यात्प्रलीयते सर्वं तृण्या वह्निकणादिव ॥ १७ ॥

रसोद्भवाश्च भूयांसो भवन्ति किल जन्तवः ।
तस्मान्मद्यं न पातव्यं हिंसापातकभीरुणा ॥ १८ ॥

दत्तं न दत्तमात्तं च नात्तं कृतं च नो कृतम् ।
मृषोद्यराज्यादिव हा स्वैरं वर्दति मद्यपः ॥ १९ ॥

गृहे बहिर्वा मार्गे वा परद्रव्याणि मूढधीः ।
वधबन्धादिनिर्भीको गृह्णात्याच्छिद्य मद्यपः ॥ २० ॥

बालिकां युवतीं वृद्धां ब्राह्मणीं श्वपचीमपि ।
भुङ्क्ते परस्त्रियं सद्यो मद्योन्मादकदर्थितः ॥ २१ ॥

रटन् गायन् लुठन् धावन् कुप्यंस्तुष्यन् रुदन् हसन् ।
स्तम्भन्नमन् भ्रमंस्तिष्ठन् सुरापः पापराड् नटः ॥ २२ ॥

पिबन्नपि मुहुर्मद्यं मद्यपो नैव तुष्यति ।
जन्तुजातं कवलयन् कृतान्त इव सर्वदा ॥ २३ ॥

दोषाणां कारणं मद्यं मद्यं कारणमापदाम् ।
रोगातुर इवापथ्यं तस्मान्मद्यं विवर्जयेद् ॥ २४ ॥

चिखादिषति यो मांसं प्राणिप्राणापहारतः ।
उन्मूलयत्यसौ मूलं दयाख्यं धर्मशाखिनः ॥ २५ ॥

चिखादिषति यो मांसं दयां यो हि चिकीर्षति ।
ज्वलति ज्वलने वल्लीं स रोपयितुमिच्छति ॥ २६ ॥

हन्ता पलस्य विक्रेता संस्कर्ता भक्षकस्तथा ।
क्रेतानुमन्ता दाता च घातकाः सर्व एव ते ॥ २७ ॥

ये भक्षयन्त्यन्यपलं स्वकीयपलपुष्टये ।
त एव घातका यत्र वधको भक्षकं विना ॥ २८ ॥

मिष्टान्नान्यपि विष्टासादमृतान्यपि मूत्रसात् ।
स्युर्यस्मिन्नङ्गकस्यास्य कृते कः पापमाचरेत् ॥ २९ ॥

मांसास्वादनलुब्धस्य देहिनं देहिनं प्रति ।
हन्तुं प्रवर्तते बुद्धिः शाकिन्या इव दुर्धियः ॥ ३० ॥

ये भक्षयन्ति पिशितं दिव्यभोज्येषु सत्स्वपि ।
सुधारसं परित्यज्य भुञ्जते ते हलाहलम् ॥ ३१ ॥

न धर्मो निर्दयस्यास्ति पलादस्य कुतो दया ।
पललुब्धो न तद्वेत्ति विद्याद्वोपदिशेन्न हि ॥ ३२ ॥

नान्यस्ततो गतघृणो नरकार्चिष्मदिन्धनम् ।
स्वमांसं परमांसेन यः पोषयितुमिच्छति ॥ ३३ ॥

शुक्रशोणितसंभूतं विष्टारसविवर्धितम् ।
लोहितं स्त्यानतामासं कोऽश्नीयादकृमिः पलम् ॥ ३४ ॥

सद्यः संमूर्च्छितानन्तजन्तुसन्तानदूषितम् ।
नरकाध्वनि पाथेयं कोऽश्नीयात् पिशितं सुधीः ॥ ३५ ॥

अन्तर्मुहूर्तात्परतः सुसूक्ष्मा जन्तुराशयः ।
यत्र मूर्छन्ति तन्नाद्यं नवनीतं विवेकिभिः ॥ ३६ ॥

एकस्यापि हि जीवस्य हिंसने किमघं भवेत् ।
जन्तुजातमयं तत्को नवनीतं निषेवते ॥ ३७ ॥

अनेकजन्तुसंघातनिघातनसमुद्भवम् ।
जुगुप्सनीयं लालावत् कः स्वादयति माक्षिकम् ॥ ३८ ॥

भक्षयन्माक्षिकं क्षुद्रजन्तुलक्षक्षयोद्भवम् ।
स्तोकजन्तुनिहन्तृभ्यः शौनिकेभ्योऽतिरिच्यते ॥ ३९ ॥

एकैककुसुमक्रोडाद्रसमापीय मक्षिकाः ।
यद्वमन्ति मधूच्छिष्टं तदश्(न)न्ति न धार्मिकाः ॥ ४० ॥

अप्यौषधकृते जग्धं मधु श्वभ्रनिबन्धनम् ।
भक्षितः प्राणनाशाय कालकूटकणोऽपि हि ॥ ४१ ॥

मधुनोऽपि हि माधुर्यमबोधैरहहोच्यते ।
आसाद्यन्ते यदास्वादाच्चिरं नरकवेदनाः ॥ ४२ ॥

उदुम्बरवटप्लक्षकाकोदुम्बरशाखिनाम् ।
पिप्पलस्य च नाश्नीयात्फलं कृमिकुलाकुलम् ॥ ४३ ॥

अप्राप्नुवन्नन्यभक्ष्यमपि क्षामो बुभुक्षया ।
न भक्षयति पुण्यात्मा पञ्चोदुम्बरजं फलम् ॥ ४४ ॥

आर्द्रः कन्दः समग्रोऽपि सर्वः किसलयोऽपि च ।
स्नुहिलवणवृक्षत्वक्कुमारीगिरिकर्णिकाः ॥ ४५ ॥

शतावरीविरूढानि गडूची कोमलाम्लिका ।
पल्यङ्कोऽमृतवल्ली च वल्लः शूकरसंज्ञितः ॥ ४६ ॥

अनन्तकायाः सूत्रोक्ता अपरेऽपि कृपापरैः ।
मिथ्यादृशामविज्ञाता वर्जनीयाः प्रयत्नतः ॥ ४७ ॥

स्वयं परेण वा ज्ञातं फलमद्याद्विशारदः ।
निषिद्धे विषफले वा मा भूदस्य प्रवर्तनम् ॥ ४८ ॥

अन्नं प्रेतपिशाचाद्यैः सञ्चरद्भिर्निरङ्कुशैः ।
उच्छिष्टं क्रियते यत्र तत्र नाद्यादिनात्यये ॥ ४९ ॥

घोरान्धकाररुद्धाक्षैः पतन्तो यत्र जन्तवः ।
नैव भोज्ये निरीक्ष्यन्ते तत्र भुञ्जीत को निशि ॥ ५० ॥

मेधां पिपीलिका हन्ति यूका कुर्याज्जलोदरम् ।
कुरुते मक्षिका वान्तिं कुष्टरोगं च कोलिकः ॥ ५१ ॥

कण्टको दारुखण्डं च वितनोति गलव्यथाम् ।
व्यञ्जनान्तर्निपतितस्तालु विध्यति वृश्चिकः ॥ ५२ ॥

विलग्नश्च गले वालः स्वरभङ्गाय जायते ।
इत्यादयो दृष्टदोषाः सर्वेषां निशि भोजने ॥ ५३ ॥

नाप्रेक्ष्य सूक्ष्मजन्तूनि निश्यद्यात्प्रासुकान्यपि ।
अवश्यं जन्तुसंपातः संभवेदशने तदा ॥ ५४ ॥

संसृजज्जीवसंघातं भुञ्जाना निशि भोजनम् ।
राक्षसेभ्यो विशिष्यन्ते मूढात्मानः कथं नु ते ? ॥ ५५ ॥

वासरे च रजन्यां च यः खादन्नेव तिष्ठति ।
श्रृङ्गपुच्छपरिभ्रष्टः स्पष्टं स पशुरेव हि ॥ ५६ ॥

अह्नो मुखेऽवसानेऽपि यो द्वे द्वे घटिके त्यजन् ।
निशाभोजनदोषज्ञोऽश्नात्यसौ पुण्यभाजनम् ॥ ५७ ॥

अकृत्वा नियमं दोषाभोजनाद् दिनभोज्यपि ।
फलं भजेन्न निर्व्याजं न वृद्धिर्भाषितं विना ॥ ५८ ॥

ये वासरं परित्यज्य रजन्यामेव भुञ्जते ।
ते परित्यज्य माणिक्यं काचमाददते जडाः ॥ ५९ ॥

उलूककाकमार्जारगृध्रशम्बरशूकराः ।
अहिवृश्चिकगोधाश्च जायन्ते रात्रिभोजनात् ॥ ६० ॥

करोति विरतिं धन्यो यः सदा निशि भोजनात् ।
सोऽर्धं पुरुषायुष्कस्य स्यादवश्यमुपोषितः ॥ ६१ ॥

रजनीभोजनत्यागे ये गुणाः परितोऽपि तान् ।
सद्गतैरेव जनकान् कः संख्यातुमलं भवेत् ॥ ६२ ॥

आमगोरससंपृक्तद्विदलादिषु जन्तवः ।
दृष्टाः केवलिभिः सूक्ष्मास्तस्मात्तानि विवर्जयेत् ॥ ६३ ॥

जन्तुमिश्रं फलं पुष्पं पत्रं चान्यदपि त्यजेत् ।
सन्धानमपि संसक्तं दयाधर्मपरायणः ॥ ६४ ॥

## ॥ त्रयोविंशतितमश्रीपार्श्वजिनदेशना–गृहिव्रतातिचाराः ॥

अस्मिन् भवमहारण्ये जरारुग्मृत्युगोचरे ।
धर्मं विनान्यो न त्राता तस्मात्सेव्यः स एव हि ॥ १ ॥

स द्विधा सर्वविरतिदेशविरतिभेदतः ।
संयमादिर्दशविधोऽनगाराणां स आदिमः ॥ २ ॥

द्वितीयोऽगारिणां पञ्चाणुव्रतानि गुणास्त्रयः ।
शिक्षाव्रतानि चत्वारीति द्वादशविधो मतः ॥ ३ ॥

व्रतानि सातिचाराणि सुकृताय भवन्ति न ।
अतिचारास्ततो हेयाः पञ्च पञ्च व्रते व्रते ॥ ४ ॥

क्रोधाद्बन्धच्छविच्छेदोऽधिकभाराधिरोपणम् ।
प्रहारोऽन्नादिरोधश्चाहिंसायां परिकीर्तिताः ॥ ५ ॥

मिथ्योपदेशः सहसाभ्याख्यानं गुह्यभाषणम् ।
विश्वस्तमन्त्रभेदश्च कूटलेखश्च सूनृते ॥ ६ ॥

स्तेनानुज्ञा तदानीतादानं द्विड्राज्यलङ्घनम् ।
प्रतिरूपक्रिया मानान्यत्वं चास्तेयसंश्रिताः ॥ ७ ॥

इत्वरात्तागमोऽनात्तागतिरन्यविवाहनम् ।
मदनात्याग्रहोऽनङ्गक्रीडा च ब्रह्मणि स्मृताः ॥ ८ ॥

धनधान्यस्य कुप्यस्य गवादेः क्षेत्रवास्तुनः ।
हिरण्यहेम्नश्च संख्यातिक्रमोऽत्रापरिग्रहे ॥ ९ ॥

बन्धनाद्भावतो गर्भाद्योजनाद्दानतस्तथा ।
प्रतिपन्नव्रतस्यैष पञ्चधापि न युज्यते ॥ १० ॥

स्मृत्यन्तर्धानमूर्ध्वाधस्तिर्यग्भागव्यतिक्रमः ।
क्षेत्रवृद्धिश्च पञ्चेति स्मृता दिग्विरतिव्रते ॥ ११ ॥

सचित्तस्तेन संबद्धः सन्मिश्रोऽभिषवस्तथा ।
दुष्पक्वाहार इत्येते भोगोपभोगमानगाः ॥ १२ ॥

अमी भोजनतस्त्याज्याः कर्मतः खरकर्म तु ।
तस्मिन् पञ्चदश मलान् कर्मादानानि संत्यजेत् ॥ १३ ॥

अङ्गारवनशकटभाटकस्फोटजीविकाः ।
दन्तलाक्षारसकेशविषवाणिज्यकानि च ॥ १४ ॥

यन्त्रपीडा निर्लाञ्छनमसतीपोषणं तथा ।
दवदानं सरःशोष इति पञ्चदश त्यजेत् ॥ १५ ॥

अङ्गारभ्राष्ट्रकरणं कुम्भायःस्वर्णकारिता ।
ठठारत्वेष्टकापाकाविति ह्यङ्गारजीविका ॥ १६ ॥

छिन्नाच्छिन्नवनपत्रप्रसूनफलविक्रयः ।
कणानां दलनात्पेषाद्वृत्तिश्च वनजीविका ॥ १७ ॥

शकटानां तदङ्गानां घट्टनं खेटनं तथा ।
विक्रयश्चेति शकटजीविका परिकीर्तिता ॥ १८ ॥

शकटोक्षलुलायोष्ट्रखराश्वतरवाजिनाम् ।
भारस्य वाहनाद् वृत्तिर्भवेद्भाटकजीविका ॥ १९ ॥

सरःकूपादिखननं शिलाकुट्टनकर्मभिः ।
पृथिव्यारम्भसंभूतैर्जीवनं स्फोटजीविका ॥ २० ॥

दन्तकेशनखास्थित्वग्रोम्णो ग्रहणमाकरे ।
त्रसाङ्गस्य वणिज्यार्थं दन्तवाणिज्यमुच्यते ॥ २१ ॥

लाक्षामनःशिलानीलीघातकीटङ्कणादिनः ।
विक्रयः पापसदनं लाक्षावाणिज्यमुच्यते ॥ २२ ॥

नवनीतवसाक्षौद्रमद्यप्रभृतिविक्रयः ।
द्विपाच्चतुष्पाद्विक्रयो वाणिज्यं रसकेशयोः ॥ २३ ॥

विषास्त्रहलयन्त्रायोहरितालादिवस्तुनः ।
विक्रयो जीवितघ्नस्य विषवाणिज्यमुच्यते ॥ २४ ॥

तिलेक्षुसर्षपैरण्डजलयन्त्रादिपीडनम् ।
दलतैलस्य च कृतिर्यन्त्रपीडा प्रकीर्तिता ॥ २५ ॥

नासावेधोऽङ्कनं मुष्कच्छेदनं पृष्ठगालनम् ।
कर्णकम्बलविच्छेदो निर्लाञ्छनमुदीरितम् ॥ २६ ॥

शारिकाशुकमार्जारश्वकुर्कुटकलापिनाम् ।
पोषो दास्याश्च वित्तार्थमसतीपोषणं विदुः ॥ २७ ॥

व्यसनात्पुण्यबुद्ध्या वा दवदानं भवेद् द्विधा ।
सरःशोषः सरःसिन्धुह्रदादेरम्बुसंप्लवः ॥ २८ ॥

संयुक्ताधिकरणत्वमुपभोगेऽतिरिक्तता ।
मौखर्यमथ कौत्कुच्यं कन्दर्पोऽनर्थदण्डगाः ॥ २९ ॥

कायवाङ्मनसां दुष्टप्रणिधानमनादरः ।
स्मृत्यनुपस्थापनं च स्मृताः सामायिकव्रते ॥ ३० ॥

प्रेष्यप्रयोगानयने पुद्गलक्षेपणं तथा ।
शब्दरूपानुपातौ च व्रते देशावकाशिके ॥ ३१ ॥

उत्सर्गादानसंस्तारानवेक्ष्याप्रमृज्य च ।
अनादरः स्मृत्यनुपस्थापनं चेति पौषधे ॥ ३२ ॥

सचित्ते क्षेपणं तेन पिधानं काललङ्घनम् ।
मत्सरोऽन्यापदेशश्च तुर्यशिक्षाव्रते स्मृताः ॥ ३३ ॥

व्रतान्येभिरतिचारै रहितान्यनुपालयन् ।
श्रावकोऽपि विशुद्धात्मा मुच्यते भवबन्धनात् ॥ ३४ ॥

## ॥ चतुर्विंशतितमश्रीवीरजिनदेशना-महाव्रतमयी ॥

अहो अपारः संसारः सरस्वानिव दारुणः ।
कारणं तस्य कर्मैव हन्त बीजं तरोरिव ॥ १ ॥

कर्मणा स्वकृतेनैव विवेकपरिवर्जितः ।
कूपकार इवाधस्ताद्गतिमाप्नोति देहभृत् ॥ २ ॥

अप्यूर्ध्वगतिमाप्नोति निजेनैव हि कर्मणा ।
प्रासादकारक इव शरीरी विशदाशयः ॥ ३ ॥

प्राणातिपातं नो कुर्यात् कर्मबन्धनिबन्धनम् ।
स्वप्राणवत् परप्राणपरित्राणपरो भवेत् ॥ ४ ॥

न मृषा जातु भाषेत किं तु भाषेत सूनृतम् ।
परपीडां परिहरन्नात्मपीडामिवाङ्गवान् ॥ ५ ॥

अदत्तं नाददीताऽर्थं बाह्यप्राणोपमं नृणाम् ।
अर्थं हि हरता तेषां वध एव कृतो भवेत् ॥ ६ ॥

मैथुनं न विदध्याच्च बहुजीवोपमर्दकम् ।
ब्रह्मैव कुर्यात्तत्प्राज्ञः परब्रह्मनिबन्धनम् ॥ ७ ॥

परिग्रहं न कुर्याच्च परिग्रहवशेन हि ।
गौरिवाधिकभारेण विधुरो निपतत्यधः ॥ ८ ॥

एतान्प्राणातिपातादीन् सूक्ष्मांस्त्यक्तुं न चेत्क्षमाः ।
त्यजेयुर्बादरांस्तर्हि सूक्ष्मत्यागेऽनुरागिणः ॥ ९ ॥

## ॥ गणधरवादः ॥

भो गौतमेन्द्रभूते ! किं तव स्वागतमित्यथ ।
सुधामधुरया वाचा तं बभाषे जगद्गुरुः ॥ १ ॥

गौतमोऽचिन्तयन्मेऽसौ गोत्रं नाम च वेत्ति किम् ? ।
जगत्प्रसिद्धमथवा को जानाति न मामिह ॥ २ ॥

संशयं हृदयस्थं मे भाषते च छिनत्ति च ।
यद्यसौ ज्ञानसंपत्त्या तदाऽऽश्चर्यकरः खलु ॥ ३ ॥

इत्यन्तःसंशयधरं तमूचे परमेश्वरः ।
अस्ति जीवो न वेत्युच्चैर्विद्यते तव संशयः ॥ ४ ॥

अस्त्येव जीवः स पुनर्ज्ञेयो गौतम ! लक्षणैः ।
चित्तचैतन्यविज्ञानसंज्ञाप्रभृतिभिः खलु ॥ ५ ॥

न जीवोऽवस्थितश्चेत्स्याद्भाजनं पुण्यपापयोः ।
यागदानादिकं तर्हि किंनिमित्तं तवाप्यहो ! ॥ ६ ॥

इति स्वामिवचः श्रुत्वा मिथ्यात्वेन सहैव सः ।
उज्झाञ्चकार सन्देहं स्वामिनं प्रणनाम च ॥ ७ ॥

ऊचे च त्वत्परीक्षार्थं दुर्बुद्धिरहमागमम् ।
उत्तुङ्गवृक्षमुद्युक्तः प्रमातुमिव वामनः ॥ ८ ॥

बोधितोऽस्मि त्वया साधु दुष्टोऽप्येषोऽहमद्य तत् ।
भवाद्विरक्तं प्रव्रज्यादानेनानुगृहाण माम् ॥ ९ ॥

आद्यं गणधरं ज्ञात्वा भाविनं तं जगद्गुरुः ।
स्वयं प्रव्राजयामास पञ्चशिष्यशतीयुतम् ॥ १० ॥

उपनीतं कुबेरेण धर्मोपकरणं ततः ।
त्यक्तसङ्गोऽप्याददानो गौतमोऽथेत्यचिन्तयत् ॥ ११ ॥

निरवद्यव्रतत्राणे यदेतदुपयुज्यते ।
वस्त्रपात्रादिकं ग्राह्यं धर्मोपकरणं हि तत् ॥ १२ ॥

छद्मस्थैरिह षड्जीवनिकाययतनापरैः ।
सम्यक् प्राणिदयां कर्तुं शक्येत कथमन्यथा ॥ १३ ॥

यच्छुद्धमुद्गमोत्पादैषणाभिर्गुणसंयुतम् ।
गृहीतं सदहिंसायै तद्धि ग्राह्यं विवेकिभिः ॥ १४ ॥

ज्ञानदर्शनचारित्राऽऽचारशक्तिसमन्वितः ।
आद्यन्तमध्येष्वमूढसमयार्थं हिं साधयेत् ॥ १५ ॥

ज्ञानाऽवलोकहीनो यस्त्वभिमानधनः पुमान् ।
अस्मिन् परिग्रहाऽऽशङ्कां कुरुते स हि हिंसकः ॥ १६ ॥

परिग्रहधियं धत्ते धर्मोपकरणेऽपि यः ।
बालानविदिततत्त्वान् स रञ्जयितुमिच्छति ॥ १७ ॥

जलज्वलनवायूर्वीतरुत्रसतया बहून् ।
जीवांस्त्रातुं कथमलं धर्मोपकरणं विना ॥ १८ ॥

गृहीतोपकरणोऽपि करणत्रयदूषितः ।
असंतुष्टः स आत्मानं प्रतारयति केवलम् ॥ १९ ॥

इन्द्रभूतिर्विभाव्यैवं शिष्याणां पञ्चभिः शतैः ।
समं जग्राह धर्मोपकरणं त्रिदशार्पितम् ॥ २० ॥

तं च श्रुत्वा प्रव्रजितमग्निभूतिरचिन्तयत् ।
तेनेन्द्रजालिकेनेन्द्रभूतिर्नूनं प्रतारितः ॥ २१ ॥

गत्वा जयाम्यसर्वज्ञमपि सर्वज्ञमानिनम् ।
आनयामि भ्रातरं स्वं माययैव पराजितम् ॥ २२ ॥

सर्वशास्त्ररहस्यज्ञमिन्द्रभूतिं महामतिम् ।
कोऽलं जेतुं विना मायां माया जैत्री त्वमायिषु ॥ २३ ॥

स चेन्मे संशयं ज्ञाता छेत्ता च हृदयस्थितम् ।
तदाऽहमपि तच्छिष्यः सशिष्योऽपीन्द्रभूतिवत् ॥ २४ ॥

अग्निभूतिर्विमृश्यैवं पञ्चशिष्यशताऽऽवृतः ।
ययौ समवसरणे तस्थौ चोपजिनेश्वरम् ॥ २५ ॥

तमालपत्प्रभुर्विप्राग्निभूते ! गोतमान्वय ! ।
अस्ति वा नास्ति किं कर्मेत्येष ते संशयो हृदि ॥ २६ ॥

प्रत्यक्षादिप्रमाणानामगम्यं कर्म मूर्तिमत् ।
कथंकारं स बध्नीयाज्जीवो मूर्तत्ववर्जितः ॥ २७ ॥

उपघाताऽनुग्रहाश्च कथं मूर्तेन कर्मणा ।
जीवस्य स्युरमूर्तस्येत्याशङ्का हि मुधैव ते ॥ २८ ॥

प्रत्यक्षं कर्माऽतिशयज्ञानिनां त्वादृशां पुनः ।
अनुमानाभिगम्यं तज्जीववैचित्र्यदर्शनात् ॥ २९ ॥

कर्मणामेव वैचित्र्याद्भवन्ति च शरीरिणाम् ।
सुखदुःखादयो भावास्तत्कर्मास्तीति निश्चिनु ॥ ३० ॥

तथाहि स्युर्नृपाः केऽपि हस्त्यश्वरथवाहनाः ।
केचित्तत्र भवे पादचारिणो निरुपानहः ॥ ३१ ॥

सहस्रकुक्षिभरयो भवन्त्येके महर्द्धयः ।
भिक्षया स्वोदरमपि पूरयन्त्यपरे पुनः ॥ ३२ ॥

देशकालादितुल्यत्वेऽप्येकस्य व्यवहारिणः ।
भूयिष्ठो जायते लाभो मूलनाशोऽपरस्य तु ॥ ३३ ॥

एवंविधानां कार्याणां ज्ञेयं कर्मैव कारणम् ।
न विना कारणं कार्यवैचित्र्यमुपजायते ॥ ३४ ॥

मूर्तानां कर्मणां जीवेनामूर्तेन च संगमः ।
समीचीनः सोऽपि नूनमाकाशघटयोरिव ॥ ३५ ॥

उपघाताऽनुग्रहाश्च नानाविधसुरौषधैः ।
अमूर्तेऽपि भवन्तीति निरवद्यमदोऽपि हि ॥ ३६ ॥

एवं च स्वामिना च्छिन्नसंशयस्त्यक्तमत्सरः ।
अग्निभूतिः प्रवव्राज शिष्यपञ्चशतीयुतः ॥ ३७ ॥

तस्मिन्नपि प्रव्रजिते वायुभूतिर्व्यचिन्तयत् ।
जितौ मे भ्रातरौ येन सर्वज्ञः खल्वयं ततः ॥ ३८ ॥

तदेतस्य भगवतोऽभ्यर्हणावन्दनादिभिः ।
धौतकल्मषकालुष्यः स्यां छिनद्मि च संशयम् ॥ ३९ ॥

एवं विचिन्त्य सोऽप्यागात् स्वामिनं प्रणनाम च ।
स्वाम्यप्युवाच जीवः स तद्वपुश्चेति ते भ्रमः ॥ ४० ॥

प्रत्यक्षाद्यग्रहणेन जीवो भिन्नस्तनोर्न हि ।
जलबुद्बुदवत्सोऽङ्गे मूर्च्छतीति तवाशयः ॥ ४१ ॥

मिथ्या तद्देशप्रत्यक्षो जीवः सर्वशरीरिणाम् ।
तद्गुणानामीहादीनां प्रत्यक्षत्वात्स्वसंविदा ॥ ४२ ॥

देहेन्द्रियातिरिक्तः स इन्द्रियाऽपगमेऽपि यत् ।
इन्द्रियार्थान् संस्मरति मरणं च प्रपद्यते ॥ ४३ ॥

इति स्वामिगिरा च्छिन्नसंशयो विमुखो भवात् ।
पर्यव्राजीद्वायुभूतिः शिष्यपञ्चशतीयुतः ॥ ४४ ॥

व्यक्तोऽप्यचिन्तयद्व्यक्तं सर्वज्ञो भगवानयम् ।
इन्द्रभूत्यादयो येन जिता वेदा इव त्रयः ॥ ४५ ॥

ममापि संशयं छेत्ता निश्चितं भगवानयम् ।
ततः शिष्यीभविष्यामि ध्यात्वैवं सोऽप्यगात्प्रभुम् ॥ ४६ ॥

तमप्युवाच भगवान् भो व्यक्त ! तव चेतसि ।
न हि भूतानि विद्यन्ते पृथ्व्यादीनीति संशयः ॥ ४७ ॥

तेषां तु प्रतिपत्तिर्या सा भ्रमाज्जलचन्द्रवत् ।
सर्वशून्यत्वमेवैवमिति ते दृढ आशयः ॥ ४८ ॥

तन्मिथ्या सर्वशून्यत्वपक्षे भुवनविश्रुताः ।
स्युः स्वप्नाऽस्वप्नगन्धर्वपुरेतरभिदा न हि ॥ ४९ ॥

इत्थं च च्छिन्नसंदेहो व्यक्तोऽपि व्यक्तवासनः ।
परिवव्राज शिष्याणां शतैः पञ्चभिरन्वितः ॥ ५० ॥

उपाध्यायः सुधर्माऽपि संशयच्छेदवाञ्छया ।
समाययौ महावीरमतुच्छालोकभास्करम् ॥ ५१ ॥

तमप्यजल्पद्भगवान् सुधर्मंस्तव धीरियम् ।
यादृगत्र भवे देही तादृक् परभवेऽपि हि ॥ ५२ ॥

कार्यं हि कारणस्यानुरूपं भवति संसृतौ ।
न ह्युप्ते कलमबीजे प्ररोहति यवाङ्कुरः ॥ ५३ ॥

तन्न युक्तं यद्भवेऽस्मिन् यो मृदुत्वाऽऽर्जवादिभिः ।
नरः कर्म नरायुष्कं बध्नाति स पुनर्नरः ॥ ५४ ॥

मायादियुक् पशुर्यस्तु स प्रेत्याऽपि पशुः खलु ।
कर्माधीना समुत्पत्तिस्तन्नानात्वं च जन्मिनाम् ॥ ५५ ॥

सदृशं कारणस्यैव कार्यमित्यप्यसंगतम् ।
शृङ्गप्रभृतिकेभ्योऽपि शरादीनां प्ररोहणात् ॥ ५६ ॥

इत्याकर्ण्य सुधर्माऽपि पञ्चशिष्यशतीयुतः ।
प्रव्रज्यामाददे पार्श्वे स्वामिपादारविन्दयोः ॥ ५७ ॥

मण्डिकोऽपि जगामाऽथ स्वामिनं संशयच्छिदे ।
स्वाम्यप्युवाच तं बन्धमोक्षयोस्तव संशयः ॥ ५८ ॥

तदसद् बन्धमोक्षौ हि प्रसिद्धौ तत्र चात्मनः ।
मिथ्यात्वादिकृतः कर्मसंबन्धो बन्ध उच्यते ॥ ५९ ॥

रज्जुबद्ध इव श्वभ्रतिर्यग्नृसुरभूमिषु ।
दुःखं तेनानुभवति प्राणी परमदारुणम् ॥ ६० ॥

ज्ञानदर्शनचारित्रप्रमुखैर्हेतुभिस्तु यः ।
वियोगः कर्मणां ज्ञेयः स मोक्षोऽनन्तशर्मदः ॥ ६१ ॥

अप्यनादिमिथः सिद्धयोगानां जीवकर्मणाम् ।
ज्ञानादिना स्याद्वियोगोऽग्निना स्वर्णाऽश्मनामिव ॥ ६२ ॥

इति स्वामिगिरा च्छिन्नसंशयो मण्डिकोऽपि हि ।
सार्धत्रिशत्या शिष्याणां सहितो व्रतमाददे ॥ ६३ ॥

मौर्यपुत्रोऽपि संदेहच्छिदे स्वामिनमाययौ ।
स्वाम्यप्यूचे मौर्यपुत्र ! तव देवेषु संशयः ॥ ६४ ॥

स मिथ्या पश्य नन्वेतान् प्रत्यक्षमपि नाकिनः ।
अस्मिन् समवसरणे शक्रादीन् स्वयमागतान् ॥ ६५ ॥

संगीतकादिवैयग्र्यान्मर्त्यगन्धाच्च दुःसहात् ।
नायान्ति शेषकालेऽमी तदभावो न तावता ॥ ६६ ॥

अर्हज्जन्माभिषेकादावायान्ति यदमी भुवि ।
प्रभावः कारणं तत्र गरीयान् श्रीमदर्हताम् ॥ ६७ ॥

इति स्वामिगिरा बुद्धो मौर्यपुत्रोऽपि तत्क्षणम् ।
परिवव्राज शिष्याणां सार्धं सार्धैः शतैस्त्रिभिः ॥ ६८ ॥

ययावकम्पितोऽपीशमीशोऽवोचदकम्पित ! ।
न सन्त्यदृश्यमानत्वान्नारका इति ते मतिः ॥ ६९ ॥

तदसन्नारकाः कामं पारतन्त्र्यवशादिह ।
आगन्तुमक्षमा गन्तुं तत्र च त्वादृशा अपि ॥ ७० ॥

प्रत्यक्षं नोपलभ्यास्ते युक्तिगम्या भवादृशाम् ।
प्रत्यक्षा एव ते सन्ति क्षायिकज्ञानिनां पुनः ॥ ७१ ॥

क्षायिकज्ञानिनोऽप्यत्र नो सन्तीति स्म मा ब्रवीः ।
मयैव व्यभिचारोऽस्या आशङ्कायाः परिस्फुटः ॥ ७२ ॥

इति श्रुत्वा प्रतिबुद्धोऽकम्पितः स्वामिनोऽन्तिके ।
उपाददे परिव्रज्यां त्रिभिः शिष्यशतैः समम् ॥ ७३ ॥

अथाऽऽगादचलभ्राता प्रभुं प्रभुरपि स्फुटम् ।
ऊचे तवाचलभ्रातः ! सन्देहः पुण्यपापयोः ॥ ७४ ॥

मा कृथाः संशयं तत्र यत्फलं पुण्यपापयोः ।
प्रत्यक्षं दृश्यते लोके तथैव व्यवहारतः ॥ ७५ ॥

दीर्घमायुः श्रियो रूपमारोग्यं जन्म सत्कुले ।
इत्यादि पुण्यस्य फलं विपरीतं तु पाप्मनः ॥ ७६ ॥

भगवता च्छिन्नसंशयः समुपाददे ।
प्रव्रज्यामचलभ्राता त्रिभिः शिष्यशतैः सह ॥ ७७ ॥

मेतार्यः स्वामिनमगात् स्वाम्यूचे तव धीरियम् ।
भवान्तरप्राप्तिरूपः परलोको न विद्यते ॥ ७८ ॥

भूतसंदोहरूपत्वाज्जीवस्येह चिदात्मनः ।
परलोकः कथं भूताऽभावे तस्याप्यभावतः ॥ ७९ ॥

तदसत् खलु जीवस्य भूतेभ्यो हि स्थितिः पृथक् ।
पिण्डितेष्वपि भूतेषु चेतनानुपलम्भतः ॥ ८० ॥

भूतेभ्यश्चेतनाऽप्येवं जीवधर्मतया पृथक् ।
परलोकगतिस्तत्स्याज्जातिस्मृत्यादितोऽपि च ॥ ८१ ॥

इत्थं प्रबुद्धो मेतार्यः समीपे स्वामिपादयोः ।
*शिष्यत्रिशत्या सहितः* परिव्रज्यामुपाददे ॥ ८२ ॥

प्रभुमागात् प्रभासोऽपि तमूचे भगवानपि ।
निर्वाणमस्ति नो वेति प्रभास ! तव संशयः ॥ ८३ ॥

मा संशयिष्ठा निर्वाणं मोक्षः कर्मक्षयः स तु ।
वेदात् सिद्धं कर्म जीवाऽवस्थावैचित्र्यतोऽपि च ॥ ८४ ॥

क्षीयते कर्म शुद्धैस्तु ज्ञानचारित्रदर्शनैः ।
प्रत्यक्षोऽतिशयज्ञानभाजां मोक्षस्तदस्ति भोः ॥ ८५ ॥

प्रतिबुद्धः प्रभासोऽपि स्वाम्युपन्यस्तया गिरा ।
दीक्षामादत्त सहितः खण्डिकानां त्रिभिः शतैः ॥ ८६ ॥

महाकुला महाप्राज्ञाः संविग्ना विश्ववन्दिताः ।
एकादशाऽपि तेऽभूवन्मूलशिष्या जगद्गुरोः ॥ ८७ ॥

## ॥ श्री चेटकमहाराजकृताऽऽराधना ॥

अर्हत्सिद्धसाधुधर्मात्मङ्गल्यान्मङ्गलात्मनः ।
लोकोत्तमांश्च चतुरश्चतुरः सोऽस्मरत् स्वयम् ॥ १ ॥

जीवाजीवादितत्त्वोपदेशकाः परमेश्वराः ।
बोधिप्रदाः स्वयंबुद्धा अर्हन्तः शरणं मम ॥ २ ॥

ध्यानाग्निदग्धकर्माणस्तेजोरूपा अनश्वराः ।
अनन्तकेवलज्ञानाः सिद्धाश्च शरणं मम ॥ ३ ॥

निरीहा निरहंकारा निर्ममाः समचेतसः ।
महाव्रतधरा धीराः साधवः शरणं मम ॥ ४ ॥

अहिंसासूनृतास्तेयब्रह्माकिंचनतामयः ।
केवल्युपज्ञः परमो धर्मश्च शरणं मम ॥ ५ ॥

अपि जन्मशतैर्यद्यदपराद्धं शरीरिषु ।
त्रिविधं त्रिविधेनापि तन्निन्दामि समाहितः ॥ ६ ॥

गृहिधर्मं द्वादशधा मया पालयता कृताः ।
ये केचिदप्यतीचारास्तान् सर्वान् व्युत्सृजाम्यहम् ॥ ७ ॥

क्रोधमानमायालोभाभिभूतेन मया सदा ।
कृतं यद्यच्च हिंसाऽऽदि तत्त्रिधापि धिगस्तु मे ॥ ८ ॥

## ॥ दीपालिकायामुपयोगि हस्तिपालस्वप्नफलम् ॥

विवेकवन्तो भूत्वाऽपि हस्तितुल्या अतः परम् ।
वत्स्यन्ति श्रावका लुब्धाः क्षणिकर्द्धिसुखे गृहे ॥ १ ॥

न दौस्थ्ये परचक्रे वा प्रव्रजिष्यन्त्युपस्थिते ।
आत्तामपि परिव्रज्यां त्यक्ष्यन्ति च कुसङ्गतः ॥ २ ॥

विरलाः पालयिष्यन्ति कुसङ्गेऽपि व्रतं खलु ।
इदं गजस्वप्नफलं कपिस्वप्नफलं त्वदः ॥ ३ ॥

प्रायः कपिसमा लोलपरिणामाऽल्पसत्त्वकाः ।
आचार्यमुख्या गच्छस्थाः प्रमादं गामिनो व्रते ॥ ४ ॥

ते विपर्यासयिष्यन्ति धर्मस्थानितरानपि ।
भाविनो विरला एव धर्मोद्योगपराः पुनः ॥ ५ ॥

धर्मश्लथेषु ये शिक्षां प्रदास्यन्त्यप्रमादिनः ।
ते तैरुपहसिष्यन्ते ग्राम्यैर्ग्रामस्थपौरवत् ॥ ६ ॥

इत्थं प्रवचनाऽवज्ञाऽतः परं हि भविष्यति ।
प्लवङ्गमस्वप्नफलमिदं जानीहि पार्थिव ! ॥ ७ ॥

क्षीरद्रुतुल्याः सुक्षेत्रे दातारः शासनार्चकाः ।
श्रावकास्ते तु रोत्स्यन्ते लिङ्गिभिर्वञ्चनापरैः ॥ ८ ॥

तेषां च प्रतिभास्यन्ति सिंहसत्त्वभृतोऽपि हि ।
महर्षयः सारमेया इवासारमतिस्पृशाम् ॥ ९ ॥

आदास्यन्ते सुविहितविहारक्षेत्रपद्धतिम् ।
लिङ्गिनो बब्बूलसमाः क्षीरद्रुफलमीदृशम् ॥ १० ॥

धृष्टस्वभावा मुनयः प्रायो धर्मार्थिनोऽपि हि ।
रंस्यन्ते न हि गच्छेषु दीर्घिकाम्भःस्विव द्विकाः ॥ ११ ॥

ततोऽन्यगच्छिकैः सूरिप्रमुखैर्वञ्चनापरैः ।
मृगतृष्णानिभैः सार्धं चलिष्यन्ति जडाशयाः ॥ १२ ॥

न युक्तमेभिर्गमनमिति तत्रोपदेशकान् ।
बाधिष्यन्ते नितान्तं ते काकस्वप्नफलं ह्यदः ॥ १३ ॥

सिंहतुल्यं जिनमतं जातिस्मृत्याद्यनूज्झितम् ।
विपत्स्यतेऽस्मिन् भरतवने धर्मज्ञवर्जिते ॥ १४ ॥

न कुतीर्थिकतिर्यञ्चोऽभिभविष्यन्ति जातु तत् ।
स्वोत्पन्नाः कृमिवत्किं तु लिङ्गिनोऽशुद्धबुद्धयः ॥ १५ ॥

लिङ्गिनोऽपि प्राक्प्रभावात् श्वापदाभैः कुतीर्थिकैः ।
न जात्वभिभविष्यन्ते सिंहस्वप्नफलं ह्यदः ॥ १६ ॥

अब्जाकरेष्वम्बुजानि सुगन्धीनीव देहिनः ।
धार्मिका न भविष्यन्ति संजाताः सुकुलेष्वपि ॥ १७ ॥

अपि धर्मपरा भूत्वा भविष्यन्ति कुसङ्गतः ।
ग्रामावकरकोत्पन्नगर्दभाब्जवदन्यथा ॥ १८ ॥

कुदेशे कुकुले जाता धर्मस्था अपि भाविनः ।
हीना इत्यनुपादेयाः पद्मस्वप्नफलं ह्यदः ॥ १९ ॥

यथा फलायाबीजानि बीजबुद्ध्योखरे वपेत् ।
तथा वप्स्यन्त्यकल्पानि कुपात्रे कल्पबुद्धितः ॥ २० ॥

यद्वा घुणाक्षरन्यायाद्यथा कोऽपि कृषीवलः ।
अबीजान्तर्गतं बीजं वपेत् क्षेत्रे निराशयः ॥ २१ ॥

अकल्पान्तर्गतं कल्पमज्ञानाः श्रावकास्तथा ।
पात्रे दानं करिष्यन्ति बीजस्वप्नफलं ह्यदः ॥ २२ ॥

क्षमादिगुणपद्माङ्काः सुचरित्राम्बुपूरिताः ।
रहःस्था भाविनः कुम्भा इव स्तोका महर्षयः ॥ २३ ॥

श्लथाचारचरित्राश्च कलशा मलिना इव ।
यत्र तत्र भविष्यन्ति बहवो लिङ्गिनः पुनः ॥ २४ ॥

समत्सराः करिष्यन्ति कलहं ते महर्षिभिः ।
उभयेषामपि तेषां साम्यं लोके भविष्यति ॥ २५ ॥

गीतार्था लिङ्गिनश्च स्युः साम्येन व्यवहारिणः ।
जनेन ग्रहिलेनेवाग्रहिलग्रहिलो नृपः ॥ २६ ॥

तथाहि पृथिवीपुर्यां पूर्णो नाम महीपतिः ।
सुबुद्धिस्तस्य चामात्यो निधानं बुद्धिसंपदः ॥ २७ ॥

कालं तेनागमिष्यन्तं पृष्टोऽन्येद्युः सुबुद्धिना ।
लोकदेवोऽभिधानेन नैमित्तिकवरोऽवदत् ॥ २८ ॥

मासादनन्तरं मेघो वर्षिता तज्जलं पुनः ।
यः पास्यति स सर्वोऽपि ग्रहग्रस्तो भविष्यति ॥ २९ ॥

कियत्यपि गते काले सुवृष्टिश्च भविष्यति ।
पुनः सज्जा भविष्यन्ति तत्पयःपानतो जनाः ॥ ३० ॥

राज्ञे मन्त्री तदाचख्यौ राजाऽप्यानकताडनात् ।
आख्यापयज्जने वारिसंग्रहार्थमथाऽऽदिशत् ॥ ३१ ॥

सर्वोऽपि हि तथा चक्रे ववर्षोक्तेऽह्नि चाम्बुदः ।
कियत्यपि गते काले संगृहीताम्बु निष्ठितम् ॥ ३२ ॥

अक्षीणसंग्रहाम्भस्कौ राजामात्यौ तु तौ विना ।
नवाम्बु लोकाः सामन्तप्रमुखाश्च पपुस्ततः ॥ ३३ ॥

तत्पानाद् ग्रहिलाः सर्वे ननृतुर्जहसुर्जगुः ।
स्वैरं चिचेष्टिरेऽन्यत्र विना तौ राजमन्त्रिणौ ॥ ३४ ॥

राजामात्यौ विसदृशौ सामन्ताद्या निरीक्ष्यते ।
मन्त्रयाञ्चक्रिरे नूनं ग्रहिलौ राजमन्त्रिणौ ॥ ३५ ॥

अस्मद्विलक्षणाचारविमकावपसार्य तत् ।
अपरौ स्थापयिष्यामः स्वोचितौ राजमन्त्रिणौ ॥ ३६ ॥

मन्त्री ज्ञात्वेति तन्मन्त्रं नृपायाख्यन्नृपोऽवदत् ।
आत्मरक्षा कथं कार्या तेभ्यो वृन्दं हि राजवत् ॥ ३७ ॥

# शास्त्रसन्देशमालाविंशतिभागमध्ये ग्रथितानां ग्रन्थानामकारादिक्रमः

(अङ्कैर्भागा विज्ञेयाः)

## अ


अट्ठारसहस्सशीलंगाइरहा ( ५ )
अध्यात्मकल्पद्रुमः ( ९ )
अध्यात्मबिन्दुः ( १८ )
अध्यात्मसारः ( ४ )
अध्यात्मोपनिषत् ( ४ )
अनुमानमातृका ( १६ )
अनेकान्तव्यवस्थाप्रकरणस्य मङ्गलप्रशस्ती ( ५ )
अन्नायउंछकुलयं ( ७ )
अन्ययोगव्यवच्छेदद्वात्रिंशिका ( १६ )
अन्योक्तिशतकम् ( ६ )
अन्तिमाऽऽराधना ( १४ )
अप्पविसोहिकुलयं ( ७ )
अभव्यकुलकम् ( ७ )
अष्टकानि ( ३ )


## आ


आउरपच्चक्खाणं-१ ( १५ )
आउरपच्चक्खाणं-२ ( १५ )
आख्यानकमणिकोशः ( ८ )
आचारोपदेशः ( ११ )
आत्मतत्त्वचिन्ताभावनाचूलिका ( ९ )
आत्मनिन्दाष्टकम् ( १४ )
आत्मप्रबोधः ( १७ )
आत्मबोधकुलकम् ( ७ )
आत्महितकुलकम् ( ७ )
आत्मानुशासनकुलकम् ( ७ )
आत्मानुशासनम् ( १४ )
आत्मानुशास्तिसंज्ञिका पञ्चविंशतिका ( १४ )
आत्मावबोधकुलकम् ( ७ )
आध्यात्मिकमतपरीक्षा ( ५ )
आभाणशतकम् ( ६ )
आराधकविराधकचतुर्भङ्गी ( ४ )
आराधना ( १४ )
आराहणा ( १४ )
आराहणाकुलयं ( ७ )
आराहणापडागा-१ ( १४ )
आराहणापडागा-२ ( १४ )
आराहणापणगं ( १४ )
आराहणापयरणं ( १४ )
आलोयणाकुलयं ( ७ )
आर्षभीयचरितमहाकाव्यम् ( ५ )


## ई


इन्द्रियपराजयशतकम् ( ६ )
ईर्यापथिकीषट्त्रिंशिका ( १६ )
ईर्यापथिकीमिथ्यादुष्कृतकुलकम् ( ७ )


## उ


उत्पादादिसिद्धिः ( १६ )
उत्सूत्रपदोद्घाटनकुलकम् ( ७ )
उपदेशकल्पवल्लिः ( ११ )

उपदेशकुलकम्-१ ( ७ )
उपदेशकुलकम्-२ ( ७ )
उपदेशचिन्तामणिः ( १० )
उपदेशपदग्रन्थः ( १ )
उपदेशप्रदीपः ( १२ )
उपदेशरत्नकोशः ( ८ )
उपदेशरत्नाकरः ( ८ )
उपदेश( धर्म )रसायनरासः ( ८ )
उपदेशरहस्यम् ( ४ )
उपदेशशतकम् ( ६ )
उपदेशसप्ततिका ( ८ )
उपदेशसप्ततिः ( ११ )
उपदेशसारः ( ११ )
उपदेशामृताकुलकम् ( ७ )
उपधानविधिः-१ ( १० )
उपधानविधिः-२ ( १० )
उवएसचउक्ककुलयं-१ ( ७ )
उवएसचउक्ककुलयं-२ ( ७ )
उवएसमाला ( ८ )

ऋ

ऋषभशतकम् ( ६ )
ऋषिमण्डलस्तवः ( १२ )

ए

एकविंशतिद्वात्रिंशिकाः ( १६ )
ऐन्द्रस्तुतयः ( ५ )

औ

औष्ट्रिकमतोत्सूत्रोद्घाटनकुलकम् ( ७ )

अं

अंगुलसत्तरी ( १३ )

क

कथाकोषः ( १२ )
कथानककोशः ( १२ )
कर्पूरप्रकरः ( १२ )
कर्मप्रकृतिः ( १३ )
कर्मविपाककुलकम् ( ७ )
कर्मविपाकाख्यः प्रथमः प्राचीनकर्मग्रन्थः ( १३ )
कर्मस्तवाख्यः द्वितीयः प्राचीनकर्मग्रन्थः ( १३ )
कम्मबत्तीसी ( १३ )
कविकल्पद्रुमः ( १८ )
कस्तूरीप्रकरः ( १२ )
कायस्थितिस्तोत्रम् ( १३ )
कालसप्ततिका ( १३ )
कालस्वरूपकुलकम् ( ७ )
कुमारविहारशतकम् ( ६ )
कूपदृष्टान्तविशदीकरणम् ( ५ )
कृष्णराजीविमानविचारः ( १३ )
केवलिभुक्तिप्रकरणम् ( १६ )

क्ष

क्षमाकुलकम् ( ७ )
क्षान्तिकुलकम् ( ७ )
क्षुल्लकभवावलिः ( १३ )

ख

खामणाकुलयं ( १ ) ( ७ )
खामणाकुलयं ( २ ) ( ७ )

ग

गणधरसार्धशतकम् ( ६ )
गाङ्गेयभङ्गप्रकरणम्-१ ( १५ )
गाङ्गेयभङ्गप्रकरणम्-२ ( १५ )
गुणस्थानक्रमारोहः ( १३ )
गुणानुरागकुलकम् ( ७ )
गुरुगुणषट्त्रिंशत्षट्त्रिंशिकाकुलकम् ( ७ )
गुरुतत्त्वप्रदीपः ( १६ )
गुरुतत्त्वविनिश्चयः ( ५ )
गुरुदर्शनहर्षकुलकम् ( ७ )
गुरुविरहविलापः ( १४ )
गोडीपार्श्वस्तवनम् ( ५ )
गौतमकुलकम् ( ७ )

घ

घनगणितसंग्रहगाथाः ( १८ )

च

चउसरणपइन्नयं ( १५ )
चतुर्गतिजीवक्षपणाकानि ( १४ )
चतुर्दशजीवस्थानेषु जघन्योत्कृष्टपदे ( १३ )
चरणकरणमूलोत्तरगुण ( १८ )
चारित्रमनोरथमाला ( ८ )
चित्तशुद्धिफलम् ( १८ )
चेइयवंदणमहाभासं ( १० )
चंदावेज्झयं पइण्णयं ( १५ )

ज

जघन्योत्कृष्टपद एककालं गुणस्थानकेषु ( १३ )
जल्पकल्पलता ( १६ )
जिनप्रतिमास्तोत्रम् ( १ )
जिनबिम्बप्रतिष्ठाविधिः ( १० )
जिनशतकम्-१ ( ६ )
जिनशतकम्-२ ( ६ )
जीवजोणिभावणाकुलयं ( ७ )
जीवदयाप्रकरणं ( ८ )
जीवसमासः ( १३ )
जीवादिगणितसंग्रहगाथाः ( १८ )
जीवानुशासनम् ( १४ )
जीवानुशास्तिकुलकम् ( ७ )
जीवाभिगमसंग्रहणी ( १५ )
जैनतत्त्वसारः ( १६ )
जैनस्याद्वादमुक्तावली ( १६ )
जोइसकरंडगं पइण्णयं ( १५ )

ज्ञ

ज्ञाताधर्मकथोपनयगाथाः ( १५ )
ज्ञानप्रकाशकुलकम् ( ७ )
ज्ञानसारः ( ४ )
ज्ञानार्णवः ( ५ )

त

तत्त्वतरङ्गिणी ( १६ )
तत्त्वबोधतरङ्गिणी ( १२ )
तत्त्वामृतम् ( ९ )
तपःकुलकम् ( ७ )
तित्थोगालिपइन्नयं ( १५ )
त्रिशतत्रिषष्टिपाखण्डस्वरूपस्तोत्रम् ( १५ )
त्रिषष्टीयदेशनासंग्रहः ( ११ )

द

दशश्रावककुलकम् ( ७ )

दर्शननियमाकुलकम् ( ७ )
दानकुलकम् ( ७ )
दानविधिः ( १० )
दानषट्त्रिंशिका ( ९ )
दानादिप्रकरणम् ( १२ )
दानोपदेशमाला ( ८ )
दीवसागरपन्नत्ति ( १५ )
दृष्टान्तशतकम्-१ ( ६ )
दृष्टान्तशतकम्-२ ( ६ )
देवेन्द्रनरकेन्द्रप्रकरणम् ( १३ )
देशनाशतकम् ( ६ )
देहकुलकम् ( ७ )
देहस्थितिस्तवः ( १३ )
दंसणसुद्धिपयरणं ( १० )
द्वात्रिंशद्द्वात्रिंशिकाः ( ४ )
द्वादश-कुलकम् ( ७ )
द्वादशव्रतस्वरूपम् ( १० )
द्वादशाङ्गीपदप्रमाणकुलकम् ( ७ )

ध

धनुःपृष्ठबाहासंग्रहगाथाः ( १८ )
धर्मपरीक्षा ( ५ )
धर्मबिन्दुः ( ३ )
धर्मरत्नप्रकरणम् ( १० )
धर्मरत्नकरण्डकः ( ११ )
धर्मविधिः ( ८ )
धर्मशिक्षा ( ९ )
धर्मसंग्रहणिः ( १ )
धर्मसंग्रहः ( ११ )
धर्माचार्यबहुमानकुलकम् ( ७ )
धर्मोद्यमकुलकम् ( ७ )
धर्मोपदेशः ( ९ )
धर्मोपदेशमाला ( ८ )
धम्मारिहगुणोवएसकुलयं ( ७ )
धर्म्मोपदेशकुलकम् ( ७ )
धम्मोवएसकुलयं ( ७ )
धूर्ताख्यानम् ( ३ )
धूमावली ( ३ )
ध्यानदीपिका ( १८ )
ध्यानशतकम् ( ६ )

न

नन्दीश्वरस्तवः ( १३ )
नमस्कारस्तवः ( १८ )
नयकर्णिका ( १६ )
नयोपदेशः ( ५ )
नरभवदिट्ठंतोवणयमाला ( १२ )
नवकारफलकुलकम् ( ७ )
नवतत्त्वभाष्यम् ( १३ )
नवतत्त्वम् ( १३ )
नवतत्त्वसंवेदनम् ( १३ )
नवपदप्रकरणम् ( १० )
नानाचित्तप्रकरणम् ( ३ )
नारीशीलरक्षाकुलकम् ( ७ )
निगोदषट्त्रिंशिका ( १५ )
नूतनाचार्याय हितशिक्षा ( ९ )
नंदणरायरिसिस्स अन्तिमाऽऽराधना ( १४ )
न्यायखण्डखाद्याऽपरनामा महावीरस्तवः ( ५ )
न्यायावतारः ( १६ )
न्यायावतारसूत्रवार्तिकम् ( १६ )

प

पज्जंताराहणा ( १४ )
पंचवत्थुगं ( २ )
पञ्चनिर्ग्रन्थी ( १५ )
पञ्चलिङ्गीप्रकरणम् ( १५ )
पञ्चसङ्ग्रहः ( १३ )
पञ्चसंयतप्रकरणम् ( १५ )
पञ्चाशकानि ( १ )
पञ्चवलीविसुद्धी ( १६ )
पडिलेहणाविचारकुलकम् ( ७ )
पदार्थस्थापनासंग्रह ( १७ )
पद्मानन्दशतकम् ( ६ )
परमज्योतिःपञ्चविंशतिका ( ५ )
परमाणुखण्डषट्त्रिंशिका ( १५ )
परमात्मपञ्चविंशतिका ( ५ )
परमानन्दपञ्चविंशतिः ( ९ )
पर्यन्ताराधनाकुलकम् ( ७ )
पर्युषणादशशतकम् ( १६ )
पव्वज्जाविहाणकुलयं ( ७ )
पिण्डविशुद्धिः ( १० )
पुण्डरीकतीर्थपतीस्तोत्रम् ( ५ )
पुण्यकुलकम् ( ७ )
पुद्गलपरावर्तस्तवनम् ( १३ )
पुद्गलषट्त्रिंशिका ( १५ )
पुष्पमाला ( ८ )
पूजाविधिः ( ११ )
पोसहविही ( १० )
पौषधषट्त्रिंशिका ( १६ )
प्रज्ञापनोपाङ्गतृतीयपदसंग्रहणी ( १५ )
प्रतरप्रमाणसंग्रहगाथाः ( १८ )
प्रतिमाशतकम् ( ४ )
प्रतिसमयजागृतिकुलकम् ( ७ )
प्रत्याख्यानस्वरूपम् ( १० )
प्रबोधचिन्तामणिः ( ९ )
प्रभाते जीवानुशासनम् ( १४ )
प्रमाणनयतत्त्वालोकालङ्कारः ( १६ )
प्रमाणप्रकाशः ( १६ )
प्रमाणमीमांसा ( १६ )
प्रमादपरिहारकुलकम् ( ७ )
प्रवचनपरीक्षा ( १६ )
प्रवचनसारोद्धारः ( १७ )
प्रव्रज्याविधानकुलकम् ( ७ )
प्रशमरतिः ( ९ )
प्रश्नद्वात्रिंशिका ( १६ )
प्रश्नशतकम् ( ६ )
प्रश्नोत्तररत्नमाला ( १२ )
प्राकृतसंवेगामृतपद्धतिः ( १४ )
प्रातःकालिकजिनस्तुतिः ( ९ )

ब

बन्धस्वामित्वाख्यः तृतीयः प्राचीनकर्मग्रन्थः ( १३ )
बन्धषट्त्रिंशिका ( १५ )
बन्धहेतुप्रकरणम् ( १३ )
बन्धहेतूदयभङ्गप्रकरणसमाप्तिगते द्वे प्रकरणे ( ५ )
बन्धोदयसत्ता ( १३ )
बृहद्वन्दनकभाष्यम् ( १० )

भ

भवभावना ( ८ )
भावकुलकम् ( ७ )
भावनाशतकम् ( ६ )
भावप्रकरणम् ( १३ )
भाषारहस्यम् ( ५ )
भोजनपूर्वचिन्तागाथाः ( ८ )

म

मंगलकुलयं ( ७ )
मण्डलप्रकरणम् ( १८ )
मदादिविपाककुलकम् ( ७ )
मनुष्यभवदुर्लभता ( ९ )
मनोनिग्रहभावनाकुलकम् ( ७ )
महासतीकुलकम् ( ७ )
मार्गपरिशुद्धिः ( ५ )
मार्ग्गणासु बंधहेतूदयत्रिभङ्गी ( १३ )
मिच्छादुक्कडवोसिरणविहिकुलयं ( ७ )
मिथ्यात्वकुलकम् ( ७ )
मिथ्यात्वमथनकुलकम् ( ७ )
मिथ्यात्वविचारकुलकम् ( ७ )
मिथ्यात्वस्थानविवरणकुलकम् ( ७ )
मुखवस्त्रिकास्थापनकुलकम् ( ७ )
मूलशुद्धिः ( १० )
मृत्युमहोत्सवः ( १४ )
मोक्षोपदेशपञ्चाशकम् ( ९ )

य

यतिदिनकृत्यम् ( ११ )
यतिदिनचर्या ( १० )
यतिलक्षणसमुच्चयः ( ४ )
यतिशिक्षापञ्चाशिका ( ८ )
यात्रास्तवः ( ११ )
युक्त्यनुशासनम् ( १६ )
युक्तिप्रकाशः ( १६ )
युक्तिप्रबोधः ( १६ )
युगपद्बन्धहेतुप्रकरणम् ( १३ )
योगदृष्टिसमुच्चयः ( ३ )
योगप्रदीपः ( १२ )
योगबिन्दुः ( ३ )
योगशतकम् ( ३ )
योगशास्त्रम् ( १८ )
योगानुष्ठानकुलकम् ( ७ )
योनिस्तवः ( १३ )

र

रत्नत्रयकुलकम् ( ७ )
रत्नसञ्चयः ( १७ )

ल

लघुप्रवचनसारोद्धारः ( १७ )
लध्वल्पबहुत्वप्रकरणम् ( १३ )
लोकतत्त्वनिर्णयः ( ३ )
लोकनालिकाद्वात्रिंशिका ( १३ )

व

वाक्यप्रकाशः ( १८ )
वाणारस्यां कृतं श्रीपार्श्वनाथजिनस्तोत्रम् ( ५ )
विचारपञ्चाशिका ( १३ )
विचारसप्ततिका ( १७ )
विचारसारः ( १७ )
विजयप्रभसूरिक्षामणकविज्ञप्तिः ( ५ )

विजयप्रभसूरिस्वाध्याय: ( ५ )
विजयोल्लासमहाकाव्यम् ( ५ )
विद्वद्गोष्ठी ( १२ )
विभक्तिविचार: ( १५ )
विरतिफलकुलकम् ( ७ )
विविधतपोदिनाङ्ककुलकम् ( ७ )
विवेककुलकम् ( ७ )
विवेकमञ्जरी ( ८ )
विशेष-णवति: ( १५ )
विंशतिर्विंशिका: ( ३ )
विषयविरक्तिकुलकम् ( ७ )
वीरस्तव: ( १५ )
वैराग्यकल्पलता ( १९+२० )
वैराग्यरसायनम् ( ८ )
वैराग्यशतकम् ( ६ )
व्यवहारकुलकम् ( ७ )
व्याख्यानविधिशतकम् ( ६ )

## श

शङ्खेश्वरपार्श्वजिनस्तोत्रम्-१ ( ५ )
शङ्खेश्वरपार्श्वनाथस्तोत्रम्-२ ( ५ )
शङ्खेश्वरपार्श्वनाथस्तोत्रम्-३ ( ५ )
शमीनपार्श्वस्तोत्रम् ( ५ )
शास्त्रवार्तासमुच्चय: ( ३ )
शीलकुलकम् ( ७ )
शीलोपदेशमाला ( ८ )
शोकनिवारणकुलकम् ( ७ )

## श्र

श्राद्धदिनकृत्यम् ( १० )
श्राद्धविधि: ( १० )
श्रावकधर्मकृत्यम् ( ११ )
श्रावकधर्मविधि: ( ३ )
श्रावकप्रज्ञप्ति: ( १० )
श्रावकव्रतभङ्गप्रकरणम् ( १८ )
श्रीकातन्त्रविभ्रमसूत्रम् ( १८ )
श्रीमद्गीता-तत्त्वगीता ( १८ )
श्रुतास्वाद: ( ८ )
श्रृङ्गारवैराग्यतरङ्गिणी ( १२ )

## ष

षट्स्थानकम् ( १३ )
षडशीतिनामा चतुर्थ: प्राचीनकर्मग्रन्थ: ( १३ )
षड्दर्शनपरिक्रम: ( १६ )
षड्दर्शनसमुच्चय:-१ ( २ )
षड्दर्शनसमुच्चय:-२ ( १६ )
षड्द्रव्यसङ्ग्रह: ( १३ )
षड्विधाऽन्तिमाऽऽराधना ( १४ )
षष्ठिशतकम् ( ६ )
षोडशकप्रकरणम् ( ३ )

## स

संग्रहशतकम् ( ६ )
संज्ञाकुलकम् ( ७ )
संज्ञाधिकार: ( १८ )
संबोधप्रकरणम् ( २ )
संविज्ञसाधुयोग्यनियमकुलकम् ( ७ )
संवेगकुलयं ( ७ )

संवेगद्रुमकन्दली ( ९ )
संवेगमंजरीकुलयं ( ७ )
संवेगरंगमाला ( १४ )
संवेगामृतम् ( १८ )
सङ्घस्वरूपकुलकम् ( ७ )
सज्जनचित्तवल्लभः ( ९ )
सन्देहदोलावली ( १६ )
सभापञ्चकप्रकरणम् ( १८ )
सप्ततिकाभाष्यम् ( १३ )
समताशतक ( ६ )
समवसरणप्रकरणम् ( १३ )
समवसरणस्तोत्रम् ( १३ )
समाधिशतक ( ६ )
समाधिशतकम् ( ६ )
समाधिसाम्यद्वात्रिंशिका ( ४ )
सम्मतिसूत्रम् ( १६ )
सम्मत्तकुलयं-१ ( ७ )
सम्मत्तुप्पायविही कुलकम् ( ७ )
सम्यक्त्वकुलकम्-२ ( ७ )
सम्यक्त्वकुलकम्-३ ( ७ )
सम्यक्त्वपरीक्षा ( १६ )
सम्यक्त्वसप्तति: ( १० )
सम्यक्त्वस्वरूपकुलकम् ( ७ )
सर्वज्ञशतकम् ( ६ )
सर्वज्ञसिद्धिः ( २ )
सर्वतीर्थमहर्षिकुलकम् ( ७ )
सर्वश्रीजिनसाधारणस्तवनम् ( २ )
सार्धमिकवात्सल्यकुलकम् ( ७ )
सामाचारी ( ४ )
सामान्यगुणोपदेशकुलकम् ( ७ )
साम्यशतकम् ( ६ )
सारावलीपइण्णयं ( १५ )
सिद्धदण्डिकास्तवः ( १३ )
सिद्धपञ्चाशिका ( १३ )
सिद्धप्राभृतम् ( १३ )
सिद्धसहस्रनामकोशः ( ५ )
सिद्धान्तसारोद्धारः ( १८ )
सुक्ष्मार्थविचारसारोद्धारः ( १५ )
सुभाषिताष्टकानि ( १२ )
सुमिणसित्तरी ( ८ )
सूक्तरत्नावली-१ ( १२ )
सूक्तरत्नावली-२ ( १२ )
सूक्तिमुक्तावली ( १२ )
सूक्ष्मार्थसप्तति प्रकरणम् ( १८ )
सूत्रकृताङ्गाद्यचतुरध्ययनाऽनुक्रमगाथाः (१५)
स्तवपरिज्ञा ( १० )
स्त्रीनिर्वाणप्रकरणम् ( १६ )
स्त्रीवास्तविकताप्रकरणम् ( ८ )
स्याद्वादकलिका ( १६ )
स्याद्वादभाषा ( १६ )
स्याद्वादमुक्तावली ( १६ )

ह

हिंसाफलाष्टकम् ( ३ )
हिओवएसमाला ( ८ )
हिङ्गुलप्रकरणम् ( १२ )
हृदयप्रदीपषट्त्रिंशिका ( ९ )

# ॥ शास्त्रसंदेशमाला ॥


१ पू. आ. श्रीहरिभद्रसूरीश्वराणां कृतयः - १
२ पू. आ. श्रीहरिभद्रसूरीश्वराणां कृतयः - २
३ पू. आ. श्रीहरिभद्रसूरीश्वराणां कृतयः - ३
४ पू. उपा. श्रीयशोविजयगणिवराणां कृतयः - १
५ पू. उपा. श्रीयशोविजयगणिवराणां कृतयः - २
६ शतकसंदोहः
७ कुलयसंग्गहो
८ भावणासत्थणिअरो
९ भावनाशास्त्रनिकरः
१० आयारसत्थणिअरो
११ आचारशास्त्रनिकरः
१२ काव्योपदेश-ज्ञातोपदेशग्रन्थनिकरौ
१३ प्रारम्भिकाणि कार्मग्रन्थिकाणि लोकप्रकाशीयानि च प्रकरणानि
१४ अन्तिमाराधनाग्रन्थाः
१५ आगमिकानि प्रकरणानि तथा प्रकीर्णकानि
१६ दार्शनिक-चर्चा ग्रन्थनिकरौः
१७ विविधविषयसंकलनाग्रन्थाः
१८ ध्यानयोग-गणित-व्याकरणशास्त्रनिकराः
१९ वैराग्य कल्पलता - १
२० वैराग्य कल्पलता - २